A.C. Joshi Library
P.U. Chandigarh

MSS No. 167 (a) Subject Philosophy

Name of MSS सिद्धान्त लेष संग्रह

Author – –

Period – – Folios 67

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 16 (Different Pages)

A.C. Joshi Library
P.U. Chandigarh

MSS No. 167 (b) Subject Philosophy

Name of MSS सिद्धान्त लेष संग्रह

Author – –

Period – – Folios 111

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 001–005 (Different Pages)

[illegible]
[illegible]
[illegible]
[illegible] No 13

(13)

[illegible]

ॐनमोविघ्ननाशनाय ॐनमोभगवतेपरमात्मने ॐवेदवेद्यमुमाकान्तंकुमाराभ्यामलंकृतं नन्दीशप्रमुखैःसेव्यं
प्रणमामीष्टसिद्धये १ शंकरंशंकराचार्यंव्यासंनारायणात्मकं सरस्वतींचब्रह्माणंप्रणमामिपुनःपुनः २ गोवि
न्देतिसमाकृष्यरक्षांप्रापभयातुरः यंगजःकरुणामूर्त्तिंतंगोविन्दंभजेन्वहम् ३ आपन्नायंसमाश्रित्यरक्षां
प्रापसुदुर्लभां कृष्णाकृष्णस्यमहिषीनित्यांतांसंश्रयेन्वहम् ४ प्रकाशितब्रह्मतत्त्वप्रकृष्टगुणशालिनं प्र
णवस्योपदेष्टारंप्रणमाम्यनिशंगुरुम् ५ योमेविश्वेश्वरोदेवोविश्वेश्वरसमोगुरुः समध्यास्तेस्वयंज्योतिर्वाणीसं तिन
ज्ञोभजामितं ६ यस्यशिष्यप्रशिष्याद्यैर्व्याप्तेयंसांप्रतमही सर्वज्ञस्यगुरोस्तस्यचरणौसंश्रयेसदा ७ गु
रोरपिगरीयान्मेयःकलाभिरलंकृतः अद्वैतानन्दवाणाख्यस्तंवन्देशर्मवारिधिं ८ ओतप्रोतमिदंसर्वं
यस्मिन्साक्षिणिसुखात्मके पर्यवस्यन्तिवेदान्तायत्रचाहंनदद्वरे ९ श्रीहरस्यचरणद्वंद्वंप्रणिपत्यनिबन्धनं
व्याकुर्वेशास्त्रसिद्धांतलेशसंग्रहसंज्ञितं १० आचार्यचरणद्वंद्वस्मृतिर्लाघवकरूपिणं मांकृत्वाकुरुतेव्या
ख्यानाहमत्रयतःप्रभुः ११ कुमाराभ्यांविघ्नेश्वरषण्मुखाभ्यां शंकरंशंकरस्यशिवस्यावताररूपंशंकरा
चार्यंभगवत्पादं तथाचशिवपुराणवचनं व्याकुर्वन्व्याससूत्रार्थंश्रुतेरर्थंयथोचिवान् श्रुतेर्न्याय्यस्सए
विस्तारकर्त्ता वार्थःशंकरःसवितानन इत्यादि व्याससूत्रकृतंबादरायणं नारायणात्मकं नारायणस्यावताररूपं

नान्तन;

निरूपितो तथा चार्थाद्वाक्यार्थरूपाभेदोऽपि निरूपितो भवति वाक्यार्थस्य तत्त्वंपदलक्ष्यार्थानतिरेकात् तथा च जीवात्मब्रह्मणोर्निर्विशेषत्वसिद्धौ वे
दान्तसमन्वयः सम्यङ्मायात्मार्थस्तात्पर्यतः पर्यवसितोऽद्वैते निरूपितो भवति इदानीं द्वितीयाध्यायार्थरूपं वेदान्तसमन्वयस्य मानान्तराविरोधं निरू
पयितुं परिच्छेदान्तरमारभते मूलकृत् यदिति समन्वयस्तात्पर्यं प्रमत्वेति असौ पेक्षा द्वितीयः प्रपंचस्य प्रमत्वसिद्धस्य बाधः द्वितीयत्वेन तस्य बाधितम्
तथा चाबाधितार्थैकवाक्यत्वं स्यात् तत्समर्थमत्र मा प्रसंगादिति भावः प्रपंचस्य रज्जुसर्पादिवद्ब्रह्मणि कल्पितत्वात् बाधस्तत्त्वमहिमा द्वितीयत्वमबाधितमिति
समाधत्ते नेति श्रुतियुक्तिभिरिति पक्षः श्रुतिशुक्त्योर्विवर्तलक्षणवस्तोः साक्षिदर्शितात् इतिना अप्रदर्शिते प्रमत्वविरोधे श्रुतिशुक्तीनामेव
बाधो मा भूत् इति मन्यमानः शङ्कते परमिति नन्विति घटः सन्निमात्रादिना घटादिसत्त्वग्राहि प्रत्यक्षेण स्वरूपं प्रपंचस्य मिथ्यात्वप्रसाधकश्रुतियुक्तीनां वि
रोधः सत्त्वादित्यर्थः श्रुत्यादिभिर्गम्यमिथ्यात्वविरुद्धं सत्त्वप्रमत्वग्राह्यमेव न भवति अतस्तद्विरोधः केवलं निरालम्बने तिपंचभिर्मतेः प्रतिपादय

प्रमत्वादिविरोधादिति चेन्नारम्भणाधिकरणे दाह तत् श्रुतियुक्तिभिः प्रमत्वाधिगम्यस्य प्रपंचस्य ब्रह्मविवर्तरूपतया मिथ्यात्वावग
मात् ननु श्रुतिभिः प्रपंचस्य मिथ्यात्वे प्रमाप्यपि तु न शक्यते घटः सन्निमात्रादि घटादिसत्त्वग्राहि प्रमत्वादिविरोधात् शङ्काकृत् तत्र शुद्धि
कारादयः न प्रमत्वेऽत्र घटादिसत्त्वावगाहित्वाति किन्त्वधिष्ठानत्वेन घटाद्यनुगतं सन्मात्रं तथा च प्रत्यक्षमपि सद्रूपब्रह्मैवेत्यर्थः किंच
तद्ग्रहणमेव तथा सति तत्सदिद्वैव प्रमत्वं स्यात् तद्घटः सन्निमात्रादि प्रमत्वामिन्द्रियान्वयव्यतिरेकानुविधायीति चेन्न यथाभ्रमेऽपि दम्भशास्त्रा
धि[illegible]नस्य प्रमत्वेन ग्रहणमिन्द्रियान्वयव्यतिरेकयोस्तत्रैवोपपत्तयः रजतादावारोपितस्य भ्रमे प्रतिभासस्तथा सर्वत्र सन्मात्रस्य प्र
ति श्रुत्याद्युक्तिमादिना प्रमत्वं घटादिना रत्नानि घटादेः सत्त्वं ज्ञानरत्नानि चेत्तर्हि निर्विषयं तत्प्रसज्येतेति शङ्कते किंचेति उत्तरं अधिष्ठानत्वेने
ति सन्मात्रमिति सद्रूपब्रह्मैव प्रमत्वस्य भ्रमे विषय इत्यर्थः एवं स्थिते न केवलं प्रमत्वाविरोधाभावः किंतु लाभोऽप्यस्तीत्याह तथा चेति घटादेरिन्द्रिय
कत्वं वादी शङ्कते तथा सतीति तस्य सन्मात्रविषयकत्वे सतीत्यर्थः इन्द्रियेति न च सन्मात्रप्रमत्वे प्रत्यक्षे इन्द्रियान्वयव्यतिरेकानुविधानोपपत्तेः प्रमत्वस्य
घटादिविषयकत्वाभावेन तदनुविधानं न स्यादित्येतादृशभावे केवलविशेषणं न युक्तमिति वाच्यं स्वप्रकाशस्य सन्मात्रस्य प्रकाशनायेन्द्रियापेक्षा
नुपपत्तेरिति भावः श्रुत्यादेस्तु किं सिद्धान्तैकदेशी किं वा भेदवादी आद्ये तन्मते दृष्टान्तेन सन्मात्रस्य प्रमत्वप्रमेयत्वमाह यद्येति नैवेति अ
धिष्ठानग्रहणमेवेत्यर्थः आत्मेति सादिरूपेणेत्यर्थः सन्मात्रस्येति तस्य स्वप्रकाशत्वेऽप्यावृतत्वात् आवरणनिवर्तकत्वेन तत्रेन्द्रियापेक्षे

सि॰ ले॰
प्र॰ टी॰
१

तिभावः घटादीति घटादेर्मलभेदरूपस्य च वस्तुनः प्रतिभासो भ्रान्त्यापेन्द्रियकत्वमभिमतः सन्मात्ररूपसाक्षिचैतन्यमूलकत्वेनाभ्युपगमादित्यर्थः
एतेन मतान्तरादिष्वेव प्रमाणत्वं स्यादित्याक्षेपमाभेदवाद्यपि निरस्तः सिद्धान्ते वाच्यघटादीनां सत्त्वेन च प्रत्यक्षस्य प्रामाण्यानङ्गीकारेऽपि घटादिभेदः प्रत्यक्षेण ज्ञानेसा
दिरूपेणाङ्गीकारात् भेदवादीशङ्कते नन्विति श्रुतिरजनादेर्बाधदर्शनात्युक्तं तस्य भ्रान्त्या प्रतिभासाङ्गीकरणं तथा च घटादिद्वैतस्य बाधाद
र्शनात्तस्य भ्रान्तिमात्रसिद्धत्वमनुपपन्नमित्यर्थः किं श्रोतबाधादर्शनमपेक्षितं किं वा प्रत्यक्षबाधादर्शनं यौक्तिकबाधादर्शनं वा आद्यमसिद्ध
द्वयमात्रस्य ब्रह्मणि नेह नानास्तीत्यादिश्रुत्या बाधदर्शनादित्याशयेनाह नेति द्वितीयमङ्गीकरोति बाधादर्शनेऽपीति तृतीयमसिद्ध्या हृष्य
ति देशकालेति घटादीति घटादेर्धर्मिकभेदरूपस्य च वस्तुन इत्यर्थः प्रत्यक्षायोग्यत्वमेव दर्शयितुं प्रथमं सम्मतमर्थं दर्शयति निर्दिश इन्द्रियेति

सद्देण ग्रहणं नैवेन्द्रियव्यापारः घटादिभेदवस्तुप्रतिभासो भ्रान्तेत्यभ्युपगमात् ननु न क्वचिद्बाधादर्शनात्तथाभ्युपगमपवाने
मूलइति चेन्न बाधादर्शनेऽपि देशकालव्यवहितवस्तुवद्घटादिभेदवस्तुनः प्रत्यक्षायोग्यत्वस्यैव तत्र मूलत्वात् तथाहि इन्द्रियव्या
पारानन्तरं प्रतीयमानो घटादिः सर्वतोभिन्न एव प्रतीयते न तदानन्तरं घटादिभेदसंशयविपर्ययादर्शनात् यत्रापि स्थाणुर्वा पुरुषो वादि
संशयस्तत्रापि तद्व्यतिरिक्तेभ्यो भेदोऽसंदिग्ध्या विपर्ययस्तत्त्वान्यकारान्तएव भेदस्य च प्रतियोगिसहोपलम्भनियमवत्तोन प्रत्यक्षेण ग्रह
णं संभवति देशकालव्यवधानेनासन्निकृष्टानामपि प्रतियोगिनां संभवात् भेदज्ञाने प्रतियोगंशे संस्कारापेक्षणात् स्मृतिरूपमस्त्व

न्वेति पदद्वयाख्या घटादिभेद इति घटादिधर्मिकभेद इत्यर्थः सर्वतो भिन्न एव प्रतीयत इत्ययुक्तं इन्द्रियसन्निकृष्टस्यापि एकदेशेन विजातीयादिप्रतियो
गिकभेदस्याप्रतीतेः प्रतीतौ वा संशयाभावापत्तेरत आह यत्रापीति ततः किं तत्राह भेदस्य चेति प्रतियोगिसहोपलम्भनियमवत इति सर्वं व
धिकपदार्थप्रत्यक्षे यावत्सु विधिविषयकत्वं यावत्सु वधिप्रत्यक्षजन्यतायाः स्वीकृत योग्यादिप्रत्यक्षेऽहन्तत्वात् भेदप्रत्यक्षेऽपि यावत्सु प्रतियोगिवि
षयकत्वं यावत्सु प्रतियोगिप्रत्यक्षजन्यत्वं च वाच्यं भेदप्रत्यक्षस्यापि सर्वविधिकपदार्थप्रत्यक्षत्वात्तथा च यावन्तः प्रतियोगिनस्तावतां प्रतियोगिनां
प्रत्यक्षासंभवेन ह्रस्तसामग्र्यभावान्न भेदः प्रत्यक्षप्रमायोग्य इति तस्य भ्रान्तिमात्रसिद्धत्वं युक्तं सिद्धान्ते तु भेदप्रत्यक्षस्य तत्प्रतियोगिसापेक्षत्वादिरूपत्वान्न
कारणापेक्षेति भावः सहोपलम्भनियममात्रस्य भेदसत्त्वमतेऽकथंचिदुपपत्त्या शङ्कते भेदज्ञानमिति संस्कारापेक्षणादिति तज्जन्यसंभवादित्यर्थः
र्थः भेदज्ञाने हि प्रतियोगिनो प्रतियोगितावच्छेदकरूपेणावभानं परेरुपेयते तेन रूपेण सकलप्रतियोगिगोचरस्वानुभवासंभवेन संस्का १

गाभावादसन्निकृष्टस्य प्रतियोग्यंशे स्फुटतिरूपत्वमपि न संभवति तदभ्युपगम्याप्याह स्थितानीति न तथापीति कनचलादिपदार्थानां सन्निकृष्टस्फुटप्रति
ष्वभेदप्रतियोगित्वेन सर्वमननुभूतत्वादिति भावः वैशिष्ट्यांशे सर्वानुभवं शाकृते कनकाचल इति एवमितरपदार्थेष्वपि अनुमानं द्रष्टव्यमिति
भावः आत्माश्रयापत्तेरिति भेदज्ञानस्य भेदज्ञानाधीनत्वेन न किंचिद्भेदज्ञानं सिध्येदिति भावः अप्रवृत्तेति तथा च पदार्थभेदज्ञानस्यानुमितिप्र
तिबंधकत्वाभावादिन्द्रियाद्यैकपदार्थभेदज्ञानमावश्यकमिति भावः तर्हीति प्रतियोगिवैशिष्ट्याद्यज्ञानस्य स्फुटतिरूपत्वासंभवे सतीत्यर्थः नेद
केति नामदप्रतियोगिपदं नियमेन प्रतियोगिज्ञानविषयस्येत्यर्थः वित्तिपदं प्रमत्वपरं भेदपदजन्यभेदज्ञानस्य प्रतियोगिविषयत्वादर्शनादिति
बोध्यं भ्रमैकविषयत्वादिति अधिष्ठानस्यापि भ्रमविषयत्वात्कल्पितत्वप्रसंगवारणाय एकपदमधिष्ठानस्य च सम्यग्दर्शनेऽपि विषयत्वात्त्रो
मैकविषयत्वमसिद्धं तथा च प्रपंचस्य सद्वस्त्वेव प्रमाणसत्कुमप्युकूलमित्यर्थः असत्त्वा घटादेश्चात्तत्त्वाद्यनुभवानुरोधेन च घटादिगम्यत्वे न
प्रत्यभिज्ञानमिव तत्तापाशुतिचेत् न तथापि भेदगतप्रतियोगिवैशिष्ट्यांशे तदभावात् न च कनकाचलो भेदप्रतियोगिवस्तुत्वादिति भेदप्रति
योगिवैशिष्ट्यगोचरानुमित्यात्तत्संस्कारसंभवः भेदज्ञानं विनानुमितिसंभावेनात्माश्रयत्वापत्तेः पक्षसाध्यहेतुपदज्ञानाद्यभेदभ्रमस्तत्रसिद्ध
साधनादिनानुमानाप्रवृत्त्यातदभेदज्ञानस्य विघटनीयस्य तद्भेदज्ञानस्यापेक्षितत्वात् अस्तु तर्हि भेदपाद्यवप्रतियोगिवैशिष्ट्यांशोऽपि प्रत्
क्षत्वमिति चेन्न प्रतियोगिनोऽप्रत्यक्षत्वेन तद्वैशिष्ट्यस्याप्रत्यक्षत्वायोगात् सर्वविषयप्रसत्त्वं विना सर्वप्रत्यक्षासंभवात् तस्मात्प्रत्यक्षायोग्यस्य प्र
तियोगिनो भ्रांतिरूपएव प्रतिभास इति तदेकवित्तिवेद्यत्वनियतस्य भेदस्य भेदैकवित्तिवेद्यत्वनियतघटादेश्च भ्रमैकविषयत्वात् प्रपंचस्येति
पाधिप्रपंचमिथ्यात्वसाधकश्रुतियुक्तीनां न प्रत्यक्षविरोधः प्रत्यक्षस्यापि घटादौ दृश्यत्वग्राहित्वाभावादिमारुमायस्तथाकृतत्वादिति स
न च घट इत्यादिर्घटादेर्घटादेः सत्वप्रतिभासोऽधिष्ठानसत्तासंबंधिविषयक एव अतो न विरोध इत्यर्थः घटादौ प्रतीयमानसत्त्वस्याधिष्ठानगतत्वसी
कारेति प्रसंगपांकृते एवामिति नीलो घट इत्यादिर्घटादौ नैल्यप्रतिभासोऽप्यधिष्ठाने नैल्यसंबंधगोचरः किं न स्यादित्यर्थः तथा च ब्रह्मरूपत्व
स्यादिति भावः नत्वादेः सत्तावैषम्येणापरिहरति नेति श्रुतेरिति सदेवेत्यादिश्रुतेरित्यर्थः सर्वसंमतमिति सर्वैर्वेदसौकर्तत्वमित्यर्थः ननु यथा
श्रुतेर्वैशेषिकादिभिरंगीकारात् अविरोधादिति रज्ज्वादेः सर्पाद्युपादानत्ववत्कूटस्थब्रह्मणोऽप्युपादानत्वाविरोधादित्यर्थः तदन्विति तत्पद
मधिष्ठानसत्तापरं तत्सेति जगदधिष्ठानभूतब्रह्मण इत्यर्थः घटादावेवेति ननु ब्रह्मणि तत्कल्पितत्वेन माकं स्फुरति विरोधादिति भावः प्रत्यक्षस्ये

सि॰ले॰ घटादौ दृष्टत्वात्तन्नायाग्राहित्वेपि तस्य प्रमाणाभासत्वात्तेन तेनैकान्तेर्बाधशंकावकाश इत्याह संक्षेपशारीरकाचार्यास्त्विति पराग्विषयस्येति जडमात्रवि
वि॰टी॰ षयकस्येत्यर्थः नत्वेति अनधिगतत्वे सत्यबाधितत्वं तत्त्वावेदकत्वं बोधकं प्रमाणलक्षणमिति वृद्धवादिसम्मतं तच्च प्रसक्तस्य नास्तीति प्रमाणाभा
२ सत्वरूपं प्रसक्तमिति भावः घटादेरिति तस्याबाधितत्वे सत्यपि अज्ञाततत्त्वं नास्तीत्यभिप्रायः अन्यथा तदभावादपि प्रसक्तस्य प्रमाणाभासत्वप्रतिपा
दनसंभवे अज्ञाततत्त्वाभावमात्रप्रतिपादनायोगात् अतो बाधितत्वासंभवमुपेत्य तस्याभासत्वप्रतिपादनमिह विवक्षितमिति बोध्यं कृत्स्नकार्यफ
लमिति यावत् स्वप्रकाशात्मन एव प्रमेयत्वे श्रुतिमपि प्रमाणयति अत एवेति अज्ञातत्वादेवेत्यर्थः नतु द्रष्टव्य इति श्रुतिरात्मदर्शनं विधत्ते नेत्या

विशेषसन्मात्रग्राहकेण सिद्धवत्कृतमिति न्यायसुधाकृतस्त्वाहुः घटादेरैन्द्रियकत्वेपि सन् घट इत्यादिरधिष्ठानसत्तानुवेध इति तन्न वि
रोधः एवं नीलो घट इत्यादिरप्यधिष्ठाननैल्याद्यनुवेधः किं न स्यादिति चेन्न श्रुत्या सद्रूपस्य वस्तुनो जगदुपादानत्वमुक्तमवि
रोधात्सर्वसंमतमिति तदनुवेधेनैव सन् घट इत्यादिप्रतिभासोपपत्तौ घटादावपि सत्ताकल्पने गौरवं तस्य रूपादिहीनत्वान्नैल्या
दिकं घटादावेव कल्पनीयमिति वैषम्यादिति संक्षेपशारीरकाचार्यास्त्वाहुः प्रसक्तस्य घटादिसत्त्वग्राहित्वेपि पराग्विषयस्य प्रसक्ता
ले॰ देसत्त्वावेदकैलक्षणप्रामाण्याभावान्न तद्विरोधेनाद्वैतश्रुत्यादिबाधशंका अज्ञातबोधकं हि प्रमाणं न च प्रसक्तादिविषयस्य घटादे
रज्ञातत्वमस्ति जडे आवरणकृत्याभावेनाज्ञानविषयत्वानुपगमात् स्वयंप्रकाशतया प्रसक्तप्रकाशांशे ब्रह्मैवाज्ञानविषय इति तद्बोधक
मेव तत्त्वावेदकं प्रमाणं तदेव प्रमितिविषयः अत एव श्रुतिरप्यावो रे द्रष्टव्य इत्यात्मन एव प्रमेयत्वमिति नियच्छति नहि द्रष्टव्य इत्य
नेन दर्शनं विधीयते प्रमाणपरतंत्रस्य विध्यगोचरत्वात् किंत्वात्मा दर्शनार्हः स्वज्ञातत्वादात्मन एव प्रमेयत्वमुचितं नान्यस्येति निय
म्य इति केचित्तु घटादिसत्त्वग्राहिणः प्रसक्तस्य प्रमाणत्वे ब्रह्मप्रमाणत्वं न्यूनतावशमेपि तद्ग्राह्यसत्वमनुगतप्रत्ययात्सत्ताजातिरूपं वा इह

हनहीति अगोचरत्वादिति पुरुषयत्नसाध्यक्रियाया एव विधियोग्यत्वादिति भावः विधिप्रत्ययस्यार्थमाह किंत्विति अर्हार्थे सत्यप्रत्यय इत्या २
ह आत्मेति प्रसक्ताविषये जडस्याज्ञातत्वमुपेत्य जडबोधकप्रसक्तस्य श्रुतितुल्यप्रमाणत्वस्वीकारेपि प्रसक्तया स्वघटादिसत्त्वस्य मिथ्यात्वावि
रुद्धत्वान्न मिथ्यात्वबोधकश्रुतीनां प्रसक्ताविरोधशंकेत्याह केचित्त्विति प्रसक्तग्राह्यसत्वं सत्ताजातिरूपं वा नत्तद्देशकालसंबंधरूपं वाद्य

टादिस्वरूपं वा पर्यवस्यतीति संबंधः ज्ञप्तिरूपत्वे मानमाह अनुगतेति सन्घटः सन्पट इत्यादिरूपेणेत्यर्थः द्वितीये मानमाह इहेति इ-
हेदानीं घट इति प्रतीतिर्घटे प्रतीयमानदेशकालसंबंधमेव सत्तारूपतया विषयीकरोतीति भावः तृतीये मानमाह नास्ति घट इती-
ति घटो नास्तीति घटास्तितानिषेधत्वेन रूपेण घटस्वरूपनिषेधस्यैवानुभवात् घटोऽस्तीत्यत्र घटस्वरूपपर्यवसानमित्यर्थः ततः किं त-
चाह न चेति नहीति न केवलक्षणप्रपंचरूपस्यागमिकारादिति भावः घटादेः स्वरूपं वा नाभ्युपगम्यत इति नहीति संबंधः तथा च न
स्य देशकालसंबन्धो नाभ्युपगम्यत इति नहीति संबंधः न ब्रह्मज्ञानादिकं वा नाभ्युपगम्यत इति नहीति संबंधः एतत्सर्वं जगन्मिथ्यात्ववा-
दिनाभ्युपगम्यत एव विरोधाभावादिति भावः नहि कीदृशं सत्त्वं मिथ्यात्वविरोधि यत्त्वया नाभ्युपेयते जगतीति पृच्छति किं त्विति उत्तरम्

दानीं घटोऽस्तीति देशकालसंबंधप्रतीतेस्तत्र देशकालसंबंधरूपं वा नास्ति घट इति स्वरूपनिषेधप्रतीतेर्घटादेः स्वरूपं वा पर्यवस्य-
ति न त्वमिथ्यात्वेन न विरुध्यते नहि मिथ्यात्ववादिनापि घटादेः स्वरूपं वा नस्य देशकालसंबंधो वा न ब्रह्मज्ञानादिकं वा नाभ्युपगम्य-
ते किं तु तेषामबाध्यत्वं न चाबाध्यत्वमेव सत्त्वं प्रमत्वग्राह्यमस्तीति वाच्यं कालत्रयेऽपि नास्त्यबाध्य इति वर्तमानमात्रग्राहिणा प्र-
त्यक्षेण ग्रहीतुमशक्यत्वादित्याह अबाध्यत्वरूपसत्त्वस्य प्रमत्वग्राह्यत्वेऽपि प्राणा वै सत्यं तेषामेष सत्यमिति श्रुत्या प्रयाणेऽस्म-
त प्राणग्रहणोपलक्षितस्य कृत्स्नस्य प्रपंचस्य ब्रह्मण स्वसत्त्वोत्कर्षापकर्षप्रतीतेः समत्वे चाबाध्यत्वरूपे सर्वं द्वेवाबाध्यत्वं
किंचित्कालमबाध्यत्वमिति सम्भवविधोत्कर्षापकर्षविना राज राज्ञो मन्त्रिणममात्य इत्यादिवृत्तान्तयोगेचरनियंतृत्वसौंदर्यादीनामि
तेषामिति घटादीनामित्यर्थः किंतु तेषामबाध्यत्वं नाभ्युपगम्यत इति संबंधः मिथ्यात्वस्य बाध्यरूपतात्तद्विरुद्धं सत्त्वमबाध्यरूपमेवं चेत्तर्हि
इदमेव सत्त्वं प्रमत्वविषयोऽस्तु तथा च प्रमत्वाविरोधः यं कास्यादेवेत्याशयवती शंकामुत्थाप्य निराचष्टे न चेत्यादिना अस्येति जगत इत्यर्थः
अबाध्यत्वरूपमेव सत्त्वं प्रमत्वविषय इत्युपेत्यापि प्रमत्वविरोधाभावमाह अस्त्वेवेति अबाध्यत्वरूपसत्त्वस्य प्रमत्वग्राह्यत्वेऽपि नामि-
थ्यात्वक्षतिर्विरोध इति संबंधः कालत्रयाबाध्यत्वरूपसत्त्वं मिथ्यात्वविरोधि तच्च ब्रह्मण एव प्रपंचस्य तु यावज्ज्ञानमबाध्यत्वरूपसत्त्व-
मेतच्च न मिथ्यात्वविरोधीति न प्रमत्वविरोध इति वक्तुं प्रपंचब्रह्मणोः सत्त्ववैलक्षण्ये प्रमाणमाह प्राणा इति प्राणग्रहणं कृत्स्नप्रपंचो-

सि॰ ले॰
द्वि॰ टी॰
३

पलक्षणमर्थं एवंपरमात्मा तेषां समन्वितानपेक्ष्यसमस्तमर्थः तथा च श्रुतौ प्रपंचसत्वं तं निकृष्य ब्रह्मणः समत्वमुत्कृष्टमितिमुक्तं भवति तत्र प्राणपदेन प्रपं-
चो पलक्षणेनियामकमाह प्रधानमभूतेति सूत्रात्मकरूपस्य प्राणस्य जगद्धिधारकत्वात्प्राधान्यम्भू रूपं न चोपलक्षणे मानाभावः शंकनीयः ब्रह्म
स्वरूपप्रतिपादनमेवास्यैव प्रपंचैकदेशाभ्युपगमाणेन कृत्स्नेप्रयोजनाभावात् कृत्स्नोपलक्षणेन समत्वेन प्रसिद्धमपि चाधिष्ठानतयाब्रह्मैवपरमार्थ
सत्येनतु प्रपंचस्य सत्त्वस्य श्रुतिबाधितत्वेनपरमार्थसत्त्वाद्योगादिति ममिति रूपप्रयोजनसत्त्वाद्विति भावः ननु किं तत्राह समत्वे चेति राजेति राज
त्वपालकत्वरूपनियन्तृत्वं न तु पालयदेशसापेक्षं न यथा च विलुशर्मा राजराज इति प्रयोगे विलुशर्मणः इतरराजापेक्षया उत्कर्षः प्रतीयते इतरेषां च निकृ-
ष्टः तौ च पालनस्य भूयो देशविषयकत्वात् अल्पदेशविषयकत्वरूपेण मन्यस्तावत्नारायणपुत्रः सुंदर इति प्रसिद्धः श्रवणेषु तथाचातिसौंदर्यमिति

वभूयोविषयत्वाल्पविषयत्वादिरूपोत्कर्षापकर्षासंभवाद्वितीयान्तरेण न संभवेऽपि प्रपंचस्य ब्रह्मज्ञानबाध्यत्वरूपं तत्रैकार्थ्यांशिकोत्कृ-
र्षापकर्षयोः पर्यवसानात् ब्रह्मसत्त्वग्राहकत्वादिरूपसत्त्वं यावत् ब्रह्मज्ञानमबाध्यत्वरूपमिति नमिथ्यात्वश्रुतिविरोध इत्याशंकाः अपरेस्तप्रपं
सू॰ २ चस्य सत्त्वं मिथ्यात्वग्राहिणोः श्रुतिप्रत्यक्षयो विरोधे पि दोषशंकाकलंकितात्मयमप्रवृत्तात्मत्वात् निर्दोषत्वाद्यपच्छेदन्यायेन प्रत्यक्षा
द्दृष्ट्या निरवकाशश्रुति यसी प्राबल्यमागमस्यैकजातात्वे प्रविष्टस्य त्वमिति स्मरणाच्च न च वेदैकगम्यार्थविषयकमिदं स्मरणं नेत्रप्रमत्ताविरो-
धशंकाभावेन प्राकितप्रमत्तविरोधएव वेदार्थे वेदस्य प्राबल्यात्तस्योचितमात् तत्वं दृश्यते व्योमत्वदृष्टौ तो कष्टवाडवत्तलं न विद्यते व्योम
न वेद्यो नोऽज्ञानात्मानः तस्मात्स्वप्रमत्तदृष्टे पियुक्तमर्थपरीक्षितं तपरीक्षज्ञानापयज्ञार्थीन यथार्थत्वविहितीयते इतिनारदसूक्तौसादि प्रकरणे

तात्पर्येण मनन्यमस्य श्रीराम इति प्रयोगे दृश्यते तत्र सौंदर्येण नामोत्कृष्टरूपादिमत्त्वमतिसौंदर्यं ततोऽप्युत्कृष्टरूपादिमत्त्वमिति बोध्यं ब्रसंभवा-
द्विनियन्तृत्वसौंदर्यादि विलक्षणे बाधाभावरूपे सत्त्वे भूयोविषयत्वाल्पविषयत्वरूपोत्कर्षापकर्षयोर्ज्ञानविशेषरूपयोश्चासंभवादित्यर्थः ननु
बाधितत्वरूपेऽपि सत्त्वे प्रकारान्तरेणोत्कर्षापकर्षौ संभवतएव तथाहि प्रपंचब्रह्मणोः कालत्रयाबाध्यत्वरूपे सत्त्वे समे [illegible] नसत्त्वं श्रुतिग-
म्यत्वात् उत्कृष्टं इतरत्तु लौकिकप्रमाणगम्यत्वान्निकृष्टमिति श्रुत्यर्थोपपादनसंभवात् तथा च मिथ्यात्वविरुद्धसत्त्वग्राहिलौकिकप्रमाणविरो-
धशंकास्यादेवेति नेत्याह विधान्तरेणेति प्राणावेसत्यमिति श्रुतौ सत्यशब्दः प्रपंचस्य यदि कालत्रयाबाध्यरूपं समत्वं प्रतिपादयेत्तदा निखिल ३
प्रपंचस्य ब्रह्मज्ञानबाध्यत्वप्रतिपादकश्रुत्यन्तरेण सह प्राणावेसत्यमिति श्रुतेर्विरोधः स्यात् न चाविरोधेन श्रुतिद्वयप्रामाण्यसंभवे विरोधेन प्रामा-

लंघनमपि तस्माच्छुक्तिरजततोकर्षापकर्षयोः कालत्रयाबाध्यत्वादेव पर्यवसानं वाच्यं नान्यत्रेत्यर्थः एवमत्राकुरित्यादिना प्रपंचमिथ्यात्वसाधकश्रुतियुक्ती
नां प्रसक्तविरोधिनिर्भवतीतिश्रुतियादिनामिदानीं प्रसक्तस्य कालत्रयाबाध्यत्वरूपसत्यत्वग्राहित्वेन श्रुतिविरोधित्वेपि न मिथ्यात्वसिद्ध्यनुपपत्तिः श्रुत्या
प्रसक्तस्य बाधोपपत्तेरित्याह अपच्छेदन्यायेनेति श्रुतिरेव प्रसक्ताद्बलीयसीतिसंबंधः श्रुतेः प्राबल्ये हेतुद्वयमाह निर्दोषत्वादिति अपच्छेदन्यायो वक्ष्य
ते प्रसक्तस्यापि निर्दोषत्वादिकं तुल्यमिति शंकां वारयति दोषेति एतच्चाग्रे स्पष्टं भविष्यति श्रुतेः प्राबल्यमन्यत्रापि नियामकमित्याह प्राब
ल्यमिति ज्ञानस्याप्रामाण्यं तेनैव नैपुण्यकृते प्रसक्तानुमानागमेषु स्वतस्त्वे वैदिके श्रुप्रसिद्धमित्यर्थः ननु वैदिकागमे स्वर्गसाधनत्वादौ वेदस्य प्राबल्य
प्रतिपादकं तद्वचनं तु मिथ्यात्वं तन्तु वैदिकागमं तस्यानुमानादिनापि सिद्ध्युपगमात् न तत्र श्रुतेः प्राबल्येतद्वचनेन प्रमाणमिति मत्वा शंकते न
चेति निराकरोति तत्त्वेति वैदिकागमार्थ इत्यर्थः तथा च वचनस्य तद्विषयत्वे वैयर्थ्यं स्यादिति भावः वचनस्य मिथ्यात्वप्रतिपादकश्रुतिप्राबल्यप
रत्वेन सार्थकमित्याह शंकितेति शंकितः प्रसक्तेणसह विरोधो यस्य मिथ्यात्वरूपस्य वेदार्थस्य स तथा एतदुक्तं भवति यस्मिन्नर्थे वेदतदितरप्रमा
णयोर्विरोधः प्रसक्तस्तस्मिन्नर्थे द्वयोः प्रामाण्यायोगादन्यतरबाधे कर्तव्ये सति तत्र प्रबलेन दुर्बलस्य बाध इति वाच्ये तेन श्रुतेः प्राबल्यमिति भवस्यपेक्षा
तथा च वचनस्यापेक्षितार्थसमर्पकत्वात्सार्थक्यमिति ननु प्रसक्तस्य क्वचिदप्रामाण्यदृष्टेः सति प्रपंचसत्यत्वग्राहिप्रसक्तेपि मिथ्यात्वविरोधिकोस्त्या
तु संस्थानवत्त्वात्सामान्यतः प्रामाण्यरूपदोषशंका न तत्र शंकितदोषप्रसक्तं मिथ्यात्वश्रुत्यानि दोषत्वेन प्रबलाबाध्यत इति तत्कथं न तत्र संभवति क्वचिदपि
प्रसक्ताप्रामाण्यदर्शनादिति सत्ख्यातिवादिनः शंकां नारदवचनोदाहरणेन निराकरोति तलवदिति तलमिन्द्रनीलमणिमयकटाहाकारत्वं तस्मादिति
सर्वजनप्रसिद्धस्यापि व्योमादेस्तलादिप्रसक्तस्याप्रामाण्यदर्शनादित्यर्थः अर्थ इति प्रसक्तदृष्टेप्यर्थ इत्यर्थः ज्ञापयन्निति आचार्यः शिष्यान्प्रतिपास्या
णि बोधयन् धर्मात्क्षेयः साधनभूतात्तत्र प्रत्यक्षवत् इत्यर्थः प्रालन ः श्रुत्युक्तसाधनत्वमव्युपपन्नेन स्वबोधत्वे पिकर्तृत्वे नोदासीनत्वाभावादिति एवं प्र
त्येमाने अप्रकरोमीति प्रसक्तमात्रेण ताति करत्वं वास्तवमिति सहसा विश्वासो न कर्तव्यः लोके प्रसक्तदृष्टस्यापि बाधदर्शनादतः प्रसक्तदृष्टमपि
आत्मनि कर्तृत्वं किं चेतनमेव वास्तवं किंवा कल्पितमिति सम्यग्विचार्य श्रुतिन्यायाभ्यां कल्पितमेवतत्स्नानसादित्वस्यानुपपत्तिरिति शिष्यान्प्रतिबो
धयन्नाचार्यो धर्मात्प्रतिपादयत इत्येतद्विषयकं नारदवचनद्वयमिति सूचयति साक्षिप्रकरणे इति एवं प्रसक्तदृष्टमपि प्रपंचसत्त्वं किं तस्य वास्तवं किंवा
काल्पनिकमिति परीक्षायुक्तेन्यायेन नारदवचनसमभिव्याहृतसाधारणतात्पर्यं कथयति प्रसक्तदृष्टस्यापीति प्रमाणपदस्यागमपरमनुमानार्थोपत्त्या
दयश्चादिपदग्राह्याः प्रतिपादनाच्च प्रसक्तापेक्षया श्रुतिर्बलीयसीतिसंबंधः प्रसक्तस्य दोषशंकाकलंकितत्वं प्रदर्शयन्नस्यागमेन बाध्यं प्रकृतोपयोगि

सि॰ले॰
सि॰टी॰
४

तथा प्रतिपादयति नहीत्यादिना नभो नैल्यप्रत्यक्षं प्रमत्तादिनानहि शाक्यमपवदितुमिति संबंधः आगमं विनापि नीलं नभ इति प्रसक्तस्य बाधकमस्ती
ति शंकते नचेति समीपे गगने रूपानुपलंभे न समीपे रूपाभावनिश्चये सति दूरेपि तत्र रूपं नास्तीति निश्चीयते रूपस्याव्याप्यवृत्तित्वनियमेन
नैदेकदेशावृत्तित्वायोगादित्यर्थः कथं तर्हीति दूरे नीलं नभ इति धीस्तत्राह दूरे तद्धीरिति तद्धाय इति तस्य नभोनैल्यप्रत्यक्षस्य इति निश्चयेन वा
धीनचेत्यत्र हेतुमाह दूरे नैल्यदर्शनादिति तर्हि नावगच्छन् किमत्र रूपमावरणं तद्धि सदपि न दृश्यते दूरे तु वृक्षाद्यावरणरूपत्वेन दृश्यते तत्
सर्वत्र गगने विद्यमानमपि रूपं समीपे न दृश्यत इत्यर्थः दोषजन्य इति दोषाधीनस्थितिक इत्यर्थः यथाश्रुतेऽनुपलंभस्योपलंभप्रागभावरूप
स्य जन्यत्वाभावादसंगतं स्यात्सामीप्यदोषेण तदनुपलंभे निरूढेन प्रागभावस्य नाशाभावाद्दोषाधीनस्थितिकत्वमस्तीति नासंगतिरिति मंतव्य रूप

प्रमत्तत्वे तस्यापि प्रमत्ततमविप्रलप्स्यप्रमाणोपदेशादिभिः परीक्षणीयत्वप्रतिपादनाच्च नहि नभो नैल्यप्रत्यक्षं नभसः शब्दादिषु पंचस्वशब्दैक
गुणत्वप्रतिपादकागमोपदेशमन्तरेण प्रमत्तादिना शाक्यमपवदितुं न च नभसि समीपे नैल्यानुपलंभाद्दूरे तद्धीर्दूरत्वदोषजन्येति निश्चये
नाः नतद्बाधः दूरे नैल्यदर्शनात्समीपे तदनुपलंभस्तु हि नावगच्छन्नुपलंभवत्समीपत्वदोषजन्य इत्यपि संभवात् अनुभवबलान्नभोनैल्यमवा
प्यवृत्तीत्युपपत्तेश्च नापि दूरस्य स्वच्छे सोयं नभः सन्निहिते नभः प्रदेशे नैल्यधीस्तत्रैव समीपगस्य तस्यानैल्यवुद्धेरभावप्रसंगेन बाधः उपरिस्थि
तस्यैव नैल्यस्यात्रारोपवादेऽपि दूरत्वदोषाद्भूसन्निधानावभास इत्युपपत्तेः पृथिव्यादिषु संकीर्णतया प्रतीयमानानां गंधादीनामनुपलभ्यात्स्व
वेकत्वं केचिदपरनैपुणाः पृथिव्यामेव गंधं विद्यादपो वायुं च संश्रितमित्यादिभिरागमैरेव व्यवस्थाप्यावक्तव्यत्वेन प्रमत्तादागमप्राबल्यस्याति
विशंकत्वाच्च न च ज्ञानसिद्धं जलोपष्टंभादिगतगंधादि पृथिवीगुण एव न जलादिगुण इत्यादिरूपेणास्मदादिभिः प्रमत्तेन शक्यं विवेचयितुं

स्याव्याप्यवृत्तित्वनियममुपेत्य समीपे तदनुपलंभस्य गतिरुक्ता इदानीं व्याप्यवृत्तित्वनियमस्यासिद्धिमाह अनुभवबलादिति नभोनैल्यप्रसक्तस्य योक्तिकानि
श्रुयबाध्यत्वं निरस्य प्रमत्तबाध्यत्वमाशंक्य निराकरोति नापीति भः सन्निहितगगनभागेऽपि नैल्यं नास्त्येव तत्र तत्प्रतीतिस्तु दूरत्वदोषाद्भवतीत्या
ह उपरिस्थितस्येति तथा च गगने नैल्यप्रसक्तमागमैकबाध्यमिति स्थितं प्रमत्तस्यागमेन बाधेऽउदाहरणांतरमाह पृथिव्यादिष्विति अस्य बाधोच पृथि
व्यामिव गंधमुपलभ्य केचिदनैपुणास्तयोरपि गंधः स्वाभाविक इति तन्न तथा ग्राह्य किंतु अपो वायुं च संश्रितं गंधं तदंतरगतपृथिव्यामेव स्थितं विद्या ४
दितिवचनार्थ इत्यादिभिरिति आदिपदेन रसो जलमात्रगुणः पृथिव्यादिषु रसाद्युपलब्धिरपि पृथिव्याद्यंतर्गतजलाद्याश्रितरसादिविषयेति

अवस्याश्रुतिपादकपुराणवचनानि शास्त्राणि न तु जलेपि पृथ्व्यादिरूपपार्थिवांशसंसर्गे सति गंधोपलब्धिरस्ति नान्यथेत्यन्वयव्यतिरेकाभ्या
मेव गंधस्य पृथिवीमात्रगुणत्वसंभवात् किमागमेनेति चेत्तत्राह नहीति आगमानपेक्षायोजलोपलंभः पार्थिवद्रव्यविशेषस्तदादिगत इत्यर्थः
जलपवनगंधः क्वचित्स्वाभाविकः क्वचिद्दोपाधिक इति कल्पनोपपन्नैवेति भावः न तु जलादौ गंधादिमत्त्वमप्रामाण्यरूपदोषशंकाक
लंकितत्वादागमेन न सिध्यतीत्युक्तं प्रपंचसत्त्वग्राहिप्रमत्वं तु न चक्षुरादिमत्त्वमितिकथं तस्यागमेन बाध इत्याशयेन शंकते पृथिव्यादीनामि
ति तस्य तच्चक्षुरादिमत्त्वमसिद्धमिति तस्याप्यागमबाध्यत्वं युक्तमित्याह नहीति संसृष्टतयेति संसर्गस्तादात्म्यं भ्रमधर्मस्येति जगदुपादानत्वेन
कल्पितस्य सद्वस्तुनो धर्मः सत्ता तस्याप्यवप्रपंचे प्रतीतिः संभाव्यते अतः प्रपंचसत्त्वग्राहिप्रमत्वमप्रमसत्ताविषयकत्वेन भ्रांतिरूपं वा प्रपंच

पृथिव्यादीनां प्रायः परस्परसंसृष्टतयान्यगुणस्यान्यत्राप्यवभासः संभवतीति पांकिनदोषप्रसक्तत्वागमेन बाधितव्यत इति चेन्नहि इत्या
पि तत्र प्रपंचयोरुपादानोपादेयभावेन परस्परसंसृष्टतयान्यधर्मस्यान्यत्रावभासः संभवतीति पांकितदोषप्रसक्तमास्ति भातिप्रियं रूपं
नाम चेत्यंशपंचकं आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति वृद्धोक्तप्रकारेणागमेन व्यवस्थाप्यतामिति तस्य न चैवमुपजीव्यविरो
यः आगमप्रमाणेन वर्णपदवाक्यादिस्वरूपाण्यप्रमत्वमुपजीव्यप्रवृत्तेनोनुपजीव्यत्वसत्त्वाद्योपमर्दनादित्याह नन्वागमस्यप्रत्य
दाबलीयस्त्वे यजमानः प्रस्तर इत्यत्र प्रमत्वाविरोधाय यजमानप्रस्तरे गौणीवृत्तिर्न कल्पनीया तथाप्यसोमेन यजेतेत्यत्रैवैयधिक

रस्वाभाविकसत्ताविषयकत्वेन प्रमारूपं वेति शंकाकलंकितमित्यर्थः प्रमत्वाय प्रकारं वृद्धवचनेन दर्शयति अस्तीति अस्ति वटो भाति वटः प्रि
यो वट इति वटे सत्त्वं चेतन्यानंदास्तावदनुभूयंते प्रियशब्दस्यानंदे मुख्यत्वात् वटस्यानंदत्तादात्म्यप्रतीतिरुपपद्यते एवं घटादिष्वपि द्रष्टव्यं नाम च वटश
ब्दादिकं तु श्रोत्रादिवाच्यात्मकं वस्तु रूपमेषां पंचकमंशाः पंचयस्य जगतस्तत्पांचकमनुभूयते न च वृत्तेरपि जगति पंचात्मकत्वानुभवो नास्तीत्यत आह प्रिय
मित्यनुभवादर्शनादिति वाच्यं केषांचित्सरकीयेष्टवेतदनुभवस्यापि सत्वान्नयाच सर्वज्ञानुगतसच्चिदानंदरूपं वस्तु ब्रह्मैव ब्रह्मण एतद्रूपतायाः

ज१ श्रुतिप्रसिद्धत्वान्नामरूपात्मकद्वयस्य तस्य नामरूपतायाः सर्वाणि रूपाणि विचिंत्य धीर इत्यादिश्रुतिसिद्धत्वादिमनेन प्रकारेण प्रपंचसत्वया

सि.ले.
द्वि.टी.
५

त्मसमवेतं जगतः स्वाभाविकसत्ताविषयकं न भवति किंत्वधिष्ठानतया जगत्यनुगतब्रह्मसत्ताविषयकमेवेति व्यवस्थाप्यत इत्यर्थः एवं प्रत्य
क्षस्यागमापेक्षया स्वतः प्राबल्ये सिद्धेऽप्यनुपजीव्यत्वप्रयुक्तं निरस्यति नचैवमिति प्रत्यक्षस्यागमेन बाधांगीकार इत्यर्थः बलीयस्त्वादागमात्मकशा
ब्दप्रत्यक्षं तदाह निजनामिव्याख्याने वेति प्रत्यक्षस्य उपजीव्यं ग्राहकज्ञानं विनाशग्राह्यबोधानुदयात् तथा च श्रुत्या प्रत्यक्षमात्रं वाध्यते ग्राह्यप्रत्यक्षस्यापि बाधः प्रसज्ये
त इत्याशङ्क्योपजीव्यबाधः स्यादित्यर्थः श्रोत्रेन्द्रियेण ज्ञायमानं प्रत्यक्षं शब्दस्वरूपं तस्य सत्त्वं च विषयीकरोति श्रुत्या च सत्त्वापादकं प्रत्यक्षमेव बाध्यते न
त्वनेनोपजीव्यं कल्पितग्राह्यस्यापि बोधकत्वसंभवेन ग्राहकबोधापादितत्वस्य त्वस्यानपेक्षितत्वाच्च शब्दस्वरूपग्राहकप्रत्यक्षस्योपजीव्यत्वेऽपि बाध्यते वि
रोधाभावादतो नोपजीव्यविरोध इति परिहरति आगमप्रमाणेनेति आगममात्रस्य प्रत्यक्षात् प्राबल्यमुक्तमादिपदेन तु आगमस्येति गौणीति श्रु
तेर्निर्वर्तकत्वगुणः तथेति सिद्धान्ते इष्टसाधनत्वं विध्यर्थः ततश्च सोमयजिपदयोर्वैयधिकरण्येनान्वये क्रियमाणे याग इष्टसाधनं सोमेयागरूपे
ष्टसाधनमिति स्यात् क्रतुनस्य विधिमत्स्यस्य व्यापारभेदापत्त्या तद्धितस्य वाक्यस्यापि व्यापारभेदापत्तेः तत्परिहाराय तयोः सामानाधिकरण्येनान्वयो
व्यापारभेदेन वाक्यभेदापत्तेः सामानाधिकरण्येनान्वये वक्तव्ये प्रत्यक्षाविरोधाय सोमवतायागेनेति मत्वर्थलक्षणा न कल्पनीया उभयत्रापि प्र
त्यक्षाविरोधेन तदनादृत्यागमेन बलीयसा प्रस्तरे यजमानाभेदस्य यागे सोमाभेदस्य सिद्धिसंभवादिति चेत् अग्रोक्तं भामतीनिबंधेनासंभ
वतीत्याह तिः प्रत्यक्षबलवती नत्वाप्ततिमात्रं मन्त्रार्थवादानां स्तुतिपरत्वे तदर्थे वक्तव्य इति सिद्धान्ते सतीत्यर्थः प्रत्यक्षाविरोधायेति सामानाधिकरण्ये
यत्ते सोमयागयोरभेदोऽवक्तव्यः सोऽयमित्यादिस्थले सामानाधिकरण्ये पदद्वयस्य पदार्थद्वयाभेदार्थकत्वात् तस्य तावत्तत्र प्रत्यक्षविरुद्ध इति तत्परिहाराय
मत्वर्थः सोमवतेति सोमपदस्य मत्वर्थलक्षणेन तथा सोमवता यागेनेष्टं भावयेदिति मीमांसकरीत्या वाक्यार्थः सिद्धान्तरीत्या तु सोमवदभिन्नो याग इष्टसा
धनमिति वाक्यार्थो द्रष्टव्यः सोमस्य यागेन सह मत्वर्थसंबंधश्च वस्तुगत्या क्रियाकारकभावलक्षण इति ज्ञापनार्था सोमेनेति तृतीया भामतीति भामती
संज्ञकग्रंथे वाचस्पतिमिश्रैरुक्तमित्यर्थः नत्वाप्ततिमात्रमिति तथा च सोमेन यजेतेत्यत्र सोमयागसंबंधे श्रुतेस्तात्पर्याभावाच्छ्रुतिसापेक्षया प्रत्यक्षमेव बलवदि
ति तदविरोधाय लक्षणाकल्पनमुचितं तथा यजमानः प्रस्तर इत्याद्यर्थवादानामपि स्वार्थे तात्पर्याभावात् प्रत्यक्षप्राबल्यमिति तत्रापि तदविरोधाय गौणा
दिकल्पनं युक्तं प्रपंचमिथ्यात्वबोधकश्रुतीनां तु तात्पर्यसत्त्वात् प्रत्यक्षापेक्षया प्राबल्यमिति नातस्तद्बाधकत्वं तत्र शक्यमिति समाधानग्रंथस्यार्थः ननु मंत्रा
र्थवादानामपि स्वार्थे तात्पर्यं किं न स्यात् तत्राह मंत्रेति तेषां स्वार्थफलाभावाच्छ्रूयमाणत्वाच्च तात्पर्यं न कल्प्यत इति भावः देवस्य त्वेत्यादिभिर्मंत्रैर्यजमानः प्रस्तर
इत्याद्यर्थवादैश्च विधेययागस्तुतिर्लक्षणीया ततश्च मंत्रादिवाक्यार्थस्य द्रव्यदेवतादिरूपस्य लक्षणीययोः स्तुत्या सह संबन्धो वाच्यः इत्यर्थ मंत्रादीनां स्व

त्राप्य संबंधाभावेनास्तु तिलसकत्वानुपपत्तेरतत्त्वनैल तत्त्वालीयायां मन्त्रादिवाक्यार्थवारम्भत्वः यथा गंगावदेनतीरे लत्त्वलीयेमवाक्यः अन्नेनोपि ननत्वत्तेवांनातात्पर्यस्तत्त्वास्थले वारम्भत्वार्थे तात्पर्यादर्शनादित्याशयेनाह स्तुतिवारम्भत्व इति ५२

ननु स्वयं दंसांतमाह वाक्यार्थवारम्भत्व इति वाक्यार्थतात्पर्येण प्रयुक्तानां पदानां वाक्यार्थप्रतिपत्तिवारम्भत्वे भूत्वाविन पदार्थे भूयस्थानां तात्पर्यं नास्ति तथेत्य र्थः विधिपरमन्त्रार्थवादानां स्वार्थे तात्पर्याभावे देवताविग्रहादिप्रतिपादकानां वज्रहस्तः पुरंदर इत्यादीनामपि देवताविग्रहादौ स्वार्थे तात्पर्याभावा पत्त्या तेषां देवताविग्रहादिप्रमितिजनकत्वं न स्याद्धि तात्पर्यविषयत्वस्यैव दजमप्रमितिविषयत्वे प्रतिव्यापकत्वात् व्यापकनिवृत्या तन्निवृत्तेरावश्यकत्वा त् तन्माह: यस्तु: पात्रः सपूर्वार्थ इति तथा च देवताधिकरणविरोधः तत्रान्यपरेभ्योपि मन्त्रादिभ्यो देवताविग्रहादिसिद्धिप्रतिपादनादित्याशयेन शं कते तात्पर्याभाव इति मानान्तराविरुद्धत्वं विशेषणं यजमानः प्रस्तर इत्यादिवारणाय इदमुपलक्षणं मानान्तरासमस्यापि एतच्च विशेषणमग्निर्हि मस्य भेषजमित्यादिवारणाय यथा हिमस्य भेषजत्वस्य प्रमाणसिद्धत्वेन न तस्यार्थवादतः सिद्ध्यनपेक्षत्वात् तथा च मानान्तरेण विरोधप्राप्त्योरभावे सत्यन्यपरेभ्यो मन्त्रादिभ्यो वाक्यमानोर्थः सिद्ध एव देवताविग्रहादिस्तथा विध इति नासिद्धिरस्मत्कृतिप्रतिपादितं देवताधिकरण इति भावः परिहरति नेति एत

वाक्यार्थवारम्भत्वे पदार्थ इव न तात्पर्यं तात्पर्याभावे मानान्तराविरुद्धं देवताविग्रहादिकं कथं तेभ्यः सिद्ध्येत् तात्पर्यवमेव प्राप्तस्य प्रामाण्यनियमादि ति चेन्न एतस्यैव रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति विशिष्टविधेस्तात्पर्यगोचरे विशेषणे स्वरूपे प्रामाण्यदर्श नेनोक्तनियमासिद्धेः अत्राहि रेवतीऋगाधारवारवंतीयसामविशेषणे न चैतत्सोमादिविशेषणवल्लोकासिद्धं येन तद्विशिष्टयागविधिमात्रे प्रामाण्यं वाक्यस्य स्यात् नापि विशिष्टविधिना विशेषणाक्षेपः अत्रापि विशेषणप्रतिपत्तौ विशिष्टगोचरो विधिस्तस्मिन्सत्येतेन विशेष सैवेति इदमेतनत्वं प्रकृताग्निष्टुद्धर्मातिदेशकं तथा च रेवत्याधारकवारवंतीयाख्यसाम्नाग्निष्टोमसाम कृत्वा प्रकृताग्निष्टुद्धर्मकेणानेन यागेन पशून्भा वयेदिति स्यकस्त्वर्थः विशिष्टविधेरिति रेवत्याधारकवारवंतीयसामादिविशेषणविशिष्टकृतभावनाविधेरित्यर्थः उक्तेति प्राकृततात्पर्यविषयत्वस्य प्रमाह प्रमितिविषयत्वं प्रतिव्यापकत्वरूपनियमासिद्धेरित्यर्थः उक्तमर्थं विवृणोति अत्रहीति न चैतदिति यदि वारवंतीयसाम रेवतीषु उत्त्वा प्रयनसिद्धं भवे त्तदा तस्य विशेषणस्य दध्यादिवल्लोकत एवावगततात्पर्यस्य वाक्यस्य न ख्यातिरेकाधिपत्यप्रमितिजनकत्वरूपप्रामाण्यं भवेन्न त्वेतदस्ति वारवंतीयसामत्व योनेरेव वाक्यप्रयनसिद्धत्वादतो वाक्यादेव रेवत्याधारकवारवंतीयाख्यविशेषणस्य प्रमितिर्वक्तव्येत्यर्थः ननु विशिष्टविषयको विधिरप्रसिद्धविशेष णस्वरूपप्रमितिजनकोऽस्तु रेवतीषु वारवंतीयसामकुर्यादित्येवमात्मकं विशेषणविधिमाक्षिपति तथा च तस्य विशेषणस्यैतेन वाक्यप्रमेयत्वमिति नेत्या ह नापीति विशेषणगोचरविधिकल्पनायां तु विशिष्टविधिना विशेषणस्वरूपप्रमितिर्वा नवाग्राह्ये ॥

सि·ले·
हि·टी·
६

तत्कोल्पनं त्वर्थोद्धितीयेविध्याक्षेपो नसिद्ध्यतिप्रमितस्यैवद्रव्यदेवतासंबंधस्य यागविध्याक्षेपकत्वदर्शनात्तथा च विशिष्टविधिना विशेषणविध्या
क्षेपणेइति वदता द्युत्ते पात्सा विशेषणस्य प्रमितत्वं वाच्यं तत्स्मापकस्य कल्पितविधिरितिवक्तव्यं न तस्मादिति विधिना विशेषणस्वरूपप्रमिते
सति प्रकृतनोविधिर्विशिष्टगोचरः सिद्ध्यति तस्मिंश्च प्रकृतविधौ विशिष्टगोचरे सति तेन विशिष्टविधिना विशेषणविध्याक्षेपइति परस्पराश्रयाप
त्या विशेषणविध्याक्षेपासिद्धेरित्यर्थः अत इति देवताधारकवाक्यवैतीयसामानाधिकरण्यविशेषणस्य प्रकृतवाक्यादप्रमितः प्रमितस्य भावादित्यर्थः नहि त
त्रापि तस्यार्थमस्त्वनेनाह अयचेति गौरवादिति भावः नचयत्नरः शाह्नः सशब्दार्थइतिन्यायविरोधः शंकनीयः तस्यौत्सर्गिकत्वोपपत्तेः प्रकृते चैतो
णाक्षेपइति परस्पराश्रयापत्तेः अतो विशिष्टविधिपरस्यैव वाक्यस्य विशेषणस्वरूपेप्रमाणं वक्तव्यं पृथक्च तत्र न तात्पर्यं उभयत्रतात्पर्ये वा
क्यभेदापत्तेः एवमर्थवादानामपि विधेयस्तुतिपराणां स्तुतिद्वारभूतेऽर्थे न तात्पर्यमिति तेभ्यः प्रसक्तस्यैव बलवत्वान्नदाविरोधापत्तेष्वह
मतरकल्पने सोमेन यजेतेत्यत्र विशिष्टविधिपरे वाक्ये सोमद्रव्याभिन्नतया यागरूपविशिष्टं विधेयमिति तत्परामेतस्य विधेयस्य दर्भाज्ञकोती
मादेर्विधेयस्य दर्शदेवलोकसिद्धत्वाभावेन विशिष्टविधिपरा वाक्याद्देवरेवत्याधारवतीयादि विशेषणस्यैव विना तात्पर्यं सिद्धिरेष्टव्या न
चतात्पर्यवृत्तिनादरामाद्यागसोमलताभेदयाहि प्रसक्तविरुद्धार्थः सिद्ध्यतीति नचापि तद्विरोधाय मतत्वर्थलक्षणाश्रयणं यद्वैतन्त्रातिरूप।
क्रमोपसंहारैकरूप्यादिषड्विधलिंगावगमितावैततात्पर्याप्रमत्ताबलवतीति ततः प्रसक्तस्यैव बाधः ततद्विरोधाय मत्वर्थलक्षणा न युक्तमिति।
विवरणवार्तिके तु प्रतिपादितं न तात्पर्यवत्त्वेनश्रुते प्रसक्ता त्वाबल्यकृत्स्नलत्वप्रयोजिदितिविधेः श्रयणस्य कृत्स्नलार्थत्वप्रतिपादने तात्पर्येपिह्न
रवलक्षणाबाधकत्वान्नतस्येह प्रसक्तिः एवमिति विशिष्टविधेर्विशेषणस्वरूपपरत्वेऽप्यर्थः न तात्पर्यमिति तथा च तात्पर्याविषयेऽपि रेवतीवारवंतीयविशेष
णस्वरूपेश्रुतेः प्रमितिजनकत्ववदन्यपराणामपि मंत्रादीनां देवताविग्रहादिप्रमितिजनकत्वं संभवतीति न देवताधिकरणविरोध इति भावः प्रकृतमाह
तेभ्य इति मंत्रार्थवादेभ्यस्तात्पर्यरहितश्रुतिवाक्येभ्य इति यावत् सोमेन यजेतेत्यत्र सामानाधिकरण्येनान्वय इति सिद्धान्ते कथं प्रसक्तविरोधः कथं वा तद
विरोधाय लक्षणाकल्पनमित्याशंकां हृदि याम् आह सोमेनेति तत्रापीति यजमानः प्रस्तरइत्यत्रेव सपिशब्दार्थः प्रसक्तविरोधाय वृत्तान्तरकल्पनमावेदस्यातः ६
न तु मत्वर्थलक्षणेत्यपि बोध्यम् ननु द्वैतस्य मिथ्यात्वबोधकाद्वैतश्रुतेरपि न स्वार्थे प्रामाण्यं तात्पर्यमात्राभावात्तथाच द्वैतसत्यत्वाहि प्रसक्तविरो

पृ

यपरिहारायाद्वैतश्रुतेरप्यसत्यानेनमेवं स्यात्प्रमितिनेत्याह अद्वैतश्रुतिरिति तात्पर्यलिङ्गानि च शास्त्रे प्रसिद्धानि तानीति यथैतच्छ्रुतेः सत्काशादित्यर्थः
वा च स्वस्य श्रुतितात्पर्यस्य प्राबल्यप्रयोजकत्वं दर्शयति विवरणवार्त्तिकेत्विति कुसलाः सर्वाणि विकाराम्भणामात्राः कुसलशेषत्वेन श्रवणे विधीयत इति श्रु
तेस्तत्तात्पर्यसिद्धमिति भावः रूपरसपरावृत्तिप्रादुर्भावो नाम सर्वं रूपरसादिना यथा सर्वकं रूपरसाद्युत्पन्नमिति तत्तात्पर्यतो यो धिश्रवणादिव्यापारः स एव श्र
वणवाह्यस्य मुख्योऽर्थः तत्त्वेवं भवत्यर्थः कुसलानामपि श्रवणज्वालादिसंपादनरूपे पाके हेतोरपि रूपरसादिपरावृत्तिप्रादुर्भावो नास्तीति समस्तसिद्धमिति
भावः ननु श्रवणं विधीयते तेन ज्वलनसमस्तवाधितं ज्वालाधिश्रयणादिक्रिया रूपपाकस्येव श्रवणस्यार्थित्वेन तस्य तत्रापि संभवात् रूपरसादिपरावृत्ति
प्रादुर्भावस्तु न तथात्वर्थः तस्य पाकफलस्य कर्मत्वरूपस्य दृष्टार्थत्वात् फलस्य विधेयत्वेन विधेयश्रवणरूपत्वायोगात् तथाचाविधेयश्रवणस्य दृ
ष्टप्रयोजनाभावादतृप्तार्थविधिः पर्यवस्यतीति श्रुतितात्पर्यविषयश्रवणस्य प्रमत्तवाधाभावादङ्गीकरणमात्रे श्रवणवाह्यस्य लक्षणेन संपन्नेत्य
परस्यादाह तत्त्वमसीति वाक्यस्येति निष्कृष्टेति निष्कृष्टं विशिष्टरूपवाच्यार्थात्सपृथक्कृतं विशेष्यमात्रं यस्ते न मतत्रेत्यर्थः श्रुतेदं वोध्यं महावाक्यानां
लक्षणे रूपरसपरावृत्तिप्रादुर्भावपर्यन्तमुख्यश्रवणसंबंधः प्रमत्तादिविरुद्ध इति तद्विरोधाय श्रवणशब्दस्याङ्गीकरणमात्रे लक्षणाभ्युपगमात्
तत्त्वमसीति वाक्यस्य जीवब्रह्माभेदप्रतिपादने तात्पर्यं पितं पदवाच्यस्य तत्पदवाच्याभेदः प्रमत्तविरुद्ध इति तद्विरोधापत्तिः कृष्टचैतन्ये लक्षणा
मतं द्वैकरसचैतन्यरूपवस्तुमात्रबोधने तात्पर्यं ज्ञातः तमेवैकं जानथ आत्मानं तमेव विदित्वातिमृत्युमेति एकधैवानुद्रष्टव्यमित्यादिश्रुतिसहस्रे
णमुक्तिसाधनीभूतमहावाक्यार्थज्ञाने प्रतिपाद्य शुद्धवस्तुमात्रस्यैव विषयत्वेन नियमात् श्रुतीनामेषोऽर्थः यस्मिन् कृत्स्नं जगद्ध्यस्तं तमात्मानं जा
नथ हे मुमुक्षवः अन्यायेऽपि स्वकृत्स्नस्य जगतः ज्ञेयत्वनिषेधार्थमवधारणमेकपदं च एकरसत्वप्रतिपादनपरं मुमुक्षुज्ञेयस्यात्मनो नानारसत्वे एकप
दमनर्थकं स्यात् एकत्वसंख्यायोगस्यात्मन एकवचनादेव सिद्धत्वात् स्यात् श्रुतेरिदं तात्पर्यं श्रुत्याद्यधिकरणभाष्ये स्फुटं दर्शितं तमेव प्रकृतं परमात्मा
नमेव न तु न ह्यतिरिक्तमप्येवमिति एवकारार्थः विदित्वा साक्षात्कृत्य मृत्युमत्येति संसारमत्येति एकधैव एकरूपेणैव शास्त्राचार्योपदेशमनुद्रष्ट
व्यमिति तच्चात्वैकरसवस्तुमात्रबोधने तात्पर्यं महावाक्यस्य तत्त्वमस्यादिपदानां लक्षणां विना न निर्वहतीति तेषु तात्पर्यानुसारेण लक्षणाभ्युपग
मः ननु प्रमत्तविरोधपरिहाराय परं तत्त्वंपदयोः चैतन्यमात्रे लक्षणा स्वीकृत्य वाक्यार्थबोधाभ्युपगमे प्रमत्तविरोधो विपरीत इत्तो भवतीत्येताव

मि॰ तो॰
टि॰ टी॰
७

स्वार्थेन प्रमाणान्तराविरोधपरिहाराय प्रमाणवाक्ये भूतलक्षणेनेति निर्वचने भूतवचनात्: तथा च सत्यपि तात्पर्ये तदनुरूपप्रमाणान्तराविरोधपरिहारायैव प्रमाणवा
क्ये भूतलक्षणाभ्युपगमात्तात्पर्यस्य प्राबल्यप्रयोजकत्वं नास्तीति प्रतिपादनमेवमिति प्रत्युक्तमंत्रार्थवादानां स्तुतिद्वारभूते स्वार्थे तात्पर्यं नास्तीत्यु-
क्तेन तद्दूषयति अर्थवादानामपीति अनन्यार्थत्वात् स्वार्थपरत्वेनेत्यर्थः तत्रार्थवादानां विधिशेषत्वेन स्वादिप्रशंसया ... प्रमितानामेवेति मानान्तरस
वादविसंवादरहितार्थवादादिमिति विशेषः तेषां स्वार्थप्रमितिमात्रेण फलाभावाद्विधेयस्तावकत्वेन विधेयकवाक्यत्वकल्पनमित्यर्थः यथा
प्रयाजादिकर्मणां प्रयोजनाकांक्षावशात्प्रयाजादिवाक्यानां फलवद्दर्शपूर्णमासविधिवाक्यैरेकवाक्यत्वं तथेति भावः अवान्तरसंसर्ग इति अर्थवा
दानामपि विध्यन्वयात् प्राक् स्वरसतः प्रतीयमाने देवतायाग्निकृतादिसंसर्गेऽवान्तरतात्पर्यमस्तीत्यर्थः प्रयाजादिवाक्यानामर्थवादादिवाक्यानां
अर्थवादानामपि प्रयाजादिवाक्यवद्विधिवाक्यानामिव स्वार्थप्रमितौ न स्वार्थतया प्रमितानामेवार्थानां प्रयोजनवशादेकवाक्यत्वे तेति प्रयाजादिवा नं॰
क्यवत्तेषामवान्तरसंसर्गे तात्पर्यमस्त्येव वाक्यैकवाक्यत्वात् पदैकवाक्यतायामेव परमवान्तरतात्पर्यानभ्युपगमादिति विवरणाचार्यैरप्युक्ति
रित्येव स्थापनेन यजमानः प्रस्तर इत्यादीनामपि मुख्यार्थतात्पर्यप्रसक्तौ प्रमाणान्तराविरोधायैव लक्षणाभ्युपगमाच्च कथं तर्हि श्रुतेः प्राबल्य
स्वार्थप्रमितौ तात्पर्ये हेतुमाह वाक्यैकवाक्यत्वादिति वाक्यानां सत्तामेव तेषां विधिवाक्यैरेकवाक्यत्वाभ्युपगमात् वाक्यानां च वाक्यार्थे तात्पर्यस्य
सामान्यतः सिद्धत्वादित्यर्थः यत्तु वाक्यार्थद्वारभूते पदार्थेप्यवेति स्तुतिद्वारभूते स्वार्थे तात्पर्याभावे दृष्टान्तप्रदर्शनं तन्न हि घटयति पदैकवाक्यतायामे
वेति पदानां सत्तामेवैकवाक्यार्थबोधने नैकवाक्यत्वमित्यर्थः तच्च पदार्थानां वाक्यार्थस्येव द्वारत्वे तदभावान्न तेष्ववान्तरतात्पर्यमपीति स्वीक्रियत इत्यर्थः
एतेन रेवत्या धारकवारवन्तीयसामात्यविशेषणेपि तात्पर्यव्याख्याने वाक्यस्य वाक्यार्थे तात्पर्यस्योत्सर्गतः सिद्धत्वाद्धि विशिष्टविधेयैर्विशिष्टभावनायां तात्पर्य
वत्वाच्च तत्र विशेषणेषु तात्पर्यं सिध्यति विशिष्टविधितात्पर्यविषयत्वस्य विशेष्यमात्रवृत्तित्वे तात्पर्यस्य विशिष्टविषयत्वानुपपत्तेः मीमांसकानां विशि
ष्टविधेर्विशेषणेषु तात्पर्याभाववचनं तु रस्य विशेषणेष्वप्रसक्तेन तात्पर्याभावपरत्वान्न स्वातन्त्र्येण तात्पर्यविषयत्वं वेदस्य प्रमितिजनकत्वमिति नियमस्य
न्यायनिर्णये विवरणाचार्यैर्व्यवस्थापितत्वेनेत्यर्थः ततः किं तत्राह यजमानः प्रस्तर इत्यादीनामिति उक्तरीत्या तेषामपि यजमानप्रस्तराभेदादौ तात्पर्यस्य
देवतत्त्व प्रमाणान्तरविरोधेन लक्षणावाप्यत इति वक्तव्यमतस्तात्पर्यवत्त्वं श्रुतेः प्राबल्यप्रयोजकं न भवतीत्यर्थः अत्र मंत्रार्थवादानामपि प्रयाजादिवाक्यानामिव स्तुतिद्वार ७

श्रुतेर्थेपरत्वान्तरत्वात्तात्पर्यमवश्यं कल्पनीयं न ह्यस्तु तत्तावता स्वार्थस्य न प्राबल्ये प्रयोजकत्वहानिः प्रत्यक्षादेस्तत्प्रयोजकत्वसंभवाद्द्वैतश्रुतीनां प्र
पंचमिथ्यात्वेमत्तानामर्थाभ्युपगमेन तत्र प्रपंचसत्वयाहि प्रमत्वस्य मिथ्यात्वश्रुत्याबाधापत्तेरित्यादिकमालोचनीयं न हीति तात्पर्यस्य प्राबल्यप्रयोजका
त्वाभावे सतोऽमर्थः नतु श्रुतिमात्रस्य प्राबल्ये सिद्धे तस्यौत्सर्गिकत्वं च कथं स्यात्तत्र दैवकुतः इति चेन्न प्राबल्यमागमस्यैव ज्ञात्वा तु श्रुतित्वस्य तामिति वचनेन
श्रुतिमात्रस्य प्रमत्वात्तदुपपद्यत्वात् प्रागमत्वादेवातिद्ध ज्ञात्वान्तर्मात्रस्य प्राबल्ये प्रत्यक्षादिप्रसिद्धं यदर्शयति निर्दोषत्वाच्चेति उत्सर्गादिति श्रुतेर्नादितरप्रमाणयो
विरोधे सति श्रुतिरेव बाधिका भवति यत्र च श्रुतिबाधितप्रमत्वादिनिरवकाशं भवति तत्रानिरवकाशेन तेन श्रुतिरेव बाध्यते सा च काशानिरवकाशयोरिति
रवकाशं बलवदिति मायादिसर्थः नतु श्रुतिबाधितस्य प्रमत्वादेर्निरवकाशस्थले तेन श्रुतेर्बाधः किमर्थमपेक्षते तत्राह किं चित्यादिना संभावनीयमु
पपादनीयमित्यर्थः स्वतएवेति निर्विषयप्रमत्वायोगादेवमर्थः प्रच्यावितमिति श्रुतिबाधित द्वैतस्य तत्तद्रूपत्वायोगाद्द्वैतबाधकप्रमत्वादस्य तत्वावे
उच्यते निर्दोषत्वान्तरत्वाच्च श्रुतिमात्रं प्रमत्वात्प्रबलमित्युत्सर्गः किंतु श्रुतिबाधितमपि प्रमत्वे कथं चित्सोचितविषयोपहारेण संभावनीयं निर्वि
षयत्वानायोगात् स्वतएवाद्वैतश्रुतिविरोधेन तत्वावेदनात्प्रच्यावितप्रमत्वमर्थक्रियासमर्थव्यावहारिकविषयसमर्पणेनोपपाद्यते किं च कुता
नेदं रजतमिति सर्वसिद्धप्रमत्वं बाधितमपि शुक्तिरजतप्रमत्वमनुभवानुरोधात्पुरोदेशे शुक्तिसंभिन्नरजतोपगमेन समर्थ्यते न तु तद्विरोधेन ब
हितमांतरमसदेव वा रजतं तद्विषय इति कल्प्यते एवं च प्रत्यक्षेय यजमानभेदग्राहिणो यावद्ब्रह्मज्ञानार्थक्रियासंवादेनानुवर्तमानस्य प्रमत्वस्य प्रा
देकरूपात्प्रामाण्यात्प्रच्यावितत्वं बोध्ये उपपाद्यते भाष्यादाविति शेषः श्रुतिबाधितप्रमत्वादीनां सिद्धान्ते व्यावहारिकप्रामाण्योपगमेन प्रमत्वान
स्यनिर्विषयत्वरूपेणिरवकाशत्वं सिद्धान्तसंमतं न भवतीत्युपपाद्यतत्र केचित्कल्प्यमाह किं चकुतेति अद्वैतश्रुतिबाधितत्वादिप्रमत्वस्य निर्विषय
प्रसंगः त्वापत्ता मे सर्वव्यवहारोच्छेदलक्षणबाधकं यथा विद्यते न तथा शुक्तिरजतादिप्रमत्वस्य निर्विषयत्वोपगमे बाधकमस्ति केचिदसतोऽपि रजतादेर्भानोपगमा
त् तथापितस्य तत्कालोत्पन्नरजतादिविषयकत्वसिद्धान्तेस्वीक्रियते अनुभवस्य निर्विषयत्वायोगात् तस्माच्छ्रुतिबाधितस्य प्रमत्वस्यानिरवकाशत्वप्र
प्रसज्जते तत्रतेन श्रुतिबाधोयुक्तः सिद्धान्तसंमतश्रुतिबाधेतः प्राबल्यमौत्सर्गिकमित्येतावता सिद्धमिति भावः शुक्तिसंभिन्नेति शुक्तितादात्म्यापन्नमित्यर्थः
व्यवहितमिति वा तद्देशांतरस्थमित्यर्थः प्रांतरामिति ज्ञानकारस्वरूपमित्यर्थः नकल्प्यतइत्यत्र हेतुः तद्विरोधेनेति रजतस्येदमर्थाभिन्नत्वानुभवावि

सि॰ ले॰ द्वि॰ टी॰ ८

रोधेनेत्यर्थः व्यवहितत्वरजतादीनामिदमर्थतादात्म्यासंभवादितिभावः एवंचेति विरोधस्थले निरवकाशशास्त्रान्तरेण श्रुतिबाधे माप्येसतीत्यर्थः ननुप्र
स्तरयजमानयोरभेदश्रुतिबाधितस्तयोर्भेदः प्रमत्वस्य शुक्तिरजतभ्रमस्येव प्रातिभासिकविषयसंभवात्तत्र तत्र न श्रुतिबाधः कल्पनीय इति ने
त्याह प्रातिभासिकविषयत्वाभ्युपगमेनेति प्रमत्वविषयस्य प्रस्तरे यजमानभेदस्य प्रातिभासिकत्वासंभवे युक्तिं सूचयति याचादीति यथा शुक्तिर
जतस्य ब्रह्मज्ञानात्प्रागेव नेदंरजतमिति प्रमत्वेन निवृत्तिः स्वोचितार्थक्रियाभावश्च तस्य प्रातिभासिकत्वे हेतुरस्ति न तथा प्रस्तरयजमानभेदस्य
प्राक् ब्रह्मज्ञानाद्बाध स्वार्थक्रियासामर्थ्याभावश्च प्रातिभासिकत्वहेतुरस्तीत्यर्थः यावद्ब्रह्मज्ञानमनुवर्तमानस्यास्य ब्रह्मज्ञानात्प्राक् बाधरहि
तस्येत्यर्थः अर्थक्रियासंवादेनेत्यस्यार्थः क्रियासमर्थभेदविषयकत्वेनेत्यर्थः बाध्यत्वइति प्रस्तरे यजमानभेदग्राहिणः प्रमत्वस्येत्यनुषंगः सर्वथे
तिभासिकविषयत्वाभ्युपगमेनोपपादनायोगात् यजमानः प्रस्तरइति श्रुतिबाध्यत्वे सर्वथा निर्विषयत्वं स्यादिति तत्परिहाराय उत्सर्गमपोह्य श्रु
तिरेव तत्तिरधिकरणादिप्रतिपादितप्रकारेण व्याख्यानीयते नचाद्वैतश्रुतिप्रमत्वयोरिव रुद्रश्रुतिप्रमत्वयोस्तात्विकव्यावहारिकयावहारिक
विषयोपगमेन प्रमत्वोपपादनं कर्तुं शक्यं ब्रह्मातिरिक्तसकलमिथ्यात्वप्रतिपादकषड्विधतात्पर्यलिंगोपपन्नानेकानेकश्रुतिविरुद्धैकैकेन
र्थवादेन प्रस्तरे यजमानस्याभेदस्य तात्विकस्य प्रतिपादनासम्भवात् एवं तत्त्वमसिवाक्यं नत्वंपदवाच्यस्य सर्वज्ञत्वादिविशिष्टब्रह्मरूपत्वबोधने
ति अयमर्थः प्रातिभासिकभेदविषयकत्वं तस्य प्रमत्वस्य न संभवतीत्युक्तं तथा व्यावहारिकभेदविषयत्वं तस्य न संभवतीत्युपदमेव वदते पारमार्थिक
भेदस्याद्वैतश्रुतिविरोधादेवानभ्युपगमात् शाकाने तथाच तस्य निर्विषयत्वरूपनिरवकाशत्वस्यादेवेति श्रुतिरेवान्यथानीयत इति संबन्धः अन्यथानय
नप्रकारमाह तात्विकेति मुख्यार्थस्याभेदस्य प्रमत्वविरोधेनासंभवात् प्रस्तरे यजमानशब्दस्य गौणी वृत्तिः कल्पनीया याचाकोशगुण इत्याकांक्षायां सूत्रका
रेण गुणोदर्शितः तात्विकेति तस्य क्रतोः सिद्धिरूपकारो यजमानप्रस्तरसाध्यो गुणस्तयोः क्रतुनिर्वर्तकत्वरूपसादृश्यगुण इति यावत् एवमन्यत्राम
र्थवादानां प्रमत्वविरोधपरिहाराय यथासंभवमालंबनानि जैमिनिभगवता अधिकरणान्तरेषु कल्पितानीत्यर्थः नन्वद्वैतश्रुतिप्रमत्वयोर्विरोधस्थले
पारमार्थिकमद्वैतं श्रुतिविषयः व्यावहारिकं द्वैतं प्रमत्वविषय इति व्यवस्था यथा कल्प्यते तथा प्रकृतेपि यजमानप्रस्तरयोर्वास्तवो भेदः श्रुतिविषयः ८
कल्पितभेदः प्रमत्वविषय इति व्यवस्था कल्प्यतामिति तन्नेत्याह नचेति इहेति यजमानः प्रस्तर इत्यत्रेत्यर्थः यजमानः प्रस्तर इत्यर्थवादेन तयोस्तात्विक

तादात्म्यं प्रतिपादयितुं न शक्यं श्रुत्यादेन श्रुतिभिर्विरोधात् न चाद्वैतश्रुतीनामपि विधिरूपत्वाभावेनार्थवादत्वाविशेषाच्छिनिगमनाविरह इति
वाच्यं तथापि तासां बहुत्वेन विनिगमनाविरहानवतारादिमाशयेनाह श्रुतेनेकेति किंच यजमानप्रस्तराभेदे तस्यार्थवादस्य तात्पर्यं नास्ति तात्पर्य
ग्राहकलिङ्गाभावाद्द्वैतश्रुतीनां च स्वार्थे तात्पर्यग्राहकलिङ्गानि षड्विधान्यपि सन्ति तथाहि छान्दोग्ये षष्ठाध्याये सदेव सोम्येदमग्र आसीदेकमेवा
द्वितीयमिति उपक्रमः ऐतदात्म्यमिदं सर्वमिति सर्वात्मकमद्वितीयवस्तूपसंहरति उपक्रमोपसंहारयोरेकरूपलक्षणेन लिङ्गेन तत्साध्या
यस्याद्वितीयवस्तुनि तात्पर्यं निश्चीयते हे सोम्येदं परिदृश्यमानं जगत्प्रसूतेः प्रागद्वितीयमेकरूपं ब्रह्मैवासीदिति श्वेतकेतुं प्रत्युद्दालकवचन
मिदं सर्वमेतदात्म्यमेतदात्मकं प्रकृतसद्वस्त्वात्मकमित्यर्थः भावप्रत्ययो न विवक्षितस्तत्समर्थः ऐतदात्म्यमिदं सर्वमिति वाक्यस्यासकृत्स्याद्वाद्भ्या
सेति द्विरद्वितीयवस्तुनो मानान्तरायोग्यत्वादपूर्वत्वसिद्धिः आचार्यवान्पुरुषो वेदेति वाक्येन प्रकृतसद्वस्तुज्ञानेन प्रकृतसम्पत्स्य इति वाक्येन तस्य तु

तज्ज्ञासर्वज्ञत्वभोक्तृत्वादिप्रसक्तमसंतनिरालंबनं स्यादिति तत्परिहाराया हंकारशबलितस्य भोक्तृत्वादि ततो निष्कृष्टस्य शुद्धस्योदासीनब्रह्म
रूपत्वमिति श्रवस्यामाश्रित्य भागमागलक्षणयाश्रीयते एवं ब्रह्मसत्यत्वे श्रुत्यादिप्रमाणादावपि प्रसक्तस्यात्मतानिर्विषयत्वप्रसक्तौ तत्परिहारायपक्ष
किलक्षणफलश्रवणात् फलमपि तत्र तात्पर्यग्राहकमस्ति पितृपुत्राख्यायिकादिरूपार्थवादश्च तत्तात्पर्यग्राहकस्तत्रास्ति प्रत्यादिदृष्टान्तैः अपू
र्वस्य ब्रह्मकार्यत्वप्रतिपादनपूर्वकं ब्रह्मज्ञानस्य प्रतिपादनमुपपत्तिस्तत्रास्ति तथा च षड्विधैस्तात्पर्यलिङ्गै रद्वितीयवस्तुपरत्वं तस्याध्यायस्य सिद्धमे
वमध्यायान्तरेष्वप्यन्यतरेषु च तात्पर्यलिङ्गानि द्रष्टव्यानि तथा चोक्ततात्पर्यलिङ्गैरुपेतत्वादद्वैतश्रुतीनां प्राबल्यमित्याशयेनाह बहुधेति ननु तर्हि
व्यावहारिको यजमानप्रस्तरयोरभेदः अभेदार्थवादस्तु न तस्य व्यावहारिकतदभेदप्रतिपादकश्रुतिबाधितत्वात् प्रस्तरयोर्भेदप्रमास्तमपि व्यावहारिकभेदविषयक
मस्तु तथा च प्रमात्वमनिश्चयकाग्रात्वाभावान्न श्रुतिबाधकत्वमिति चेन्न समानसत्ताकयोर्भेदाभेदयोरेकत्रासंभवेन तथा कल्पनायोगात् अस्तु तर्हि प्राति
भासिक एवेतयोरभेदः अभेदार्थः तत्र भेदो यजमानाभेदस्यैव प्रस्तरे यजमानाभेदस्य प्रमत्वप्रतिभासाभावादिति भावः श्रुतेः प्रमत्वात् प्राबल्यमितु सर्गस्य
यजमानः प्रस्तरस्तत्रापवादस्यैव लडशेषित्वाम्प्रपवादस्यलोतरमाह एवं तत्त्वमसीति तत्त्वमसीति वाक्ये न हि स्वरसतः किंचिज्ज्ञत्वकर्तृत्वभोक्तृत्वादि
विशिष्टचेतनस्य जीवस्य तद्विपरीतेन सर्वज्ञत्वाभोक्तृत्वाकर्तृत्वादिविशिष्टचेतनस्य रूपेण ब्रह्मणा सहाभेदः सार्वकालिकः प्रतिपाद्यते तद्बोधने

सि॰ ले॰
टि॰ टी॰
४

जीवे त्वन्यत्सर्वज्ञानित्यधर्मीणीकारे जीवे तद्विरुद्धस्य सर्वज्ञत्वकर्तृत्वादिरूपसंसारावगाहि प्रमाणं निरालंबनं स्यादतो निरवकाशसंसारप्रमाणेन श्रुतेर्बाधः
स्वीकर्तव्यः स च बाधो विशेष्यचैतन्यांशमात्राभेदप्रतिपादकत्वेन श्रुतेः संकोचरूप एव वक्तव्य यजमानः प्रस्तर इत्यत्रेव कार्त्स्न्ये न मुख्यार्थत्यागो न
ध्यकल्पनरूप इति विशेषः इत्यर्थः प्रकारान्तरेणोपलक्षयति अंतःकरणविशिष्टचैतन्यस्येत्यर्थः भागत्यागेति तेभेदवाच्यस्यैको भागोस्तु विशेषण
भागो विशेष्यभागश्चेति तत्र विशेषणरूपस्य भागस्य त्यागपूर्वकत्वं पदस्य विशेष्यभागे चैतन्यमात्रे लक्षणा स्वीक्रियते एवं तत्पदार्थोपि द्रष्टव्य अप
वादस्थलांतरमाह एवं कृत्स्नमिति प्रसक्तावृत्ति श्रुतिबलात्फले शुद्धरूपरसपराहृत्ति प्रादुर्भावपर्यंतपाकरूपस्य श्रयणस्यांगीकारे तेषु श्रय
णाभावप्रमाणस्याविषयो न लभ्यते अदृतेन श्रुतिविरोधेन तेषु पारमार्थिकस्य श्रयणाभावस्यासंभवात् श्रुत्युक्तश्रयणस्य तेषु व्यावहारिकस्यैव वक्तव्यतया
तेषु तदभावस्यापि व्यावहारिकस्यासंभवात् व्यवहारकाले बाधरहितस्य श्रयणाभावस्य प्रातिभासिकत्वासंभवाच्च तस्मात्प्रमाणं निर्विषयं स्यादित्यर्थः
एवं सोमेन यजेतेत्यत्रापि सोमेन यागेन भावयेदिति वाक्यार्थोपस्थिते श्रुतिबलात्सोमयागयोरभेदांगीकारे तयोर्भेदग्राहि प्रमाणं निरवकाशं स्यादिति
तो लक्षणा नेत्याह नास्ति किंचनेत्यत्र कथंचिद्विषयोपपादनसंभवेन तु न प्रबलायाः श्रुतेरन्यथानयनमिति न कश्चिद्व्यवस्थाप्रसंगः अथवा कृत्स्नलं
अथ ये सोमेन यजेतेत्यादौ न प्रमाणानुरोधेन लक्षणया श्रयणे किं त्वनुष्ठानामात्या नहि कृत्स्नलेऽभीकरणमात्रमिव मुख्यः पाकोत्पत्त्यंगतयावतेन
नहि रोधपरिहाराय सोमपदस्य मत्वर्थे लक्षणा स्वीक्रियत इति द्रष्टव्यं एवं निरवकाशप्रमाणेन श्रुतेर्बाधमुत्सर्गस्यापवादरूपं दर्शयित्वौत्सर्गिकश्रुतिप्राबल्यं
प्रकृतानभिप्रायेण दर्शयति कथंचिदिति द्वैतमिथ्यात्वश्रुतीनां तत्सत्वग्राहिप्रमाणस्य च विरोधस्थले प्रमाणस्य श्रुतिबाधितस्यापि निरवकाशत्वकल्पि
तेष्वंतत्कृतं व्यावहारिकसत्त्वादिविषयकत्वेन सावकाशत्वादतो श्रुत्या प्रमाणस्यैव बाध इति बाधः कथंचिदित्यस्य कल्पितदेहादिसमर्पणेन चेत्यर्थः कथं
चिच्छब्दात् सर्वप्रमाणस्येति शेषः न काश्चिदपीति तात्पर्यसमभावप्रयोजकत्वपक्षेपयातात्पर्यविषयस्यापि श्रवणादेर्बाधदर्शनरूपा व्यवस्थाप्रस
क्तानन्तयाश्रुतिप्राबल्यौत्सर्गिकपक्षे सा प्रयुज्यते प्रत्युपलंभादित्यर्थः ननु प्रमाणेन श्रुतिबाधे च हस्तदाहरणं निदर्शितानि श्रुत्या प्रमाणबाधोदाहरणं
नैकमेव दर्शितं तथा च प्रमाणस्य श्रुत्यपेक्षया प्राबल्यमौत्सर्गिकमिति वक्तव्यं न तु वैपरीत्यमित्यस्वरसादाह अथ वेति तदभिन्न इति सोमाभिन्न इत्यर्थः तस्मादिति
अनुष्ठानात्तस्मादित्यर्थः तन्नेति प्रमाणविरोधादित्यर्थः नन्वेवेति अनुष्ठानामात्रेणैव तत्र प्रमाणविरोधादन्नेन प्रमाणप्राबल्यस्यौत्सर्गिकत्वे आगमवा ४

ध्यानां गजननीतप्रसक्तादीनां भयसंभवदर्शितत्वादित्यर्थः तस्मादिति प्रागभावस्य सौत्सर्गिकत्वसंभवादित्यर्थः न कश्चिद्बाध इति भागमस्य प्रसक्तास्या
वत्वे यजमानः प्रत्यक्षमाहारपि यजमानप्रत्यभेदादिसिद्धमसंग इति येनावाय ग्राशंकितः सर्वस्य नास्ति तस्य वक्ष्यमाणैः प्रकारैः परिहृतत्वादित्यर्थः अपच्छेदमा
यश्रकृते योजयितुमाशिपति अथ कथमिति कथं प्राकृतस्य चितस्यात्वेपस्य विवरणं तन्निराकरणं च यत्विस्यादिना भविष्यति प्रथमं तन्मायं प्रकृते योजयति उ
च्यत इति वहिष्पवमाने स्तोत्रमुद्दिश्य पान्वारब्धेन यागकृतामृत्विजां मध्ये उद्गातुरपच्छेदे सति प्रारब्धं क्रतुमदक्षिणं तया समाप्य पुनः स एव क्रतुस्तस्मै देय इति
तदपच्छेदनिमित्तकमारब्धक्रतोरदक्षिणतया समापनं प्रायश्चित्तं तया विहितं तथा चैकस्मिन्प्रयोगे देवात्क्रमेणोभयोरपच्छेदे सति विरुद्धयोः कतमत्प्रायश्चित्त
वासोम द्रव्यकरणक यागइव तदभिन्नो यागः केनचिदनुष्ठातुं शक्यते न चानुष्ठेयत्वाभिमतस्य प्रसक्तविरोधपरिहारानुष्ठानाशक्तिरिति शङ्कान्तरेण वदन्नियत
इति वाच्यं शशिमंडले कोतिमत्त्वं यादिति विधावनुषेयत्वाभिमतस्य शशिमंडले कोतिमत्त्वस्य प्रसक्ताविरोधेप्यनुष्ठानाशक्तिदर्शनेन तस्यात्तेनाभि
न्नत्वात् तथाचत तएवत त्रलक्षणं प्रयाणं तस्मादपच्छेदन्यायादिति कृत्स्नकृति वलीयस्त्वस्य न कश्चिद्बाध इति अथ कथमत्रापच्छेदन्याय श्रुतिः उ
च्यते यथा ज्योतिष्टोमे वहिष्पवमाने सर्पतो उद्गातुरपच्छेदे सति यद्यक्रतुमदक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेतेति श्रुतिनिरीक्षणेन ज्ञा
तोत्रोद्गातुरपच्छेदनिमित्तकर्तव्यताबुद्धिः पश्चात्प्रतिहर्त्रपच्छेदे सति यदि प्रतिहर्तापच्छिद्येत सर्ववेदसं दद्यादिति श्रुतिनिरीक्षणेन ज्ञातप्रतिहर्त्रपच्छेदप्र
तिहर्त्रपच्छेदनिमित्तकर्तव्यताबुद्ध्या बाध्यते एवं सर्ववेदसादिसमनवप्रसक्ते परपातत्मिथ्यात्वं ज्ञातिजमबुद्ध्या बाध्यते न चोदाहृतस्थले सर्वं नैमित्ति
योरनुष्ठानसंभवात्कालात्मतरस्यानुष्ठेयत्वे स्थिते सति किं सर्वनिमित्तकप्रायश्चित्तमनुष्ठेयं किं वोत्तरनिमित्तकमिति विषये निर्णयमाह उद्गातुरपच्छेद इत्या
दिना यत्र प्रयोगे प्रथममुद्गातुरपच्छेदो भवति तत्र प्रयोगाभिप्रायो यं ग्रन्थः श्रुतिनिरीक्षणेनेति निमित्तोपजननानन्तरमेव नैमित्तिकशास्त्रस्य बुद्धिस्थत्वा
दिति भावः अपच्छेदनिमित्तकर्तव्यताबुद्धिरिति उद्गात्रपच्छेदनिमित्तप्रायश्चित्तस्य तदुद्गात्रपच्छेदनिमित्तं तस्य कर्तव्यताबुद्धिरित्यर्थः न हि कृत्स्नेति
उद्गात्रपच्छेदनिमित्तकर्तव्यतानन्तरार्थः तद्धि कृत्स्नवत्कर्तव्यताविशेषणं एवमिति एकस्मिन्प्रयोगे अदक्षिणत्वसर्ववेदसदक्षिणकत्वयोर्विपकत्व च
हारि इत्यपच्छेदस्य सत्वमिथ्यात्वयोरपि विरुद्धत्वाद्बुद्ध्योर्बाध्यबाधकत्वमिति भावः न चोदाहृतस्थले उभौ यत्र प्रथमं प्रतिहर्त्रपच्छेदस्तत्र सर्वः शास्त्र
मिति यद्यक्रतो नापच्छिद्येतेति शास्त्रमित्यर्थः युगपदिति उद्गातृप्रतिहर्त्रपच्छेदयोर्युगपदेव सत्युद्गात्रपच्छेदनिमित्तकमेव प्रायश्चित्तमनुष्ठेयमित्यापस्तंवा

सि॰ ले॰
हि॰ टी॰
१०

वाधैरुक्तत्वादितिभावः असत्त्वं विति द्वैतसत्त्वमसत्त्वामित्यर्थः अद्वैतस्येति द्वैतमिथ्यात्वस्येत्यर्थः विषयांतराभावादिति द्वैतप्रपंचे प्रतीयमान
सत्त्वस्य ब्रह्मसत्वाबाधे सति तत्सत्वांतराभावात्सत्वप्रसक्तेरिति विषयस्यात्रैचेतःकल्पितेऽप्रसक्तत्वानस्यानिर्विषयत्वादर्शनात्तदन्यपरमा द्युतिभावः इत्यत्र प्रप
चेपारमार्थिकस्यसत्वस्यब्रह्मसा परिच्छिन्नत्वेपिव्यावहारिकस्यसत्वस्यतयानपह्नुतत्वात् सत्वमसत्त्वस्यतानिरवकाशत्वमिति परिहरति यत्रेति विष
यमिति सत्वस्वरूपमितिशेषः नन्वप्रसक्तेसत्वे पारमार्थिकेघटादिप्रपंचे सत्वंव्यावहारिकं ब्राक्ति रजतादौ सत्वे भातिभासिकमिति सत्त्वाद्वैविध्यपदेन
दादिसत्वमसत्त्वस्यविषयांतरं नान्वेषणीयं व्यावहारिकसत्वस्य घटादौ विद्यमानत्वेवतद्विषयस्यलाभादेकैवसर्वत्रसत्तेतिपक्षे व्यावहारिकसत्वमाति
भासिकसत्वयोरभावात् सत्वप्रसक्तस्याविषयांतरमन्वेषणीयमेव यद्योत्तरभाविविरुद्धापच्छेदस्थले सर्वथाबाधितस्य सर्वापच्छेदनिमित्तकमायश्चि

नु प्रपंचगतमिथ्यात्वप्रपंचे तद्व्यावहारिकमेव वाच्यं ब्रह्मज्ञानेनानिवर्त्यस्य मिथ्यात्वधर्मस्य प्रातिभासिकत्वपारमार्थिकत्वयोरयोगात् तस्य व्यावहारिकत्वे त
प्रपंचगतसत्त्वं पारमार्थिकं सिध्यति तस्यापि सत्त्वघटादिसमसत्ताकस्य यावत्तत्त्वज्ञानमनुवर्तमानस्य प्रातिभासिकत्वायोगात् व्यावहारिकमिथ्या
त्वधर्मवति प्रपंचे तत्सत्त्वस्य व्यावहारिकस्यायोगाच्च तथा च प्रपंचगतस्य सत्त्वधर्मस्य पारमार्थिकत्वसिद्धो धर्मिणः प्रपंचस्यापि पारमार्थिकत्वमनिवार्य

मित्याशंक्य तत्र धर्मिणः समसत्त्वप्रतिक्षेपकं धर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वे हि उभयवादिसिद्धं धर्मिसमसत्त्वं तंत्रं न पारमार्थिकत्वं गुरुतरकत्वादि प्रति
क्षेपके घटत्वे सत्त्वस्य पारमार्थिकत्वासंप्रतिपत्तेः ब्रह्मणः सप्रपंचत्वे न धर्मिसमसत्ताकमिति तन्नानिः प्रपंचसत्त्वप्रतिक्षेपकं ग्रतएव मिथ्यात्वस्य व्या
वहारिकत्वेन विरोधिनोऽप्रातिभासिकस्य सत्त्वस्य पारमार्थिकत्वस्यापादिति निरस्तं धर्मिसमसत्ताकस्य मिथ्यात्वस्य व्यावहारिकत्वे धर्मिणोऽपि
व्यावहारिकत्वनियमात् अथवा यो यस्य स्वविषयसाक्षात्कारानिवर्त्यो धर्मः स तत्र स्वविरुद्धधर्मप्रतिक्षेपकः शुक्तौ शुक्तितादात्म्यं तद्विषयसाक्षात्का
रानिवर्त्यम् शुक्तित्वविरोधि तत्रैव रजततादात्म्यं तन्निवर्त्यम् रजतत्वाविरोधीति च व्यवस्थादर्शनात् एवं च मिथ्यात्वं कल्पितमपि प्रपंचसाक्षात्कारानिवर्त्य

मिति ब्रह्माद्वैतवादिनिरिति कस्यचिच्चोद्यं वक्ष्यमाणहेतुना निरस्तमित्याह ग्रतएवेति नियमादिति मिथ्यात्वधर्मस्य धर्मिसमानसत्ताकत्वप्रयुक्तं व्यावहारिकत्वमुपे
त्यापि मिथ्यात्वधर्मिणि प्रपंचे तत्सत्त्वपर्यवसायिनः प्रपंचसत्त्वे पारमार्थिकत्वापादनस्य विरोधेनासंभवादित्यर्थः न च प्रपंचे पारमार्थिकसत्त्वस्याभावे प्रातिभा
सिकव्यावहारिकसत्त्वयोरपि माङ्गिःसत्त्वात्तत्र सत्त्वान्तरभवविरोधश्रुतिवाच्यं व्यावहारिकस्यैव सत्त्वस्य प्रपंचे स्वीकारे तावन्मात्रविरोधाभावात् न च मिथ्यात्वस
त्त्वयोर्व्यावहारिकत्वेन समानसत्ताकयोरेकत्र विरोध इति वाच्यं मिथ्यात्वविरुद्धस्य यावत्तत्त्वज्ञानं बाधरहितस्वरूपसत्त्वलक्षणसत्त्वस्य प्रपंचादिविषयस्यासत्त्व
हुतत्वादिति भावः सर्वत्र ब्रह्मसत्तैव प्रतीयते न तदतिरेकेण व्यावहारिकं प्रातिभासिकं वा सत्त्वमस्तीति मते धर्मिसमसत्त्वं तंत्रमिति समाधानेन न संभवतीति मन्वानः स्व
यानंतरमाह अथवेति धर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वे हि स्वाश्रयसाक्षात्कारानिवर्त्यत्वं प्रयोजकं कल्प्यते संप्रतिपन्नत्वात् न तु पारमार्थिकत्वं तस्यास्माकमसंमत ३२
पेतरिति भावः यो धर्मी यस्य धर्मिणो धर्मिगोचरसाक्षात्कारानिवर्त्यः स धर्मस्तत्र धर्मिणि सदत्वार्थः उक्तप्रयोजके हेतुत्वमाह शुक्ताविति तत्सदं शुक्तिपदे शुक्तित्वं वि

रोपीति अखण्डकित्वस्य प्रतिक्षेपकमित्यर्थः तत्रैवेति शुक्तावेव रजततादात्म्यरूपेण धर्मो वर्तते स च स्वविरुद्धस्य रजतत्वस्य रजतभिन्नत्वस्य शुक्तिगतस्याविरोधी प्रति
क्षेपको न संभवतीत्यत्राह तद्गर्भविशेषणं तन्निवर्त्यमिति शुक्तिसाक्षात्कारनिवर्त्यमित्यर्थः एवं चेति स्वाश्रयसाक्षात्कारनिवर्त्यधर्मस्य स्वाश्रये स्वविरुद्धधर्मस्थि
तिविरोधित्वेऽप्रमाणेन तन्निश्चिनोतीत्यर्थः अनिवर्त्यमिति यथा शुक्तिसाक्षात्कारे सति शुक्तितादात्म्यं न निवर्तते तथा घटादिप्रपञ्चसाक्षात्कारे सति इक्षणिस्वाय
सिद्धमिथ्यात्वं न निवर्तत इत्यर्थः चोद्यान्तरमपि वक्ष्यमाणहेतुना निरस्यन्नित्याह एतेनेति शाब्दगम्यस्य ब्रह्मणः सत्यत्वे शाब्दनिष्ठयोग्यतायाः सत्यत्वं वक्तव्यमित्य
त्रेत्तन्माह योग्यता समानसत्ताकस्यैवेति वा कार्यकारणयोः समानसत्ताकत्वनियमः सोऽयं प्रातिभासिकयोग्यतया चेतेति व्यावहारिकार्थस्य सिद्धभा
वेनेति संबन्धः प्राब्दगम्यस्य ब्रह्मणः सत्यत्वे ब्रह्मगोचरप्रावृत्तानि तच्छस्य प्रामाण्यस्य सत्यत्वं वक्तव्यमित्यत्रेत्तन्माह अर्थाबाधरूपेति तथा च वेदान्तार्थस्य ब्रह्मणः

मिति सत्यत्वप्रतिक्षेपकमेव ब्रह्मणः सप्रपंचत्वं तु ब्रह्मसाक्षात्कारनिवर्त्यमिति तन्निःप्रपंचत्वप्रतिक्षेपकमिति एतेन शाब्दगम्यस्य ब्रह्मणः सत्यत्वे शाब्दयोग्यता
याः शाब्दधीत्वप्रामाण्यस्य च सत्यत्वं वक्तव्यं प्रातिभासिकयोग्यतावत्ता नासवाक्येन व्यावहारिकार्थस्य व्यावहारिकयोग्यतावता अग्निहोत्रादिवाक्येन तात्त्विकार्थस्य
वा सिद्धभावेन योग्यतासमानसत्ताकस्यैव शाब्दार्थस्य सिद्धिनियमात् अर्थाबाधरूपप्रामाण्यस्यासत्यत्वेऽर्थस्य सत्यत्वायोगाच्च तथा च ब्रह्मातिरिक्तस्य सत्त्व
तस्सत्वेन द्वैतस्य वयपभावइति वियदादिप्रपञ्चोपि सत्योऽस्त्विति निरस्तं व्यावहारिकस्यार्थक्रियाकारित्वस्य अवस्थापितत्वेन व्यावहारिकयोग्यताया अपि तत्सत्य
सिद्धिप्रभवाद्ब्रह्मपरवेदान्ते तत्त्वादिपदसत्त्वात्तत्त्वब्रह्मसिद्धेः अग्निहोत्रादिवाक्ये तादृशपदाभावात् न तत्त्वेपि प्रचलब्रह्माद्वैतश्रुतिविरोधात् तदसिद्धिरितिव

तत्त्वसंरक्षणाय तद्धीप्रामाण्यस्य सत्यत्वं वक्तव्यमिति भावः ननु ब्रह्मव्यतिरिक्तस्य तात्त्विकयोग्यतादेः सत्त्वासिद्धावपि स्वर्वाद्यभिमते निखिलद्वैतसत्त्वं कथं सिद्ध्य
ति नेत्याह तथा चेति द्वैतावयपभावइति अद्वैतभंगावयपभावइत्यर्थः वेदान्तशाब्दनिष्ठयोग्यतायाः सत्यत्वं किं तस्याः शाब्दबोधरूपार्थक्रियाकारित्वसिद्ध्यर्थमप
देते किं वा ब्रह्मणः सत्यत्वसिद्ध्यर्थं नाद्य इत्याह व्यावहारिकस्येति प्रपञ्चस्येति शेषः योग्यताया इति पञ्चमी सत्यस्य ब्रह्मणः सिद्धिः शाब्दबोधः द्वितीये योग्यतायाः
सत्यत्वाभावेऽपि ब्रह्मणस्तात्त्विकत्वसिद्धिं साह ब्रह्मपरइति अत्रादिपदं विमतादिस्यपरार्थं न त्वग्निहोत्रादियमस्यापि सत्यादिपदात्त्वसिद्धिः स्यादित्यत आह अग्निहो
त्रादीति ननु यो वै स धर्मः सत्यं वै तदिति यमेपि सत्यादिपदश्रुतिः प्रयुक्तमस्तीत्यत आह तत्त्वेपीति तदसिद्धिरिति यो वै स धर्म इति वाक्यस्याग्निहोत्रादेः परमार्थत्व
प्रतिपादने तात्पर्यलिंगानामभावेनानन्यपरस्य तत्सत्यतात्पर्यकत्वेन प्रबलद्वैतश्रुत्याबाधाद्धर्मस्य तत्त्वं ब्रह्मवत्परमार्थत्वासिद्धिरित्यर्थः श्रुतावग्निहोत्रादेरव्यापरार्थत्वेन

सि॰ले॰
मु॰टी॰
२२

समसत्ताकत्वनियमाभावस्थितेन धर्मत्वं वा विवक्षितं तादृशो वेतधर्मः समं चैतेनेदिति समधर्मयोरभेद इत्यर्थः इतिमतं तं व्यावहारिकयोरपेक्षतावत्तावेदान्तवाक्येन समसमस्यब्रह्म
णः सिद्धोपकालेन्वमाह शाब्दार्थयोरपेक्षतयोरिति ब्रह्मणः समत्वेपितज्ज्ञानेन ब्रह्मप्रामाण्यस्य नतस्यतेसिद्ध्यति तस्य ब्रह्ममात्रत्वाभावादित्याह घटज्ञानेति तदतिरि
केति ब्रह्मत्ववति ब्रह्मप्रकारकानुभवत्वरूपतत्प्रामाण्यस्यापि ब्रह्मातिरिक्तब्रह्मत्ववैशिष्ट्यघटितत्वेनेत्यर्थः यदि च ब्रह्मज्ञानगतं प्रामाण्यमबाधितार्थानुभव
त्वरूपं तच्च विवक्षितविवेके नबाधयोग्यविषयत्वरूपमात्रं पर्यवस्यति नत्वात्रपर्यवसितप्रामाण्यस्य चात्वेन्पर्यवसायेवेदान्तेषु ब्रह्ममात्रमेव न तदतिरिक्तघटितत्व
मिति ब्रह्मज्ञानप्रामाण्यस्य समत्वं संभवतीत्यत आह तत्र तर्हि ब्रह्मगोचरशाब्दधीप्रामाण्यस्यापि समत्वेन तद्वैषम्यसिद्धिः तस्य ब्रह्ममात्रेण न ब्रह्मातिरिक्तसमत्वासि
द्धेरिति भावः तस्मादिति विरोधाभावादित्यर्थः प्रपंचस्य मिथ्यात्वपक्षे प्रमत्तादिविरोधाभावो निरूपितः इदानीं सर्वेषु शरीरेष्वात्मन एकत्वपक्षे सुखदुःखा
दिवैषम्योपपत्तेः शाब्दार्थयोरपेक्षतयोः समानसत्ताकत्वनियमस्यातिः प्रमाणकत्वात घटज्ञानप्रामाण्यस्यापि घटत्ववत्समभूतब्रह्मज्ञानप्रामाण्यस्यापि तद
तिरिक्तघटितत्वेन मिथ्यात्वोपपत्तेश्च तस्मादारम्भणाधिकरणोक्तन्यायेन कृत्स्नविषयादिप्रपंचस्य मिथ्यात्ववज्रलेपायते तदारम्भणशब्दादि
भिश्चैतन्यस्य विषयादिप्रपंचस्य मिथ्यात्वसिद्धावपि चेतनानामपवर्गभाजां मिथ्यात्वयोगाद्वितीये ब्रह्मणि समन्वयो न युक्तः न चैषां ब्रह्माभेदः
प्रागुक्तो फलकः परस्परभिन्नानां तेषामेकेन ब्रह्मणाभेदायोगात् न च तदभेदासिद्धिः सुखदुःखादिव्यवस्थानासिद्धेरिति चेन्न तेषामभेदेप्युपाधि
भेदादेव तद्व्यवस्थोपपत्तेः न तूपाधिभेदेपि तदभेदानपायात् कथं व्यवस्था न त्वाश्रयभेदेनोपपादनीयो विरुद्धधर्मसंकरस्तदतिरिक्तस्यैकस्यावि
दितिव्यवस्थाविरोधमाशंक्य तान्निरूपयितुं प्रसंगमाह नन्वित्यादिना अपवर्गेति जीवानां स्वरूपेण मिथ्यात्वे तत्वज्ञानेन निवृत्त्यापत्त्या तेषां मुक्तिभाक्त्वं नस्यादि
त्यर्थः ननु जीवानां ब्रह्माभेदस्य वेदान्तप्रमाणकस्याप्ययमपरिच्छेदावसानेनोक्तत्वात् ब्रह्मणैनाद्वितीयत्वानुपपत्तिरित्याशंकां निराकरोति न चैतेषामिति जीवा
नां परस्परभेदासिद्धिमाशंक्याह न च तदिति एकस्य यदा दुःखं भवति तदान्यजीवान्तरस्य सुखं भवतीति सुखदुःखव्यवस्थापकरागद्वेषादिव्यवस्थाप्यनुभव
सिद्धा इत्याद्यात्तेषां परस्परभेदः सिध्यतीत्याह सुखेति ननु आरम्भणेत्यादिना प्रागभिप्रतिशरीरमात्मभेदपक्षप्रतिक्षिप्त इति नेति उपपत्तेरिति नात्मभेदः।
प्रामाणिकः इत्यर्थः तदभेदेति आत्माभेदेत्यर्थः कथं साधूक्तविताममनुपपत्तिमाह नहीति तदतिरिक्तस्येति विरुद्धसुखदुःखाद्याश्रयातिरिक्तस्यैकस्य चिद्रूपस्य २२
अनुभवगोचरस्येत्यर्थः अतः करणमेव च यायाश्रयोऽहमनुभवगोचरश्च न त्वात्मा तस्य कूटस्थत्वात् तथा चाश्रयभेदादेव व्यवस्थेति समाधत्ते अत्र केचिदा

द्धिरिति मनएवेति मनोऽन्तःकरणं कामसंकल्पादीनां परिणामत्वात्सामानाधिकरण्यं विज्ञानमंतःकरणं तत्तज्ज्ञाने करोतीति यज्ञं शास्त्रीयं कर्म आदिपदेन का॥
र्यमप्यस्य इति ध्येयता इत्यादिश्रुतिग्राह्या विद्यात्मनः कर्तृत्वे प्रमाणमाह असंगो ह्ययमिति असंगो न हि सज्जत इति समाधोगपत्वादित्यर्थः आदिपदेन
साक्षी चेता केवलो निर्गुणश्च अनन्य त्वमेघ अभिवाकशीतिइत्यादिश्रुतिसंग्रहः न चैवं सतीति अन्तःकरणस्यैव एवं धाश्रयत्वे सतीत्यर्थः अहं करोम्यहं
सुख्यहं दुःख्यहमनुपलभ इत्यादिरूपेणोपलब्धिरूप चैतन्यस्य कर्तृत्वसुखदुःखाद्यात्मकवस्तुसामानाधिकरण्यमनुभूयते तद्विरोध इत्यर्थः यथाऽ
दग्धायसोऽदहनात्मनोऽप्ययस्तरजतेरजतत्वसदनत्वसामानाधिकरण्यानुभवस्तद्वदिति समाधत्ते अन्तःकरणस्येति तद्धर्माणामित्यत्र तत्पदमन्तःकरण
पर यत्तद्धर्मभवति आत्मनश्चैतन्यरूपत्वाविभेदकल्पनया चैतन्यमात्मधर्मः तथा चान्तःकरणयोरैक्याध्यासेऽन्तःकरणधर्माणां चैतन्यकर्तृत्वा

दे दोषगमेनास्तिस्यति अत एवेदाहुः सिध्यत्येवान्तःकरणोपाधिभेदेन सुखदुःखादिधर्मवत्स्या कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृ
तिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति विज्ञानं यज्ञं तनुत इत्यादिश्रुतिभिस्तस्यैव निखिलानर्थाश्रयत्वप्रतिपादनाद् असंगो ह्ययं पुरुषः असंगो
न हि सज्जत इत्यादिश्रुतिभिश्चैतन्यस्य सर्वात्मनोदासीन्यप्रतिपादनाच्च न चैवं सति कर्तृत्वादिधर्मस्य चैतन्यसामानाधिकरण्यानुभवविरोधः
अन्तःकरणस्य चैतन्येन तादात्म्येनाध्यस्ततया तद्धर्माणां चैतन्यसामानाधिकरण्यानुभवोपपत्तेः न चान्तःकरणस्य कर्तृत्वादिधर्माश्रयत्वे चैत
न्यः संसारी कस्मादिति वाच्यं कर्तृत्वादिधर्माश्रयान्तःकरणग्रन्थिना तादात्म्याध्यासाधिष्ठानभावापन्नस्य संसारित्वोपगमात् तावतैव भीषणत्वाद्या

दीनां सामानाधिकरण्यं संपद्यत इति तदनुभवविरोध इति चेतन इति चेतनमाश्रय आत्मा संसारी कर्तृत्वादिधर्मवान् कस्मादित्यर्थः चेतनस्य स्वतः संसा
राश्रयत्वाभावेऽपि बुद्धिनिष्ठस्य संसाराश्रयत्वस्य साहित्यानुभूयमानस्यात्मन्यारोपोपपत्तेः आरोपितसंसाराश्रयत्वमस्तीति परिहरति कर्तृत्वादी
ति अहंकारस्य चैतन्येन सह ग्रन्थितुल्यो यस्तादात्म्यरूपाध्यासस्तदधिष्ठानत्वमेवेत्यर्थः तस्य चैतन्यस्येत्यर्थः संसारइति संसाराश्रयत्वभ्रान्तिप्रयोजक
इत्युपगमादित्यर्थः तावतैवेति उपाधेः संसाराश्रयत्वमात्रेणेत्यर्थः भीषणेन भयहेतुत्वेन तत्तत्सर्वधर्मः अभिमानो भ्रान्तिः न चावस्तुनिश्चय संसाराश्रय
त्वस्यात्मन्यारोपे अन्यथाख्यातिप्रसंग इति वाच्यं अनुभूयमानारोपस्थले आरोपाधिष्ठानयोः संसर्गस्यानिर्वचनीयस्योपगमेन तदप्रसंगादिति

सि॰ले॰ भावः एतदिति बुद्धिनिष्ठं सारस्याभासमारोपाभिप्रायेणैवेत्यर्थः बुद्धौ ध्यायंत्यामात्मा ध्यायतीव भाति तस्यामेव लेलायंत्यां चलंत्यामात्मा चलतीव न तु वस्तु
द्वि॰टी॰ तो ध्यानाश्रय इति विशदार्थः ध्यानादिग्रहणमशेषबुद्धिधर्माणामुपलक्षणार्थं अहंकारेण कर्तृत्वाद्यभेनसह विमोहितात्मा तस्याध्यासमापन्नस्तन्नात्मा
२४ त्मानमहं कर्तेति मन्यते कर्तृत्वमननमशेषसंसारमननोपलक्षणार्थं ननु बुद्धेः स्वतः संसाराश्रयत्वे चिदात्मनस्तद्भ्रांतिसिद्धसंसाराश्रयत्वमिति वि
भागाभ्युपगमे शरीरे बुद्धिभेदात्तद्धर्मव्यवस्थासिद्धावपि प्रतिशरीरमात्मभेदाभावात् तत्कृतस्यैव यस्य न व्यवस्था सिध्यतीति शंकते नवैकस्मिन्नेवेति
विचित्राणां सुखदुःखानामाश्रयभूतानि तत्तद्देहांतःकरणानि तेषामेकस्मिन्नेवात्मन्यध्यासाद्धेतोर्यत्रात्मन्याभिमानिकः सुखदुःखादिस्तस्य व्यवस्था नास्ति

अथ सर्वतादात्म्याध्यासापि ज्ञानेश्वरादवयंभीषणः स्वाभिमानवदात्मनोनर्थाश्रयत्वाभिमानोपपत्तेः एतदभिप्रायेणैव ध्यायतीव लेलायतीव अहं
कारविमूढात्मा कर्ताहमिति मन्यत इत्यादिश्रुतिस्मृतिदर्शनाच्च नन्वेकस्मिन्नेवात्मनि विचित्रसुखदुःखाश्रयतत्तद्देहांतःकरणानामध्यासादात्मा
भिमानिकसुखदुःखादिव्यवस्थैव न सिध्यतीति वाच्यं आध्यासिकतादात्म्यापन्नांतःकरणगतानेकजातस्यैव तत्कृतभेदजातस्याभिमानतत्तादात्म्य
तयात्मनोपारमार्थिकमाकृताद्दर्शनभेदेन तद्व्यवस्थोपपत्तेः एतेन सुखदुःखादीनामंतःकरणधर्मत्वेपि तदनुभवः साक्षिरूप इति तस्यैकत्वात्सुख
दुःखानुभवरूपभोगव्यवस्था कथं सिध्यतीति निरस्तं तत्तद्देहांतःकरणतादात्म्यापन्नात्तत्तद्देहांतःकरणभेदेन भेदवत एव साक्षिणस्तत्तदंतःकरणसुखदुःखा

सिध्यतीत्यर्थः एवमपीति बुद्धिधर्मव्यवस्थासिद्धावपीत्यर्थः वंधाश्रयत्वस्यैव बुद्धिगतस्य परस्परभेदाश्रयत्वस्यात्मन्यारोपाभ्युपगमात्तद्व्यवस्थेति परिहरति आ
प्रा॰१ ध्यासिकेति नन्वारोपितेन भेदेन कथं व्यवस्थेत्याशंक्य व्यवस्थापनीयस्यात्मन्यारोपितत्वात्तद्व्यवस्थापकत्वे तादृशभेदस्येत्याह यादृशमिति आत्मसाक्षिचैतन्य
योरभेदेपि भेदं कल्पयित्वा कल्पितं वंधाश्रयस्यात्मन एकत्वप्रयुक्तदोषो निरस्तः इदानीं साक्षिचैतन्यस्य सर्वशरीरेष्वेकत्वप्रयुक्तदोषमाशंक्य निराकरोति एते
नेति वक्ष्यमाणहेतुत्वेनेत्यर्थः तदनुभव इति सुखाद्यनुभव इत्यर्थः सुखीति देवदत्तस्य यः सुखानुभवः स एव चेद्यज्ञदत्तस्यापि तदा देवदत्तस्य सुखानुभवकाले त २५
मेव सुखानुभवमादाय यज्ञदत्तस्याप्यहं सुखीति भोगप्रसंग इत्यर्थः यथांतःकरणगतभेदस्यात्मन्यारोपः तथा साक्षिचैतन्यरूपसुखाद्यनुभवेपि तत्कृतभेदारो
पाभ्युपगमान्न भोगाव्यवस्थेति परिहरति तत्तद्धीति भेदेनेति तत्तदंतःकरणभेदेन साक्षिण्यारोपितेन भेदविशिष्टस्यैवेत्यर्थः ध्यानेन यत्नवानित्यं चैवरत्तोप्या

साद्भिरांपन्नः करणभेदाद्रोपेहेतुः तादात्म्यापत्त्येति सर्वशरीरेष्वात्मनपकत्वेन सुखादिव्यवस्थानस्यादिति हर्षवाधादेषेप्रसत्स्वभावानमाह अन्येति
ति एतेन कर्तुत्वेवं चाश्रयत्वेहूषयति जडस्येति अनुपपत्तेरितिवंयस्य चेतनस्य धर्मत्वप्रसिद्धिविरोधादितिभावः बुद्धेरेव कर्तृत्वं न चेतनस्य तस्य कूटस्थ
त्वादितिसांख्यमतनिराकरणं एवं कं चेतनस्यैव कर्तृत्वव्यवस्थापकस्तत्रानुरोधोक्तुस्याह कर्तेति चेतनः कर्ताभवितुमर्हतीति नयास्तस्यैव चेतनस्य कर्तृ
त्वप्रतिपादके कर्ताविज्ञानात्मा पुरुषइतिशास्त्रमर्थवद्भवति अन्यथानर्थकस्यादितिसूत्रार्थः चिदाभासइति नतु साक्षाच्चिदात्मैवतस्य कूटस्थत्वेन व
युपरिणामित्वायोगादितिभावः चिदाभासस्य वंधाश्रयत्वेपिकथं व्यवस्थासिद्धिरित्याह तस्यचेति विंवप्रतिविंवयोरभेदेपिप्रसंगतः करणप्रतिवि
वभे॰ २ वोत्तम्यतेउपाधिभेदेनतन्निरूपितप्रतिविंवानामपिकल्पितभेदाभ्युपगमात्तथाचप्रतिविंवमिथ्यात्वमतएवतस्य वंधाश्रयत्वेसामाविकेसंभवतीति
तन्मिथ्यात्वमतमाश्रितं नचेवमिति विंवप्रतिविंवयोर्भेदाणीकारइत्यर्थः सत्यस्यविंवचेतनस्य ब्रह्मभावलक्षणमोक्षाश्रयत्वेचसतीतिशेषः भुक्त्यनु

द्युनुभवत्वेनत्वव्यवस्थायामनुपपत्तेरिति अन्येतुजडस्यकर्तृत्वादिवंधाश्रयत्वानुपपत्तेः कर्ताशास्त्रार्थवत्वादितिचेतनस्यैवतदाश्रयत्व
प्रतिपादकसूत्रेणातःकरणेचिदाभासोवंधाश्रयः तस्यचचेतनस्यविंवादिनतथाप्रसंगतः करणभेदाद्धिन्नत्वाविरोधःविकर्तृकर्त्रादि
अवस्था नचेवमतस्तस्यवंधाश्रयत्वेवंधमोक्षयोर्वैयधिकरण्यापत्तिः अस्यचिदाभासस्यांतःकरणावच्छिन्नस्वरूपतः सत्यतयाभ्युपगमात्पि
रमार्थिकजीवेपरमात्मतयाकर्तृत्वाद्याश्रयचिदाभासतादात्म्याध्यासाधिष्ठानभावस्तस्यवंधइत्युपगमादित्याहुः अपरेत्वात्मेन्द्रियमनोयुक्तंभोक्ते
त्याहुर्मनीषिणइति सहकारित्वेनदेहेन्द्रियैस्तादात्म्येनमनसाचयुक्तस्य चेतनस्यभोक्तृत्वश्रवणादंतःकरणभेदेनतद्विशिष्टभेदाद्व्यवस्था

सिद्धेर्विंवस्यतावच्छिन्नचेतनस्यस्वतःसंसाराश्रयत्वाभावेपिभ्रांतिसिद्धस्यतदाश्रयत्वस्यसंभवान्नवैयधिकरण्यदोषइत्याह अन्येति चिदाभासानवंधस्य
चिदात्मस्याध्यासेचिदात्मचिदाभासयोस्तादात्म्याध्यासेहेतुमाह अध्यस्तेयेति अस्यचिदाभासस्यपारमार्थिकजीवेनाध्यस्ततयेतिसंवंधः तस्यचपरइतिवं
धः वन्ध्यारोपेहेतुरितिसुपगमादित्यर्थः यथा इन्द्रतायाध्यासाधिष्ठानतस्यवंधरूपत्वाभावान्नसुखादेरेववंधरूपत्वाच्चेतिदोषः सर्वशरीरेषुचिदात्मनपक
त्वेपितस्यकेवलस्यवंधाश्रयत्वेनोपपद्यते किंचबुद्धिविशिष्टस्यचिदात्मनस्तथाचवंधाश्रयस्यविशिष्टस्यप्रतिशरीरभेदान्नसुखदुःखादिसांकर्यमि
तिमतांतरमाह अपरेत्विति विशिष्टस्यभोक्तृत्वेमानमाह आत्मेति आत्मशब्दोदेहपरः इन्द्रतात्मानमित्यध्याहारः इतिशब्दोक्तितोयासमानार्थः ततश्चदे
हेन्द्रियांतःकरणयुक्तमात्मानंभोक्तारमाहुर्विद्वांसइत्यर्थः नतुदेहस्यविशेषणतयाभोक्तृकोटौनिवेशोनसंभवतीतिनस्यात्मनिभोगंप्रसवके

सि.ले. दकत्वघोपकरणत्वादिंद्रियाणामपि भोक्तृकोटित्वे प्राप्ते संभवति तेषामुपकरणमात्रत्वात् सत्स्वपि तेषामभावेऽपि भोगदर्शनाच्च तस्मादेहेंद्रियेभ्यस्तस्या
कि.टी. त्मनो भोक्तृत्वक्रान्तिरुपपन्नेत्याशंक्य पुनरपि हेतोः नियोगे यथायोग्यदर्शयति सहकारित्वेन चेति आत्मनि स्वकामसंकल्पादयोऽनुभूयन्ते तेच मेनायमा
३५ त्वेनक्रांतिसिद्धांतयाचकामादिमन्मनस्तात्तत्स्वविनातत्तः कामाद्याश्रयत्वानुपपत्तेस्तत्तादात्म्येन तद्विशिष्टस्य भोक्तृत्वयुक्तमित्यभिप्रायेणाह तादा
त्म्येनेति ननु बुद्धिविशिष्टात्मा केवलात्मनः सकाशाद्भिन्नो विशिष्टः केवलेन भवतीति प्रतीतेः विशिष्टवृत्ति केवलमपि योगिकभेदस्य विशेष्यवृत्ति
त्वात् यमात्तथा च विशिष्टात्मगतत्वं यस्य विशेष्यात्मन्यपि तेऽपि च तत्त्वयिति केवलचैतन्मेवं धानन्वपादेयधिकरणमन्ताद्वचस्यमिति तेनाह विशिष्टेति
विशिष्टान्तर्गतविशेष्यस्य केवलादनतिरेकादित्यर्थः अयंभावः लोके दंडविशिष्टेपुरुषे केवलपुरुषाभेदस्य प्रत्यभिज्ञायमानत्वात् तत्प्रत्यभिज्ञायांवा

नचैवंविशिष्टस्यैवं योविभुकृत्स्नमोक्ष इति वैयधिकरण्यं विशिष्टगतस्यैवंयस्य विशेष्येनान्वयाभावाद्विशिष्टस्यानतिरेकादित्याशङ्क्य इतरेण
स्त्रे केवलस्यैतन्मनःकर्तृत्वादिवृपाश्रयः स्फटिके लोहितस्यापेनातःकरणस्यतद्विशिष्टस्य वा कर्तृत्वाद्याश्रयस्य सत्त्रियानाश्चेतनेपि कर्तृ
त्वाद्युत्तरायासोपगमात् नचतस्यैकत्वाव्यवस्थानुपपत्तिः उपाधिभेदादेव तदुपपत्तेः नचात्मभेदादत्र विरुद्धधर्मव्यवस्थानयुज्यत इति वाच्य
म् एकत्वाश्रयैकोपाधिमात्रेण वृक्षे संयोगतदभावदर्शनात् तत्र पुरुषकर्णपुटोपाधिभेदेन श्रोत्रभावयुपगतस्याकाशस्य तत्र तत्र शब्दोपलंभक
त्वानुपलंभकत्वतारतम्येदेशान्तरशब्दोपलंभकत्वादेर्वैचित्र्यदर्शनाच्चेतिवदंति एकेनैवयद्याश्रयभेदादेवविरुद्धधर्मव्यवस्थापपादितीयातदावे

याभावाच्च विशिष्टान्तर्गतविशेष्यस्य केवलस्य चस्वाभाविकत्वं विशिष्टत्वाविशिष्टत्वरूपभेदेन कात्मनिकोभेदश्च कल्प्यते तथा चैतगतत्वं यस्य विशेष्या विशिष्ट४
त्वयिनः केवलात्मन्यप्यन्वयः सिद्ध इति ग्रंजसा द्वयमोत्तयोः सामानाधिकरण्यमाह इतरथेति स्फटिकेति यथालोहित अयस्मज्जपाकुसुमादेः सन्निधा
नात्तस्फटिके उपाधिगतलोहिमोपदर्शात्तद्वति विवभ्रतस्य लौहित्यान्तरस्योत्पत्तिः तथा विदात्मनि बुध्याद्यगतव्यापेतया तस्य कर्तृत्वादिवेयस्या
थ्यासात्मकस्योपगमादित्यर्थः नचबुद्ध्यादौ साहित्येणानुभूयमानस्य चिदात्मनि संसर्गमात्रात्याध्यासोपगमेन वैयधिकरण्यमाकापरिहारसंभवात्तत्र बुद्ध्या
दिनिष्ठकर्तृत्वादिसदृशोकर्तृत्वमप्यधिवेयोत्पत्तिकल्पनेनप्रामाणिकमिति वाच्यं बुद्ध्यर्गणे नारायणमजोसिवरइतिस्कन्दावबरशहितजीवस्यारायमा
त्रशाहितमल्पपरिमाणं बुद्धिगुणशाहित्तबुद्धिपरिमाणेहेतुकमित्यापादनेनतुल्यस्याथतयाकर्तृत्वादिकमपि बुद्धिधर्मसदृशमात्मनस्तदपद्यत इत्यस्या ३५
र्थस्यक्रातिमनन्तत्वेनप्रामाणिकत्वात् नचैवतस्येति कर्तृत्वाद्यध्यासाधिष्ठानस्यात्मन इत्यर्थः मलेति यस्मैतेनेदहेद्यानवयसिद्धांतेमलावाकिन्नेहृदसा

अवच्छिन्नवृत्तस्य व कास्यनिक भेदाभ्युपगमेनैवतं योगनद्भावव्यवस्थोपगमात् श्रोत्रेन्द्रियस्य हि मारभ्य न्वोपगमान्बेति वोध्यं तादेति तादृशाहोपलंभकत्वं मेहा
होपलंभकत्वे दृष्टाहोपलंभकत्वानि दृष्टाहोपलंभकत्वादिलक्षणस्यैव विश्रमदर्शनादिमर्थः यदि दृष्टांतयोरुपाधिभेदेन तदुपहितयोरात्मादिभेदव्यवस्था
पात्तदाभक्तेपि तथास्त्विमाशयेनाह एकोविति निष्कृष्ट इति अंतःकरण विशिष्टवेषान्निष्कृष्टेन तदुपहितेचिदात्मनीत्यर्थः ननु तर्हि भेदव्यवस्था
प्रयोजक इति नेत्याह प्रकल्पितेति घटादिभेदस्यापि तत्तदवस्थासाकमत्तमनत्वादिमर्थः ननु स्वाभाविकभेद एव व्यवस्थाप्रयोजकोनत्वौपाधिक इत्या
शंक्याह मणीति मुखेति मलिनदर्पणाकृतेन भेदेन श्यामत्वावदातत्वव्यवस्थासंप्रतिपत्तेः कृपाणमणिमयस्तंभादिकृतेन भेदेन वर्तुलत्वदीर्घभावादि
व्यवस्थासंप्रतिपत्तेरितिभावः न च विंबप्रतिविंबयोर्भेदस्वाभाविकस्तत्त्व भेदश्चौपाधिक इति सिद्धमिति न दृष्टान्ताव्यवस्थापि सिद्धमिति तयोरभेद एव कथं सिद्ध इति
वाच्यं तस्य प्रागेव साधितत्वादिति भावः अवच्छेदपदेऽौपाधिकभेदस्य व्यवस्थापकत्वसंप्रतिपत्तिं दर्शयति घटस्थलीति जीवानामुपाधिभेदात्वाऔपाधिक

तनेति कृष्णपटवोपाधिवशाद्भेदकल्पनात्त प्रकल्पिताश्रयभेद एव व्यवस्थाप्रयोजक इति कोप्यसंप्रतिपत्तेः मणिमुकरकृपाणाद्युपाधिकल्पित
भेदेन मुखेष्वश्यामावदातवर्तुलदीर्घभावादिधर्माणामेव स्वल्पपट्टभौपाधिकल्पितेन भेदेन दीपे पाश्चात्यपौरस्त्यादिधर्माणां च व्यवस्था संप्रतिप
त्तेरित्याह एवमुपाधिवशाद्व्यवस्थोपपादने संभावितेजीवानां परस्परस्य स्वदुःखानुसंधानप्रयोजक उपाधिः क इति निरूपणीयं अत्रैके विद
ऋ भोगायतनाभेदस्तद्भेदाववनुसंधानाननुसंधानप्रयोजकउपाधिशरीरावच्छिन्नवेदनायास्तदवच्छिन्नेनानुसंधानाच्चरणावच्छिन्नवेदना
याहस्तावच्छिन्नेनाननुसंधानाच्च हस्तावच्छिन्नोहं पादावच्छिन्नवेदनामनुभवामीत्यप्रत्ययात् कथं तर्हि चरणत्वग्रकंटकोद्धरणापहस्तव्यापारः

भेदस्तावत्तु दुःखादिव्यवस्थासिद्धौ तेषां वस्तुतः परस्परभेदे प्रमाणाभावादेकस्मान्भेदः सिद्धमिति न सिद्धौ च जीवाभिन्ने ति व्युत्पंचेव ब्रह्मणि वेदां
तसमन्वयः सिद्ध इति प्रतिपादितं संप्रतिविचारांतरमारभते एवमिति उक्तप्रकारेणेत्यर्थः क इति अनुसंधानाननुसंधानयोः किं भोगायतनाभेद
तद्भेदौ प्रयोजकौ किं वा विशिष्टभोगायतनाभेदतद्भेदौ अथवा शरीराभेदतद्भेदौ अंतःकरणाभेदतद्भेदौ वा अज्ञानाभेदतद्भेदौ वा इति प्रश्नप्रतिव
चनं निरूपणीयमित्यर्थः तत्राद्यपक्षमादाय प्रतिवचनं निरूपयति अत्रैके चिदाहुरिति तत्रान्वयव्यतिरेकौ प्रमाणयति शरीरावच्छिन्नेति भोगा २५
यतनं स्वावच्छेदकतासम्बन्धेन भोगाश्रयः स च देहस्तदवयवहस्तादिश्च भवतीत्याशयेनाह चरणेति अननुसंधानमेव दर्शयति हस्तावच्छिन्नेति ह

सि॰ ले॰
टि॰ टी॰
३९

स्तावच्छिन्नात्मनः पादावच्छिन्नात्मगतदुःखानुसंधानत्वाभावे वा पर्यंकेऽपि कथं न हीति अयं हस्तव्यापारो हस्तावच्छिन्नस्यानुसंधानान्न भवति किं तु तदनु
संधानादिति संबंधः तस्य शरीरावच्छिन्नस्य यच्चरणावच्छिन्नगतवेदनानुसंधानं तस्मादित्यर्थः ननु चरणावच्छिन्नगतवेदना कथं शरीरावच्छिन्नेनानुसंधी
यते अवयवावयविनोर्भेदात् भेदेप्यनुसंधाने णमे चैत्रशरीरावच्छिन्ना वेदना मैत्रशरीरावच्छिन्नेनानुसंधीयेत भेदाविशेषात् तथा च चैत्रशरीरलग्नकं
टकोद्धाराय मैत्रशरीरस्य स्वाभाविको व्यापारः प्रसज्येतेत्यत आह अवयवावयविनोरिति अवयवानां परस्परभेदेऽपि शरीरतदवयवयोस्तादात्म्योपगमादित्यर्थः
एवं चेति शरीरावच्छिन्नस्य चरणावच्छिन्नवेदनानुसंधाने शरीरचरणयोस्तादात्म्यस्य नियामकत्वे सतीत्यर्थः ननु हस्तावच्छिन्नस्य चरणावच्छिन्न

नायं हस्तव्यापारो हस्तावच्छिन्नस्यानुसंधानात् किं त्ववयवावयविनोश्चरणशरीरयोरभेदसत्त्वेन चरणावच्छिन्नवेदना शरीरावच्छिन्नेनाहं चर
णे वेदनावानित्यनुसन्धीयते इति तदनुसंधानादेव चैत्रमैत्रशरीरयोरभेदाभावाच्चैत्रशरीरावच्छिन्नवेदना मैत्रशरीरावच्छिन्नेन नानुसंधीय
ते नाप्युभयशरीरानुस्यूतावयवी तदवच्छिन्नेनानुसंधीयत उभयानुस्यूतस्यावयविनो भोगायतनस्याभावादिति न चैत्रशरीरलग्नकंटको
द्धाराय मैत्रशरीरव्यापारप्रसंग इति अयमेव विशिष्टोपाधिभेदो नानुसंधाने प्रयोजकः तथा च हस्तावच्छिन्नस्य चरणावच्छिन्नवेदनानुसंधाना
भ्युपगमेऽपि न दोषः न चैवं सति गर्भस्थस्य मातृसंबंधाद्यनुसंधानप्रसंगः एकस्मिन्नवयविन्यवयवभावेनानुप्रविष्टयोर्विशिष्टदेहनाव

गतवेदनानुसंधानत्वाभावेऽपि चरणलग्नकंटकोद्धाराय हस्तव्यापारवन्मैत्रशरीरावच्छिन्नस्य चैत्रशरीरावच्छिन्नगतवेदनानुसंधानत्वाभावेऽपि चैत्रशरीरल
ग्नकंटकोद्धाराय मैत्रशरीरव्यापारप्रसंगः परिहर्तुं न शक्यते तत्राह नापीति चैत्रमैत्रशरीरद्वयानुस्यूतेनेत्यर्थः चैत्रशरीरावच्छिन्नवेदनाऽभयानुस्यूताव
यवितरावच्छिन्नेनापि नानुसंधीयत इति संबंधः अतो न दृष्टान्तसाम्यमिति भावः चरणलग्नकंटकोद्धाराय हस्तव्यापारानुरोधेन हस्तावच्छिन्नस्यैव चरणाव
च्छिन्नवेदनानुसंधानमप्युपपद्यते न तु तथा सति भोगायतनभेदस्यानुसंधानप्रयोजकत्वं न स्यात् चरणहस्तभेदे व्यभिचारादिति वाच्यं तदपरत्वाय विशेषणमुप
नोपपद्यते इति मत्वा द्वितीयमुपाधिं निरूपयति अनेनेति उपाधिपदं भोगायतनपरं न दोष इति भोगायतनयोर्हस्तचरणयोर्भेदसत्त्वेऽपि तयोर्विशिष्टत्वा
भावेन विशिष्टभोगायतनभेदस्यानुसंधानप्रयोजकस्याभावान्न तत्र व्यभिचार इत्यर्थः न चैवं सतीति विशिष्टत्वविशेषणदाने सतीत्यर्थः गर्भस्थ ३९
जीवस्य यद्भोगायतनं तस्य मातृशरीरस्य च विश्लेषाभावादिति भावः विशिष्टपदार्थानभिज्ञस्येदं चोद्यमिति परिहरति एकास्मिन्निति तयोस्तादात्म्यादिति एकास्मिन्

वपविनिमुवयवभावेनाननुभविष्टत्वादित्यर्थः नयावविशिष्टोपाधिभेदसत्त्वात्गर्भस्थजीवस्य मातृस्मृतानुसंधानप्रसंग इति भावः निहत्यानुसंधा
नप्रयोजकस्यव्यभिचारं शंकते नवेति दोहदः वाहुदंडाः कवंधाः छिन्नांगिसकादेतादृशदेहभोच अग्रवचने चैत्रमैत्रशरीरयोरिव विशिष्टयोः कथं
चिरसोर्भेदेसमापि शिरोवच्छिन्नस्य कवंधावच्छिन्नमतयोः स्मृत्यानुसंधानत्वमवगम्यतइत्यव्यभिचारइत्यर्थः तत्रानुसंधानमपेक्ष्य चैत्रमैत्रशरीरवैलक्षण्येन
समाधत्ते तत्रापीति चरत्वादिति सर्वमनुभविष्टत्वादित्यर्थः अस्य वचनस्य सार्थमानताभावाद्व्यभिचारशंकेवाशुरुमाशयेनाभ्युपगमं परिमजति
शिरश्छेदानंतरमिति कवंधाप्यपिपानयति किमुताग्रइति योगानामुक्तातातिवाघंग्रंशसमेन वचनमित्यर्थः नत्वशिरश्छेदानंतरमपि प्रकृतानुसंधानादिकं
योगमाहात्म्यात योमहिम्नावावृद्धानमहिम्नाकेषांचित्संभवति ततो विद्यमानार्थकमेवेदमित्याशंकायामनुसंधानमपेक्ष्य व्यभिचारं परिहरति नाह

वंदीनत्वात् मातृगर्भशरीरयोस्तथात्वादित्याहः नचोयदापुष्पदोर्दंडाः पतिनन्तशिरोहिभिः पयपतः पातपतिस्म कवंधाय्यपरीनिदेतिमहाभार
तोक्त्वाविशिष्ट एवानुसंधानमवगतमिति वाच्यं तत्रापि शिरः कवंधयोरेकस्मिन्नवयविसमवायभावेनानुभविष्टत्वात् शिरश्छेदानंतरमकर्म
रणयोरन्यतरावयवभावेन दृष्टविरुद्धस्मृत्यादशावचनस्यैकेपुतिकमायेन युद्धोत्साहातिशयप्रदीसापरत्वात् नादृगभावयुक्तत्रुस्वविशेषपरा
त्वेन भूतार्थवादत्वेपि निकृतस्योत्सर्गतोनत्वनुसंधानं नत्वविद्यातान्त्र अतएवाकवद्यमाणापदे शुद्धोगिनोजातिस्मरणं च शरीरांतरहृता
नानुसंधानेन दोषप्रसक्तिः अपरेतु शरीरैक्याभेदावनुसंधानतदभावप्रयोजकोपाधी बाल्यमावतरानुभूतयोरनुसंधानतदभावदर्शनः नत्ववा
ल्ययौवनयोरपि शरीरभेदः शंकनीयः प्रत्यभिज्ञानात् नचपरिमाणभेदेन तद्भेदावगमः एकस्मिन्नहृदेमलायभेदनेवकालभेदेनएकस्मिन्न

गिति विशिष्टभोगायतनभेदोनानुसंधानप्रयोजकः उत्सर्गतस्तथाभ्युपगमाज्जात्तादतानुसंधानस्थलस्य तद्दृवपवादस्थलत्वाभ्युपगमात् तत्रव्यभिचारोनदोषा
येति भावः अतएवेति उत्सर्गतस्तथाभ्युपगमादेवेत्यर्थः नदोषप्रसक्तिरिति भोगायतनभेदस्यैवानुसंधानप्रयोजकत्वनियमाभ्युपगमेपियोगिनो जाति
स्मरणेपुत्रचभोगायतनभेदादिप्रयोजकचतुष्टयस्य सत्त्वेप्यननुसंधानाभावेनव्यभिचारस्यपदोषप्रसक्तिर्नभवेदित्यर्थः अदृष्टविशेषासहकृतस्यभो
गायतनभेदादेरनुसंधानप्रयोजकत्वस्यविवक्षितत्वात् त्वयोगपादिषुव्यभिचारइतितात्पर्यं तत्तोयपदस्मादायप्रतिवचनं निरूपयति अपरेत्विति
तन्मतमाह बाल्येति बाल्येत्यनुभूतस्यवार्धकेत्वनुसन्धानं स्मर्यते बाल्यवार्धकयोः शरीराभेदानंतरजन्मदेवमवतारानुभूतस्यास्मिन्जन्मन्यनु
सन्धानेन दृश्यतइत्यर्थः शंकनीयइति परिमाणभेदादितिभावः बाल्याद्यवस्थाभेदेपितदेवेदंशरीरमितिप्रत्यभिज्ञादर्शनात् शरीरभेदइति परि
हरति प्रत्यभिज्ञानादिति शंकावीजमनूद्यान्यथासिद्धमाह नचेत्यादिना आरंभवादमाश्रित्य शंकते नान्विति नष्टेवासिद्धमिति पूर्वसिद्धेभ्यो

सि॰ले॰
टि॰टी॰
३२

देहपरिमाणत्वायोगात् पूर्वसिद्धशरीरनाशे सर्वैस्तदवयवैरुपचितावयवैश्च मिलित्वा शरीरान्तरं द्व्यणुकत्र्यणुकादिक्रमेणारब्धव्यमिति परिमाणभेदे शरीरभेदे
आवश्यक इत्यत आह मिलित्वा च शरीरत्वसामान्यविषया भविष्यतीति चेत् समस्तमयूकत्वविकासविशेषणसमस्तमयपर्यन्ततारूपो बोध्यः तेन स्वतन्त्रदीपदीप्तिप
दे उपादानोपादेययोः सामानाधिकरण्यानुभवादिशरादिपदार्थः अन्तर्गुणोपि न इति द्व्यणुकादिक्रमेण स्थूलावयवोत्पत्तिपक्षो विलम्बापत्तेः समस्तमयत्वा
यत्तु भवविरोधात् सर्वमाणुसंयोगनाशक्रमेण प्रमादिनाशोपि विलम्बापत्तेरारम्भवादे उपादानोपादेययोः सत्ताभेदानभ्युपगमेन सामानाधिकरण्यानु
भवविरोधाच्च तत्रादस्मत्पक्षे घटमेवेत्यर्थः अवयवोपचयक्रमेण शरीरान्तरानभ्युपगमे कथमेकस्मिन् शरीरे विरुद्धपरिमाणयोग इत्यत आह विवर्तवा
देचेति तदर्थपक्षमादाय प्रतिक्वनददाति इतरोविति प्रागिति स्वादेः भवादिव्यवस्थोपपादनप्रश्न इत्यर्थः पंचमपक्षमाह केचिदिति प्रतिजीवम
ज्ञानभेदेऽप्रमाणं ब्रह्मलक्षणविचारावसरे दर्शितं एवमेकात्म्यवादे व्यवस्थामुपपाद्य ज्ञानानात्ववादे व्यवस्थानुपपत्तिमाह अन्येति अन्यो ब्रह्मणो जीवः

कपरिमाणत्वयोपपत्तेः न च अवयवोपचयमन्तरेण न परिमाणभेदः अवयवानामपक्षयादापन्नं ततो न पूर्वसिद्धशरीरं प्रतिपन्नं तत इति परिमाणभेदे शरी
रभेदावश्यक इति चेन्न प्रदीपप्रभायाः क्रियासमस्तमयसौयोद्भवापि प्रभामण्डलविकाससंकोचयोर्न समस्तमयतन्तवोपचायन्त्र रोधिनः परमा
णुप्रक्रियया आरम्भवादस्यानभ्युपगमात् विवर्तवादे चैन्द्रजालिकदर्शितशरीरवदेवावयवोपचयमायया शरीरस्य वृद्ध्युपपत्तेरित्यभिवदन्ति इ
तेरत्वेनः करणाभेद तन्नेदाभ्यामनुसंधानानुसंधानव्यवस्थामापादयति अपि चैवमुक्तः माणुपपादितः केचित्तु ज्ञानानि जीवभेदोपाधिभूतानि
ना नातिस्वीकृत्य तन्नेदभेदाभ्यामनुसंधानाननुसंधानव्यवस्थामालपन्ति अत्र केचिद्देशोनानात्ववदेशादिस्वधिकरणे दृष्टानियमादभिसंध्यादि
त्यपि चैवं प्रदेयादिति चेत्तत्र भावादिनिरूक्तत्वाप्यरीतिमनुसृत्यैकस्मिन्नात्मन्युपाधिभेदेन व्यवस्थानुपपत्तिमेकरूप्भुगादिशरीरमात्मभेदवादेऽपि च

कृतिषु जीवब्रह्मणोर्नानात्वव्यपदेशात् न च ब्रह्मनिरंशस्य कथं जीवोंश इति वाच्यं अवच्छिन्नाकाशो महाकाशस्येव यथांशस्तथावच्छिन्नचैतन्यमनवच्छिन्न
चैतन्यस्य ब्रह्मणोंश इत्युपगमादिति सूत्रभाष्यार्थः अदृष्टानियमादित्यादिसूत्रद्वयस्याभ्यामानं भविष्यति कणभुगादिभिर्हि प्रतिशरीरमात्मभेदा
भावे व्यवस्थानसंभवतीत्यात्मभेद आश्रितः न चात्मनैकत्वेप्युपाधिकृता व्यवस्था संभवतीति तत्रैदाश्रयणे तेषां वैयर्थ्यमिति वाच्यं उपाधिकृतव्यवस्थायाः
क्लिष्टत्वात् अतो जनस्य व्यवस्थासिद्धये आत्मभेदस्तैराश्रितः तत्तदेतन्मतं दूषयति कणभुगादिरीत्येति व्यवस्थेति व्यवस्थां जन्यभावस्य तत्त्वमाहुरित्यर्थः
वाचेत्यस्य तथाच नाम सामर्थ्यः कण्टकवेधादिसामादि पर तत्र घातादिसंभवतीति यात्मसाविशेषं समाधारणमसिद्धमिति दूषयति सर्वात्मसन्निधाविति ३२
अदृष्टानियमादिति सूत्रमवतारयति यददृष्टेति स्वंचेवाचष्टे अदृष्टस्यापीति अनियमं साधयति यदाहीति तदामैवमात्मभिः प्रत्यग्जनत्वस्य ततः कि

तेनाह कथमिति आत्ममनःसंयोगरूपासमवायिकारणस्य समवायिकारणरूपात्मनस्साधारणत्वादित्यर्थः संयोगमात्रेति मात्रपदमभिसंध्यादिसाधार
णस्य व्यवच्छेदार्थं न तु समवायिकारणस्य तद्व्यवच्छेदार्थमिति बोध्यम् अभिसंधिः फलेच्छा आदिपदेन कृतिजनकस्य कार्यताज्ञानचिकीर्षयोः संग्रहः अभिसं
ध्यादि स्वार्थिं चैवमिति स्वैवं योजना तु परस्मात् नेमादिना मनसो साधारण्यमाशंक्य निराकरोति न तु स्वकीयेति तथा च तत्संयोगासमवायिकारणा
के तदेवं साधारणं भविष्यतीति भावः प्रदेशादिति चेत्रा तभावादिति स्वत्वं वाचकादाणपदं प्रदेशाकृतत्वं स्वस्यामाशंक्य निराकरोति न त्वात्मनामिति व
यः स्वत्वं तु स्वादितदात्मसाधारणं तत्प्रदेशविशेषावच्छेद्यत्वेन चेदिति सोऽवं सांकाभावादित्यर्थः एकस्मिन् शरीरे एकस्यैवात्मनः प्रदेशो नानात्मनां
मिति नियमासिद्ध इति दूषयति न यस्मिन्नित्यादि अदृष्टस्यात्मनो वृत्तित्वादात्मनो यः प्रदेशोऽदृष्टाश्रयः स एव चात्र प्रदेशावच्छेद्यः तथा च यस्मिन्ना
वस्यानुपपत्तितौल्यमाह तथा हि चैत्रचरणलग्नकंटकेन चैत्रस्य वेदनोत्पादसमये मैत्रस्याप्यात्मनो कुतो वेदना नोत्पद्येत सर्वात्मनां सर्वगतत्वात् तथा चैत्र
शरीरान्तर्भावाविशेषात् न च यस्य शरीरे कंटकवेधादिस्तस्यैव वेदना नान्येषामिति वाच्यं स्वात्मसर्वात्मसन्निधानेऽनुत्पद्यमानशरीरे कस्यचिदेव नान्येषामिति
नियन्तुमशक्यत्वात् न च यददृष्टोत्पादिते कण्टकीभवति तस्यैवेति नियमः अदृष्टस्यापि यमासिद्धेः यदाहितदृष्टोत्पादनापेक्षेन चिदात्मना संयुज्य
ते मनः संकल्पेन एवं तर्हीमेरपि कर्यकारणसाधारणेऽपि कश्चिद्देवतदृष्टस्य तन्नो तन्नु मनः संयोगमात्रसाधारणेऽपि अहमिदं फलेनाभुञ्जामि संयुक्त
स्थिरदृष्टस्यादृकक्रमात्तु हलकृतिरिमेवमादि अवास्थितमिति तत्प्रवाहदृष्टनियमो भविष्यतीति चेत् न अभिसंध्यादेरनामपि साधारणमनःसं
योगादिनिष्पाद्यतया अव्यवस्थितसिद्धेः न तु स्वकीयमनःसंयोगो भिन्नसंध्यादिकारणमिति मनःसंयोगस्यासाधारणेऽभविष्यतीति चेन्न निःसर्वा
त्मसंयुक्तमनः कस्याचिदेवस्वमितिनियन्तुमशक्यत्वात् न चादृष्टविशेषाद्धात्मविशेषणामनसः स्वस्वामिभावसिद्धिः तस्याप्यदृष्टस्य एवं चैवमव्यवस्थि
तादिप्रदेशो चैत्रशरीरस्थितं न चैत्रस्य सुखाद्युत्पत्तेर्न भवति तस्मिन्नेव प्रदेशो चैत्रशरीरावच्छेदकक्रमेणानेतरं मैत्रशरीरमागत्यास्थितं तन्मैत्रस्य सुखाद्युत
नेदृश्यते अत एव तत्र पश्चादागतमैत्रशरीरे चैत्रमैत्रात्मप्रदेशयोरदृष्टाश्रययोः प्रवेशात् तत्कुरीरे चैत्रमैत्रयोरुभयोरपि भोगप्रसंगः न च पूर्वशरीराप
क्रमणसमये तत्कुरीरगतं स्वचैत्रात्मप्रदेशस्याप्यपक्रमणमेवास्त्विति वाच्यं प्रदेशाच्चात्मनः स्थिरत्वेन प्रदेशस्य चलनानुपपत्तेरेवमेतेषामप्या
त्मनां प्रदेशानामभावे प्रफलभोगसांकर्यमस्तु तस्मादिति आत्मनो व्यापकत्वाभ्युपगमादित्यर्थः नन्वात्मैकमतः इत्यत्रात्मानामनेकत्वेऽपि कथंचिद्व्यवस्थास्त्वी
क्रियत इत्याशंक्याह स्फुरतीति आत्मैकत्वस्फुरतीत्यर्थः तत्रैवेति एकस्मिन्नेवात्मनीत्यर्थः जीवात्मत्वगमकस्फुरतिफलत्वं वक्ष्यमाणभेदेन पुनर्जीवब्रह्माभेदमादि
पतिसंततिति निराकरोति नैवमिति अविद्यानस्यैति यत्पुनरुक्तवतात्मादिभेदेऽप्यत्र समर्थः जीवस्याणुत्वेऽपि सर्वशरीरव्यापिसुखादिकसंभवती
ति शंकते यद्वेति कल्पनाप्रकारस्तेषामणुत्वेऽपीत्यादिना भविष्यति आदौ तस्याणुत्वमानमाह उत्क्रांतीति तदुत्क्रामतस्त्वित्यादि स्क्रान्तेस्तत्क्रामा

सि॰ ले॰
टि॰ टी॰
३८

ऽदिकं सूच्यत इति भावः ननु मध्यमपरिमाणस्य जीवस्योत्क्रान्त्याद्यनुपपन्नमा चेदणुत्वं कल्प्यते तर्हि जीवस्य ब्रह्मभावश्रवणानुपपत्त्या तस्य विभुत्वं क
ल्प्येत ऋतं राधी पते रविशेषादित्याशंक्याह गुणेहीति यमात्मानमेतौ सिनीतः बध्नीतः केनेत्याह पुण्यं च पापं च पञ्चात्मा ग्रहीत्यर्थः वा
लः केशाग्रः शततमभागकल्पितस्य च भोगो जीवः स विज्ञेय इति वाक्यमादिपदेन गृह्यते वालाग्रस्य यः शततमो भागस्तस्यापि शततया विभक्तस्य यो भागस्तत्तुल्य
परिमाणो जीव इत्यर्थः जीवस्याणुत्वसाधकप्रमाणानुसारेण मर्वाचीनकल्पनाप्रकारं दर्शयति तेषामणुत्वेपीति यथा प्रभायाः स्वाश्रयप्रदीपं वितत्य
प्रदेशान्तरव्यापित्वं तथा ज्ञानादीनां स्वाश्रयमणुमात्मानं विहाय कांश्चित्स्वशरीरव्याप्यत्वं कल्प्यत इत्यर्थः ननु आत्मनः शरीरव्यापित्वे सति फणपत्त्वं सुखदुः
खमयत्वाद्ययुगपदनुभूयमानानां तत्तदवच्छेदकभेदेन संभवतीति तस्याणुत्वे तत्कथं तद्यौगपद्यं निर्वाह इत्यत आह द्रोणामिति अङ्गतेष्वपि नन्वेतरजीवाणोरेषु तिष्ठे
वः सुखः सम्भूतः कायव्यूहगतेष्वपि नन्वेतस्मादपि जीवाणोः स्थितियोगः भोगानां भुज्यमानसुखदुःखादीनां वैचित्र्यं कायव्यूहानां विचित्रत्वगुणादिनेकशरीराधिष्ठा ग५
नसिद्धेः नन्वात्मनो विभुत्वेपि तेषां प्रदेशविशेषाभावे एवं प्रभाजन्यसाक्षात्कारणं चैत्रशरीरे तत्प्रदेशविशेषाभावात्सुखदुःखादिव्यवस्था भविष्यतीति
चैत्र यज्ञदत्तप्रदेशो चैत्रः सुखाद्यनुभूयते सर्वात्मदेशादपक्रान्तस्तस्मिन्नेव मैत्रे समागते तस्यापि तत्र सुखदुःखादिदर्शनेन शरीरान्तरे स्वान्तरप्रदे
विशेष शोस्याप्यन्तर्भावात्तस्मादात्मभेदेपि व्यवस्थानुपपादकत्वं चित् तदुपपादनेन च स्मत्तृणोपाद्याहोह्यवशात्मैक्यमङ्गीकृत्य तत्रैव तदुपपादनेन के
हेयकर्मिति संयुक्ते सर्वगुणप्रवाहादिविभुत्वे व्यवस्थानसवचा नैवमात्मनामणुत्वे कुत्रचित्सर्वाङ्गीणसुखोदयस्य केशशिरश्चरणाद्यधिष्ठा
नस्य वानुपपत्तेः यद्वार्वाचीनकल्पने उक्तां निगमयति प्रवणान्यथानुपपन्नाप्रमाणं वेष्यात्मा य एवा एते सिनीतः पुण्यं च पापं च वालाग्र
शतभागस्येत्यादिकं सिद्धसादादणुत्वश्रवणे न चाणवो जीवास्तेषामणुत्वेपि ज्ञानसुखोदयानां प्रदीपप्रभामात्रेनाप्रपातिरिक्तप्रदेशवि
ष्ठानव्यापित्वं तथा सर्वाङ्गीणसुखाद्युपलम्भः द्रोणं तत्रस्य ते भोगमित्यादिस्वरूपेणैव जीवानामेकवत्त्वात् करशिरश्चरणाद्यनुगते शुते
सुखदुःखत्वादियौगपद्यं कायव्यूहगतेष्वपि तेषु योगिनां भोगवैचित्र्यं चेति न काप्यनुपपत्तिः एवं च जीवानामणुत्वेनाप्यं करात सुखदुःखा
दिव्यवस्था विभोरीश्वरादभेदश्चोक्तौ सूत्रोक्तं मवैतदीपिकायां एवमपि कथं व्यवस्थासिद्धिः चैत्रस्य पादे वेदना शिरसि सुखमिति सा पाभेद
तंच योगिनां सर्वाङ्गे संभवतीत्यर्थः जीवाणुत्वपक्षे न केवलमनुपपत्तिसामान्याभावः किं तु लाभोप्यस्तीत्याह एवं चेति जीवस्याणुत्वे सतीत्यर्थः अ
सङ्करादिति एकस्मिन्शरीरे सर्वेषां जीवानां प्रवेशाभावादित्यर्थः विभोरिति जीवस्यापि विभुत्वे तल्लक्षणभेदाभावादीश्वराभेदो नासिद्ध्येत अणु ३८
त्वे तु न नित्यवैलक्षण्यादभेदः सुगम इति भावः अर्वाचीनकल्पनां दूषयति अत्रोक्तमिति एवमपीति जीवस्याणुत्वसाधनत्वे कल्पनेपीत्यर्थः जीवस्य
स्वापगतसुखाद्यनुसंधानं जीवान्तरगतसुखाद्यननुसंधानं चाभ्युपगच्छता तयोर्भेदो न त्वनुसंधानप्रयोजकः अभेदस्य तदनुसंधानप्रयोजकः

इति वक्तव्यं तत्रानुसंधानप्रयोजकभेदाभेदमात्रं वा शुद्धभेदो वा आद्ये चैत्रः स्वांशागतसुखादिकं नानुसंधत्ते अनुसंधानप्रयोजकभेदस्य तत्राप्यादि
सत्त्वपि भेदे स्वांशागतमनुसंधत्ते न तु चैत्रो मैत्रगतसुखादिकमप्यनुसंदध्यादिति स्यात् चैत्रस्येति अंशांशिनोरनुसंधानप्रयोजकभेदासिद्धिमाशंकते
सायुज्यमिति कायव्यूहेति विपक्षेति अंशिनः सकाशात् द्विभागं प्राप्येत्यर्थः स्वमेवेति योगिनो निजशरीरादन्यत्र कायव्यूहे इत्यर्थः तयोर्भेदो न स्वाभिः सा
धनीयः स्यादित्याशयेनाह अंशांशिनोरिति ननु भेदमात्रमननुसंधानप्रयोजकं तथा नेष्यते येन जीवः स्वांशागतमपि सुखादिकं नानुसंदध्यात् यद्यनुसंदध्या
त् तदा जीवान्तरगतमपि तदनुसंदध्यादिति दोषः प्रसज्येत किं तु विशेषतो भेद इति द्वितीयपक्षं [illegible] नेच्छतीति आद्ये कल्पे जीवेश्वरभेदस्यांशांशिभावसहचारि
तत्वेन शुद्धभेदत्वाभावात् तयोः परस्परसुखाद्यनुसंधानं स्यादित्याह नाद्य इति जीवेश्वरयोरंशांशिभावे मानमाह अंश इति परमस्य परमात्मनः जीवल
क्षणो लोके जीवलोकः ननु भेदस्यांशांशिभावमात्रसहचरितत्वे शुद्धत्वं न भवति किंतु मुख्यांशांशिभावासहचरितत्वं जीवेश्वरयोरंशांशित्वं तु न मुख्य

गतसुखदुःखानुभववन्मैत्रगतसुखदुःखानुसंधानस्यापि दुर्वारत्वात् अविशेषो हि चैत्रजीवात्तदंशयोर्मैत्रस्य च भेदः कायव्यूहस्थले विपक्षत्वा
त्रसंसरणसमर्थानामयानां जीवाद्येदावयवभावादंशांशिनोस्तथाभेदाभेदाभ्युपगमात् न शुद्धभेदो नानुसंधानप्रयोजक इति वाच्यं शुद्धत्वं
हि भेदस्यांशांशिभावासहचरितत्वमभेदासहचरितत्वं वा स्यात् नाद्यः अंशांशित्वेन परस्परमन्वयो जीवलोके अंशो नानाव्यपदेशादित्यादिश्रुति
स्मृतिसिद्धजीवस्य ब्रह्मांशत्वप्रतिपादनेन ब्रह्मजीवयोर्भोगसांकर्यप्रसंगात् ननु जीवाश्रयानां जीवप्रतीवजीवस्य ब्रह्मप्रतिनेयत्वे किंतु चेन्मुवि
न्यस्य गुहादिवत् सान्तानामिति वक्तारः प्रपत्स्यते ततो मुख्यत्वमात्रमौपचारिकांशत्वमिति चेत् किं तदेतद्व्यतिरेकेण मुख्यमंशत्वं जीवानां जीव
प्रति यदत्रानुसंधानप्रयोजकं शरीरेति निवेशपतेन तावत्संप्रति तत्त्वमाभिवारंभकत्वं जीवस्यानादित्वात् नापि महाकाशंप्रति घटाकाशादे
नामिव प्रदेशत्वं टंकच्छिन्नपाषाणशकलादीनामिव अवयवत्वं वा अणुत्वेन निःप्रदेशत्वान् अवच्छेद्यत्वाच्च भिन्नाभिन्नद्रव्यत्वं मुख्यमभिमतमिति चेन्न
तथा सति जीवेश्वरयोर्जीवांशानां च भोगसांकर्यप्रसंगात् स्वतो भिन्नानां तेषां चेतनत्वादिनाभेदस्यापि विद्यमानत्वात् सम्मतसम्मतं हि नोभेदाभे

मतस्तयोर्भेदे मुख्यांशांशिभावासहचरितत्वरूपशुद्धत्वस्य सत्त्वात् नोक्तदोष इति शंकते नन्विति जीवं प्रतीति तथा च जीवतदंशयोर्भेदस्य मुख्यांशांशिभाव
सहचरितत्वस्य सत्त्वेन तदसहचरितत्वरूपशुद्धत्वाभावादननुसंधानोपपत्तिरिति भावः नांशत्वमित्यनेनैतरमुख्यमिति शेषः कोऽसाविति स्वाह यस्य मुख्यांशां
शिभावासहचरितभेदो ननुसंधानप्रयोजकः स एव मुख्यांशांशिभावो दुर्निरूप इत्याह किंतदिति यन्मुख्यमंशत्वमननुसंधानप्रयोजकं शरीरेति वेषपते तदेतद्व्य
तिरेकेण किमिति योजना मुख्यमंशत्वमारंभकावयवत्वं वा प्रदेशत्वं वा अवच्छेदत्वं वा भिन्नाभिन्नद्रव्यत्वं वेति किंशब्दार्थः तत्राद्यं निराकरोति न तावदिति ।
द्वितीयं तृतीयं क्रमेण निराकरोति नापीत्यादिना जीवस्याणुत्वेन प्रदेशासंभवादणुत्वेनैव देहे धीभावायोग्यत्वाच्चेत्यर्थः चतुर्थं शंकते भिन्ना
भिन्नेति जीवांशानां जीवेन सह भिन्नाभिन्नद्रव्यत्वं मुख्यमंशत्वमभिमतं तदेव चाननुसंधानप्रयोजकं शरीरेति वेषपते तथा च भिन्नाभिन्नद्रव्यत्वा

सि॰ ले॰ सहचरितभेदः शुद्धभेदः सत्वानुसंधानप्रयोजकइतिनिष्कर्षः नन्वदूषणमाह तथास्तीति जीवेश्वरयोस्तथाभिन्नाभिन्नद्रव्यत्वाभ्युपगमात् तयोर्भेदः शु
टि॰ टी॰ द्धभेदोनभवति तथाजीवानामप्यपरस्परंभिन्नाभिन्नद्रव्यत्वस्यस्वीकारात्तेषांभेदोपिशुद्धभेदोनभवति तथाचानुसन्धानप्रयोजकाभावाज्जीवेश्व
३९ रयोर्जीवानांचभोगसांकर्यप्रसंगइत्यर्थः चेतनत्वादिनेति सत्वद्रव्यत्वसंयुक्तार्थमादिपदं दूषणान्तरमाह समष्टेरिति समष्टेर्व्यष्टिसमष्टिनाञ्चपरस्परमभि
न्नत्वेसत्यभिन्नत्वमंगीकर्तव्यं तत्वमतेसमष्टिनामपिपरस्परमभिन्नत्वमावश्यकं तथाचोक्तवादाद्वैकुण्ठमिलितानांजीवानामभिन्नानांपरस्परमभिन्नद्रव्यत्वस्या
पित्वात्तेषांपरस्परंभेदः शुद्धभेदोनभवति भिन्नाभिन्नद्रव्यत्वसहचरितत्वात् तथाचपरस्परंतेषांमनुसन्धानप्रसंगइत्यर्थः ननुसमष्टितासम ग॰
ष्टिताभिन्नत्वेपिनतेषांपरस्परमभिन्नत्वमस्तिन्मतेऽस्तिमुक्तोनोक्तदोषइत्याशंक्याह स्वाभिन्नेति स्वयमेकःसमष्टिरेवदर्शनदभिन्नःसमष्टित्वदभिन्नोपन्न
दत्तस्तेनसहस्वस्यापिद्वैवदत्तस्याप्यभेदस्यतत्वमतेदुर्वारत्वात् तथातदभिन्नाभिन्नस्यतदभिन्नत्वानियमाभ्युपगमादित्यर्थः परंप्रत्युक्तनियमाभ्युपगमे
साधयतिपद्दीत्यादिना गुणगुणिनोर्जातिव्यक्त्योश्चाभेदवादिनेप्रतिहूपणपयोजीवाणुत्वादिद्वयोर्यदीत्यादिः गुणगुणिनोरभेदमंगीकृत्ययदि
योगविभागाद्वित्वादेरनेकाश्रितत्वमभ्युपगम्यतेतथाजातिव्यक्त्योरभेदमुपेत्यजातेरनेकाश्रितत्वमभ्युपगम्येततदापटादेरपिघटाभेदप्रसंगइत्यत्रहेत्व

द्वित्वादिनस्तत्वमतेएकसमष्ट्यन्तर्गतजीवानांपरस्परमपिप्रभेदसत्वाच्चस्वाभिन्नसमष्ट्याभिन्नेनस्वस्याप्यभेदस्यदुर्वारत्वात् यदिसंयोगादीनांजा
तेश्चानेकाश्रितत्वंस्यात्तदाएकदेशभेदात् घटाभिन्नसंयोगाभिन्नपटादेरपिघटाभेदःप्रसज्येतेत्यादिवदतात्पर्यात्तदभिन्नाभिन्नस्यतदभेदनिय
माभ्युपगमात् नचजीवांतरसाधारणचेतनत्वादिधर्मैकरूप्येकसमष्ट्यन्तर्गत्यादिप्रयुक्ताभेदविलक्षणमभेदांतरमंगीकृत्यजीवेश्वरयोरस्तिभेदइत्यनु
संधानप्रयोजकेयदज्ञानातिप्रसंगाद्यपिवदेत्तन तथासतितस्यैवविशिष्यनिर्वक्तव्यतापत्तेः धर्मैकरूप्याद्यप्रयुक्तत्वमंशांशिनोरभेदेविशेषइ

तर्भविशेषणमाह घटाभिन्नेति घटाभिन्नःसंयोगस्तदभिन्नत्वात्पटादेरित्यर्थः ननुजीवेश्वरयोर्जीवानांनासमष्टाभिन्नजीवानांचयोर्यचेतनत्वादिधर्मप्रयुक्त
भेदः एकसमष्ट्याभेदप्रयुक्ताभेदश्चतदपेक्षयाप्यभेदोजीवतदंशयोस्तत्तयोर्भेदेसत्यपिपरस्परमनुसंधानेजीवेश्वरयोर्जीवानांसमष्टिजीवा
नांचतादृशाभेदाभावाच्चेतनत्वादिप्रयुक्ताभेदेसत्यपिनपरस्परमनुसंधानमितिचेद्वक्ष्यामो तथाचभिन्नाभिन्नद्रव्यत्वासहचरितभेदः शुद्धभेदः सचानुसं
धानप्रयोजकइत्यत्रजीवतदंशयोः परस्परानुसंधानप्रयोजकत्वाभिमतोविलक्षणभेदएवप्रविष्टइतिजीवेश्वरादेस्तादृशाभेदवद्वितभिन्नाभिन्नद्रव्यत्वा
सहचरितभेदसत्वात्नोक्तातिप्रसंगइतिपांकोनिराकरोति नचेतिजीवतदंशयोरिवजीवानुसंधानेपिसाधारणयेचेतनत्वादिधर्मैकरूप्यप्रयुक्तएक
समष्ट्यन्तर्गत्यादिप्रयुक्तश्चाभेदस्ततोविलक्षणमित्यर्थः जीवेश्वरगतस्यमुक्तोयाधीभावस्यसंयुक्तार्थमादिपदं अंशांशिनोर्भेदेसत्यपितयोरनुसंधानप्रयोज ३९
कमभेदांतरंनचास्तियदभेदांतरेजीवेश्वरादौवर्तिप्रसंगपरिहाराययभिन्नाभिन्नद्रव्यत्वशरीरप्रविष्टतयाविवक्षितेतियोजना तत्वभेदांतरंकृत्वानास्तीत्यत्रा
त्याह तथासतीति विलक्षणाभेदस्यांशांशिनोःसत्वइत्यर्थः जीवेश्वराभेदापेक्षयाजीवतदंशयोरभेदस्यविशेषविशेषतोनिर्वक्ति धर्मैकरूप्याद्यप्रयुक्त

तत्त्वमिति उक्तविशेषणसिद्धिमाह न जीवेति जीवस्य तदंशानां चेतनत्वसत्त्वद्रव्यत्वादिधर्मैकरूप्यमस्ति तथा जीवस्य तदवयवानां चैकशरीरानुप्रवेशकालेत
द्वशरीरावच्छेदेन समस्तोऽप्यस्ति तथा योगिजीवावयवानां कायव्यूहप्राप्तानेकशरीरेष्वनुप्रविष्टानां क्वचित्तैः शरीराणां मेलनेऽसति योगिजीवेनाभिन्नसह
स्वहस्तमस्तोऽस्ति तथा च जीवतदंशयोरभेदधर्मैकरूप्यादिप्रयुक्तत्वसंभवात् तदप्रयुक्तत्वमसिद्धमित्यर्थः ननु जीवानां चेतनत्वादिधर्मैकरूप्यादिप्रयुक्तोऽभेद
स्तत्वेऽपि तेषामंशांशिभावाभावादंशांशिभावप्रयोजकाभेदासमपवस्तु च न धर्मैकरूप्यादिप्रयुक्त इति शंकते धर्मैकरूप्यादीति जीवानन्तु स्वाधारणाभेदस्यैव।
धर्मैकरूप्यादिप्रयुक्तस्यापि परिहार्यत्वात् तस्याप्यभ्युपगमे सति जीवतदंशयोरभेदवदयमभ्युपगतः परस्परमनेनाप्रसज्येतेऽभिमिति वदन्तेऽपरमसात् न तयोरिति
अंशांशिनोरित्यर्थः तदाकारेति प्रतियोग्यकारेत्यर्थः प्रतियोगित्वावच्छेदकेति यावत् भेदस्यानेकत्वानभ्युपगमोऽपसमाधेः स्यादित्यर्थः तस्मादिति जीवस्य

ति चेत्र जीवतदंशयोश्चेतनत्वादिधर्मैकरूप्यस्यानेकशरीरावच्छेदे कायव्यूहमेलने च समस्तसत्त्वेन च तयोरभेदे धर्मैकरूप्यादिप्रयुक्तत्वस्यापि संभवात् य
धर्मैकरूप्यादिप्रयुक्ताभेदान्तरस्यैव वै जीवतदंशयोरंशांशिभावप्रयोजकाभेदानन्तरप्रकल्पने च तयोरभेदद्वयाभावात् तत्रान्तेऽधिकरणे कृपसति
भेदस्याभेदस्य चाप्रतियोगिभेदेन तदाकारभेदेन वानेकत्वानभ्युपगमात् तस्मादाद्यपक्षे स्यादिति प्रसंगः एतेनैव द्वितीयपक्षोऽपि निरस्तः अभेदस्य
कल्पितभेदस्यानुसंधानप्रयोजकत्वे उक्तरीत्या तन्नतेजीवब्रह्मणोर्जीवानां चाभेदस्यापि सत्त्वेनातिप्रसंगस्य दुर्वारत्वात् न च भेदसमसत्ताकस्तस्यानुसंधा
नैतत्त्रमिति तदभावेनानुसंधानस्वस्वस्वाभेदः स्वाश्रयाभेदश्च प्रसक्तमिति नन्दुकुङः स्वात्मनुसंधानं जीवान्तरेणाभेदस्तत्त्वेऽपि तस्य समसत्ताकत्वं तु एव
ह्यनुसन्धाने जातिस्मरणस्यात्मभेदीयात्मनोऽभेदसमसत्ताकत्वात् हृतानानुसन्धानसमेवातदभावात् तस्मादिसर्वसंगकतरीतिचेन्न तर्हि ऐक्यात्मैक
देऽपि सर्वात्मनावरकाज्ञानावरणे चैत्रस्य मैत्राद्यभेदप्रसक्तामिति तत्तवसर्वव्यवस्थोपपत्तेरर्थः स्मृतिविरुद्धात्माभेदाभ्युपगमः नवेस्यम
पिप्रपंचतत्त्वादिन तत्त्वव्यवस्थानिर्वाहः सर्वज्ञस्येश्वरस्य वस्तुसज्जीवान्तराभेदप्रसत्तावपभावेन जीवेशुद्धः एवं तत्त्वहड्ढः एवीत्नुभवायते:
श्रस्मत्त्वे तेनेश्वरः स्वाभिन्नजीवसंसारप्रतिबुद्धविमालिमामिवपश्यन्नपि मिथ्यानिश्चयान्न पीडो चक्रेति तिनैषप्रसंगः स्यादेतन्ना
श्यायोर्थः पूर्वमंशांशिभावो निरू
पितस्तद्गमिदेकेण जीवतदंशयोर्मुख्यांशांशिभावस्य दुर्निरूपत्वादित्यर्थः तथा च जीवेश्वरयोर्भेदस्यानिरूपितत्वांशांशिभावसहचरितत्वेन तदसहचरितत्व
रूपप्रयुक्तत्वाभावे सत्यनुसंधानप्रयोजकस्य भेदाभावाज्जीवेश्वरयोः परस्परं भोगसांकर्यप्रसंगरूपो दोषः स्थिरस्त्यर्थः आद्यपक्ष इति अंशांशिभावासहचरि
तत्वप्रयुक्तत्वमिति पक्षद्वयमर्थः अभेदस्य सहचरितत्वप्रयुक्तत्वभेदस्येति पक्षद्वयसमाधानेऽन्तनानिराकरोति एतेनैवेति उक्तरीत्येति चेतनत्वादिधर्मैकरूप्यमुक्तरीत्या
जीवतदंशयोरिव जीवब्रह्मणोर्जीवानां चाभेदस्यापि पूर्वोक्तातिप्रसंगपरिहारं शंकते नाभिनेति स्वस्येति अंशिनो जीवस्येत्यर्थः जीवान्तरेणेति स्वस्यैव तु वेगः
जातिस्मरस्येति पूर्वजन्मस्मरणवत इत्यर्थः सर्वेति सर्वात्मनावारकं यदज्ञानं तत्प्रयुक्तावरणादित्यर्थः तत्तवेति चैत्रमैत्रादीनां सर्वेषां परस्परमभेदसमसत्ताभावा
देव व्यवस्थितत्वयाऽसत्याभावान् नानुसंधानोपप

सि॰ले॰
हि॰दी॰
५०

नेरित्यर्थः अभेदप्रसत्त्यानुसंधानप्रयोजकत्वस्यैतत्परमते आत्मभेदकल्पनागौरवं स्मृतिविरोधं चैश्वर्यं विना परमते तस्य प्रयोजकत्वमपि न संभवतीति
प्रसंगादित्याह न चेत्यसमपीति अभेदप्रसक्तमनुसंधानप्रयोजकमिति कल्पनायामपीत्यर्थः वस्तुतस्तु परमार्थतो जीवानां तदभेदस्तत्त्वमसदमीश्वरस्या
वेष्टुपकमन्यथा सर्वज्ञत्वभंगप्रसंगः स्यादित्यर्थः ननु सिद्धान्तेपि ब्रह्मणः सर्वज्ञत्वजीवाभिन्नत्वयोस्तत्वात् कथं दोषप्रसंग इति नेत्याह असमञ्जस इति यद्वा जी
वानां सावयवत्वात् करशिरश्चरणानुगतेषु जीवांशेषु सुखदुःखभवाद्द्वैयोगपद्यं संभवति योगिनां कायव्यूहगतेषु योगिजीवावयवेषु युगपत्सुखदुःखा
दिभोगवैचित्र्यादिच संभवतीति न काचिदनुपपत्तिरिति तत्र जीवं प्रति जीवांशानामणुत्वं प्रागेवस्थापितं निरस्तत्वाज्जीवं प्रति तदंशानां जीवसहस्रांशेष
तिजीवांशे पदत्वयान्न न परिमाणत्वन्यायोपचारिकांशत्वस्यापि जीवाणुत्वपदे बाधितत्वाच्च अणुपरिमाणस्यैव सर्वपरिमाणापेक्षयान्नन परिमाण
त्वेन ततोपि न्यून परिमाणाभावात् सदृशत्वेसति ततोन्यूनत्वरूपांशत्वस्य चंदविंबांशरूपविंबवज्जीवांशानां जीवापेक्षयानंतभेदप्रयोजकत्वेन जीवस्य
स्वांशगतसुखाद्यनुसंधानत्वासंभवाच्च तथा योगिजीवांशानां कायव्यूहाधिष्ठातृत्वेपि तेभ्योत्यंताभिन्नस्य योगिजीवस्य कायव्यूहाधिष्ठातृत्वाभावप्रसंगा
त्तथा शरीराधिष्ठातृजीवस्य शरीरावयवशिरश्चरणाद्यधिष्ठातृणां जीवांशानां चात्यंतभिन्नत्वे नैकस्मिन् शरीरे भोक्तृनानात्वप्रसंगात् जीवस्य सांशत्वेमा

भेदंशाभेदे करशिरश्चरणादीनां कायव्यूहस्य चाधिष्ठानमात्मदीपस्यानपायिनी ज्ञानप्रभास्ति व्यापिनीति तेष्वेव सर्वाधिष्ठानं भविष्यतीति चेन्नत्वा
नवदात्मधर्मस्य सुखदुःखभोगस्य ज्ञानमात्राश्रित्वासत्यसंभवे न करचरणाद्यवयवभेदेनापि विना कायव्यूहवतः कायभेदेन च भोगवैचित्र्याभा

नाभावाच्च द्रोणं बृहस्पतेर्भागमिति वचनस्य वर्णितरीत्या उक्तांशपरत्वाभावे तद्बृहस्पत्यादेर्योगप्रभावेन भूभारहरणादिदेवकार्यार्थं शरीरांतरप
न॰ रिग्रहमात्रपरत्वात् एतेन श्रीरामकृष्णादेर्विष्वंशत्वव्यवहारोपि व्याख्यातः तस्माज्जीवांशविशिष्टस्य करशिरश्चरणाद्यधिष्ठातृत्वं न कायव्यूहाधिष्ठातृत्वं च
न संभवतीति एवं ग्रंथस्याशयेस्थिते शंकते स्यादेतदिति अधिष्ठानमिति भेदकहेत्वर्थः भविष्यतीति जीवः स्वयमणुतया शरीरैकदेशस्थोपि स्वतम्भवे
तेनव्यापिज्ञानेन करशिरश्चरणादीन्कायव्यूहांश्चाधितिष्ठतीति निरंशस्याप्यणोर्जीवस्य शरीराधिष्ठातृत्वात् तदादिकेनानुपपन्नमिति भावः ज्ञानमात्राश्रि
ति ज्ञानधर्मत्वेपि सुखदुःखादीनामनुत्पत्तिः संभवेत्तन्न ज्ञानस्य व्यापकतानतदाश्रितसुखादेरपभोगस्यापि करशिरश्चरणादौ कायव्यूहे च युगपदुदयः
संभवेत्तन्न तथा सुखादेर्ज्ञानधर्मत्वानिष्टेन तस्य ज्ञानवदेवात्मधर्मत्वाभ्युपगमाद्विज्ञानस्य व्यापित्वेपि न करशिरश्चरणादौ कायव्यूहे च युगपद्भोग
वैचित्र्यं संभवतीत्यर्थः कायव्यूहवत इति योगिन इति शेषः तस्य च भोगवैचित्र्यं स्मर्यते आत्मनो वै शरीराणि बहूनि भरतर्षभ योगी कुर्याद्बलं प्राप्य तै
श्च सर्वैर्महीं चरेत् प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिवेति आत्मनो शरीराणां बलं योगजनितं सामर्थ्यं ५०

र्म्यं तर्हि ज्ञानधर्मत्वमेव सुखादेरस्तु यदि न धर्मत्वे भोगवैचित्र्यं संभवेत्तत्राह सुखदुःखभोगादिरिति भुक्तिश्चोक्ता आत्मगुणज्ञानविषयस्य भोगवैचित्र्यस्य
धिकरणत्वपाश्चात्मभेदस्य साधकत्वासंभवादित्यर्थः सुखादेर्यापि ज्ञानधर्मत्वं समतविरुद्धं चेत्याह भोगग्राह्यप्रपस्येति नैयायिकमतइवात्रैतमतइवचेत्य
र्थः तस्मादिति आत्मगुणस्यज्ञानसुखादेर्यापि न वकल्पनायोगादित्यर्थः जीवाणुत्वाभ्युपगमस्य पराभिमतप्रयोजनांतरं दूषयति नापिनेन तस्येतिजी
वस्याणुत्वेनेत्यर्थः कृतिनदर्यापत्तिभ्यां जीवस्याणुत्वं वदतां तत्त्वमनेनाभ्यामेवेश्वराणुत्वस्यापि हृदयवर्तित्वान्नेश्वरस्य विभुत्वासिद्धिस्तदिति द्योतनत्वेश्व
सिद्धिरिति निहृदयपति उत्क्रांत्यादीति वदतस्तत्त्वपदेपरोपमात्मरेव सिद्धेदिति संबंधः तत्स्रष्ट्वेत्यत्र ततत्पदद्वयं जगत्परं प्रकृतः परमात्मास्रष्टादिकर्तात्र

वप्रसंगात् सुखदुःखभोगादिर्ज्ञानधर्मएवनात्मधर्मइत्युपगमेन द्वैविध्येणात्मगतस्य तत्त्वानस्यभेदेसिद्धावप्यात्मनोभेदासिद्ध्या भोगवैचित्र्या
दिनाश्चात्मभेदप्रतिक्षेपयोगाभोगग्राह्यस्य सात्मनोणुत्वेन प्रतिशरीरमवकित्रतथातथापि तवादइवतद्भेदवादइवचनधर्मसंकरापत्तिरि
तिमनतत्त्वानेश्च तस्माज्जीवस्याणुत्वोपगमेन व्यवस्थोपपादनेन युक्तं नापितेन तस्येश्वराभेदसाधनं युक्तं उत्क्रांत्यादिश्रवणात्त्वादणुत्व
श्रवणाच्चाणुर्जीवइतिवदतस्त्वमनेनतत्सृष्ट्वातदेवानुप्राविशदितः प्रविष्टः शास्ताजनानामित्यंतःप्रविष्टः परमेपरार्धइत्यादिस्मृतिषु प्रवेशादि
श्रवणात् सर्पयोगिमाप्यमात्मातद्दिदये लीयानन्नीहेर्वायवाद्वेतिस्मृतेः साक्षादणुत्वश्रवणाच्चपरोपिप्राणुरेवासिद्धेतेतिज्ञातः परजी
वयोर्विभुत्वाभ्यां भेदसिद्धिः नत्वाकाशवत्सर्वगतश्चनित्यः ज्यायान्दिवोज्यायानेनविस्तादिस्मादिश्रवणात्सर्वप्रपंचोपादानत्वाच्चपुरस्य स
र्वगतत्वसिद्धेः तदणुत्वस्मृतयस्तूपासनार्था दुर्ग्रहत्वाभिप्रायावाउत्क्रेपाः प्रवेशस्मृतयश्चशरीराद्युपाधिनानिर्वाहाः नचजीवोत्क्रांत्यादि
स्मृतयोपिवुद्ध्याउपाधिनानिर्वोढुं शक्याइतिवाच्यं नमुत्क्रामंतंप्राणोनूत्क्रामतीतिप्राणस्येवुद्ध्युत्क्रांतिवचनात् तथाविधात्मनस्तूपा

धेरिति शारीरेष्वितिशेषः शास्तानियंतापरस्मार्द्धस्थानमर्हतीति परार्धपरमश्रुत्यांतं हार्दाकाशं तस्मिन्याबुद्धिलक्षणागुहा तां प्रविष्टोजीवेश्वरावित्यर्थः
३१४ प्रवेशादीति शास्तृत्वस्थत्वादिकमादिपदार्थः सउपक्रमेप्रकृतएषः सन्निहितः अणिमाग्रणुः भावप्रत्ययोनविवक्षितः मेरुदयेप्रतरेषप्रकृतोभाव
रूपत्वादिगुणकआत्मावर्ततेसचश्रीसाद्यपेक्षयाणुरित्यर्थः अनन्ययासिद्धस्मृत्यादिवशेनविभुत्वमीश्वरस्यसाधकतेनत्विति ज्यायानित्यत्रपरःप
रस्यविभुत्वेलिंगमाह सर्वेति परमाणुत्वस्मृतीनामनन्यथासिद्धिमाह तदणुत्वेति उपासनार्थाइति अणीयान्त्रीहेर्वाइत्याद्याः स्मृतयस्तथ्यः दुर्ग्रह
त्वेति सर्पयोगिमेत्यादिस्मृतयइत्यर्थः आसामुपासनाप्रकरणगतत्वादितिभावः यद्वास्थितविकल्पवाचीवाकारः प्रवेशादिश्रवणस्यान्यथासिद्धिमा
ह प्रवेशस्मृतयश्चेति परमेश्वरस्यसर्वकापरिरहितशारीरेन्द्रियप्रवेशोपाधिकः शरीरस्थितः प्रवेशइत्यर्थः नतुजीवाणुत्वस्मृतिलिंगानामप्यन्यथा
नयनसंभवाज्जीवस्यापिस्वाभाविकं विभुत्वंकिंनस्यात् तयाचनतस्याणुत्वसिद्धिरितिसिद्धांतिनः शंकामनूद्यनिराकरोतिजीवाणुत्ववादी नचेत्या

सि.ले. दिना तमुत्क्रामन्तमिति न चात्रक्रान्तौ प्राणोत्क्रान्तेः प्रागेव जीवस्योत्क्रान्तिश्रवणेऽपि न केवलस्य तस्योत्क्रान्तिसिद्धिः बुद्धिविशिष्टस्य तस्योत्क्रान्तिसंभवा
हि.टी. दिति वाच्यं बुद्धिप्राणयोर्भेदासिद्धेः तयोरभेदस्यैव श्रुतिसिद्धत्वाच्च तथा च श्रुतिः यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति प्रज्ञा बुद्धिरित्याशयेनाह
५१ प्राणाद्युपाध्युत्क्रान्तेरिति नामरूपसाहित्येऽपि निरुपाधिनिरूपणं तत्परमपि जीवब्रह्मप्रतिगतिः श्रूयते तथा च यथोक्ता तेरौपाधिकत्वे न संभवति तथाभोतर।
प्यौपाधिके तत्वे न संभवतीत्यमध्यमपरिमाणस्य स्वाभाविकमणुत्वस्यौकार्यमित्याशयेनाह तथापि विहानि ति यदाद्विरण्यगर्भो जीवस्य स्वाभाविके
गमनाश्रयत्वे सत्येव दृष्टान्तविशेषः संगच्छते श्रुतस्यातदेहव्यस्यादित्याशयेनाह तद्यथेति तत्र च जीवस्य परलोकं प्रतिगमने दृष्टान्त उच्यते श्रुनः शाक
टं सुसमाहितं गटोपकरणैः इति सुत्सृजन् यातं ऊर्ध्वं न्यायात् केयथा एवं जीवो बुद्धेरणान्वारूढः शरीरतः गच्छति परलोकमित्यर्थः तथा च जीवस्या
णुत्वे स्वाभाविके सिद्धे तत्स्मरणत्वविभुत्वाभ्यां जीवेश्वरयोर्भेदसिद्धिरिति भावः सिद्धान्ती दूषयति नैतत्सारमिति यथा परमात्मप्रकरणे श्रुतं परस्य विभु

त्वमुक्तः यथा त्वरं पुरुषमुपैति दिव्यमिति नामरूपमोक्षानंतरमपि गतिश्रवणाच्च तद्यथानः सुसमाहितमुत्सृजन्यायादेवमेवायंशारीर आ
त्मा प्राज्ञेनात्मनान्वारूढ उत्सृजन्याति इति स्वाभाविकगत्याश्रयं शंकर दृष्टान्तोक्तेः श्रुतिवत् नैतत्सारं स वा एष महानज आत्मा योऽयं विज्ञानम
यः हृदसंह तत्राकाशो नीयमाने घटे यथा घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः इत्यादिश्रुतिषु जीवस्यापि विभुत्वश्रवणात् तन्मते महत्
तेरेव जगदुपादानत्वाभावाज्जीवस्य कार्यस्य जगतः स्वतः एवोपादानत्वं वदन्ति विज्ञगदुपादानत्वसंभवाच्च तस्य सर्वगतत्वादिसिद्धेः तस्य
वेशश्रुतीनां शरीरोपाधिकत्वकल्पने जीवोत्क्रान्त्यादिश्रुतीनामपि बुद्ध्युपाधिकत्वोपगमसंभवात् यत्र हृत्तिमनो बुद्ध्यपदिश्यत इति सूत्रभाष्ये
बुद्धिप्राणयोः कार्यभेदात् भेदस्य प्रतिपादितत्वेन बुद्ध्युपाधिके जीवे प्रथममुत्क्रामति प्राणस्यानुत्क्रमणोपपत्तेः तममध्याने ह्यनुमुक्तेन।

यज्जीवप्रकरणोक्तं जीवस्य विभुत्वमप्यनुध्यानेनानुमपुक्तं मित्याशयेन कृतमप्यालोत्यादि जीवप्रकरणगतं वाक्यजातमुदाहरति स वा इत्यादिना विज्ञा
नमयो जीवो महानव्यापकश्चास्तीति जीवस्य व्यापकत्वश्रवणादित्यर्थः नभोपम इत्यनेन सतो जीवस्य विभुत्वमुच्यत इत्यर्थः इत्युक्तिः प्रागेव व्याख्याता
विभुत्वेनाम्नायासिद्धश्रुतिसामर्थ्यात्परस्य परेण विभुत्वलिङ्गं विघटयति तन्मन इति प्रकृतिर्माया परस्य ब्रह्मणः सर्वप्रपञ्चोपादानत्वमुपेत्यापि नत
द्विभुत्वसाधकमित्याह जीवस्येति श्रुतो विशेषः ततः सर्वोपादानत्वान्नस्येश्वरस्येत्यर्थः जीवोऽणुत्वश्रुतिलिंगानामप्यन्यथानयनमपि तुल्यमेवेत्याह तत्त्व
वेदश्रुतीति ब्रह्मणो प्रवेशोत्पत्त्यर्थः पञ्च प्राणापानादिलक्षणवृत्तयो यस्य मुख्यप्राणस्य सः पञ्चवृत्तिः प्राणः श्रुतिषु व्यपदिश्यते वृत्तिमत्त्वमात्रे दृष्टान्तः
मनोवदिति प्राणापानादिवृत्तीनां चोच्छ्वासादिकं प्रत्येकं कार्यमिति निर्दिष्टं तथा च दृष्टान्तदार्ष्टान्तिकभावेन सत्त्वे मनःपाधितबुद्धेः प्राणस्य च भेदातिदि ५१
ष्टः स च बुद्धीन्द्रियकार्यविषयालोचनापेक्षया विलक्षणस्योच्छ्वासादिक्रियारूपकार्यस्य प्राणे दर्शनात् प्राणो बुद्ध्यादिभ्यो भिन्न इत्यादिप्रकारेण भाष्ये

ताधिनत्यमर्थः यो वै प्राणः सः प्रज्ञेति श्रुतौ प्रज्ञाप्राणयोर्भेदे तत्र विप्रज्ञाप्राणैकवक्ति तस्य प्रमाणात्मनापकत्वादुपाहितात्मनायामेन तयोरेकीकरणमविरुद्धमि
ति यत्तद्वत्नाधिकरणभाष्ये प्रतिपादितत्वात् ब्रह्मश्रुतिविरोधोऽपीति भावः एतन्नामरूपोपाधिनिहितमनन्तरं जीवस्य ब्रह्मप्रतिगतिश्रवणं जीवस्य विभुत्वविरोधी
नित्यत्वयुक्तं तस्य ब्रह्मणोऽपि विभुत्वविरोधि न ब्रह्मणोऽपि तदसिद्धिप्रसंगात् लोकपरिच्छिन्नस्यैवं गन्तव्यत्वनियमदर्शनादित्याह नामरूपेति ननु परमतेन ब्र
ह्मणो व्यापकत्वरूपेणानुक्रमाप्यत्वं किन्तु लोकविशेषावच्छेदोपहितत्वेन उपहितत्वरूपेण प्राप्यत्वं च न ब्रह्मणः स्वरूपेण व्यापकत्वविरोधी स्यात् अत्र
त्वमेतन्नवमते जीवस्यापीत्याह प्राकृतेति विद्यानामरूपादिमुक्तः इति श्रुतौ प्राकृतनामरूपादिमुक्तः इत्यर्थं कल्पयित्वा त्वयापि विदुषो जीवस्याप्यप्राकृ
तनामरूपस्वीकारेण स्वतो विभोरपि जीवस्याप्राकृतनामरूपोपाधिपरिच्छिन्नस्य ब्रह्मप्रतिगन्तृत्वसंभवात् न विभुत्वश्रुतयो जीवविषयाबाधनीया इत्य
र्थः ननु प्रविश्यापि तत्र प्रविष्टपदं जीवे स्वाभाविकमवेशार्थं ब्रह्मण्यपि तच्छरीराद्युपाधिकृतमवेशार्थकमित्याशंक्यानन्तर्यात इति भाकृत्क्रमस्य प्रविष्टप

नामरूपमोक्षानन्तरं ब्रह्मप्राप्तिश्रवणस्य प्राप्तिजीववद्ब्रह्मण्यपि विभुत्वविरोधित्वात् प्राकृतनामरूपमोक्षानन्तरमप्राकृतलोकवि
शेषाद्युपधानेन ब्रह्मणः प्राप्यत्ववादिमते प्राप्तुर्जीवस्याप्यप्राकृतदेहेन्द्रियादिमत्त्वेन तदुपधानेन ब्रह्मप्राप्तिश्रवणाविरोधात्स्वाभाविकगमनश्च
यणाकटदृष्टान्तश्रवणमात्राज्जीवस्य स्वाभाविकगतिसिद्धौ गृहादिप्रविष्टाविति स्वाभाविकप्रवेशार्थजीवसमभिव्याहारेण ब्रह्मणोऽपि स्वाभावि
कप्रवेशासिद्धिप्रसंगात् ब्रह्मजीवोभयानुयायिनः एकस्य प्रवेशपदस्य एकरूपप्रवेशपरत्वस्यैवौचित्यात् ततः परमते ब्रह्मजीवयोर्विभुत्वाविरो
धित्वं स्थितमसिद्धेनैकुतोऽपि भेदसिद्धिः प्रसाध्या शून्यमते ब्रह्मात्मैक्यप्रमाणवाक्यानुरोधेनावान्तरवाक्यानां नेयत्वात् स्वरूपेण जीवस्य विभुत्व
मोपाधिकरूपेण परिच्छेद इत्यादिप्रकारेण जीवब्रह्मभेदव्यापकश्रुतीनामुपपादनं भाष्यादिषु व्यक्तं तस्मादचेतनप्रपञ्चस्य मिथ्यात्वाच्चेतन
प्रपञ्चस्य ब्रह्माभेदाच्च न वेदान्तानामद्वितीये ब्रह्मणि विरोधकप्रमाणान्तरसमन्वयस्य कश्चिद्विरोध इति ॥ इति श्रीशास्त्रसिद्धान्तलेशसंग्रहे द्वितीयः प

दस्यार्थः चेद्रूपं प्रतज्ञेनेति मत्वाह ब्रह्मजीवोभयेति यदि ब्रह्मणो विभुत्वश्रुत्यनुरोधेन प्रवेशस्य सामान्यपरत्वमेव प्रविष्टपदस्य कल्प्यते न तु तत्कृतविशे
षपरत्वमपि तर्हि जीवस्यापि विभुत्वश्रुत्यनुरोधेन शाकटदृष्टान्ते गमनादिसामर्थ्यमात्रं विवक्षितं नेत्वस्वाभाविकगमनाश्रयत्वादिकमपीति न जीवस्य स्वाभा
विकाणुत्वसिद्धिः तस्मान्नास्ति जीवब्रह्मणोः अणुत्वे दुर्वारं विनिगमनाविरहादिति भावः तत इति उत्क्रान्तिव्यवस्थितेरित्यर्थः ननु परमते जीवेश्वरयोरपि
विभुत्वाणुत्वश्रुतिलिंगानामविरोधाद्भयाणुत्वश्रुतिलिङ्गानामन्यथासिद्ध्यविरोधाच्च तयोरणुत्वं विभुत्वं वा समानं तत्रैव सिद्धे न त्वेकस्य विभुत्वमप
रस्याणुत्वमिति व्यवस्थासिद्धिरिति यथादोषः प्रसज्जते तथा सिद्धान्तेऽपि जीवस्य परिच्छिन्नत्वविभुत्वश्रुतिलिङ्गानामविरोधात् तस्य स्वाभाविकं विभुत्वं
परिच्छिन्नत्वमौपाधिकमिति व्यवस्थानासिद्धेरिति दोषः प्रसज्यत एवेति नेत्याह प्रसन्नमत इति ब्रह्मात्मैक्यज्ञानस्य मुक्तिसाधनत्वात् तज्ज्ञानजनकानि तत्त्वमस्या

दिवाक्यानि महावाक्यानि वाक्यार्थज्ञानकारणीभूततत्त्वंपदार्थज्ञानं प्रतिसाधनभूतानि जीवस्वरूपप्रतिपादकवाक्यानीश्वरस्वरूपप्रतिपादकवा
क्यानि चावान्तरवाक्यानि महावाक्यशेषत्वात्तदर्थप्रतिपादकवाक्यानामिति प्रधानवाक्याङ्गत्वेन गुणभूतवाक्यानामित्यर्थः स्वरूपेण निजजी
वस्य स्वरूपेण एवमहावाक्यप्रतिपाद्यब्रह्माभेदानुपपत्तेर्ब्रह्मणश्च स्वरूपेण एतत्त्वाभावे कर्तृत्वादिविरोधादिति भावः प्रतिपादितो ब्रह्मणि वेदा
न्तसमन्वयाविरोधसमर्थनरूपपरिच्छेदार्थमुपसंहरति तस्मादिति पंचम्यं तत्पंचमीभ्यो विवृणोति अचेतनस्येति इति श्रीमत्परमहंसपरिव्राजकाचा
र्यश्रीमदच्युतकृष्णानन्दतीर्थस्वामिश्रीचरणारविन्दमलप्ररजोभूतस्याच्युतकृष्णानन्दतीर्थस्य कृतौ सिद्धान्तलेशसंग्रहव्याख्यायां कृष्णालं
काराख्यायां द्वितीयः परिच्छेदः समाप्तिमगात्॥ ॐ श्रीगणेशाय नमः॥ स्वापत्नायं समाश्रित्य रत्नाभापसङ्कलभा कृष्णालंकारस्य महीप्रीतं कृष्णलंतस्य
रिच्छेदः समसमुच्चयमवगीध्वंसम्॥ ननु कथं विद्यैव ब्रह्मप्राप्तिः यावता कर्मणामपि तत्प्राप्तिहेतुत्वं स्मर्यते तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं म
हामुने इति सत्यं नान्यः पन्था विद्यतेऽयनायेति श्रुतेर्नित्यसिद्धब्रह्मावाप्तौ कण्ठगतविस्मृतकनकमालावाप्तितुल्यायां विद्यातिरिक्तसाध
नत्वासम्भवाच्च ब्रह्मावाप्तौ परम्परया कर्मापेक्षामात्रपरतात्पर्या स्मृतिः कुतर्हि कर्मणामुपयोगः अत्र भामतीमतानुवर्तिन आहुः तमेतं वे
दानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतेर्विद्योत्पादनद्वारा ब्रह्मावाप्त्युपायभूतायां विविदिषायामुपयोगः।
न विद्यमानायां विद्यायामुपयोगः किं न स्यात् न स्यात् प्रमस्यार्थस्याभावात् विद्यासम्प्रयोगान्न समासतानि विद्यासाधनानि शमदमादीनि वि
विदिषासम्प्रयोगानुबन्धात्तु वाह्यतराणि यज्ञादीनीति सर्वाधिकरणभाष्याच्च ननु विविदिषार्थयज्ञाद्यनुष्ठानाद्वेदनगोचरेच्छावत्त्वे विविदिषायाः सिद्ध
त्वेन तदभावे वेदनोपाये विविदिषायां कामनासम्भवेन च विविदिषार्थयज्ञाद्यनुष्ठानायोगात् न यज्ञादीनां विविदिषायां विनियोग इति चेन्न
येन्नं १॥ पूर्वपरिच्छेदान्ते ब्रह्मप्राप्तिरूपमोक्षस्य विद्यैकप्राप्यत्वमुक्तं तत्र विद्याप्राप्यत्वमुपेत्य मोक्षस्यैकपदलभ्यं साधनान्तरमवच्छेदमसहमानः समुच्चया।
वादी प्रत्यवतिष्ठते ननु कथमिति यावतेति यस्माद्धीत्यर्थः स्मृतौ तत्पदं ब्रह्मपरं उक्तमिति तेनेति ब्रह्मविष्णुपकादिमादिकात्सेतिशेषः तेन ब्रह्मवेदनरूपम्
योः समुच्चयेन वावित् ब्रह्मप्राप्नोतीति श्रुत्यर्थः ज्ञानकर्मणोः समुच्चयस्य ब्रह्मप्राप्तिहेतुत्वश्रवणमनुमोदते सत्यमिति ब्रह्मप्राप्तेर्विद्यामात्रसाध्यत्वप्रतिपादक
श्रुत्यन्तरेणोपपत्तिः सहितेन विरोधात् समुच्चयश्रवणं तत्फलकस्तुतिवचनं च ब्रह्मसमुच्चयपरतया नेतव्यमित्याशयेनाह नान्यः पन्था इति ब्रह्मज्ञानोपल
याप्रमोज्ञानकर्मसमुच्चयरूपः केवलकर्मरूपो वा पन्था उपायो मोक्षं प्रति नास्तीति श्रुत्यर्थः नित्यसमाप्तस्वरूपतया सिद्धस्य ब्रह्मणो वाप्तिः प्रागसत्त्वभ्रमादि
निवृत्तिरूपा भ्रमादिनिवृत्तिश्च ज्ञानमात्रसाध्येति न लोके हस्तस्थकण्ठगतायामेव कनकमालायां विस्मृतायां तस्यां भ्रमासत्त्वभ्रमेण चक्षुर्विषयविदे ५२
शासस्याप्तोपदेशजन्मज्ञानमात्रेणाप्राप्तत्वभ्रमनिवृत्तिरूपा प्राप्तिर्दृष्टेति कनकमालावाप्तिः तत्तुल्यायां नित्यसिद्धब्रह्मावाप्तौ विद्यातिरिक्तसाधनापेक्षाभावा

त्, नेदं तिरिक्तस्य भूमादिनिवृत्तौ सामर्थ्याभावाच्चेत्यर्थः। परंपरया मुक्तावुक्ते कर्मणामुपयोगं प्रपंचयितुं पृच्छति कातर्हीति नहि ज्ञानवत्साक्षान्मुक्तिहेतुत्वाभा
वेऽपि तत्र विविदिषायां विद्यायां वा साधनत्वेनेषामित्यर्थः तमेतमिति तच्छब्दः प्रकृतपरमात्मपरः एतच्छब्दो नित्यापरोक्षजीवपरस्तथा च जीवाभिन्नपरमात्मा
नं वेदानुवचनादिभिर्वेदितुमिच्छंतीत्यर्थः स्वनाध्ययनादिलक्षणं तेषो व्याहृतयेन यज्ञो विशेषणमनाशकेनेति तथा च हितमितमेध्याशनादिरूपं तप इति विव
दिषंतीति लभ्यते ननु विविदिषायामश्रवणभूतायां कथं विनियोगस्तत्राह विद्यासंपादनद्वारेति ततश्च गौणमुख्यार्थत्वं तस्मात् संभवतीत्यर्थः ननु श्रुतेरुपपत्ति
प्रमाणतत्त्वज्ञविद्यायास्तस्यामेव विनियोगः कुतो न कल्प्यते इत्यत आह विशेषाच्च कामनाविषयत्वेनेति तत्स्वर्गादेरिव कर्मफलतयाप्रत्यक्षीकाराच्चेति मत्वाशंक
ते नत्विति स्वर्गकामादिवाक्येषु यागादेर्विधिप्रत्ययेनेष्टसाधनत्वेऽवगते किं तदिष्टमिति विशेषाकांक्षायां तस्य पुरुषविशेषणत्वेनोक्तयोः कामना
स्वर्गयोरन्तरस्यापि शाद्वितः प्राधान्याभावेन तत्रार्थतः प्राधान्ये स्वर्गस्येव प्रयोगित्वेऽस्ततः पुरुषार्थतया स्वर्गस्यैव फलत्वेनान्वयः स्वीकृतः यागः स्वर्गसाधन
मिति न तु कामनायाः एवं तु वेदनकामनाया एव फलत्वेनान्वय उचितः प्राधान्यतः प्रधानत्वादत एव फलस्य स्वस्य सुखादिकमप्यास्तिकांक्षेत्करामिति मत्वा समाधत्ते न
स्यादिति तस्य तस्यः प्रसयोगाद्यार्थः विविदिषायामेव विनियोगः इत्यत्र भाष्य सम्मतिमाह विद्योत्पत्तिप्रयोगादिति विद्यासाधनत्वादित्यर्थः प्रसाससन्नानीति याव
द्विद्योदयमनुपयोगानीत्यर्थः आमादिवैषम्यं कर्म दर्शयति विविदिषासंप्रयोगात्विति तत्साधनत्वादेवेत्यर्थः वासतराणीति विविदिषोदयपर्यंतमेवानुष्ठेयानी
ति यावत् विद्योत्पत्तौ सर्वाणि कर्माण्यपेक्षितानीति प्रतिपादकाधिकरणादित्यर्थः विविदिषाविनियोगप्रकारांतरेणाह द्विपतेति नान्विति वेदनेच्छायां यज्ञादि
फलत्वेव वेदनेच्छागोचरेच्छायां यज्ञाद्यनुष्ठानं वाच्यं वेदनेच्छायाश्च स्वतः फलत्वाभावाद्वेदनद्वारा मुक्तिफलकत्वं वाच्यं तथा चायं क्रमः प्रथमं मुमुक्षोः स्वतः पु
रुषार्थत्वज्ञानादिच्छा ततो वेदने मुक्तिसाधनत्वज्ञानादिच्छा ततो वेदनेच्छायां वेदनसाधनत्वज्ञानादिच्छा तथा च यज्ञाद्यनुष्ठानमिति तथा च वेदनेच्छारूपा विवि
दिषोद्देशेन यज्ञाद्यनुष्ठाने प्रवर्तमानस्य ब्रह्मवेदने विविदिषाफलेऽकामित्वं स्यादिति न वाच्यं यज्ञाद्यनुष्ठानेऽवैयर्थ्यमितिमभिप्रेत्याह वेदनगोचरेति वेदनगोचरेच्छा
या एवाविविदिषात्वादिति भावः सिद्धत्वे न विविदिषार्थयज्ञाद्यनुष्ठानायोगादिति तत्वय नद्वितीयः विविदिषाफले वेदने कामनाया प्रसक्तेर्विविदिषा
यामपि कामनायाः प्रभावात् विविदिषोद्देशेन यज्ञाद्यनुष्ठानायोगः इत्याह तदभावइति वेदनगोचरेच्छायाः प्रभावइत्यर्थः विविदिषार्थयज्ञाद्यनुष्ठानरूप
वेदनगोचरेच्छा न चेत्तावता तदनुष्ठानवैयर्थ्यं विविदिषायो विध्योपपत्तेस्तथा हि वेदने द्विविधा विद्या मोक्षरूपफलदानरूपविलक्षणा च तत्रायया
यज्ञाद्यनुष्ठानात् प्रागपि वेदनेऽपि वर्तत इति तामादाय वेदनसाधनभूतायां विविदिषायां कामनासंभवतीति विविदिषार्थयज्ञाद्यनुष्ठानमुपपन्नं द्वितीयानुय
ज्ञादिफलभूता तदनुष्ठानानंतरभाविनीति फलरूप एव विविदिषायां यज्ञादिविनियोगः इति तस्या ध्यानमभिप्रेत्याह नेति वेदनेच्छाया द्वैविध्ये यज्ञाद्यनुष्ठानोदय
दृष्टान्तमाह श्रुतेरेषणेति तमसि त्यागायेति कार्यपर्यवसितायाः श्रवणविषयकोत्कटेच्छायाः सत्त्वमपीत्यर्थः उक्तं केति श्रुपिकेत्यर्थः यावत्वैव संप्रयोजका
त्सत्तानयनादि संप्रयुज्यमाना दिपदं नवेति श्रवणभवदादेरित्यर्थः नजायत इति पतञ्चालुभवसिद्धमिति भावः अधीतसांगस्वाध्यायः पुरुषो वेदान्तेऽत्र्यमणोनेति
सायानेदं नयत्व विद्यायां न त्वोऽसि साधनत्वं चक्षात्वात्तस्मिन्नर्थे संपन्नविश्वासो भवतीत्युक्तं तथा विधानामपि पुरुषाणां बहूनां तस्मिन्नर्थे विश्वासपत्तेरदर्शना

सि॰ले॰ १८॰टी॰ ५२ हिंसाशंक्याह प्राचीनेति प्राचीनेषु बहुजन्मसु अनुष्ठितानि फलाभिसंधिरहितानि यानि नित्यनैमित्तिककर्माणि तैरुपसंजातो यश्चित्तप्रसादः शुद्धिविशेषस्तेनाहि ५५४
त्यर्थः तथा च स्मृतिः मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये कश्चिदिति उक्तचित्तप्रसादवानित्यर्थः सिद्धये विद्यालाभाय न सर्व इति भावः ननु प्रमाणासि तत्सा
धनविद्यामेव शोके देव्यापारसमानसाधनश्रवणादेः प्रवृत्तिपर्यंताह विविदिषन्तीति कृतेन तस्य यज्ञादिवृत्तीनन्तत्राह अनादीति दुरितदोषेण प्रतिबंधात् ह चिन्न
जायत इति संबंधः ननु पूर्वोक्तचित्तप्रसादमहिम्ना ब्रह्मविद्यादौ संपन्नविश्वासस्यास्तिकनमस्यानर्थबहुले विषयभोगे प्रावण्यं कथं संभवतीत्याशंक्याह भसि द
ष्टान्तेन नत्वं संपादयति आस्तिककामुकस्येति विहितानुष्ठानादृष्टवत् प्रयत्ने यो भवति निषिद्धकरणादिनाप्यवश्यमहानर्थो भवति शास्त्रप्रामाण्यादिति निश्च
यवानास्तिकस्तस्यापि कस्यचित्कामोद्रेकोनिहितागम्यागमनादौ प्रावण्यं च यथा पापविशेषात् संभवति यथा च योक्तमुमुक्षोरपीत्यर्थः प्रतिबंधेति अनादि
भवसंचितानेकदुरितदोषकृतप्रतिबंधेनेत्यर्थः तत्संपादकेति विविदिषाशाहितायां श्रवणादौ प्रवृत्तिपर्यंताह चित्तसंपादकेत्यर्थः कृतर्हि कर्मणा उपयो

अन्तदोषेण कामं प्रापस्य तत्परिहाराय यान्नविषयोत्कं बलत्तणयामिकर्यो सत्ताम शुद्धकाजीर्णादिप्रफलकत्वात्तवैवम्यदोषात्तत्र प्रवृत्तिपर्यन्ताह चिन्न
जायत इति नक्रो च कोषधविधौ तत्र इतिप्रयानंदस्ये ब्रह्म नत्या मो विद्यासाधनमित्यर्थे प्राचीनबहुजन्मानुष्ठितानभिसंहितफलनित्यनैमित्तिकक
र्मोपार्जितचित्तप्रसादमहिम्ना संपन्नविश्वासस्य पुरुषस्य ब्रह्मावमो विद्यायां च न दोषं बलत्तणयामिकापसत्ताम प्यनादिभवसंचितानेकदुरित
८४ दोषेणास्तिककामुकस्येव कर्मणि वा विषयभोगे प्रावण्यं संपाद्यता प्रतिबंधाद्विद्यासाधने श्रवणादौ प्रवृत्तिपर्यन्ताह चिन्न जायत इति प्रतिबंधनिरा
सद्वंद्वं तत्संपादकयज्ञादिविधानोपपन्नेदिति विवरणं तु सारिणस्त्वाहुः प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति न्यायात् प्रत्ययादिकाविष
यत्नयज्ञाहवाप्यपवशाहसाधनत्वमन्वय इति स्वर्गकामादिवाक्येहि तत्र विधेयस्य यागस्य बलीयस्त्वाद्येन जिगमिषसि तिनाजिहासतीत्यादौ लौकिकम

ग इष्यत्र प्रसक्ते विद्यायां विनियोग इति प्रतिवचनं नरम बनारयति विवरणेति पूर्व तत्रयज्ञादीनां तन्नीयाकृत्यासाधनत्वेनावगततानो साध्याकांक्षायां विविदिषैव
साध्यत्वेनान्वेति तस्याः शाहृतः प्रधानत्वाकृहत्तः प्रधानस्यैव पदार्थस्य राजपुरुषमानयेत्यादौ सर्वत्र समभिव्याहृतपदार्थान्तरेणान्वयस्य प्रसिद्ध
त्वाद्विसाधनयज्ञादीनां विविदिषायां विनियोगः उक्तस्तत्रास्वरसे दर्शयन् विद्यायां तेषां विनियोगमुपपादयति प्रकृतीति प्रकृतिप्रत्ययार्थ योर्द्वन्द्व
६०१ दिकयोर्मध्ये प्रत्ययार्थस्य विविदिषालक्षणस्य प्रत्ययार्थत्वाकृहतः प्राधान्येन तत्र विविदिषायां प्रवर्तते फलत्वेनान्वय इत्यत्र हेतुभूतोयः सामान्य
न्यायो राजपुरुषमानयेत्यादौ प्रसिद्धः सोहतः प्रधानस्यैव समभिव्याहृतक्रियाकारकान्वय इमेवं रूपस्सतादिमर्थः विविदिषायाः फलत्वेन साधनत्वेनावगततया
मादेरिष्टविशेषाकांक्षायोः समापाहृतः प्राधान्याभावेपि स्वर्गस्य फलत्वेनान्वयः कृतः इत्यर्थः यागमात्राभावोविशेषे कामनाया एव यागादिफलत्वेना ५२
न्वयः कुतो न कल्पितस्तत्राह इच्छाविषयतयेति इच्छाविषयत्वस्य फलत्वयं जकत्वात् पुरुषार्थत्वेन प्रतीतस्य स्वर्गस्यैव फलत्वं न कामनाया इत्यर्थः ननु काम
नाविषयत्वस्य मुक्तिसाधारणत्वात्तेव यागादिफलकस्मान्न कल्प्यते तत्राह प्राहुर्वाच्य इति याहीसाकांक्षा प्रोहेनैव रूपते इति न्याया ज्ञातिप्रसंगः तेष्याचे

केव्यमाणसमभिव्याहारे ह्यवमाणस्यैवसाधनत्वेनाविकल्पाः इति विशेषस्यापेनोक्तसामासम्यायवाधस्यकामोपवंथवाक्येशुद्धसत्त्वा द्धि विविदिषंतीत्यत्रापिस
स्याथीत्वप्रयुक्तेविविदिषायाः शाब्दमाधान्येनसक्तो वेदनमाथान्येवाद्यापीयमित्यर्थः इकावाविसन्यासयमभिव्याहृते वे लौकिके वैदिकप्रयोगेषु
प्रत्ययार्थतयाप्रधानामपीकामशुत्ल्येनहिविषयेष्वेवसमभिव्याहृतपदार्थान्तरान्वयदर्शनाच्छ्रेयमाणप्रमेयेनेति नदनेष्टव्यमिति नद्वहराकाशामुब्रह्मविचा
र्यमित्यर्थः निदिध्यासितव्यमिति श्रोतव्याधातव्यस्तत्समर्थः ननुदाहृतश्रेयागेषुइकापश्रमवादिसाधनाद्यन्वयायोग्यत्वात्प्रसा परिणाम इति चेन्नहिं प्रकृ
तेपिवेदनेकायासत्त्वयोग्यत्वात् ब्रह्मवेदनस्यचब्रह्मानंदसाक्षात्काररूपतयाफलत्वेनान्वेतंयोग्यताद्वेदनपदवयज्ञाद्यन्वयोनविविदिषायामिनितुल्य
मितिभावः विद्याविनियोगपक्षेपिविध्यंतरविरोधंशंकते नान्विति कर्माणिसज्जनैवमुमुक्षुणासक्तः स्वसमयमनगास्तस्वरूपपदब्रह्मसाक्षात्कारवन
योगेष्वादिरूपसाधनस्यतद्वेष्टव्यंनद्रावविजिज्ञासितव्यंनिदिध्यासितव्यंमंतव्यइत्यादौवैदिकप्रयोगेनवार्थभूतविधेश्च सत्यमस्याभिधीयते काम्यवि
षयपवगमनात्वावन्वयस्यशुम्यत्वात्तु प्रकृतस्यमितितायाविद्यायायज्ञादीनांविनियोगः नत्वतथासति यावद्विद्योदयंकर्मानुष्ठानापत्तेस्त्यजेतैव
हितदेयमित्यादिश्रुतिप्रसिद्धकर्मत्यागरूपस्यसंन्यासस्यविद्यार्थत्वंपीडयेतेतिचेन्न प्रागवीजावायात्कर्षणंतदनंतराकर्षणमितिकर्षणाकर्षु
णाभ्यांव्रीत्यादिनिष्पत्तिवदारुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते योगारूढस्यतस्यैवशमःकारणमुच्यते इत्यादिवचनानुसारेणचेतसःशुद्धे
विविदिषादिरूपप्रत्यक्प्रावण्यपादपर्यंतंकर्मानुष्ठानंततःसंन्यासइति कर्मतत्त्यागाभ्यांविद्यानिष्पत्त्युपगमात् उक्तंहि नैष्कर्म्यसिद्धौ प्रत्य
क्प्रवणतांबुद्धेःकर्माण्युत्पाद्य शुद्धितः कृतार्थान्यस्तमायांति प्रावृडंते घना इवेति कर्मणांविद्यार्थत्वपक्षेपि विविदिषापर्यंतमेवकर्मानुष्ठाने विवि
दिषार्थत्वपक्षात्कोभेद इति चेत् अयंभेदः कर्मणांविद्यार्थत्वपक्षे यावज्जन्मतविविदिषासिद्ध्यनंतरमुपरतावपि फलपर्यन्तानि विशिष्टगुरुलाभान्ने
विघ्नश्रवणमननादिसाधनानिनिवृत्तिप्रसुर्वानि संपाद्यविद्योत्पादकत्वनियमोस्ति विविदिषार्थत्वपक्षेतु श्रवणादिप्रवृत्तिजननसमर्थीन्क
त्वसृजनेतिक्रमसर्वः अथपरिव्राडिह्युपक्रम्य ब्रह्मभूयायकल्पतइ संतेनक्रसंतरेणापि परिव्राड्वाह्योपात्तसंन्यासस्यब्रह्मभूयप्राप्तिब्रह्मसाक्षात्कारहेतुत्व
मुक्तं एवं क्रसंतरेणपीत्यभिप्रेत्याहिपदंद्वयेत्यविविदिषावाक्यसंन्यासविध्योरविरोधंसहृष्टांतेस्तप्रमाणं चदर्शयति नप्रामोतीति वचनेकारणपदद्वयं कंजया
र्थकं शमःसंन्यासः चित्तशुद्धिविविदिषारूपप्रत्यक्प्रावण्ये सेतत् गीतावचनगतयोगपदव्याख्यानमितिवोध्यं रागादिराहित्यरूपचित्तशुद्धिविविदि
षावैराग्यगुरुदेवतादिभक्तिलक्षणप्रत्यक्प्रावण्यजनन्तपर्यंतकर्मानुष्ठानमित्यत्रसुरेश्वराचार्यसंमतिमाह उक्तंहीति शुद्धितइति शुद्धिद्वारेत्यर्थः अ

नदत्ताभेवुततल्लाभायतयततेयत्नेकृतेपियद्यन्नलभतेतदानकार्यनिवृत्तिंलभते॥७

ति॰ले॰ त्तमायांतीति स्वागमायांति स्वतयामेवुभवंति कृतप्रयोजनत्वादित्यर्थः कृतप्रयोजनानांनिवृत्तोदृष्टांतमाह प्रावृडंतइति वर्षाकालावसानइत्यर्थः विवि
तृ॰ती॰ दिषायांविनियोगपक्षेविविदिषोदयपर्यंतमेवयज्ञाद्यनुष्ठानमित्यविवादं विद्यायांविनियोगपक्षेप्येवंचेत्कलत्रयोभेदइतिशंकते कर्मणामिति अनुष्ठानेवि
४४ शेषाभावेपिफलतोविशेषोस्तीत्याह अयंभेदइति वक्ष्यमाणइत्यर्थः उपरतावितिस्यागेपीत्यर्थः अहमहकारेतिशेषः विविदिषाविनियोगपक्षेहियज्ञादि
कर्मजनिताहृदंश्रवणादिषुप्रवृत्तिपर्यंतोविविदिषाप्रादुर्भावाहृचित्तस्याद्यनपयति फलेकनाशपत्वादहृदस्यविविदिषोत्पन्नानंतरंचश्रवणादिप्रतिबंधकदुरि
ताभावेसति विविदिषावलाद्वश्रवणादिकंसंपाद्यविद्यांलभते श्रवणादिप्रतिबंधकदुरितसत्वेतुतत्त्वंयत्नकृतेपिश्रवणाद्यलाभेननिःश्रेयसतन्निवृत्त्य
यायपुनस्तिष्ठानिश्रायेणतन्निवर्तकोपायानुष्ठानेवातदनुष्ठानस्यापिविघ्नबाहुल्येवाश्रवणाद्यसंभवात्तज्ज्ञानोदयः यथाश्रेवधवीर्येणात्रभवेत्तोणहचेहस्तो
त्तस्यामप्रतिवन्धेनाप्यलाभेतत्त्वदत्तेननकार्यपनिवृत्तिंलभते सूवमितापीस्मभिप्रेत्याह नावश्यमिति विविदिषाविनियोगपक्षस्यसंस्कारैकर्मणांविनि
योगपक्षेदहृष्टांतयति यस्यैतइति यस्यपुरुषस्यएतेष्टौतस्मातंधर्मासूत्रचत्वारिंशत्संख्याकाःसंस्काराःसंतिगर्भादिसंपत्तिश्चवर्तते तस्यकर्मभिःस

हैकात्संपादनमात्रेणकृतार्थतेति नावश्यंविद्योत्पादकत्वानियमः यस्यैतेष्टचत्वारिंशत्संस्काराइतिस्मृतिमूलेकर्मणामात्मज्ञानयोग्यतापादक
मलापकर्षणगुणाधानलक्षणसंस्कारार्थत्वपक्षइवेतिवदति ननुकेषांकर्मणामयमुक्तार्थः तस्मात्तविनियोगोवोध्यते अत्रकोश्चिदुक्तेवेदा
नुवचनेनेतिब्रह्मचारिधर्माणांयज्ञेनेतिगृहस्थधर्माणांतपसानाशकेनेतिवानप्रस्थधर्माणांचोपलक्षणमित्याश्रमधर्माणामेवविद्योपयोगः

कृतस्यविद्याधिकारिणःश्रवणादिसत्वंतत्त्वज्ञानद्वारापरब्रह्मप्राप्तिर्भवति तदसंप्रतिपन्नोचपुण्यलोकावाप्तिरितिकर्मणांसंस्कारकत्वपक्षेयथाज्ञानो
त्पादकत्वनियमोनास्तिसंस्कारजननमात्रेणचरितार्थानांकर्मणांविद्योत्पत्तिपर्यंतंव्यापाराभावात्तथातेषांविविदिषार्थत्वपक्षेपीत्यर्थः आत्मज्ञानयो
ग्यताकार्यकारणसंघातनिष्ठातदापादकोयोमलापकर्षणगुणाधानलक्षणसंस्कारोतदर्थत्वपक्षइत्यर्थः कर्मणांविविदिषार्थत्वपक्षेसंस्कारार्थ
त्वपक्षेचज्ञानोत्पत्त्यनियमेसमानेपिविविदिषार्थपक्षेप्रापिकाज्ञानोत्पत्तिस्तीव्रमुमुक्षायाइवहस्तविविदिषायाः सर्वेश्वयत्नेनविद्यासंपादनसमर्थत्वा
त् संस्कारार्थत्वपक्षेतुब्रह्मज्ञानयोग्यतामात्रसिद्धावपिविविदिषायाअनुत्पन्नियतत्वेनविद्योत्पत्तिःप्रापिकापिनभवतीतिविविदिषासंस्कारार्थत्वपक्ष
योरपिभेदऊहनीयइतिभावः केषामिति किमाश्रमकर्मणामेव किंवान्येषामपीत्यर्थः नन्वाश्रमधर्माणामपिसर्वेषांविविदिषावाक्येश्रवणभावा ४४
त्तेषामपिनसर्वेषांविनियोगोलभ्यतेतत्राह वेदानुवचनेनेति वेदस्यगुरुवचनमनुपश्चादस्यवचनंवेदानुवचनंवेदाध्ययनंतच्चब्रह्मचारिधर्माणामध्ये

प्रधानेनैवेतत्कर्माः सर्वैरङ्गैर्न इत्यर्थः एवमुत्तरत्रापि प्राधान्ये द्रष्टव्यं तथा कृच्छ्रचान्द्रायणादिरूपं वा न प्रत्यासाधारणमिति तपःशब्दः प्राभातीति भावः अना
श्रितः कर्मफलं कार्यं कर्म करोति यः इत्यादिस्मृतिषु नित्यनैमित्तिकाश्रमिणो कार्यकर्तव्यं यत्कर्मास्ति तत्सर्वं फलाभिसंधिं त्यक्त्वा यः करोति स योगपदेनाभिहितः पूर्वो
क्तविनष्टाशुद्धिविविदिषात्मकं मम कर्माव्याप्तं फलं भवत इति प्रतिपादनात्मकं लभ्यते विविदिषावाक्ये पि सर्वेषामाश्रमकर्मणामुपलक्षणं तु क्तमिति मन्तव्यं
आश्रमकर्मणामेव विनियोगः इत्यत्र सौत्रं लिङ्गमाह अत एवेति आश्रमकर्मणामेव विनियोगाभ्युपगमादेवेत्यर्थः आश्रमकर्मणां विविदिषावाक्येन वि
द्यायां विनियुक्तत्वात्तत्कामेनानुष्ठितेनाश्रमिणा स्वाश्रमविहितं कर्मानुष्ठेयमिति शङ्कायामुत्तरं सूत्रे तेनापि कर्तव्यमेव तत्प्रतिविहितत्वात् इत्यथास्यार्थः स्वा
याश्रमाङ्गाणां हि तत्सूत्रार्थो वोध्यः अमीषामपि विनियोग इति पत्नीनिमित्तकर्ममात्रविषयतया श्रयमर्थः दर्शयति कल्पतरो त्वेति कल्पतरावुक्तमिति संबन्धः आ
श्रमधर्मव्यतिरिक्तानामप्यस्ति विद्योपयोग इति कल्पतरुकारमतमयुक्तं सूत्रे विद्यार्थकर्मस्वाश्रमकर्मपदप्रयोगविरोधात् न च सोत्राश्रमकर्मपदस्य वर्णध
र्मोपलक्षणत्वमुपपत्तेर्नैतद्विरोध इति वाच्यं लक्षणायामेव प्रमाणाभावादित्याशयं तत्रानियामकं दर्शयति नाश्रमधर्माणामेव विद्योपयोग इति आश्रम

अत एव विहितत्वाच्चाश्रमकर्मापीति शारीरकसूत्रे विद्यार्थकर्मस्वाश्रमकर्मपदप्रयोग इति कल्पतरौ न नाश्रमधर्माणामेव विद्योपयोगः अन्तरा चापि तु
तद्दृष्टेरित्यधिकरणे अनाश्रमरहितविधुराद्यनुष्ठितकर्मणामपि विद्योपयोगनिरूपणात् न च विधुरादीनामनाश्रमिणां प्राग्जन्माद्यनुष्ठितपक्षाह

धर्मव्यतिरिक्तानां वर्णधर्माणामप्यस्ति विद्योपयोग इत्येवकारार्थे हेतुमाह अन्तरा चापि त्विति विद्यां प्रति बहिरङ्गसाधनेषु कर्मसु अन्तरङ्गसाधनेषु श्रवणादिषु
चानाश्रमिणामधिकारोस्ति न वेति संदेहे सति नास्त्यधिकार इति पूर्वपक्षः आश्रमकर्मणामेव विद्यायां विनियुक्तत्वात्तेषामाश्रमकर्माभावात् साधनचतु
ष्टयसंपन्नस्यैव श्रवणादिष्वधिकाराच्चानाश्रमिणां च साधनचतुष्टयाभावात्तस्यापि च शमादिनिःसंन्यासस्याभावेन तत्संपत्त्यभावादिति सिद्धान्तसूत्रे तु शब्दः
पूर्वपक्षव्यावृत्त्यर्थः अन्तरा चाह आश्रमाणामन्तराले स्थितानामित्यमाह तथा चानाश्रमित्वेवर्तमानोपि पुरुषः श्रवणादिषु विद्यार्थकर्मसु चाधिक्रियते कुतः
श्रुतिस्मृतिषु रैक्ववाचक्नवीप्रभृतीनामनाश्रमिणामपि विद्यावत्त्वोपलब्धेः परिव्राजकस्य श्रवणादिषु मुख्याधिकारे पि गृहस्थादीनामपि वा नाश्र
मिणामपि गौणाधिकारोपपत्तेस्तथा तदधिकारे णाभ्यं पुरुषार्थविद्याप्रतिषेधाभावमात्रेणार्थिनमधिकरोति श्रवणादिविधिरिति अविद्यानिवृत्तिवि
द्याया दृष्टं फलमर्थिनमविद्यानिवर्तकसाक्षात्कारार्थिनमधिकारित्वेन स्वीकरोति सूत्रे स्यैववेदान्तश्रवणादिषु अनाश्रमिणां प्रतिषेधाभावात् गौणा
धिकारे संन्यासापेक्षा नास्तीति मत्वा मात्रपदमिति भाष्यार्थः अन्तरा चापि त्विति साधिकरणमनाश्रमिणां श्रवणाद्यधिकारमात्रनिरूपणपरं न त्वनाश्रमि
कर्मणामपि विद्योपयोगनिरूपणपरं तथा च सोत्राश्रमकर्मपदस्य वर्णधर्मोपलक्षकत्वेन सिद्धान्तीति मतमाशङ्क्य ते न च विधुरादीनामिति ननु तेषां वि
द्यार्थकर्माभावे विविदिषोदयासंभवादनाश्रमिणां श्रवणाधिकारनिरूपणमयुक्तमित्याशंक्याह प्राग्जन्मेति अनाश्रमिणोपि येजन्मान्तरीयाश्र

मकर्मानुष्ठानजनितविविदिषावंतः संन्यासिनेवेति ब्रवैराग्याभावादनुष्ठानाधिकारात्मच्युतास्तेषां श्रवणाधिकारनिरूपणपरं तदधिकरणं न त्वनाश्रमि
मात्रविषयमविदिषुणां श्रवणाद्यैर्महत्संभवादेवेत्यर्थः श्रुतिन चर्या क्व मितिसंदेयः नन्वेतमात्रापिवित्ति तस्वे विद्यार्थकर्मस्तु विधुरादीनामधिकारे क्वाप्य
दिप्रनाश्रमिणां रैक्ववाचक्नवीप्रभृतीनां विद्यावत्त्वदर्शनेहेतुत्वेनोक्तं तदपरं रैक्ववाचक्नवीविधुरप्रभृतीनां जन्मांतरीयविद्यासाधनानुष्ठानवलादे
वविद्याजातेति शंकासंभवादतोनाश्रमिकर्मणां विद्योपयोगइत्यत्र तेषां विद्यावत्त्वदर्शनमन्यथासिद्धं लिंगं न भवतीत्यवरसादनमथास्ति वृत्तेनमन्य
मभिप्रेत्योक्तं विशेषानुग्रहश्चेति विशेषेर्धर्मविशेषैर्जपादिलक्षणैर्ब्राह्मणत्वादिवर्णमात्रसंबंधिभिरविचित्तशुद्धि विविदिषाद्वाराश्रमधर्मैरिवावि
द्यायाअनुग्रहउपकारः संभवत्येवजतः जप्येनैव तु संसिध्येद्ब्राह्मणोनात्र संशयः रागाद्यास्तानमात्रेणमुच्यतेनात्र संशयः यस्य स्मरणमात्रेणेत्यादि
वचनैर्जपतीर्थस्नानदेवताध्यानादिधर्माणां शुद्ध्यादिद्वारा विद्यादिसाधनत्वस्य प्रतिपादनादित्यर्थः तदनुष्ठितानामिति अनाश्रमिणां तत्तु
ह्यर्थः पयमनाश्रमिधर्माणामपि सत्वकारैरेवस्वयं विद्योपयोगस्य साधितत्वात्तदविरोधायसोऽत्रमाश्रमकर्मपदं वर्णधर्माणामप्युपलक्षकं वाच्यमित्यभिप्राये
णाहस्त्रवइति एवं कल्पतरुकाराणामभिप्रायमनुपवर्ण्य तन्मतमनुपपादयति आश्रमधर्मत्वादिना नमुपत्वादीनां विनियोगः कल्प्यमानः किं काम्यसाधारणः

स्यादितिविविदिषाणां विद्यासाधनश्रवणादावधिकारनिरूपणमात्रपरं तदधिकरणं न तु तदनुष्ठितकर्मणां विद्योपयोगनिरूपणपरमिति शं
कां विशेषानुग्रहश्चेति तदधिकरणस्त्ववतरणभाष्ययोस्तदनुष्ठितानां जपादिरूपवर्णमात्रधर्माणामपि विद्योपयोगस्य कंठोक्तत्वादाश्र
मकर्मापीतिसूत्रे आश्रमपदस्य वर्णधर्माणामप्युपलक्षणत्वादित्यभिसंधायोक्तं आश्रमधर्मातिरिक्तानामप्यस्ति विद्योपयोगः किंत्वनित्या

कल्प्यते किं वा नित्यानामेव नाद्यः काम्यकर्मफलस्य स्वर्गादेर्विद्यानपेक्षितत्वेन तेषां विद्योपकारकत्वासंभवात् न द्वितीयः नित्यकर्मफलस्य दुरितक्षय
स्यापि प्रमाणासाध्यविद्यापेक्षितत्वेमानाभावात्तेषामपि विद्याविनियोगानुपपत्तेरिति शंकते किं त्विति समाधत्ते नित्यानामेवेति ज्ञानमुत्पद्यते पुंसां क्ष
यात्पापस्य कर्मणः इत्यादिवचनान्नित्यकर्मफलस्य दुरितक्षयस्यापि प्रमाणसाध्यविद्यापेक्षितत्वे प्रमाणत्वेन सूचयति हीति प्रमाणजन्यायामपि वि
द्यायां दुरितस्य प्रतिबंधकत्वसंभवाद्दुरितक्षयापेक्षायुक्तेति भावः काम्यकर्मणां विद्याउपकारकत्वमंगीकरोति नेति न च काम्यानां नित्यानामिव दु
रितक्षयफलकत्वमप्यस्ति तथा च तेषामपि विद्यापेक्षितदुरितक्षयलक्षणोपकारजनकत्वसंभवतीति वाच्यं तेषां दुरितक्षयफलकत्वे मानाभावेन वि
द्योपकारकत्वस्याक्लृप्तत्वादिति भावः। कर्मणां विद्यायां विनियोगविधेः क्लृप्तोपकारैर्नित्यकर्मभिरेव चारितार्थ्ये दृष्टांतमाह तत्रापथ्येति यद्वा काम्या ५५
नां पापक्षयफलकत्वस्यानतः यास्यभावेपि यज्ञादीनां विनियोगबलादेव तेषां तत्त्वं कल्प्यतामिति नेत्याह तत्रेति काम्यकर्मणो विद्यापेक्षितोपका
रकत्वाक्लृप्तौ सत्यामित्यर्थः नित्येति गौरवादिति भावः आश्रमकर्मव्यतिरिक्तानामपि विनियोगइतिपदे काम्यसाधारण्यं दर्शयति संदेग्धि अविशेषा

दिति यज्ञादिशास्त्राणां नित्ययज्ञादिष्विव काम्ययज्ञादिष्वपि स्वत्वाविशेषान्नित्यानामिव काम्यानामपि विनियोगः क्रत्वाभावीति तत्साधारणस्यैव कर्म
णामुपकारः कल्प्यत इत्यर्थः काम्यसाधारण्येन विद्योपयोग्युपकारकल्पनेन संभवति न तु कल्पने सर्वत्र त्र्यसावित्रीत्यादिति मन्त्रा विकृतिषु तिदिशास्य
गानि दृष्टान्ते तेन कल्प्यतया तु दाहृतानि नत्वानि यज्ञादीनां दृष्टान्तत्वेनोदाहरणयोग्यानीत्याह प्रकृताविति दर्शपूर्णमासादिषु प्रकृतिषु यागादिषु यः
पदार्थानां क्रमस्तदुपकारस्तस्य प्रथममतिदेशः तत्सद्भावेन पदार्थानां विकृतिषु सौर्यपशुयागादिष्वतिदेशः नतु प्राकृतपदार्थानामतिदेशोना
विकृतिषु विनियोगानन्तरं पदार्थानामुपकारकल्पनमिति न तत्र क्रमोपकारपरित्यागेनोपकारान्तरप्रसक्तिरस्तीत्यर्थः एतदुक्तं भवति प्रकृते
९८ यज्ञादीनां विनियोगानन्तरमुपकारकल्पनमतिदेशस्थले तु उपकृतानुपकारकल्पनानन्तरं प्रकृतपदार्थानां विकृतिषु विनियोगः ततो दृष्टान्तोऽवि
नामेवतेषां किफलं दुरितक्षयं विद्यापेक्षतेन काम्यानां फलं स्वर्गादि तत्र यथा प्रकृतौ क्रमोपकाराणामङ्गानामतिदेशः सति न प्राकृतोपकारात्ति
रिक्तोपकारकल्पनमेवं ज्ञाने विनियुक्तानां यज्ञादीनां क्रमनित्यफलपायत्वयातिरेकेण ननित्यकाम्यसाधारणविद्योपयोग्युपकारक
ल्पनमिति सन्देहपक्षाशीयकेतु नित्यानां काम्यानां च कर्मणां विनियोग उक्तः यज्ञादिशास्त्राविशेषात् प्रकृतौ क्रमोपकाराणां पदार्थानां क्रमप्र
प्राकृतोपकारातिरेकस्तुत्वेनैव विकृतिष्वतिदेशेन सम्बन्धो न तु पदार्थानामतिदेशेनेतरस्मुपकारकल्पने तेन न तत्र प्राकृतोपकारातिरिक्तोप
कारकल्पनाप्रसक्तिः इत्ततु प्रसक्तं प्रथममेव विनियुक्तानां यज्ञादीनामुपदिष्टानामिव पश्चात्कल्पनीय उपकारः प्रथमावगतविनियो
गानिर्वाहाय क्रमोऽपि सामान्यशास्त्रप्राप्तः सकलनित्यकाम्यसाधारणः कतेन कल्प्यः मूर्धन्यमीमांसकैरपि स्तुपकारस्तुत्वेन पदार्थान्वयप
वक्रमोपकारनियमः पदार्थान्वयानन्तरमुपकारकल्पने त्वक्रमोऽपि विनियुक्तपदार्थानुगुण एव उपकारः कल्पनीय इति सप्रतिपाद्यैव वा
यलक्षणं रसमिद्धार्थमुपकारस्तुत्वेन विकृतिषु प्राकृतान्वयोदृशमाद्येसमर्थितः प्रप्रसक्ति इतान्विति दार्ष्टान्तिकइत्यर्थः प्रकृतानुगुणदृष्टान्त
मात उपदिष्टानामिति दर्शपूर्णमासादिप्रकरणेष्वमन्त्रवाक्यतानां पदार्थानां श्रुतिलिङ्गादिभिर्दर्शपूर्णमासादिषु विनियुक्तानां प्रथमावग
त विनियोगनिर्वाहाय यथायोग्यं दृष्टादृष्टफलदाता उपकारः कल्प्यके यथा तथा उपकारोऽत्रापि कल्प्य एव न तु प्रथमावगतविनियोगपरित्यागोऽचितः
यज्ञाद्यविशेषश्रुतिबाधप्रसङ्गादित्यर्थः सामान्यशास्त्रेति नित्यकाम्यसाधारणयज्ञादिशास्त्रेणेत्यर्थः यथा क्रमोपकारातिरिक्तोपकाराकल्पने क
ल्पतरुकारोक्तमीमांसकसंमतं तथा प्रथमावगतविनियोगानुसारेण क्रमोपकारकल्पनमपि मीमांसकसंमतमेवेत्याह मूर्धन्येति कर्ममीमांसके
रित्यर्थः मूर्धन्यमीमांसकैरपि सम्प्रतिपद्यैव प्राकृतान्वयः समर्थित इति संबन्धः पदार्थान्वयपक्षे पदार्थान्वयस्थल एवेत्यर्थः क्रमोपकारनियमः
क्रमोपकारातिरिक्तोपकाराकल्पनमित्यर्थः एवकारव्यावर्त्यमाह पदार्थान्वयानन्तरमिति उपकारकल्पनस्थले त्वित्यर्थः संप्रतिपाद्यैवेति स्वीकृ

सि॰ले॰ ह॰टी॰ ४६ मैवेत्यर्थः वा यत्नवत्त्वेनेति वाधाध्याया रंभसिद्ध्यर्थमित्यर्थः प्राकृतान्वय इति प्रकृतियागादेशे षभूतायेपदार्थास्तेषां विकृतियागादिष्वतिदेशेन प्राप्तिरि
त्यर्थः प्रत उक्तं भवति एवं तंत्रे दशमाध्याये वैकृतावतिदिष्टानामंगानां प्रकृतावुक्तोपकारस्यासंभवे बाधो निरूप्यते तत्र बाधनिरूपणं विकृति
ष्वतिदेशेन पदार्थप्राप्त्यनंतरमुपकारकल्पनपक्षेन सिध्यति प्रकृतौ प्रकृत्यादिभिर्विनियुक्तपदार्थानां दृष्टोपकारासंभवे अदृष्टोपकारकल्पन
वाधिकृतिषु अतिदेशेन विनियुक्तानां पदार्थानां दृष्टोपकारासंभवे दृष्टोपकारकल्पनयात त्स्वार्थसंबंधाभावेन नामनुष्ठानावश्यंभावेनके
षांचिदंगानामननुष्ठानं तदतिदेशाध्यायाः एव रूपवाधासंभवाद् तो वाधनिरूपणासिद्ध्यर्थं प्रकृतिवदृष्टोपकारस्यैवैनैव प्राकृतानामन्वयो विकृ
तिष्विति दशमाध्याये प्रथमाधिकरणे साधित तथा च यत्र पदार्थानां विनियोगानंतरमुपकारकल्पनं तत्र तत्तत्पदार्थसामर्थ्यानुसारेण प्रथमा
वगत विनियोगनिर्वाहायादृष्टोपकारकल्पनं मीमांसकसंमतमिति मतीयते यदि विनियोगानंतरमुपकारकल्पनास्थलेपि दृष्टोपकार
संभवे विनियुक्तपदार्थपरित्यागप्रसंगः तदृष्टोपकारकल्पने तत्संमतं भवेत्तदा उपकारमुखेनैव पदार्थानामतिदेश इति निरूपणपरमधिकरणव
र्थं स्यात्पदार्थानामेव श्रवणवचनादीनामतिदेशेन विनियोगेपि विकृतिगतकृष्णलादिषु श्रवणादेर्विकृतिस्तिनु बाधिमोक रूपं दृष्टोपकारस्थलो
कैव दृष्टोपकारालाभान्निस्तानामेवायं विनियोग इति उपगमेनिस्तेभ्यो दुरितक्षयस्तस्माद्वा ज्ञानोत्पत्तेरस्मत आसिद्धो यथार्थो यं विनियोगः
अन्यतः तदा सिद्धो ज्ञानो यद्विनोपकारजनकत्वे नित्येषु न दृष्टः सामित्यविशेषान्नित्यकाम्यसाधारणविनियोगो दुर्वार: नतु नित्यानां दुरितक्ष
यमात्र हेतुत्वस्यान्यतः सिद्धावपि विविदिषाज्ञानोत्पत्ति प्रतिवंधक दुरितनिर्वर्हकत्वं न सिद्धं किन्त्वास्मिन्विनियोगसति ज्ञानोद्देशेनेति
कसिद्धस्याभावाद् दृष्टोपकारकल्पनानंगीकाराच्च श्रवणादेरनुष्ठानादिलक्षणवाधस्य दशमाध्यायेनिरूपणीयस्य संभवेन तदर्थमुखेनैव पदा
र्थानामतिदेश इति निरूपणस्यानर्थक्यमिति न वाच्यं तस्माद्विविदिषावाक्येनाविशेषेण नित्यकाम्यसाधारणे विनियोगे प्रथममवगते तन्निर्वाहाया
दृष्टोपकारकल्पने फलकर्मैवेति वस्तुतस्तु नित्यकर्मस्वपि विद्यायेत्तिनोपकारजनकत्वं दृष्टमिति सिद्धं त्वात् किं चेत्यादिना अलाभादिति काम्ये
ष्विति शेषः नित्यानां विद्यायेत्तिनदुरितक्षयलक्षणोपकारद्वारा विद्याहेतुत्वं विविदिषावाक्यादन्यतः सिद्धमस्तिदेवा तत्रनोद्यः विविदिषावाक्ये
यर्थप्रसंगादित्याह नित्येभ्य इति विनियोग इति शेषः तद्रूपविनियोगस्यथकथमाह इत्यर्थः द्वितीयेनित्येष्वपि विद्योपकारकत्वमदृष्टमेव कल्पनीयमि
ति नित्यकाम्यसाधारणोपकारकल्पनं फलकर्मैवेत्याह अन्यतस्तदसिद्धाविति नित्यानां विद्योपकारकत्वासिद्धाविस्यर्थः अन्यतः सिद्धिं पक्षमेव
लंब्य विनियोगार्थवत्त्वं शंकते नन्विति दुरितेति तावद्विविदिषाज्ञानोत्पत्तिप्रतिबंधकं ज्ञानोत्पत्तिमपसुदासीनसत्त्वरकादिमत्त्वं च तथा च नित्यानां ज्ञानो ४६
विनियोगाभावेनित्यकर्मभिर्ज्ञानप्रतिबंधकदुरितस्यैवक्षय इत्यत्र नास्ति मानं यमेण पापमपनुदतीति यज्ञादानेनतपसेत्यत्र वपावनानि मनीषिणामित्यादि

ष्कृतिस्मृतिवचनानां नित्यानां दुरितक्षयमात्रहेतुत्वबोधनमात्रपरत्वात् तेनो नियमेन ज्ञानप्रतिबंधकदुरितक्षयहेतुत्वं नित्यकर्मणामन्यतो न प्राप्तमि
ति न तस्यास्य छौर्यं विनियोग इत्यर्थः नित्यैरेव यज्ञादिभिर्दुरितक्षयद्वारा ज्ञानं संपादयेदिति प्रकारेण विविदिषावाक्यीयेन नित्यानां ज्ञाने विनियोगे प्राप्ति
वाक्ये प्रतिबंधकदुरितस्यैव क्षयो नित्यानुष्ठानतो लभ्यत इत्याशंक्य किं विति न लाभप्रकारमाह प्रत्यक्षेति श्रवणमिति नित्यानुष्ठानाज्ज्ञानप्रति
बंधकदुरितक्षये सति प्रतिबंधकराहित्येन महावाक्याद्बोधकं ज्ञानं भवतीत्यर्थः इतरथेति एतद्विनियोगाभावादित्यर्थः दुरितसामान्यक्षयरूपा शुद्धिर्भ
वति न तु नियमेन ज्ञानप्रतिबंधकदुरितक्षयरूपशुद्धिविशेषो भवति ज्ञानोद्देशेन नित्यानामननुष्ठानात् तथा च वक्ष्यमाणस्य नित्यकर्मानुष्ठानशील
स्यापि नियमेन ज्ञानं न जायेत किं त्वदृष्टवशात् कदाचित् ज्ञानप्रतिबंधकदुरितक्षयसंभवे सति तत्संभवे ज्ञानमपि कदाचिद्भवतीत्यनियता ज्ञानोत्पत्तिरित्यर्थः
ज्ञानायेति नोपकारो नित्येषु शुद्धेति मतं निरालंबनमित्याभिप्रायकाम्येष्विव नित्येष्वप्यङ्गोपकारकल्पने तुल्यमिति द्रष्टव्यमिति नहीति नित्येषु ज्ञानोप
कारकत्वनियमास्तीत्यर्थः नन्वेवमपि नित्यानामेव विनियोगपक्षे विधलौघवमस्ति तेषां पक्षे ज्ञानप्रतिबंधकदुरितानिर्वर्तकत्वस्यावचनात् काम्यानाम

मान्यतु नित्यतो बध्यं ज्ञानं भवति इतरथा शुद्धिमात्रमनियता ज्ञानोत्पत्तिरिति नित्यार्थ कोऽयं विनियोग इति चेन्न हि नित्यानामप्यङ्गसमेव नियमतो ज्ञा
नोत्पत्तिप्रतिबंधकदुरितनिबर्हणेन ज्ञानसाधनविशिष्टगुरुलाभश्रवणमननादिसंपादिका सर्वव्यवहारं कल्पनीयमित्यङ्गतोपकारकल्पना
विशेषा ज्ञसामान्यस्य ङ्गत्वोपपादिनो नित्यकाम्यसाधारणाविनियोगो भंजनीय इति नन्वेवमपि कथं कर्मणो विहितस्य विद्यास्थितानजनकादयः
मादिस्मरणान्निर्वाहः न च तस्य विद्यार्थकर्मानुष्ठानपरत्वे विविदिषावाक्ये ब्राह्मणग्रहणेन ब्राह्मणानामेव विद्यार्थकर्मण्यधिकारप्रतीतेः श्रु

तेन नियममात्रस्य विधिलभ्यात्काम्येषु तु ज्ञानप्रतिबंधकदुरितनिर्वर्तकत्वं सर्वथानवगतमिति काम्यानामपि विनियोगपक्षे विधेयस्तात्पर्यगौरवमपि वि
तार्थमिति चेन्न तथापि यज्ञादिश्रुतीनां संकोचलक्षणबाधपरिहाराय काम्यानामपि विनियोगाश्रयणपक्षेऽपि च तात्पर्यबोध्यं नित्येभ्यो ज्ञानप्र
तिबंधकदुरितस्यैव क्षयरूपशुद्धिविशेषलाभेऽपि तावन्मात्रान्न ज्ञानोत्पत्तिरास्ति श्रवणाद्यपेक्षासंभवान्नादिरूपस्य प्रतिबंधकसत्त्वात् तन्निरासोप
योगिना मुमुक्षुगुरुतदधीनश्रवणमननध्यानादीनां संपादकादृष्टजनकत्वं तेषामङ्गत्वमेव विविदिषावाक्यीयविनियोगबलात्कल्पनीयमित्याह
ज्ञानसाधनेति एवं विविदिषाद्वारा विद्यायां कर्मणां विनियोगो निरूप्यते शुद्धत्रैवर्णिकानामप्यधिकार इति निरूपणार्थमाहोपमाज्ञेन प्रसंगं दर्शयति नन्विया
दिना एवमपीति तत्रा सिद्धेति तु विज्ञानं कर्म चोक्तं कामानेइनि ज्ञानकर्मसमुच्चयप्रतिपादकस्मरणस्य विविदिषावाक्याविरोधेन ज्ञानं साक्षान्मोक्षसा
साधनं कर्म विद्याद्वारा तत्साक्षिसाधनमिति क्रमसमुच्चयपरतया निर्वाहेऽपीत्यर्थः अत्रावधारणेन संसिद्धिमास्थिताः मुक्तिमतिकर्मातिरिक्तोपायनिषेधा १४४
ज्ञानकाद्यनुष्ठितकर्मणा मुक्तिप्राप्तिसाधनादेवोपयोगः प्रतीयते स च विविदिषावाक्यविरुद्ध इति समुच्चयस्मरणाद्वदेस्मरणस्य निर्वाहो नास्तीत्यर्थः

अस्याधिविविदिषावाक्यादिकं सिद्धं स्यादिमममर्थमाशंक्य निषेधति नचतस्येति विद्यार्थेति अस्मिन्नंशे तं सिद्धिपदं विद्यापरं तथाच शुद्धिद्वारा कर्मणो
वविद्यासाधनत्वादिति स्मरणार्थ इति भावः तस्य स्मरणस्य विद्यार्थकर्मानुष्ठानपरत्वं नचेत्यत्र हेतुमाह विविदिषावाक्य इति अत्र इति विविदिषावाक्ये विद्याधि
द्यासाधनकर्मणि त्रैवर्णिकोनामनधिकारादित्यर्थः उपलक्षणत्वादिति तथाच भाष्ये ब्राह्मणग्रहणमुपलक्षणार्थमविशिष्टो ह्यधिकारस्त्रयाणां व
र्णानामिति तथाच विद्यार्थकर्मसु जनकादीनामप्यधिकारस्तस्मात्कर्मणैवहीतिस्मरणं विद्यार्थकर्मानुष्ठानपरमेवेति नतद्बलात्कर्मणाविदित्वा तिस्स्वु
मेति नाम : पंथाइत्यादि श्रुतिविरुद्धः साक्षादेव कर्मणो मुक्त्युपयोगो वक्तव्य इति भावः अत्रभवंत इति पूज्या इत्यर्थः आत्मबोधन इति आत्मबोधसाधनय
ज्ञादिकर्मणीत्यर्थः विद्यार्थकर्माधिकारस्यैव प्रकृतत्वादिति मतश्च नतु विविदिषावाक्ये ब्राह्मणपदस्य त्रैवर्णिकोपलक्षणत्वे सिद्धे त्रयाणां वर्णानाम
विशेषेण विद्यार्थकर्मस्वधिकारः सिध्यति सर्वेषामविशिष्टाधिकारत्वे सिद्धे तदनुरोधेन ब्राह्मणग्रहणस्योपलक्षणत्वं सिध्यतीति परस्पराश्रयत्वम
स्मादिति चेन्न ब्राह्मणग्रहणस्य द्विजोपलक्षणत्वमनुपजीव्येव सर्वेषां द्विजानां विद्यार्थकर्मस्वधिकारस्तिद्धेर्वार्तिकवचने विवक्षितत्वात् नतु विविदिषा
तोजनकाद्यनुष्ठितकर्मणां साक्षादेव मुक्त्युपयोगो वक्तव्यः नैवम् विविदिषावाक्ये ब्राह्मणग्रहणस्य त्रैवर्णिकोपलक्षणत्वात् यथाहुरत्रभवंतो
वार्तिककाराः ब्राह्मणग्रहणं चात्र द्विजानामुपलक्षणम् अविशिष्टाधिकारित्वात्सर्वेषामात्मबोधन इति नहि विद्याकामो यज्ञादीननुतिष्ठेदिति
विधिविशिनष्टि विद्याकामाधिकारविधौ ब्राह्मणपदस्याधिकारिविशेषसमर्पकत्वं कल्प्यते उद्देश्यविशेषणयोगात् नापि राजा स्वाराज्यकामो रा
जसूयेन यजेतेति स्वाराज्यकामाधिकारे राजसूयविधौ स्वाराज्यकामो राजकर्तृकेण राजसूयेन यजेतेति कर्तृतया यागविशेषणत्वेन विधेय
वाक्ये ब्राह्मणग्रहणेन ब्राह्मणस्यैव विद्यार्थकर्मस्वधिकारे प्रतीयमाने कथं वर्णत्रयसाधारणाधिकारः सिद्ध्येदिति चेन्न वक्तव्यं किं ब्राह्मणपदस्य यज्ञादि
विधावुद्देश्यविशेषणसमर्पकतया ब्राह्मणमात्राधिकारज्ञापकत्वं किं वा विधेयकर्तृसमर्पकतया तदुभयसमर्पकत्वाभावे पि स्वसन्निधिमात्रेण तन्मा
त्राधिकारज्ञापकत्वेवागतसंनताभावात्त्रैवर्णिकोपलक्षणत्वात् नहोति यज्ञादीनां विद्यालक्षणफले विनियोगपरे विधौ विद्याकामस्याधिकारः सिद्ध एव तथाच
ब्राह्मणपदविशिष्टस्य विद्याकामस्याधिकारो विवक्षित इति स्वीकृत्य ब्राह्मणपदस्याधिकारिविशेषणसमर्पकत्वं वक्तुं न शक्यते विधेये यज्ञादिनिरूपितो
देश्यतायाः विद्याकाममात्रे पर्यवसानसंभवेन ब्राह्मणरूपविशेषणस्यानाकांक्षितत्वात् तथा विद्याकामं प्रति विशेषणत्वेनान्वयायोगात् विशिष्टस्योद्देश्य
त्वे कल्पनागौरवाच्च विद्याकामब्राह्मणयोः प्रत्येकमुद्देश्यत्वे च वाक्यभेदप्रसंगात् द्विद्याकामो यज्ञादीननुतिष्ठेत ब्राह्मणो यज्ञादीननुतिष्ठेदिति भावः द्वितीयं
यं सदृष्टांतमाशंक्य निराकरोति नापीति स्वाराज्यकामवाक्ये राजपदस्य पूर्वोक्तरीत्या स्वाराज्यकामं प्रति विशेषणत्वायोगात् कर्तृविधायकत्वं स्वीकृ ४७
त्य राजसूयेनेत्यत्र राज्ञः सतः स्वाराज्यकामस्याधिकारः साधित इत्यर्थः राज्ञो यागादधिकारिकोटिनिवेशाद्विदितिसंबंधः अर्थादिति पक्षे कामयोपनिस्कृदयति।

राजकर्तृकेपि इहेति विविदिषावाक्य इत्यर्थः विधेयस्येति विद्याकामो ब्राह्मणकर्तृकयज्ञादीनन्वतिष्ठेतेत्येवं विधेयस्येत्यर्थः अर्थादिति ब्राह्मण
कर्तृकयज्ञादेर्ब्राह्मणेनसंपादयितुमशक्यत्वादित्यर्थः अर्थादधिकारिकोटिनिवेश इत्यपि न कश्चन इत्यत्र हेतुमाह तेनैवम्प्यमभिप्रेत्य हेतुमाह सर्व
व्यापीत्यादिना यज्ञादीनामाश्रमकर्मत्वपदे विद्यासहकारित्वपदे च यावज्जीवादिवाक्येषु येग्निहोत्रादयो धर्मा विहितास्त एवात्रोपेयाः अतः श्रुति
स्मृतिरूपोभयलिंगात् श्रुतिस्तावद्धि विविदिषावाक्यगतयज्ञादिश्रुतिरेव तया प्रसिद्धयज्ञादीनां प्रसिद्धदानादीनां च प्रत्यभिज्ञायमानत्वादपूर्वय
ज्ञादिविधायकत्वे प्रत्यभिज्ञाविरोधात् प्रसिद्धयज्ञाद्यनुवादेन फलसंबंधमात्रबोधने लाघवाच्च यज्ञादीनां सर्वेत यज्ञादिपदोपात्तत्वेनानुविधेयता
प्रतीतेश्च स्मृतिश्चानाश्रितः कर्मफलमित्याद्या प्रसिद्धयज्ञादीनामेव फलाभिसंधिं विनानुष्ठितानां विद्याहेतुत्वं दर्शयतीति तत्त्वार्थः अन्यथेति चावि

स्य राज्ञो राजकर्तृकराजसूयस्य राज्ञा संपादयितुमशक्यत्वादर्थादधिकारिकोटिनिवेशवदिह यज्ञादिकर्तृतया विधेयस्य ब्राह्मणस्यार्थादधिकारि
कोटिनिवेश इति भुज्यते सर्वथापि तयवोभयलिंगादिति स्त्रेत्यत्र विहितानामेव यज्ञादीनां विविदिषावाक्ये फलविशेषसंबंधविधिर्न सर्वयज्ञादि
विधिरिति व्यवस्थापितत्वेन प्राप्तयज्ञाद्यनुवादेनैकस्मिन्वाक्ये कर्तृरूपगुणविधिः फलसंबंधविधिश्चेत्युभयविधानात् वाक्यभेदापत्तेः नापि रा
जसूयवाक्ये राज्ञः कर्तृतया विधेयत्वाभावपक्षे राजपदसमभिव्याहारमात्राद्धि विशिष्टकर्तृत्वलाभवदिह वाक्यभेदाय कर्तृतया ब्राह्मणविधा
नेपि ब्राह्मणपदसमभिव्याहारमात्रेण ब्राह्मणकर्तृकत्वलाभात्त्रैवर्णिकाधिकारपर्यवसानमित्युपपद्यते अन्यथा त्रैवर्णिकाधिकारित्वेन लोकमानामि
हापित्रैवर्णिकाधिकारात्मविद्यार्थत्वेन विधीयमानानां यज्ञादीनां त्रैवर्णिकाधिकारित्वस्य प्रकृततया विधिसंसर्गाहीनब्राह्मणपदसमभिव्या
हारमात्रादधिकारसंकोचासंभवेन ब्राह्मणपदस्य यथाप्राप्तविद्याधिकारिमात्रोपलक्षणतोचितात् न तु विद्याधिकारिमात्रोपलक्षणत्वेस्य द

दिषावाक्यादन्यत्र कर्मकांड इत्यर्थः उभयविधानादिति राजसूयवाक्ये तु कर्त्रादिगुणविधिः स्यात्सर्वकर्मणामेव विधिप्राप्तिमात्रवाक्यभेदप्रसक्तिरितित्र
राजपदस्य कर्तृरूपगुणाविधायकत्वमुक्तमिति भावः तृतीयमपि सहस्रोतमात्रेवपनिराकरोति नापीति राज्ञ इति राज्ञः कर्तृतया विधेयत्वाभावेपि राज
पदराजसूयाधिकारः सिध्यति राजपदसन्निधानेन स्वाराज्यकामपदस्य राज्ञविषयपरत्वावगमात् अन्यथा राजपदवैयर्थ्यप्रसंगादिति तात्पर्यं तथैवमेते रा
ज्ञः कर्तृतया विधिर्नाभ्युपगम्यते नैषां पदे इत्यर्थः ब्राह्मणमधिकारपर्यवसानमित्यपि नोपपद्यते इत्यत्र हेतुमाह अन्यत्रेति कर्मकांड इत्यर्थः इहापी
ति विविदिषावाक्येपीत्यर्थः त्रैवर्णिकाधिकारात्मविद्येति ब्राह्मणस्येतरद्वित्रयं वैश्ययोरपि विद्यायामर्थित्वलक्षणाधिकाराविशेषात् सहस्यैव विद्यार्थय
ज्ञादिषु तयोः प्रतिषेधाभावाच्चेत्यर्थः युक्तनयेति अधिकारिणामसंकोचस्य विधिगतानुष्ठापकत्वलक्षणप्रामाण्योपपादकत्वादिति भावः अन्यत्र

सि॰ ले॰
रा॰ टी॰
५८

ल्हमन्वाद्युपयति त्रयमास्यापि त्रैवर्णिकेष्वपयोरधिकारस्य ब्राह्मणमयहमपवादकमित्याशंक्याह विधिसंसर्गहीनेति उद्देश्यसमर्पकतया विधिवाक्याधीनत्वयवोपायानुपयोगीत्यर्थः राजसूयवाक्ये न राजसूयस्याप्रैवर्णिकाधिकारित्वेनाप्युल्हमन्वाद्युक्तो विधिसंसर्गहीन राजपदसमभिव्याहारमात्राद्राजकर्तृनियम इति भावः ननु तन्न्यायेन ब्राह्मणपदाभावेपि त्रैवर्णिकस्ययोरिव ब्राह्मणस्यापि विद्यार्थकर्मस्वधिकार[illegible]ब्रह्मग्रहणेवत्वर्थमेवस्यादिति चेन्न विद्यार्थकर्मसु ब्राह्मणस्य मुख्याधिकारज्ञापनार्थत्वोपपत्तेर्वैयर्थ्याभावकापादिनिभावः [illegible]ग्रहणस्योपलक्षणत्वेति प्रसंगेशंकते नन्विति । अविधेयायां हि विद्यायामधिकारो नाम विद्यार्थित्वमात्रं तच्च शूद्रस्यापि संभवतीति [illegible] तस्यापि विद्यार्थकर्मस्वधिकारोस्तु वा इत्यर्थः शूद्रस्य सगुणब्रह्मविद्यासु निर्गुणब्रह्मविद्यासाधने वेदान्तश्रवणादिषु [illegible] नास्त्यधिकार इति निर्णीतमपशूद्राधिकरणे तस्याधिकाराभावे च भाष्ये हेतुरुपन्यस्तो वेदाध्ययनाभावादिति शूद्रस्य वेदो[illegible]निषेधेन वेदाध्ययनाभावे विवेदार्थभूतोपासनाद्यनुष्ठानं किं न स्यादित्याशंक्याध्ययनविधिना वेदजन्यवेदार्थज्ञानस्य वेदार्थानुष्ठाने नियमितत्वादध्ययनशूद्रस्य न

स्यापि विद्यायामर्थित्वसंभवेन तस्यापि विद्यार्थकर्माधिकारप्रसंग इति चेन्न अध्ययनगृहीतस्वाध्यायजन्यतदर्थज्ञानवत एव वैदिकेष्वधिकार इत्यपशूद्राधिकरणे अध्ययनवेदवाक्यश्रवणादिविधुरस्य शूद्रस्य विद्याधिकारनिषेधात् न शूद्राय मतिं दद्यादिति स्मृतेर्यथा न तोपि तस्य विद्यामहिमावगत्युपायासंभवेन तदर्थित्वानुपपत्तेश्च तस्य विद्यायामनधिकारादिति केचित् अप्रमेत्याह शूद्रस्याप्यस्य वा विद्यार्थकर्माधिकारः तस्य वेदानुवचनाधिकाराद्यसंभवेपि केचिदोक्तसर्ववर्णाधिकारश्रीपञ्चाक्षरमंत्रराजविद्यादिजपपापक्षयहेतुतया दानपाठयज्ञादिस

द्भावात्तत्सगुणनिर्गुणविद्यानुष्ठाने स्वाधिकारः स्त्वके तथा च तल्लक्षयाविद्यार्थकर्मस्वप्यधिकारो नास्तीत्यर्थः ननु शूद्रस्य वेदोक्तयज्ञादिष्वधिकाराभावेपि वक्ष्यमाणरीत्या तस्य विद्यासाधनकर्मणां संभवाद्विद्याकामनया शूद्रस्यापि तेषामनुष्ठानं संभवतीत्याशंक्य तस्य विद्याकामनैव न संभवतीत्याह नशूद्रायेति मतिं शास्त्रार्थज्ञानं विद्यायाः माहिमनिरतिशयानंदरूपब्रह्मप्राप्तिसाधनत्वं शूद्रस्यापि विद्यार्थकर्माधिकारप्रसंग इत्यत्रेष्टापत्तिरित्याह शूद्रस्याविति केचनेत्युक्तः सर्ववर्णाधिकारो यस्मिन् तादृशा विद्यादिजपेष्वतत्रोक्तः श्रीमत्पञ्चाक्षरमेव मंत्रराजविद्याश्रादिपदेचागमिकपौराणिकमंत्रानभिप्रेत्याह्यर्थं तथा च ब्रह्मोत्तरखंडे किं तस्य बहुभिर्मंत्रैः किं तीर्थैः किं तपोध्वरैः यस्यो नमः शिवायेति मंत्रो हृदयगोचरः मंत्राधिराजराजोयं सर्ववेदान्तशेखरः सर्वज्ञाननिधानं च सोयं शैवः षडक्षरः मणवेन विना मंत्रः सोयं पंचाक्षरः स्मृतः स्त्रीभिः शूद्रैश्च संकीर्णैर्धार्यते भक्तिकांक्षिभिरिति पाठयज्ञा ५८
दीन्यादिपदहविजशुश्रूषानामकीर्तनतीर्थस्नानादिसंग्रहार्थम् नन्वविविदिषावाक्ये शूद्रसाधारणवर्णधर्माणामुपलक्षणोपियज्ञादीनामेकवाक्यो

पादानान्नैवासमुच्चयस्य विद्यासाधनत्वं भावितं यज्ञादिश्रुतेरश्ववदित्याधिकरणे इति कथं तस्य विद्यार्थकर्माधिकार इत्याशंक्य हेत्वसिध्या दूषयति वेदानुवचनेने
ति वेदानुवचनेन विविदिषंतीति यज्ञेन विविदिषंतीत्यादिरूपेण प्रत्येकं साधनत्वश्रुतेर्न समुच्चयापेक्षा तद्धि वृत्तायां हि वेदानुवचनयज्ञदानतपोभिर्विविदिषंतो
ति वाक्यं स्यात् पृथक्करणविभक्तिश्रवणेपि वेदानुवचनेन च यज्ञेन च तपसा चेति अनिपासार्थं चकारश्रुत्या वाक्यं स्यात् यदग्नये च प्रजापतये चेत्यादिवदिति भावः
यत्नायाततो विद्यामहिमावगत्युपायासंभवेन विद्यायामार्थित्वलक्षणाधिकारानुपपत्तिरिति तद्दूषणं निराकरोति न च शूद्रस्येति श्रावयेदिति ब्राह्मणश्रुतिशे
षः पुराणादिवियादीन् श्रावयेत् तदाविशेषमाह हंतेति पुराणादिभिः साधनमस्तेरवगतविद्यामाहात्म्येन शूद्रेणासनयातेत्यर्थः मतिनिषेधवचनस्य संको
चं दर्शयति न शूद्रायेति प्रमत्थेति शास्त्रार्थज्ञानमात्रदाननिषेधपरत्वमित्यर्थः शूद्रस्य स्वतः पुराणादिपठनेनिषेधाद्भ्योपि पुराणादिश्रवणाभावेत्वयु
मीवगतिर्न संभवतीत्यर्थः इथापत्तिमाशंक्याह शूद्रश्च न यो वर्ण इत्यादिना जातिजन्मेउपनयनाभिद्वितीयजन्मशूद्रस्येत्यर्थः अप्रक्षालनमेवेति नत्वपोषणानम

भवात् वेदानुवचनेन यज्ञेन दानेनेति पृथक्करणविभक्तिश्रुतेर्विविदिषावादीनां विद्यार्थजपदमादिमात्रानुष्ठानानुमतेश्च वेदानुवचनादिसमुच्चयानपेक्ष
णात् न च शूद्रस्य विद्यायामर्थित्वासंभवः श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत इत्यादीतिहासपुराणश्रवणे चातुर्वर्ण्याधिकारस्मरणेन पुराणाद्य
वगतविद्यामाहात्म्यस्य तस्यापि विद्यार्थित्वसंभवात् न शूद्राय मतिं दद्यादिति स्मृतेश्च तदनुष्ठानानुपयोगयज्ञहोमादिकर्मज्ञाननिषेधपरत्वाच्च श्रम
ण्यात्तस्य स्ववर्णधर्मस्याप्यवगत्युपायासंभवेन शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि समक्रोधाः शौचमाचमनार्थं पाणिपादप्रक्षालनमेवैकं श्राद्धक
र्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामित्यादितद्धर्मविभाजकवचनानामननुष्ठानलक्षणाप्रामाण्यापत्तिः न चैवं सत्यपशूद्राधिकरणस्य नि
र्विषयत्वं तत्र शूद्रे पातकं किंचिन्न च संस्कारमर्हतीति स्मृतेरुपनयनाख्यविद्योपनयनसंस्काररहितस्य शूद्रस्य तद्गुणविद्यास्वनिर्गुणविद्यासा

गत्यर्थतादिकं चेत्येवकारार्थः उत्तरेषामिति द्विजानामित्यर्थः न शूद्राय मतिं दद्यादिति स्मृतेः शास्त्रार्थज्ञानमात्रदाननिषेधपरत्वेपि वृद्धौ च मातापितरौ भा
र्या साध्वी सुतः शिशुः अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदित्यादिवचनदर्शनेन ये ब्राह्मणादुत्कृष्टलक्षणमात्रादिसंरक्षणोपयोग्यर्थलाभाय शूद्रान्प्रति
पुराणादिपठने प्रवर्तन्ते तेभ्यो विद्यामाहात्म्यस्वधर्मयोरवगतिसंभवान्न काप्यनुपपत्तिरिति मंतव्यं न चैवमिति शूद्रस्यापि विद्यार्थकर्माधिकारस्वीकार इत्य
र्थः निर्विषयत्वमिति तदधिकरणस्य शूद्राधिकारनिषेधपरत्वादिति भावः सत्यं तदधिकरणं शूद्राधिकारनिषेधपरं किंतु विद्यार्थकर्माधिकारनिषेधप
रं न भवति वेदांतश्रवणाद्यधिकारनिषेधपरत्वान्न दोष इति परिहरति तस्य न शूद्र इत्यादिना वेदांतश्रवणमशुश्रूषोपासने चाधिकाराभावे हेतुगर्भविशेषण
माह गुरूपसदनाख्येति शूद्रस्य संस्कारमन्तरेणा तमाह न शूद्र इति पातकमिति अभक्ष्यभक्षणादिकृतमित्यर्थः संस्कारो द्विविधः अध्ययनाङ्गोपनयन
लक्षणो विद्याङ्गोपनयनलक्षणश्चेति द्विविधमपि संस्कारं निषेधति न च संस्कारमर्हतीति शिष्यत्वेन स्वीकारसमीस्यात् अनुरूपं विद्याङ्गोपनयनमाचार्यक

सि.ले.
र.टी.
५५

देके तद्वृत्तोपाध्यायकर्तृकशूद्रूपसदनस्य सर्वकर्तृकशूद्रोपसदनादविशिष्टत्वं शूद्रोपसदने च तद्विहितानामर्थस्य शूद्रमेवाभिमानकेदित्यादिना विद्यांगत्वेन विहितं तथा तं हो
पनिषेधेऽस्यादिशूद्रस्याविद्यांगत्वेनोपनयनं च शनी यत इति भावः न विद्यार्थिनं शूद्रमुपनीतवानित्यर्थः ननु श्रूद्रस्य सगुणोपासने प्रवृत्ति निर्गुणविद्यासाधनवे
दांतश्रवणादिष्वपि वा निर्गुणविद्यायामप्यधिकारनिषेधपरमपशूद्राधिकरणं किं न स्यादिति निरामकाभावात् तथा च निर्गुणविद्यायामधिकाराभावेन तस्या
यनकर्मसु शूद्राधिकारेण न सिध्येदित्यत आह निर्गुणविद्यायामिति अस्या विद्यालक्षणस्य विषयस्य तो दर्शयन्त्युक्ति साधनत्वं तज्ज्ञानशूद्रस्य विद्यायामर्थित्वलक्षण
धिकारस्य तदधिकरणन्यायेन निषेद्धुमशक्यत्वादित्यर्थः ननु शूद्रस्य विद्यायामर्थित्वलक्षणाधिकारसत्त्वेऽपि तदनिरिक्तस्याधीनवेदत्वादिरूपविशेषणस्यानधिकारस्याभा

यन त्ववेदांतश्रवणादिष्वप्यधिकारनिषेधपरत्वान्निर्गुणविद्यायां शूद्रस्यापि विषयसौदर्यमयुक्तस्यार्थित्वस्य निषेद्धुमशक्यत्वात् श्रविधेयायां च तस्यानद
तिरिक्ताधिकाराप्रसक्त्यात त्रिषेधायोगाच्च न च तत्स्य वेदांतश्रवणासंभवे विद्यार्थकर्मानुष्ठानसंभवेऽपि विद्याङ्गसंततस्मतदर्थकर्मानुष्ठानं व्यर्थमिति वा
च्यं तस्य वेदांतश्रवणाधिकाराभावेऽपि भगवत्सादेः श्रावयेच्चतुरो वर्णान् इति च निहासपुराणाधिगमचातुर्वर्ण्याधिकारस्मरणाद्वेदपूर्वं तत्त्वनास्त्यधिका
रः स्मरणामिति निश्चितमिति अपशूद्राधिकरणोपसंहारभाष्ये ग्रन्थैकयपरपुराणादिश्रवणे विद्यासाधनाधिकारस्य दर्शितत्वात् विद्योत्पत्तियोग्यविग्र
लदेवशरीरनिष्पादनद्वारामुत्यर्थं भविष्यतीति त्रैवर्णिकानां मुक्तिफलकसगुणब्रह्मविद्यार्थकर्मानुष्ठानवद्वेदांतश्रवणयोग्यत्रैवर्णिकशरी
रनिष्पादनद्वारा विद्योत्पत्त्यर्थं भविष्यतीति शूद्रस्य विद्यार्थकर्मानुष्ठानाविरोधाच्च तस्माद्विविदिषावाक्ये ब्राह्मणपदस्य यथा न स विद्याधिकार

वात्कथं तस्याधिकारो विद्यायामित्यत आह श्रविधेयायामिति च शूद्रः शंकानिरासार्थः तदतिरिक्तेति अर्थित्वातिरिक्तेत्यर्थः स्वर्गानुभववद्ब्रह्मानंदानुभवरूपाया
निर्गुणविद्यायाः फलरूपत्वाद्विधेयत्वफलस्याविधेयत्वात् तथा च यथा स्वर्गानुभवाद्यैकत्वेन दर्शितमात्रमधिकारस्तथा निर्गुणविद्यायामपि तदार्थित्वमात्रमे
वाधिकारः स च निषेद्धुमशक्यः विधेये ह्यवोपासनादिषु पूर्वोक्ताधिकारविशेषणान्तरापेक्षा शास्त्रेण निरूपितेति विषमो दृष्टान्त इति भावः श्रुसंभवइति अपशू
द्राधिकरणन्यायेन तदसंभवे सतीत्यर्थः तस्य वेदांतश्रवणाभावेऽपि ब्रह्मात्मैक्यपरपुराणादिश्रवणाधिकारस्य भाष्ये दर्शितत्वाच्छूद्रस्यापि संभवति विद्योत्पत्ति
रित्यर्थः भाष्येऽनुग्राह्यो व्याख्यानार्थः श्रावयेच्चतुरो वर्णानिति वचनेन शूद्रस्य पुराणादिश्रवणाभ्यनुज्ञानेऽपि मनननिदिध्यासनयोः संभवत्त्वज्ञानाभावान्मननाद्य
नुष्ठाने तस्य प्रसिद्धाविति न च मननादेः श्रवणांगत्वात् न पृथगभ्यनुज्ञानापेक्षेति वाच्यं प्रयाजदर्शपूर्णमासादेरिव मननादेर्न श्रवणाङ्गीभावे बोधकप्रमाणाभाव
न श्रवणादिषु गांगीभावस्य तत्र तस्य गाणत्वात् तथा च शूद्रस्य केवलपुराणादिभागश्रवणेऽपि विद्योदयासंभवात् विद्यार्थकर्मानुष्ठानवैयर्थ्यं तदवस्था
मेवेत्यस्वरसादाह विद्योत्पत्तियोग्येति यद्यपि तेषां पुराणाभ्यो वेदस्योपबृंहयेदिति वचनादितिहासादिगतब्रह्मात्मैक्यपरभागस्य वेदांतश्रवणजन्यतत्त्ववेदा
नार्थज्ञानोपकारकत्वमात्रमेव न तु वेदांतश्रवणमनपेक्ष्य स्वातंत्र्येण ब्रह्मात्मैक्यज्ञानजनकत्वमिति निश्चीयते तथा समेवतद्वचनपूर्वार्द्धसंगत्वेन विभेत्यल्पश्रु ५५

नाहं होमामयं प्रतरेदितीति भूयमर्थः अल्पं वेदमात्रं ज्ञाते विचारितं येन तादृशेन सोऽल्पश्रुतस्तस्माद्गुरुवाक्येन ज्ञातो वेदो बिभेति कथं बिभेति तत्राह मामिति अयमल्प
श्रुतः पुरुषः मां ज्ञातवेदं प्रतरेत् मां हित्वा स्वपाण्डित्यं मीमांसायामाभासवादिशङ्कया मामन्यथार्थान्तरपरत्वेन भावयेत् इति भावेनोऽहमर्थः एवं मतान्तरेण संभवाद्वेदो यतो ह
सपुराणाभ्यां वेदं समुपबृंहयेत् इति नतु सपुराणैर्वचनैर्मीमांसानुसारिभिस्तस्मान्नयाहं तन्मायत्वान्निश्चयसंपादनेनाराभीमांसानिर्णिताद्येवमावेदस्यापर्यवसि
ति तथा च सहस्य वेदान्तश्रवणादितस्य वेदान्तार्थोपबृंहणरूपब्रह्मानैक्यपरेतिहासादिश्रवणे महत्ता चापि नास्ति विद्योदयः आवश्यकत्वं तु शेषवर्णानामिति वचनमपि
सहस्यादैवत परपुराणादिश्रवणेनाशूद्रसार्थमभ्यनुज्ञापरं अपशूद्राधिकरणभाष्ये विशदस्यादैवतपुराणादिवर्णनेनविभेमल्पश्रुतादिति वचनेनास्तीति कृत्वा
कृतामिति न भाष्यविरोधोऽपि तथा च वेदान्तश्रवणे कृतायामविद्यानिवृत्तौ सहस्य नसिध्येदेवेत्यत्र साराह विद्योत्पत्तियोग्यत्वेति सुत्वार्थमिति तद्गुणब्रह्मोपासनमि
ति शेषः विद्योत्पत्त्यर्थत्वमिति सहस्य मन्त्रघटितयागादौ विद्योत्पत्त्यर्थत्वं भविष्यतीति निश्चयेन तदनुष्ठानसंभवादित्यर्थः तस्मादिति सहस्य विद्यार्थकर्मानुष्ठा
नेवाथकाभावादित्यर्थः विद्याधिकारमाश्रेति नतु ब्राह्मणपदस्य ब्राह्मणमात्रपरत्वे नवान्तैवर्णिकमात्रमिति नमात्रपरत्वे आर्थः ब्राह्मणपदस्य द्विजोपलक्षणत्ववार्ति

मात्रोपलक्षणत्वेन सहस्यापि विद्यार्थकर्माधिकारः सिद्ध्यत्येव ननु तत्कर्मणां चित्तशुद्धिद्वारा विद्योपयोगः संन्यासस्य किं द्वारा विद्योपयोगः केचिदाहुः वि
द्योत्पत्तिप्रतिबन्धकदुरितानामनन्तत्वात् किंचित्प्रत्यानुष्ठाननिवर्त्यं किंचित्संन्यासापूर्वनिवर्त्यमिति कर्मवत् चित्तशुद्धिद्वारैव संन्यासस्यापि तदुपयोगः तथा च
गृहस्थादीनां कर्मच्छिद्रे श्रवणाद्यनुष्ठाने तस्मिन् जन्मनि विद्यावाप्तिः किंतु जन्मान्तरे संन्यासफले बलवत्प्रतिबन्धकेषां तु गृहस्थानामेव जनकादीनां
विद्याप्रत्यनेते तेषां पूर्वजन्मनि संन्यासाद्विद्यावाप्तिः अतो न विद्याः संन्यासापूर्वव्यभिचारशंकापीति अन्ये तु शान्तो दान्त उपरत इत्यादिश्रुत्या उपरतशब्दलक्षिते

कवचनेयोहे तत्रकः त्रयाणामात्मबोधनकर्मस्वधिकाराविशेषादिति तस्य हेतोः सहस्राधारणत्वादिति भावः किं वेति किमदृष्टद्वारा विद्योपयोगः किं वा दृष्टद्वा
राना च्यः विद्योत्पत्तिप्रतिबन्धकदुरितस्य यज्ञाद्यनुष्ठानजनितापूर्वेणैव निवर्तितत्वेन संन्यासजनितापूर्वनिवर्त्यदुरितालाभे सति संन्यासस्यैवापूर्वस्याज्ञानान्नोह
तोपलब्धदृष्टोपलम्भादिसाधनाभिप्रायः तत्राद्यपक्षमसमर्थयते केचिदाहुरिति न च संन्यासापूर्वस्य न विद्योदये हेतुत्वं असंन्यासिनामपि केषांचिद्विद्योदयेऽपि न श्रवण
द्यनुष्ठानदर्शनात् केषांचित्संन्यासं विनैव विद्योदयस्य प्रमाणासिद्धत्वाच्चेत्यत्राह तथा चेति संन्यासस्य विद्यामनिदृष्टद्वारा तु पलम्भेनादृष्टद्वारैव विद्यावाप्ति
हेतुत्वे संन्यासविधिना सिद्धे सति तथा च दृष्टद्वारोपलम्भो सिद्धः लौकिकवैदिकव्यापारविक्षिप्तचित्तस्य विद्योदयासंभवेन सर्वकर्मसंन्यासस्यावैदपरित्यागे
तदुपदृष्टद्वारा विद्याहेतुत्वसंभवादिति द्वाचं लौकिकवैदिककर्मवतामपि केषांचित्पुरुषधौरेयाणां देशकालविक्रोषभयादिलक्षणाविक्षेपनिवृत्तेरपि भवत्वासिद्धत्वेनन
तदर्थसंन्यासानपेक्षणादिति भावः संन्यासस्यादृष्टद्वारकत्वपक्षमेवावलम्ब्य संन्यासापूर्वस्य श्रवणाद्यधिकारिविशेषणत्वेन विद्योपयोगं समर्थयमानमाहुः अन्ये तु
ति तितिक्षुः समाहितः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिविशेषः शमः अन्तरिन्द्रियनिग्रहः दमः बाह्येन्द्रियनिग्रहः उपरतिर्नित्यकर्मसंन्या

सि·ले·
टी·
५०

गः ननु शमदमादीनां तपश्चाभ्यासमेव कर्ममात्रस्य वारितत्वादुपरतिश्रुतिर्व्यर्थेति चेन्न शमदमविधिशास्त्रस्य सामान्यशास्त्रत्वान्नित्यकर्मविधिनाविशेषशास्त्रेणानित्य
नैमित्तिककर्मव्यतिरिक्तबाह्यान्तःकरणव्यापारनिवृत्तिमात्रपरतया संकोचे सति नित्यकर्मत्यागलाभात्तु नहूपरतिश्रुत्या नित्यकर्मत्यागो बोध्यते इति न
तस्या वैयर्थ्यमिति तितिक्षुः शीतोष्णादिद्वन्द्वसहिष्णुः समाहितः श्रवणाद्युपयोगिचित्तसमाधानवान् देवतागुरुवेदान्तेषु श्रद्धैव वित्तं यस्य सः श्रद्धावित्तः
भूत्वेत्यस्य प्रत्येकमन्वयः आत्मन्येव कार्यकारणसंघातएव स्वान्तःसाक्षिणमात्मानमहं ब्रह्मास्मीति पश्येदिति श्रुत्यर्थः साधनचतुष्टयेति नित्यानित्यव
स्तुविवेकः ऐहिकामुष्मिकभोगविरागः शमदमादिषट्कं मुमुक्षा चेति साधनचतुष्टयं तच्च श्रवणाद्यधिकारिविशेषणमिति तिष्ठ वस्यापि तत्प्रथममस्त्व
इतिभावः संन्यासस्य सर्वस्याधिकारिविशेषणत्वे हेत्वन्तरमाह सहकार्यन्तरेत्यादिना प्रतिपादनादित्यन्तेन सहकार्यन्तरस्य विद्याप्रतिसाधनान्तरस्य मौनस्य
विधिरपूर्वनियतिविधिरिति शाह इति सूत्रभाष्यार्थः सोऽत्रपदं तद्वत इति तस्य व्याख्यानं विद्यावत इति श्रवणाद्यनुष्ठानोपयोगिपाण्डित्यज्ञानवत इत्यर्थः तद्वतः सहका
र्यन्तरविधिरिति सूत्रे संन्यासिन इत्युक्तत्वात्कथं संन्यासिन इति लभ्यते तत्राह तस्मादिति तस्मादित्यपि श्रुतिपदमेव यस्मादतीतः ब्राह्मण आपाततोऽव

गतया संन्यासस्य साधनचतुष्टयान्तर्गतत्वात् सहकार्यन्तरविधिरिति सूत्रभाष्ये तद्वतो विद्यावतः संन्यासिनो बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं वि
धीयते तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्यादिश्रुतौ ततः प्राक्कामित्वाद्येपि चरन्तीति संन्यासाधिकारादिति प्रतिपादनात् सत्त्वाशोधकं यस्यैव संसारप्रजिहा
सतः जिज्ञासोरेव चैकात्म्यत्रय्यते श्रवणाधिकारितेति वार्तिककोक्तेश्च संन्यासस्य सर्वस्य विद्यासाधनवेदान्तश्रवणाद्यधिकारिविशेषणत्वमिति तस्यावि

द्यात्मानं विदित्वा ततस्तादात्म्याकारार्थं मुमुक्षुर्हितं यथाहितं संन्यासं कृतवं तस्मादिहाधीततोऽपि ब्राह्मणो मुमुक्षुः संन्यस्य पाण्डित्यादिकं तत्त्वसाक्षात्कारार्थमनु
तिष्ठेदिति श्रुत्यर्थः पाण्डित्यं श्रवणं मौनं ध्यानं ततन इति तस्माद्ब्राह्मण इति वाक्यार्थः सर्वमित्यर्थः संन्यासस्य सर्वस्याधिकारिविशेषणत्वे वार्तिकसंमतिरूपं हे
त्वन्तरमाह सत्येति वार्तिके प्रथमविशेषणं संन्यासपरं तथा च संन्यासमुमुक्षाजिज्ञासानां समुच्चयार्थेन चकारेण मुमुक्षुत्वादेरिव संन्यासस्यापि वेदान्त
श्रवणादिष्वधिकारिविशेषणत्वं भातीति भावः संन्यासस्यैवेति संन्यासस्य त्यागलक्षणक्रियारूपतया स्वरूपेणानुष्ठेययोगाद् दृष्टपर्यन्तप्रावन
मितिबोध्यं संन्यासस्य दृष्टद्वारा विद्योपयोग इति द्वितीयपदं समर्थयते अपरे त्विति ननु संन्यासस्य विद्याङ्गत्वबोधकश्रुत्यादिवत्तस्य श्रवणाद्यङ्गत्वबोधक
प्रमाणाभावाद्विवरणोक्तिरनुपपन्नेत्याशङ्क्य न स्यात्तात्पर्यमाह अत्र न्यायमपरे तेषां काहाचित्कं श्रवणादिकं विद्योदयद्वारा न तत्त्वसाधनं कि
न्तु सार्वकालिकं ब्रह्मसंस्थोऽमृतत्वमेति श्रुतेरम्रुतेकालेनये देहान्तचिन्तया स्मादिकं नतिस्थाने भ्यस्तस्याच्चानन्यव्यापारतया श्रवणाद्यनुष्ठा ५०
नं विदधता शास्त्रेण संन्यासोऽपेक्षितो न गृहस्थादेः स्वाश्रमविहितकर्मव्यग्रस्य सदा श्रवणाद्यनुष्ठानासंभवात् तथा विद्यासाधनत्वेन संन्यास

विदयवतापि ज्ञानसेनाकारतया निरंतरश्रवणादि अनुष्ठानमपेक्षते संन्यासस्य तादृशज्ञानसाधनत्वाभावात् दृष्टद्वारासंभवे ऽदृष्टद्वारकल्पनानुपपत्तेश्च तत्रापि
श्रवणादिकं न तत्त्वं जनकत्वादर्थतः प्रधानं भवति संन्यासस्तु उक्तन्यायेन भावात् गुणभूतं न यागवद्विधीयते एवं श्रवणविधेः संन्यासविधेश्च परस्परापेक्षत्वा
त्वादेकवाक्यभावमापन्नाभ्यां विधिभ्यां संन्यासांगकं मनननिदिध्यासनसहितं श्रवणं विधीयत इति सिद्धा संन्यासस्य श्रवणांगता न यागाश्च ज्ञानफलकोत्
तिभावः यद्वा विवरणोक्तेरयं भावः श्रवणविधिस्तावत् कृच्छ्रवणसाधनतया विक्षेपनिवृत्तिं तदेव च संन्यासं चापेक्षते विक्षिप्तस्य चेतसः श्रवणाद्यनुष्ठानेऽसं
संभवात् गृहस्थादेश्च स्वाश्रमकर्मकारणकालातिरिक्तकालेपि बहुविषयतया विक्षेपावश्यंभावात् संन्यासविधेरपि विक्षेपनिवृत्तिरूपदृष्टद्वा
राश्रवणादिकं दृष्टिपूतावियासंयाह्यतः संन्यासस्य विधानेन चापि तादृश्यसंभवेऽदृष्टद्वारा विद्यासाधनसंन्यासविधायकत्वासंभवात् तथा चेहवे
वसंन्यासस्य श्रवणांगतायेव विद्याफलकत्वं न तु दृष्टद्वारेति सिद्धमित्यस्मिन् व्याख्याने न व्याख्यापारतये तस्य विक्षेपनिवृत्तिद्वारा इत्यर्थो विव

द्योपयोगमाहुः अपरे तु श्रवणांगतया आत्मज्ञानफलता संन्यासस्य सिद्धेति विवरणोक्तेरनभ्युपायतया श्रवणादि निष्पादकेषु चेतस
स्य विद्यायामुपयोगः दृष्टद्वारासंभवे सत्यदृष्टकल्पनावकाशात् यदि तु नलसस्य धीमतः गृहस्थाश्रमयस्याश्रमान्तरस्थस्यापि कर्मच्छि
द्रेषु श्रवणादिसंपत्त्या न तस्य तु न संन्यासाश्रमपरिग्रहेणो च श्रवणादि निवर्तनीयमिति नियमाभ्युपेयमिति नन्वस्मिन्पक्ष
हृदये त्रिपदे पययोः कथं वेदान्तश्रवणाद्यनुष्ठाने संन्यासस्य ब्राह्मणाधिकारत्वात् ब्राह्मणेतरे निर्वेदमापन्ने ब्राह्मणोक्तिस्याद्ब्राह्मणः

क्षितः तेष्वपि संन्यासस्य अर्थः ननु संन्यासस्य विक्षेपनिवृत्तिद्वारा श्रवणाद्यंगभावमापन्नस्य विद्यासाधनत्वक्रममनुपपन्नं संन्यासं विनापि विक्षेप
निवृत्तेः केषांचित् श्रवणाधिकारिणां संभवादिति शंकते यदि त्विति अनलसस्येति सहकारिणा प्राधान्यस्येति यावत् धीमतः इति विषयेषु दोषदर्शने
लस्येति यावत् गृहस्थोरेयस्येति विषयेभ्यः सकाशादिन्द्रियाणां निग्रहे समर्थस्येत्यर्थः एतैर्विशेषणैर्विक्षेपहेतूनामभाव सूचना हि क्षेपनि
वृत्तिरूपकार्यसंन्यासफलस्य विक्षेपाभावस्य संन्यासादिव संन्यासादन्यतोपि प्राप्तेः संन्यासविधिस्तिन तस्य श्रवणाद्युपलक्षितविक्षेपनिवृत्तिशक्ति प
क्षे प्राप्तेः पक्षे वा प्राप्तिरिति लभ्यते तथा च समाश्रमत्वसंन्यासाश्रमविधिरप्यपूर्वविधिः नियमविधिस्तु भवेदेवेति समाधत्ते तदेति परिग्रहेणो वेति
विक्षेपनिवृत्तिद्वारेति शेषः नन्वस्मिन् पक्षद्वय इति संन्यासस्याधिकारिविशेषणत्वपक्षे श्रवणांगत्वपक्षे चेत्यर्थः कथमिति संन्यासाभावादि
तिभावः तयोः संन्यासाभावे हेतुमाह संन्यासस्येति ब्राह्मणस्यैव संन्यासाधिकारे मानमाह ब्राह्मणा इति निर्वेदं वैराग्यं तत्पूर्वकं संन्यासं कुर्यादि

सि.ले.
त.टी.
५।

मर्थः निर्वेदप्राप्तिवैराग्यस्य संन्यासं प्रति सामग्रीत्वेन तन्मित्त विसंन्यासस्यावश्यकत्वात् संन्यासविधिरेवायमिति भावः सुत्यायेति संन्यस्येमर्थः यस्मा
च्छ्रुतावधिकारिविशेषस्यज्ञानाय ब्राह्मणग्रहः तस्मात्त्रैवर्णिकयोः संन्यासविधिर्नास्तीति वार्तिकयोजना अत्रैके विजयोः श्रवणाद्यनुष्ठानसिद्धिः
समर्थयितुम् इति संबंधः ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेदिति सर्वेषां नो चतुर्णामप्याश्रमाणां समुच्चयं प्रतिपाद्यते अविकल्पदर्शाय
तिं यदि वेतरथेति यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यर्थः तत्र तद्भुसत्ता वाह गृहाद्वेति गृहाश्रमे स्थितं तद्भुसत्तावाह वनाद्वेति प्र
विशेषेति ब्राह्मणादिविशेषग्रहणरहितेमर्थः अत एवेति वर्णत्रयसाधारणतया संन्यासस्योक्तत्वादित्यादेवेमर्थः यद्यपादिवेति अक्तौ

प्रव्रजेदिति संन्यासविधिषु ब्राह्मणग्रहणात् अधिकारिविशेषस्यज्ञानाय ब्राह्मणग्रहः न संन्यासविधिर्यस्मात् अक्तौ त्रैवर्णिकयोरिति वार्ति
कोक्तेश्चेति चेत् अत्रैके चित् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेत्यविशेषश्रुत्या ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद् गृहात् त्र
याणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति स्मृत्यनुगृहीतया त्रैवर्णिकयोरपि संन्यासाधिकारसिद्धेः अतस्तत्र ब्राह्मणग्रहणं त्रयाणामु
पलक्षणमत एव वार्तिके प्यधिकारिविशेषस्येति श्लोकेन भाष्याभिप्रायमुक्त्वा त्रयाणामविशेषेण संन्यासः श्रूयते अतो पदोपलक्षणार्थस्या
त् ब्राह्मणग्रहणात् देत्यनेन्तरश्लोकेन स्वमते त्रैवर्णिकयोरपि संन्यासाधिकारो दर्शित इति तयोः श्रवणाद्यनुष्ठानसिद्धिं समर्थयन्ते अन्ये तु ने
के षु संन्यासविधिवाक्येषु ब्राह्मणग्रहणं दृष्टं जाबालश्रुतौ संन्यासविधिवाक्ये ब्राह्मणग्रहणाभावे पि श्रुत्यन्तरसिद्धं ब्राह्मणाधिकारमेव
सिद्धं कृत्वा संन्यासावस्थायामयज्ञोपवीती कथं ब्राह्मण इति ब्राह्मणस्यैव परामर्शाच्च ब्राह्मणस्यैव संन्यासाधिकारः विरोधाधिकरणन्यायेन श्रुत्य
विरुद्धस्यैव स्मृत्यर्थस्य ग्राह्यत्वात् यत्तु संन्यासस्य सर्वाधिकारत्वे वार्तिकवचने तद्विवक्षितसंन्यासविषयत्वेन त्वात्र विविदिषासंन्यासे भाष्याभिप्रा

श्रूयते तदुपलक्षणार्थं स्यादिति संबंधः अन्ये त्विति भाष्यानुवर्तिन इत्यर्थः अत्र स्वमतसिद्धमिति ब्राह्मणो वा स्यायेत्यादि क्रमेणान्तरसिद्धमित्यर्थः सिद्धं
कृत्वेति विरोधे न संन्यासविधिवाक्यानां सर्वेषामेकवाक्यत्वादिति भावः कथमिति तत्र तवयज्ञोपवीतादेर्ब्राह्मणत्वव्यञ्जकत्वात् परमहंससंन्यासे
च तदभावादाक्षेप इत्यर्थः यद्यत्र त्रैवर्णिकयोरपि संन्यासो विवक्षितः स्यात्तदा कथं ब्राह्मण इति वक्तव्यं क्षत्रियः कथं वैश्य इत्यपि श्रूयते तस्मात्त्र
योः संन्यासः अस्माभिमत इति भावः एवं संन्यासविधीनामेकवाक्यत्वे सति ब्राह्मणः क्षत्रियो वापीति स्मृतिवचनं जाबालश्रुतिनास्मर्यात्मा ॥
त्वात् अप्रमाणमित्याह विरोधाधिकरणन्यायेन प्रमत्तश्रुतिविरुद्धस्मृतिवचनमप्रमाणमिति विरोधाधिकरणन्यायः तस्माद्ब्राह्मणः पाठितं ५१

निर्विघ्नत्वादि फलतो संन्यासाधिकारानुरोधेन ब्राह्मणाः संन्यस्य पांडित्यादिकमनुतिष्ठेदिति वाक्यार्थलाभात् विविदिषार्थसंन्यासे विविदिषुत्वमात्रक्रियमाणो ब्राह्मणा
स्यैवाधिकार इति भगवतो भाष्यकारस्य मतं यदि वार्तिकवचनस्य प्रमाणमूलभाष्यकारमतविरुद्धेऽर्थे तात्पर्यकल्पनेन तदा संन्यासस्य सर्वाधारत्वप्रतिपाद
कस्य श्रुतिवचनवद्वार्तिकवचनमपि हेयमेव स्यात् ततो भाष्याविरुद्धार्थपरं वार्तिकवचनमित्याह तर्हि वृत्ते संन्यासविषयमिति विविदिषासंन्यासे तु वाधि
कारश्रुतिपादनपरं न भवतीत्यत्र हेतुत्वेनाह सर्वाधिकारेति क्षत्रियवैश्ययोस्तत्त्वज्ञानमभ्युपेयते न वा नाद्यः जनकादीनां तत्त्वज्ञानवत्त्वप्रतिपादकशा
स्त्रविरोधात् द्वितीयः तत्त्वज्ञानेन कर्माधिकारप्रयोजकवर्णाश्रमाद्यभिमाननिवृत्तौ सकलकर्मनिवृत्तिरूपविद्वत्संन्यासस्य क्षत्रियवैश्ययोरपि वारयितुमशक्य
त्वात् विविदिषासंन्यासे च विद्वत्संन्यासेऽपि ब्राह्मणस्यैवाधिकार इति नियमासंभवादिति भावः कृतो वलात् नियमः क्रियते तदा तादृशो वलं नास्तीत्यर्थः एवं चेति
श्रवणाङ्गत्वेनाधिकारिविशेषणत्वेन वा विद्यासाधने विविदिषासंन्यासे ब्राह्मणस्यैवाधिकार इति सिद्धस्ततीयर्थः ननु संन्यासस्याधिकारिविशेषणत्वे

यद्विरुद्धं सर्वाधिकारश्रुतिपादनपरं सर्वाधिकारविच्छेदविज्ञानं चेदुपेयते कुतोऽधिकारनियमो ध्यानेन क्रियते वलादित्यनंतरश्लोके न ब्रह्मज्ञा
नोदयानंतरं जीवन्मुक्तेन क्रियमाणो विद्वत्संन्यास एवाधिकारनियमनिराकरणात् एवं च ब्राह्मणानामेव श्रवणाद्यनुष्ठाने संन्यासोऽङ्गं क्षत्रिय
वैश्ययोस्तु निरपेक्षः श्रवणाधिकार इति तयोः श्रवणाद्यनुष्ठाननिर्वाहः न हि संन्यासस्य श्रवणापेक्षितत्वपक्षे श्रवणमात्रस्य न तदपेक्षत्वादिति
यतो मोक्षात्ते कर्ममुक्तिफलकसगुणोपासनया देवभावं प्राप्तस्य श्रवणादौ संन्यासनिरपेक्षत्वस्यावश्यं वक्तव्यत्वात् देवानां कर्मानुष्ठानाप्रसक्त्या
तत्त्यागरूपस्य संन्यासस्य तेष्वसंभवादित्याह अपरे तु ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुतेर्दिता यस्य ब्रह्मणि संस्थासमाप्तिरनन्यव्यापारत्वरूपेति त्रि

याङ्गतया वा श्रवणापेक्षितत्वपक्षे श्रवणमात्रस्य संन्यासापेक्षितत्वाभावात् क्षत्रियवैश्ययोर्विविदिषासंन्यासरहितयोः श्रवणाद्यनुष्ठाने नास्तीत्येवपर्य
वस्यतीति न च तयोः श्रवणं संन्यासनिरपेक्षमिति तथा च कथं तयोः श्रवणाद्यनुष्ठाननिर्वाहस्तत्राह नहीति देवभावं प्राप्तस्येति न च सगुणोपासकस्य ब्र
ह्मलोकेगतस्योपासनया देवभावं प्राप्तस्य निर्गुणब्रह्मतत्त्वज्ञानकामस्योपासकेन क्रियमाणे श्रवणादौ संन्यासस्य व्यभिचार इत्यपकतत्त्वस्य सगुणविद्यासाम
र्थ्यादेव निर्गुणसाक्षात्कारसंभवेन श्रवणाद्यनुष्ठानस्यैवाभावादिति वाच्यं देवताधिकरणे सगुणविद्यया देवभावं प्राप्तस्योपासकस्यैव साध्यान्येन विषयी
कृत्य श्रवणादौ देवताधिकारस्य निरूपितत्वेन तस्यापि श्रवणाद्यनुष्ठानं विना विद्यानुदयस्य भागेव श्रवणविधिविचारावसरे दर्शितत्वात् तथा च व्यभि
चारात्संन्यासो न श्रवणमात्राङ्गं किं तु ब्राह्मणकर्तृकश्रवणस्यैवाङ्गमिति क्षत्रियवैश्ययोः संन्यासाभावेऽपि श्रवणाद्यनुष्ठाननिर्वाह इत्यर्थः ननु देवा

यदि व्यभिचारस्तर्हि त्रैवर्णिकमात्रकर्तृकश्रवणे संन्यासाश्रमस्य ५९

ति.ले.
द.टी.
५२

नामपि कृतः संन्यासाभावस्तत्राह देवानामिति ननु देवकर्तृकश्रवणे संन्यासाश्रमस्यैतत्त्वमस्तु न तु ब्राह्मणमात्रकर्तृके तथा संकोचे मानाभावात् उक्तं
हि भागवते वचन सर्वाश्रमेषु संन्यासाश्रमपरिग्रहेणैव श्रवणादि निर्वर्तनीयमिति तच्चाश्रमविभागो वर्णत्रयसाधारण एव न ब्राह्मणमात्रगतस्तथा च संन्यासि
नो ब्राह्मणस्यैव संन्यासहीनयोः क्षत्रियवैश्ययोः श्रवणादौ नाधिकारः संभवतीत्यस्वरसादाह अपरे त्विति कृतसुदितात् ब्रह्मणि संस्थायस्य संभवति तस्य मुख्यो
धिकार इति संबंधः संस्थापदं व्याख्यानं समाप्तिस्तस्यां अपि व्याख्यानमनन्येति अमृतत्वकामस्य नैरंतर्येण विचारकर्तव्यता या स्यादिति वचनान्यथानुपपत्या उदाहरति ग
कृत इति स्वपतेति शयानस्येत्यर्थः सजीवति मनो यस्य मननेनैव जीवतीत्यादि वचनसंग्रहार्थमादिपदं मननेन तत्वचिंतनं तद्रहितो जीवेत्त्वमृत इत्यर्थः ।
अयं च मुख्योधिकारः संन्यासिनामेवेत्याह सा चेति वैयर्थ्यादिति अन्यथा इति शेषः सार्वकालिको विक्षेपनिवृत्तिः संन्यासिनां न संभवतीति भावः न मुख्य इति
शास्त्रीयोधिकारो नास्तीत्यर्थः अयंभावः ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुत्या प्रतिपादितमकृतसैव ब्रह्मनिष्ठापूर्वकः संन्यासाश्रमो विधीयते ब्रह्मसंस्थाया हि ता
याः ब्रह्मनिष्ठायाः संन्यासाश्रमे संभवादाश्रमांतरे च असंभवादिति श्रुतिप्रतिपादितं संन्यासाधिकरणभाष्यादौ तथा च ब्रह्मनिष्ठत्वस्य संन्यासाश्रमधर्मत्वेनाव

धृतत्वं तस्य श्रवणादिषु मुख्योधिकारः गच्छंस्तिष्ठन्तो वापि जाग्रतः स्वपतो पिवा न विचारपरं चेतो यस्यासौ मृत उच्यते आसुप्तेरामृतेः कालं नयेद्वे
त चिंतयेत्यादि स्मृतिषु सर्वदा विचारविधानात् सा च ब्रह्मणि संस्था विना संन्यासमाश्रमांतरस्थस्य न संभवति स्वस्वाश्रमविहितकर्मानुष्ठा
नैव यस्मादिति संन्यासरहितयोः क्षत्रियवैश्ययोर्न मुख्यः श्रवणाद्यधिकारः हित्वा संन्यासिनो ब्राह्मणस्य ब्रह्मनिष्ठत्वं स्वधर्म इति संन्यासिनस्तत्र मु

ख्योधिकारः तस्य ब्रह्मनिष्ठत्वमतिक्रमे प्रत्यवायावगमाच्च तथा च परमहंसोपनिषदि श्रूयते काष्ठदंडोधृतो येन सर्वाशी ज्ञानवर्जितः स याति नरकान्
घोरान् महारौरवसंज्ञिकानिति काष्ठदंडोपलक्षितः संन्यासाश्रमो धृतः परिगृहीतो येन सः सर्वाशी सर्वविषयजातमश्नितुं भोक्तुं शीलमस्यास्तीति सर्वाशी ।
वाप्यांतः करणजयरहितः इति यावत् ज्ञानाभ्यासवर्जितः रहितः इत्यर्थः यः संन्यस्य शमदमादिसहितं ब्रह्मनिष्ठत्वं नानुतिष्ठति सः तीव्रां दुर्गतिं गच्छतीत्य
र्थः यथा संन्यासिनो ज्ञाननिष्ठाविधायकानि संन्यस्य श्रवणं कुर्यात् गच्छंस्तिष्ठन्तो वापि आसुप्तेरामृतेः कालमित्यादीनि स्मृतिवचनानि सहस्रशः सन्ति
तथा तत्परित्यागे पातित्यबोधकान्यपि स्मृतिवचनानि सहस्रशः सन्ति त्वंपदार्थविवेकाय संन्यासः तर्हि कर्मणो क्षत्रिया विधीयते यस्मात्तत्यागोपि नैवोभवे
त् नित्यकर्मपरित्यज्य वेदांतश्रवणं विना वर्तमानस्तु संन्यासी स पतत्येव न संशयः इत्यादीनि सर्वाश्रमसाधारणैः न्यानापि स्वधर्मत्यागे दोषस्यापि परिहारो मह ५२
नर्थः स्मर्यते श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो भयावह इत्यादौ संन्यासाधिकरणभाष्यकारैरेवं तत्सर्वमभि

प्रेमसंन्यासिनोऽनन्यव्यापारतया श्रवणादिनिष्ठानमकुर्वतः यानि संकंचनपवीरूतथा च भाष्यं ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमवि।
हितं कर्म यज्ञादीनि चेतरेषामितद्यतिक्रमे च तस्य प्रत्यवाय इति तस्माच्छ्रवणादेर्भिन्नं प्रति विहितं नान्यदितिक्रमेभिन्नोः प्रत्यवायावगमाच्च तस्माद्विनः श्रवणा।
दौ मुख्याधिकारः संन्यासरहितानां प्रति न श्रवणादेरविहितत्वात्करणेऽप्रत्यवायानवगमाच्च नास्ति तेषां मुख्योऽधिकार इति न उत्तम विप्रादिकं प्रति श्रवणादि।
विधानाभावे सत्यधिकार एव नास्तीति कुतो नोऽनन्तेऽइति शंकते किं त्विति निस्याधिकारस्तु पशुख्याधिकारासंभवे पिकाम्याधिकाररूपगौणाधिकारसंभवान्न
वर्णितिभाष्येणोक्तरमाह दृष्टार्था चेति किं तु मुख्याधिकारमात्रेण श्रवणाद्यनुमतिरिति संवेषः यथा भुजिक्रिया तृप्त्याख्यानिवृत्तिरूपदृष्टफला तथावि
द्यापि सर्वानर्थमूलाविद्यानिवृत्तिरूपदृष्टफलाऽस्ति सिद्धान्तयाचेतस्यां विद्यायामनर्थनिवृत्तिकामानां सर्वेषामेवार्थिनां लक्षणाधिकारः संभवति तथा
च विद्याधिकारिणां सर्वेषामविशेषेणैव दान्तश्रवणादावधिकार इत्यको मद्वस्यैव श्रवणादि प्रति विधाज्ञाधिकार इत्युक्तमप्यद्राधिकरणे दाविद्यादीनां

किं तु दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणार्थिनमधिकरोति श्रवणादिष्वन्तराचापि तु तद्दृष्टेरित्यधिकरणभाष्योक्तन्यायेन प्रद्युवदप्रतिषिद्धयोस्त
यो विधुरादीनामपि वदेदन्तरे विद्याप्रापकत्वेनागौणाधिकारमात्रेण श्रवणाद्यनुमतिः न त्वन्तरा चापि तु तद्दृष्टेरित्यधिकरणे विधुरादीनामनाश्रमि
णां मैत्रीकन्याश्रवणाद्यधिकारो मुख्य इति वक्तुं शक्यते अन्तरा तु तद्दृष्टेर्लिंगाच्चेति सूत्रकारेणैव तेषामनुख्याधिकारस्फुटीकरणात् न चैतत्र
चनत्याप्रतिषेधाभावादेवान्तश्रवणाधिकारोऽभ्यनुमतो विधुरादीनामिवेत्यर्थः ननु मुख्याधिकारिभिरनुष्ठितश्रवणादेरपि विद्योत्पादकत्वमेवं एवाश्रमानथा।
गौणाधिकारनिरूपणपरभाष्येवेपर्थ्यं प्रसंगात् हि विद्योत्पादकत्वावस्थाभावे च नकाम्याधिकारस्य गौणत्वमुख्यगौणाधिकारयोः फलतो विशेषाभावादिस्मत
आह देहान्तरइति अयं भावः मुख्याधिकारिणामनन्यव्यापारतया प्रत्यहं निवसमानश्रवणादिकं निरंकुशब्रह्मचर्यादिसाधनसदमादियुक्तमस्मिन्नेव जन्मनि
आधारा विद्योत्पादकं संपद्यते अमुख्याधिकारिणा तु श्रवणादिकं मनन्यव्यापारत्वपराभावात् संकुचितब्रह्मचर्यादियुक्तत्वाच्चास्मिन्जन्मनि विद्योत्पादक
योग्यमेव न भवति किं तु बहुषु जन्मसु किंचित्किंचिच्छ्रवणादिकं संपाद्यमानं संभूय देहान्तरे विज्ञानमुत्पादयेदिति महान्फलभेदो गौणमुख्याधिकारयो
तथा च स्मृतिः अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति अनेकेषु जन्मसु संतत श्रवणादिना कावि जन्मनि संसिद्धः उत्पन्नविद्यः सन् ततः सिद्धिबलान्मु
क्तिं गच्छतीति स्मृत्यर्थः ननु बहिर्मयवैष्णवो विधुरादीनामिवाश्रम्याधिकारस्य गौणस्य पालोकसंप्रतिपत्तेरनुमतत्वान्न तदीति वक्तुं न शक्यत इत्याशंक्य यद्यपि
संन्यासिन एव मुख्याधिकार इति सूत्रं प्रतिपादितं तेन विधुरादीनां संन्यासाभावाद्गौणाधिकारः सिद्धस्तथापि तेषां गौणाधिकारे सूत्रसंमतिं ताम प्रत्य
पतिमाह अन्तराचापितुतद्दृष्टेरिति अनतः अनाश्रमिभिरनुष्ठितविद्यासाधनापेक्षया तदपेक्षया आश्रमिभिरनुष्ठितविद्यासाधनकर्मश्रवणादिकं बाह्याप्यः अशस्त्रविद्या
साधनज्यायस्त्वावधारणार्थत्वेनापाठः अपीतिलिंगात्स्मृतिलिंगाच्चेतरेति अप्राविद्यायाप्यफलादि निवाक्य अस्ति लिंगम् अनाश्रमी न तिष्ठेत क्षणमेकमपि हि

सि॰ले॰
कृ॰टी॰
५२

जद्यतिवाक्यस्य तिर्थं तेनउत्पन्नत्वेन ब्रह्मवेदनेन ब्रह्मपदप्राप्नोतीत्यर्थः अत्र कृतोत्पत्त्येनश्रुतिसाध्यादा साधनमपवर्गमेतमेवविशेष्य ब्रह्मप्राप्तिसाधनत्वप्रतिपादना
द्वेदनाश्रमिधर्मोत्तमविद्योत्पाद्युग्रहस्येतिस्वोकस्मात्येन। विद्योपयोगितामपिनिः कर्माश्रमिसंवन्निः कर्मविधुरादीनां विद्यार्थकर्मस्तु श्रवणादिषु चमुख्याधिकारोऽभा
वश्रुतरूपवेतिवक्तव्ये तेनतराभावादनाश्रमित्वस्यानिंदितत्वाच्च न हि कर्मज्ञानयो मुख्याधिकारीनिंदा हेहिति कश्रमाप्यकारयोरभिप्रायइत्यर्थः नन्वविधुराधिकरणे वि
धुराद्युपस्थितेकर्मविद्यासाधनमितिनावदेवोक्तंनतविधुरादेः श्रवणाधिकारोपितदुपपादितः तथाच श्रवणादौ विधुराद्यधिकारस्यगौणमुख्यत्वचिंतानिराले
वनेस्त्रावांकापरिहरति नवतचेति विधुराधिकरणइत्यर्थः ततएवेति संन्यासाभावादेवेत्यर्थः अस्तुपुनर्ब्रह्मणजन्मइत्यत आह ब्रह्मलोकमिति नसपुनरिति ब्रह्म
लोकमभिसंपद्य पुनरस्मिन्लोके आवर्तनावर्तितइत्यर्थः एतत्कुतिमूलत्वमुदाहरति अनावृत्तिरिति ब्रह्मलोकंगतानामुपासकानामनावृत्तिर्नास्ति उदाहृतश्रुतेरित्य
र्थः स्मृतेश्चेत्यादिस्मृत्युदाहरणार्थमादिपदं तथाच स्मृतिः ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानः प्रविशंतिपरंपदमिति तेब्रह्मलोकवासिनोब्रह्मो
पासकाः प्रतिसंचरे महाप्रलयेपरस्यहिरण्यगर्भस्यब्रह्मलोकस्वामिनः आयुषोंतेकृतात्मानः साक्षात्कृतआत्मानः येषांतेतथा नन्वनन्यव्यापारत्वसंभवेपिसंन्यासोनास्तीत्याश्र

तेषां श्रवणाधिकार एवनोक्तः किंतु तदीयकर्मणां विद्यानुग्राहकत्वमितिशंक्यं दृष्टार्थाच विधेयस्यादेतन दधिकरणभाष्यविरोधात् नचवृद्धिविधेयवैषम्ययोः सं
न्यासाभावादमुख्याधिकारे ततएवदेवानामपि श्रवणादिषुमुख्यएवाधिकारः स्यात्तथाच क्रममुक्तिफलकसगुणविद्यादेवभावे आप्यश्रवणाद्यनुवृत्ति।
नानाविद्याश्रयसंन्यासोऽस्ति हुनत्रीब्रह्मणजन्मवत्कल्पमिति ब्रह्मलोकमभिसंपद्यते नसपुनरावर्तते अनावृत्तिः शब्दादित्यादिकांतिसूत्रविरोधइतिवाच्यं दे
वानामनुष्ठेयकर्मवैयर्थ्याभावात्तत्वतएवानन्यव्यापारत्वसंभवतीति क्रममुक्तिफलकसगुणविद्याविधायिशास्त्रप्रामाण्याद्धिनापिसंन्यासंतेषां मुख्याधि
कारासुपगमादित्याहुः ननु शूद्राधिकारेणदृष्टफलभूतवाक्यार्थावगत्यर्थमोवाहितशास्त्रांतरे विचारस्वक्रियमाणेवेदांतविचारः कथंजन्मांतरीय
विद्याकामानुपयुज्यते नत्वल्लुविचारस्यादिनांतरीयावेचार्थावगतिहेतुत्वमुपयुज्यते हरेजन्मांतरीयतत्वेनत्वनचवाच्यमुख्याधिकारिणं धर्मज्ञानकेनक्रियमाणस्य
पिश्रवणादृष्टार्थमेवसवेदविचार्यावगतेर्दृष्टफलत्वात्तस्यचयथाप्रारब्धकर्मविशेषरूपप्रतिवंधाद्विहजन्मनिफलमजनयतोजन्मांतरेप्रतिवंधापगमेनफ
लजनकत्वमैहिकमप्यप्रस्तुतप्रतिवंधेतद्दर्शनादित्यधिकरणेनयाविर्णयात् एवममुख्याधिकारिकृतस्यापियतः शास्त्रीयांगपुक्तं श्रवणमदृष्टविधिवप

त्वात् क्रममुक्तीति मनुष्येषु संन्यासो मुख्याधिकारप्रयोजकः वर्णाश्रमविभागस्य मनुष्यविषयत्वादितिभावः श्रवणितेति न्यायशास्त्रादिविचारवदित्यर्थः एतज्जन्मीयवे
दांतविचारस्यागामिजन्मीयावगत्यर्थावगतिप्रतिहेतुत्वासंभवं कैमुतिकन्यायेनदर्शयति नचात्र्यस्विति मुख्याधिकारीकृतविचारदृष्टांतेनगौणाधिकारिश्रवणा
देरपिजन्मांतरीयविद्योपयोगंशंकते नचवाच्यमिति ननुः किंतु आह तस्येति यथा तस्य मुख्याधिकारिकृतश्रवणस्य प्रतिबंधादिहजन्मनि विद्यालक्षणफलमजन
यतोजन्मांतरेफलजनकत्वमेवमुख्याधिकारिकृतस्यापि श्रवणस्यजन्मांतरेफलजनकत्वंस्यादिति नचवाच्यमितिसंबंधः मुख्याधिकारिकृतश्रवणस्य सति प्रतिबंधके ५२
प्रामुष्मिकजन्मोत्पत्त्युपमानमाह यदिहकर्मयाति प्रस्तुतप्रतिवंधे असतिविद्याजन्मइहजन्मन्यपि भवति अपिया ह्यात् सतिप्रतिबंधे जन्मांतरे भवति अतः तद्दर्शनात् तस्यश्र

तिबंधकवशाज्जन्मान्तरे विद्योदयस्य वामदेवादिषु दर्शनादित्यर्थः । दृष्टान्तवैषम्येणोत्तरमाह शास्त्रीयाङ्गयुक्तामिति शास्त्रीयाङ्गं संन्यासः तद्युक्तं संन्यासिना अनुष्ठीयमान
मिति यावत् तथा च शास्त्रीयाङ्गसहितं श्रवणं श्रवणविधिरपूर्वविधिरिति पक्षे स्वयमेव विद्यालक्षणफलपर्यन्तं महदृष्टं जनयतीत्यर्थः । श्रवणविधिर्नियमविधिरिति
पक्षे तु तादृशं श्रवणं नियमविधिदृष्टेऽस्मिन् फलपर्यन्ते नियमादृष्टं जनयतीत्यर्थः । तच्चेति श्रवणजनितादृष्टमित्यर्थः । जातोऽपि जातिजन्मान्तरे श्रवणजातिस्मरत्वसंपाद
कमदृष्टं सर्वजन्मतद्वृत्तानुभवजन्यसंस्कारमालिन्यजन्मसु बोध्यते इत्येतद्द्वारा पूर्वजन्मतद्वृत्तं तत्स्मृतिं च ह्रदयति तथा प्राचीनेन श्रवणादिजनितसंस्कारमुद्बोध्य
तत्संस्कारकारणभूतस्य श्रवणस्याभावेऽपि जन्मान्तरे विद्योपयोगित्वं वहत्युदयतीत्यर्थः । शास्त्रीयाङ्गवियुक्तमिति संन्यासरहितेन त्रिवर्णादिना क्रियमाणं श्रवणमदृष्टोत्पादकं न भ
वतीति त्रिवर्णादिकं प्रत्यविहितत्वाच्छ्रवणे ह्यविहितभावः नन्वविहितश्रवणस्यादृष्टानुत्पादकत्वेऽपि संस्कारजननकत्वसंभवात् तद्बलादेव जन्मान्तरीयविद्याहेतुत्वं ज्ञातो
न स्यादित्यत आह दृष्टकारणत्वेनेति अतिप्रसङ्गादिति जन्मान्तरानुभूतसकलपदार्थस्मृतिप्रसङ्गादित्यर्थः । कर्मणो विद्यायां विनियोग इति पक्षमाश्रित्य परिहरति उ
देवलपर्यन्तमदृष्टं नियमविधिपक्षे नियमादृष्टं वा जनयति तच्च जातिस्मरत्वापादकादृष्टवत् प्राग्भवीयसंस्कारमुद्बोध्य तन्मूलभूतस्य विचारस्य जन्मान्तरीयविद्यो
पयोगित्वं वहदयतीति कथ्यते शास्त्रीयाङ्गवियुक्तश्रवणं नादृष्टोत्पादकमिति कुतस्तस्य जन्मान्तरीयविद्योपयोगित्वमुपपद्यते दृष्टकारणत्वेन जन्मान्तरीयश्र (?)
माण व्यापारस्य जन्मान्तरीयाववाति हेतुत्वोपगमे अतिप्रसङ्गात् उच्यते मुमुक्ष्वधिकारिणा पुनरत्र विविदिषया क्रियमाणं श्रवणं द्वारभूतविविदिषोत्पादकं प्रा
चीनयज्ञाद्यनुष्ठानजन्यादृष्टं प्रकल्पमिति नचैवमदृष्टं विद्यारूपफलपर्यन्तं म्रियमाणं जन्मान्तरीयाणामपि विद्यायाः स्वकार्ये न श्रवणस्योपकारकत्वं त्वद
यतीति नानुपपत्तिः श्रवणादौ विध्यभावपक्षेत्वस्मासु सर्वं विवृतं तस्यापि श्रवणस्यादृष्टानुत्पादकत्वात् तन्निमित्तं वये तस्य जन्मान्तरीयविद्याहेतुत्वमित्यमेव निर्वा
हः आचार्याणां नियमविधिपक्षेऽप्ययमेव निर्वाहः श्रवणमभ्यसतः फलप्राप्तेर्वा कुप्रयोगे तन्नियमादृष्टस्यानुत्पत्तिस्तस्य फलपर्यन्तावृत्तिगुणकश्रवणानुष्ठान
मतः इति यज्ञादिभिर्विद्यायां संपादनीयायां द्वारभूता या विविदिषा तत्स्यादुत्पादकं प्राचीनं यद्विद्यार्थयज्ञाद्यनुष्ठानं तज्जन्ममित्यर्थः । तत्पदं यज्ञाद्यनुष्ठानजन्यादृष्टपरं वाचस्पति
मते मुमुक्ष्वधिकृतेन श्रवणस्यापि यज्ञाद्यपूर्वेणैव निर्वाह इति दृष्टान्ताभिप्रायेणाह श्रवणादौ विध्यभावपक्षे त्विति विवरणपक्षेऽप्येवमेव निर्वाह इत्याह आचार्याणां त्विति
मुख्यभावः असंभावनानिवृत्तिः श्रवणफलं प्रमेयासंभावनानिवृत्तिर्मनननफलं विपरीतभावनानिवृत्तिर्निदिध्यासनफलं तथा च त्रिविधप्रतिबन्धकनिवृत्तिल
क्षणफलपर्यन्तमावृत्तिविशिष्टानि श्रवणादीनि यस्य मुमुक्ष्वधिकारिणो निष्पन्नानि तस्य नियमादृष्टमुत्पन्नमेव पश्चात्तत्र तत्र विद्या साधनस्यापि प्रतिबन्धवशाद्य
दि विद्या न जाता तदा पुनर्जन्मलाभेन प्रतिबन्धक्षये सति पुनर्विचारमनपेक्ष्यैव विद्या जायते यथा वामदेवादिहिरण्यगर्भादेः यस्य त्वनुक्रमं प्रतिबन्धनिवृत्तिपर्यन्तं श्रवणा
द्यावृत्तिर्न जाता मध्य एव मृतिः स्वजाता तस्य मुमुक्ष्वधिकारिणोऽपि नियमादृष्टं न जायते स च पुनर्जन्मान्तरे उक्तप्रतिबन्धनिवृत्तिपर्यन्तं श्रवणादिकमभ्यस्य श्रवणादिनि
यमादृष्टवशेन विद्याप्रतिबन्धककल्मषक्षये सति विद्यां लभते तदुक्तं भगवता श्रीकृष्णेन तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ कुरुन
न्दनेति तत्र प्रायेणास्य पुनर्जन्मनि पूर्वदेहे भवमिदानीं संस्कारात्मना अनुवर्तमानं बुद्धिसंयोगं श्रवणादिकं तदभ्यासं संबंधं लभते अस्मिन्नपि जन्मनि प्रतिबन्धनिवृत्ति

सि॰ले॰
टी॰
५५

द्वारा विद्योदयावसानं यावच्छ्रवणादिकमनुष्ठेयमिति विध्यायुक्तो भवतीत्यर्थः ततः सर्वजन्मीयपत्नापेक्षयाभ्युपगमेऽपि किं यत्नतेऽसंसिद्ध्यर्थमित्यर्थः तथा च योऽयं फलप
र्यन्तावृत्तिगुणकश्रवणादिरहितो योगभ्रष्टस्तस्य नियमादृष्टाभावाद्युक्तायदृष्टादेव चनिर्वाहः कर्त्तव्यश्रुतिश्रुतिचयनिवृत्तिरूपफलमाप्तेः सर्वनियमादृष्टवाद्
यपत्तौ हेतुमाह तस्येति नियमादृष्टस्येत्यर्थः नियमादृष्टं हि न श्रवणमात्रजन्यं किं तु श्रवणनियमजन्यं तन्नियमश्च श्रवणादेरेव फलपर्यन्तमावृत्तौ सत्यामिति
ष्पद्यते तथा च फलोत्पत्तेरर्वाक् श्रवणादिनियमस्यैवाभावान्न नियमादृष्टोत्पत्तिरित्यर्थः उक्तमर्थं प्रपञ्चयति नहीत्यादिना श्रवणनियमः श्रवणस्योपक्रममात्रे
ण निर्वर्त्तितो न भवतीत्यत्र हेतुमाह अवघातवदिति अवहननविधिवदित्यर्थः अवघातविधिरपि हि अवहननस्य तण्डुलनिष्पत्तिलक्षणफलसाधनतायाः लोकसिद्धत्वादिति भावः प्राक्तनादि
ति फलपर्यन्तं श्रवणस्यैवावृत्तौ सत्यां श्रवणस्यापादितमाप्तावपरिपूर्णलक्षणनियमो निष्पन्नो भवति न ततः प्रागित्यर्थः श्रवणस्यारम्भमात्रे वा कतिपयावृत्तिमात्रे
वा जाते सति श्रवणनियमो निष्पन्न इति वचनं विषयाभावान्निरालम्बनमित्यर्थः तदनावृत्तावपीति श्रवणवद्यावत्तावदनुष्ठानमपक्रम्य श्रवणादिकमन्वयभावाप्रवया

नियमसाध्यत्वात् नहि नियमादृष्टजनकः श्रवणनियमः फलपर्यन्तमावर्त्तनीयस्य श्रवणस्योपक्रममात्रेण निर्वर्त्तितो भवति येन तज्जन्यनियमादृष्टस्यापि फ
लपर्यन्तश्रवणावृत्तेः प्रागेवोत्पत्तिः संभाव्येत अवघातवदावृत्तिगुणकस्यैव श्रवणस्य फलसाधनत्वेन फलसाधनपत्तधीनिष्पत्तेः प्राक्तनान्नियमनिर्वृत्तिव
चनस्य निरालम्बनात् श्रवणवद्यावत्तावदुपक्रममात्रेण नियमनिष्पत्तौ तावतैव नियमपालनाच्च सांख्यमितिसिद्धमिति तदनावृत्तस्य वैकल्यप्रसङ्गाच्चेत्याह केचि
त्तरदृष्टस्यापि श्रवणस्य दिने दिने तत्तद्वेदान्तश्रवणजन्यतिसंयुतात् गुरुशुश्रूषयालव्धापूर्वमिति फललभेदिन्याद्विवचनमात्राणामात्वतन्त्रीदृष्टस्याद
कत्वमप्यास्ति यथाग्निसंस्कारार्थस्याधानस्य गुरुषसंस्कारे गुणविनियोगानात्तद्धित्वमपि एवंवचनबलादुभयार्थत्वोपपत्तेः तथा च प्रतिदिनश्रवणजनितादृ
ष्टमपि हि मैत्रेय्याभिव्यक्तविद्योपयोगित्वं श्रवणमननादिसाधनानामित्याह एवं श्रवणमननादिसाधनानुष्ठानमात्रेणाल्पाविद्यावाप्तिरित्यस्मिन्नर्थे
द्विविचारेण न च विद्वल्लावादेश्च महत्तावपि नियमविधिविरोधाभावमसंगादित्यर्थः मुख्यामुख्याधिकारिभिरनवरतं क्रियमाणस्य वेदान्तश्रवणस्य मतिचयकानिवृत्तिरूपदृ
ष्टफलो मा दृकत्ववदृष्टोत्पादकत्वमप्यास्ति तथा च तत्फलाजन्मान्तरे विद्योपयोगित्वे विचारस्य चरितार्थत्वेऽपि परिहारान्तरमाह केचित्त्विति फलमिति गुणरूपमित्यर्थः
वचने तथा हि श्रवणार्थं तथा च वेदान्तश्रवणस्य देवतागुरुवेदान्तविषयभक्तिगुरुशुश्रूषाभ्यां तुष्टाभ्यामनुग्रहातैश्च शमदमब्रह्मचर्याहिंसादिभिः समुच्चयार्थत्व
मावृत्तिभावः स्वतन्त्रेति वेदान्तश्रवणस्य स्वतन्त्रतयादृष्टोत्पादकत्वमस्तीत्यर्थः स्वातन्त्र्ये चादृष्टजननेन श्रवणस्य विद्यायां विनियोगबोधकश्रवणविधिर्नैरपेक्ष्य
मिति बोध्यं एकस्योभयार्थत्वे दृष्टान्तमाह यथेति अग्नीनादधीतेति वचनादाधानस्याहवनीयाद्यग्निसंस्कारत्वोपगमादिति भावः पुरुषसंस्कारेष्विति अ
ग्न्याधेयमग्निहोत्रमित्यादिपुरुषसंस्कारसंग्राहकसूत्रे पुरुषाधानस्यापि पाठादित्यर्थः महिम्नेति वेदान्तश्रवणजनितादृष्टस्योपयुक्ततया विद्यायामेव विनि ५५
योगस्य वक्तव्यतया तत्फलाजन्मान्तरीयविद्योपयोगित्वमिति भावः एवमुत्तममध्यमाधिकारिणां सांख्यभागमिति रूपतद्यावत्ताना ममतत्तमेदाधिकारिणां योग

मार्गान्निरूपयितुमुपक्रमते पंचमीति सर्वसंप्रतिपत्तेरिति सर्वश्रुतिसूत्रस्मृतिसम्यक्प्रतिपत्तेर्निश्चितत्वादित्यर्थः आरूढ इति सम्यङ्निरूपितत्वं तत्समर्थः ननु नैतेन
याकल्पितत्वं तत इति भ्रमितत्वेनस्यापि श्रुत्यादिसिद्धत्वात् तत्र हेतुकारणत्वोपलक्षितं ब्रह्मलोकात्यये गाम्भ्यां विद्याद्वाराप्राप्तिश्रुतेश्च तन्मते न प्राप्नमिति सांख्यः अ
वर्णादिपरैर्योगिभिरुपासकैः यस्या नं ब्रह्मस्वरूपं विद्याद्वारागम्यते प्राप्यत इत्यर्थः योगैश्चित्तानुवृत्तिशास्त्रयोगमार्गस्यात्र कुलत्वमातीति वा अथ अपीति विद्यावाश्व
पायामीस्वत्र वगः निर्गुणब्रह्मोपासने मानमस्मिन्निति मातोक्तं परिहरति न चेत्यादिना न निर्विशेषाकात श्रुत्वा तत्कारणे यत्नात्स्थैरिति श्रुतिस्मृतिसोदाहवेवचनप्रमा
णत्वेनोदाहृतत्वात् नचोदाहृतश्रुतिस्मृतिगतयोगपदस्य सगुणोपासनपरत्वसंभवादाशंकाफलकेति वाच्यम् भिन्नविषययोरुपासनासाक्षात्कारयोः कार्यका
रणभावासंभवेन निर्गुणविद्याहेतुभूतस्य योगस्य निर्गुणोपासनरूपत्वावश्यंभावात् न च यत्तत्स्थैरिति वचनगतयोगपदस्योपात्तिपरत्वमेवासिद्धं तस्य गीता
भाष्ये कर्मयोगपरत्वेन व्याख्यानत्वादिति वाच्यं यत्तत्स्थैरिति वचनस्य वस्तुतो निर्गुणोपास्तिपरस्यैव सतो भगवत्पादैः स्वोत्कर्षेन कर्मविषये उदाहृतत्वेन तदनुरोधे

सर्वैः संप्रतिपत्तेः स्थिते आरूढीर्योः ध्यानदीपे विद्यावासाद्युपायांतरमप्याह तत्कारणं सांख्ययोगाभिपन्नं यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यत इति श्रु
तिस्मृतिदर्शनाद्व्याख्यास्यं ज्ञानमवेदांतविचारः श्रवणाद्याहितोमननादिसहकृतो विद्यावाश्वपायः एवं योगशब्दाहितेर्निर्गुणब्रह्मोपासनमपि न चानिर्गुण
स्योपासनमेव नास्तीति शंक्यं यस्तोपनिषदि शैव्यप्रश्ने एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः यः पुनरेतं त्रिमात्रेणोंकारेण परं पुरुषमभिध्यायीतेति निर्गुणस्यैवोपासनप्रतिपादनात् तद
नेतरसमयतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इत्युपासनाफलवाक्ये इति कर्मत्वेन निर्दिष्टं यन्निर्गुणं ब्रह्म तदेवोपासनावाक्येपि ध्येयमिति का

न भाष्ये तथाव्याख्यानोपपत्तेः योगपदस्य ध्याने रूढत्वेन वस्तुतः कर्मपरत्वाभावात्तद्वचनमवलम्ब्य तायोतत्कारणमिति श्रुतेर्योगपदस्य ध्यानपरतया शारीरकभाष्ये
व्याख्यानत्वाच्च कर्मयोगस्य बुद्धियोगद्वारा ब्रह्मप्राप्तिसाधनत्वेन तत्साक्षादिति ज्ञापनाय सवचनस्य कर्मविषयतया भगवत्पादोदाहरणसंभवाच्च तस्मात् प्रामा
वाक्येन न युक्तेति चेन्न उदाहृतश्रुतिस्मृतिव्यतिरेकेणाप्यत्रैकापि निर्गुणोपासने न दृष्टमित्येतावत्ताभिप्रायेण शंकोपपत्तेरत एव सर्वाण्येव श्रुतिभिर्निर्गुणो
पासने हृष्टमिति भिन्दाधिकारिणा मुमुक्षासतायाह प्रश्नोपनिषदीत्यादिना त्रिमात्रेणेति द्वितीयार्थे तृतीया तिस्रः अकारोकारमकाराख्यामात्रा यस्योंकार
स्य सः त्रिमात्रः ओंकारे निर्गुणमेव ब्रह्म तदभेदेन ध्येयमिति यः अभ्यासादिसमर्तिमाह तदनंतरमिति ध्यानवाक्यानंतरमित्यर्थः जीवघनः परमात्मनो घनः हेतु
कार्यवद्गुपाधिपरिच्छिन्नचैतन्यात्मा जीवघनः तस्मात्परः शुद्धः निरुपाधिकः परमात्मा तस्य ध्यानात्पुरि हृदयादीकाशे बुद्धिसाक्षित्वेन शयं वर्तमानमीक्षते सा
क्षात्करोतीत्यर्थः उपासनावाक्ये परं पुरुषमभिध्यायीतेति वाक्ये इत्यर्थः कार्यतीति ईक्षणवाक्यस्य ध्यानफलभूतसाक्षात्कारप्रतिपादकत्वेन ध्यानवाक्येककवा
क्यत्वात् ध्यानेक्षणयोः कार्यकारणभावो वगम्यत इति भावः नियमादिति असमर्थानां दमसाक्षात्कारादर्शनादिति भावः ननु कल्पतरौ ध्यानतत्त्वस्य तस्य

सि॰ ले॰ तेन सत्तेज सि सृष्टे संपन्न इति सर्वसंपत्ति वचनानुसारेण विशेषणं दत्तं तथा चोंकारेण ध्यानं कुर्वतः स्वस्य निर्गुणब्रह्मरूपत्वं कल्पतरुकारैर्नंगीकृतमिति प्रतीयते नि चेत्र सत्यं
रु॰ टी॰ संपत्ति वचनस्याविरादि मार्गप्राप्ति परतायाश्च तुर्थीध्याये व्यवस्थापितत्वेन सत्यं तदेस्येश्वर प्राप्ति परताभावात्कल्पतरुकारणमपि तदीय वचनान्तर पर्यालोचया न४
५५ क्रान्ते मार्ग प्रवर्तयाश्चर्यतस्य त्वविशेषणदानेना तत्पूर्णभावस्य प्रिमुलेप्रतिपादितत्वाच्चेति भावः देवा ह वै प्रजापतिमब्रुवन् अणोरणीयांसमिमम् आत्मानमोंकारं
नो व्याचक्ष्वेत्याद्याथर्वणीय श्रुतिश्लोकस्तस्मादपि सूत्रस्य विज्ञेयमिमं प्रस्तुतं परमात्मानमोंकारगम्यमिति मर्थः एतच्छ्लोकवादरैव ब्रह्मेत्याद्याकठवल्लीश्रुतिः ओ
ने॰ मित्येतदक्षरमिदं सर्वमित्यादि माण्डूक्य श्रुतिः ओमित्येवं ध्यायथ आत्मानमिति मुण्डक श्रुतिरादि पदार्थः निर्गुणस्योपास्यत्वे सूत्र संमति माह सूत्र कृतापीति सूत्र
कृता निर्गुणोपि गुणानामुपसंहारस्य दर्शितत्वादिति संबंधः निर्गुणेतु गुणोपसंहारो निर्गुणब्रह्मासि त्यर्थमेव न निर्गुणब्रह्मोपास्य इति निर्णयकाबकेदायपादे वि
सिनुष्टि उपास्य गुणपरिच्छेदार्थमिति परिच्छेदो निर्णयः निर्गुणेति गुणोपसंहारनिरूपणस्य निर्गुणोपास्तिरपि फलमिति च तत्त्वमन्यथा तन्निरूपणस्य पापसंग
तिप्रसंगादिति भावः आनन्दादयः क्वचित्सूत्रे अमत्ता अप्युपसंहर्तव्याः प्रधानस्य वेद्यब्रह्मणः सर्ववेदान्तेष्वभेदेन ब्रह्मविद्याया एकत्वादिति सूत्रार्थः भावरूपाणां
र्मनामन्तर्ईशानित्यानयोः कार्यकारणभूतयोरेक विषयत्वनियमादित्यस्यार्थस्ये ज्ञाति कर्माधिकरणे भाष्यकारादिभिरंगीकृतत्वात् अमत्वापीनापनीयक
त्ववत्वादिधर्मान्तरे निर्गुणोपास्ते अपेक्षितत्वात् सूत्रकृता गुणोपास्यगुणपरिच्छेदार्थमारभ्य गुणोपसंहारपादे निर्गुणेप्यानन्दादयः प्रधानस्येति सूत्रेणाभा
वरूपाणां ज्ञानानन्दादिगुणानामन्तरथिपान्त्वविशेषश्चित्यादिसूत्रेणाभावरूपाणामस्थूलमनणुत्वादि गुणानां चोपसंहारस्य दर्शितत्वाच्च न त्वानन्दादिगुणो
पसंहारे उपास्य निर्गुणमेव न स्यादिति चेन्न आनन्दादिभिरस्थूलत्वादिभिश्चोपलक्षितमखंडैकरसं ब्रह्माहमसीति निर्गुणत्वानुपमर्दनोपासनासंभवात् ननु
मिति विशेषणमन्तरुथियामित्यधिकरणस्यानन्दादय इत्यधिकरणे पौनरुक्त्यपरिहारार्थमितिवाच्यं अक्षरे ब्रह्मणि धीर्येस्थूलादिषा द्वका आर्थभ्रस्ते रश्मावर्थवत्तीते न्तरपि
यस्त्वे वाम चिरोधउपसंहारः इत्येव वेदान्तेषु कर्तव्य एवेति सूत्रभाष्यार्थः स्थौल्यादिनिषेधानां निष्प्रपंच ब्रह्म प्रमितिहेतुत्वादिति भावः आचार्येणाक्त नन्विति आ
नन्दादिगुणानामुपास्यकोटौ निवेशो नांगीक्रियते येनोपास्यब्रह्म सगुणं स्यात् किं तूपास्य निर्गुणनिर्णयद्वारा निर्गुणोपास्तावुपयोगमात्रं स्वीकृत्य तदुक्तिसमाप्यते ने
ति आनन्दादिगुणानामस्थूलादिगुणानां चोपसंहारो हि तद्वाचकपदानां सकृदुच्चारणरूपो विवक्षितः तत्तत्पदोपस्थितिविशिष्टे चेत्तन्मवाचकैरानन्दादिपदैः स्थौल्या
द्यभाव विशिष्टचैतन्यवाचकैरस्थूलादिपदैश्च स्ववाच्यार्थं प्रत्युगतम खंडैकरसं ब्रह्मलक्षणया बोध्यते तदहमसीत्युपासनं संभवादित्यर्थः उक्तं च ध्यानदीपे आ
नन्दादिभिरस्थूलादिभिश्चात्मा लक्षितः यो खंडैकरसः सोहमस्मीत्युपासनं इति श्रुतेति वेदान्तेष्वित्यर्थः एवं श्रुतिसूत्राभ्यां निर्गुणस्योपास्यत्वं निरूप्य निर्गुणोपासन
स्य श्रुतमतरविरोधमाशंक्य परिहरति ननु तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासत इत्यादिना तदेवेति तुर्यादिसाक्षि चैतन्यमेवेत्यर्थः उपास्यस्य ब्रह्मत्वनिषेधवद्वेद्यस्यापि ब्रह्मत्वनिषेधात्प्रसंगवेदनमपि ५५

त्वसिद्धेरित्याह अमदेवेति वेदनविषयादन्यद्ब्रह्मेत्युक्ते अर्थाद्ब्रह्म वेद्यं न भवतीत्यर्थः अस्त्विति वेद्यत्वमुपास्यत्वं वा ब्रह्मणि परमार्थतो नास्तीति निषेधश्रुतीनां तात्पर्यमि
भावः निर्गुणोपासने अधिकारिणं दर्शयति एवं चेति निर्गुणोपासने प्रमाणसिद्धे सतीत्यर्थः केषांचिन्मुमुक्षूणां श्रवणसंभवे प्रमाणमाह अश्रवणायापीति बहुभिःश्रु
त्वाभिः यः परमात्मा श्रोतुमपि न लभ्यते तस्य श्रोतृत्वापि साक्षात्कारो दूरापास्त इत्यर्थः बहूनां श्रवणालाभे श्रवणेऽभिमतं कारणं कारणं दर्शयति येषामिति बुद्धीति उ
क्तं च ध्यानदीपे अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सोऽनिशमिति तत्र सामग्र्यसंभवे चिह्नमेति न्याययति येषामसंतबुद्धिमांद्या
नां श्रवणादिकं न संभवति येषां वक्रशालमतीनामपि सामग्र्यभावात् श्रवणादिकं न संभवतीत्यर्थः विशिष्टतमसंभिन्नार्थमर्यादत्वकारुणिकत्वादिलक्षणो वाऽथ ते
षां ब्रह्मजिज्ञासा हेतुमाह अध्ययनेति अधिगमितः अवगमितः ब्रह्मात्मभावो येषां ते तथोक्तास्तेषामित्यर्थः तेषां तद्विचारं विनैव गुरुभ्यो वा यथार्थतदनुष्ठानात्साक्षात्का
रः संपद्यत इति संबंधः निर्गुणब्रह्मविचारं विनैव निर्गुणब्रह्मोपासनास्तीत्यर्थः तत्र प्रश्नोपनिषदादावुपासनामात्रमुक्तं न तु तदनुष्ठानप्रकारो यो त्माशंक्याह आथर्वणे यथेवि

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इति श्रुतेर्न परब्रह्मोपास्यमिति चेन्न अमदेवत हि दिवादयो विदिताद्विति श्रुतेस्तस्य वेद्यत्वस्याप्यतिप्रसङ्गापातात् श्रुतेस्तत्रैव
ब्रह्म वेदनमसिद्धेरवेद्यत्वश्रुतिर्वास्तवावेद्यत्वपरा वदर्थं वा णादौ तदुपासनामात्रसिद्धे तदनुपास्यत्वश्रुतिरपि वस्तुहृत्तपरा स्त्व एवं च अश्रवणायापि बहुभिर्यो न ल
भ्यत इति श्रवणात् येषां बुद्धिमांद्यात्साधनसंपादनकुशले विशिष्टगुरुलाभाद्वा श्रवणादि न संभवति तेषामध्ययनगृहीतैर्वेदान्तैरापाततोऽधिगमितब्रह्मा
त्मभावानां तद्विचारं विनैव प्रश्नोपनिषदाद्युक्तमार्गेण ब्राह्मवासिष्ठादिकल्पेषु पञ्चीकरणादिषु च अनेकशाखाविप्रकीर्णसर्वार्थोपसंहारेण कल्पसू
त्रेष्वग्निहोत्रादिवन्निर्धारितानुष्ठानप्रकारे निर्गुणोपासने संप्रदायमात्राद्विज्ञाय गुरुभ्यो वा यथार्थतदनुष्ठानात् क्रमेणोपास्यभूतनिर्गुणब्रह्मसाक्षात्कारः सं

ति ननु पञ्चीकरणे वेदान्तलक्ष्ये अखंडैकरसे प्रणवमात्रात्मकत्वात्तत्प्रपञ्चविलापनोक्तपूर्वकमहंब्रह्मास्मीत्यभेदानावस्थानं समाधिरित्युक्तायोः रखंडैकरसः सोऽहम
स्मीत्येवमुपासीत इत्युदाहृतध्यानदीपवचनाच्च प्रकृतनिर्गुणोपासनमहं ब्रह्मरूपं विवक्षितं प्रश्नोपनिषत्प्रतोऽवमर्षेत्त्वोंकारस्वरूपे प्रतीके निर्गुणब्रह्मदृष्टिर्विवादे
ता तथा कठवल्ल्यामपि तथा च कथं प्रश्नोपनिषद्वाक्ये प्रकृतोपासने प्रमाणत्वेनोदाहृतमिति चेन्न प्रकृतोपासनेतापनीयमाण्डूक्यखंडकश्रुतीनामेव प्रमाणत्वेन वि
वक्षितत्वात् कठवल्ली प्रश्नोदाहरणं तु निर्गुणस्याप्युपासनमन्यत्रापि दृष्टमित्येतावन्मात्रेणेति न विरोध इति भावः पञ्चीकरणादेश्च निर्धारितानुष्ठानप्रकारमिति से
वन्यः तत्र हेतुमाह अनेकशाखेति अनेकासु शाखासु विप्रकीर्णेन तया विप्रकीर्णतया स्थितानामुपसंहारेण यथा अग्निहोत्रादिकमानिर्धारितानुष्ठान
प्रकारं भवति तथेत्यर्थः उपासनानुष्ठानप्रकारः संप्रदायः तन्मात्रविज्ञोऽपि गुरुभ्यः तत्काण्डनिष्ठेभ्य इत्यर्थः उक्तं च भगवता श्रीकृष्णेन निर्गुणप्रकरणे श्रुत्वान्ये
भ्य उपासत इति क्रमेणेति उपासनापरिपाकक्रमेणेत्यर्थः ननु निर्गुणोपासनस्य कथं प्रमालक्षणसाक्षात्कारपर्यवसानमित्यत आह अविसंवादीति अयमर्थः क

विकृष्टविदेशे स्थितस्य श्रीकृष्णस्य रूपविंवस्य प्रतिविंबं गवाक्षादिद्वारि पश्यतो दूरे स्थितस्य पुरुषस्य प्रतिविंबे श्रीकृष्णोयमिति भ्रमो जायते तेन भ्रमेण प्रतिविंबाश्रयोपाधि
समीपगतस्य तत्र श्रीकृष्णगोचरप्रमा जायत इति लोकप्रसिद्धं तत्र प्रतिविंबे विंवभ्रमस्तत्र श्रीकृष्णस्य भ्रमोऽविसंवादिभ्रमः विसंवादः फलाभावः तद्रहितोऽविसंवादिभ्रमः
फलवत्स्वभ्रम इति यावत् यथा तेन भ्रमेण गृहीतस्य श्रीकृष्णस्य प्राप्तिलक्षणफलकाले श्रीकृष्णस्य प्रमा जायते तथा निर्गुणोपासनेन गृहीतस्यापि ब्रह्मणः प्राप्तिलक्षणफलका
ले निर्गुणप्रमा जायत इति ननु संवादिभ्रमदृष्टांतेन निर्गुणोपास्तेः प्रमापर्यवसानमुक्तमनुपपन्नं दृष्टांते वैषम्यात् तत्र हि समीपोपसर्पणानंतरं सतः श्रीकृष्णस्य चक्षुः
सन्निकर्षे सति श्रीकृष्णस्य प्रमा जायते न तु संवादिभ्रमात् प्रकृते च निर्गुणोपासनस्य प्रमाजनने सामर्थ्याभावात् सामग्र्यंतराभावाच्च कथं प्रमापर्यवसानमित्या
शंक्य निर्गुणोपासनेऽपि वस्तुसमानविषयकप्रमाजनने सामर्थ्यसंभावनाय तस्य यथार्थत्वं सदृष्टांतमाह पाणिनीति विधायेति तदुक्तं स्वकरविंदे तामिति शेषः तदुक्त
रेति दैवयोगात्स्वचेववराटिकास्तव पाणौ संतीत्युक्तरवकृतिमर्थः निर्गुणोपासनस्यापि वस्तुतो यथार्थत्वेनेति संबंधः अवरोडुकरस्य ब्रह्माहमस्मीति प्रत्ययस्य मूर्तिरूपो तं॰

अविसंवादिविभ्रमन्यायेनोपास्तेरपि क्वाचित्फलकाले प्रमापर्यवसानसंभवात् पाणौ पंचवराटिकाः पिधाय केनचित्करे कतिवराटिका इति पृष्टे पंचवराटि
का इति तदुक्तरवकृतवाक्यप्रयोगमूलभूतं तेषां विशेषज्ञानस्य मूलप्रमाणामूलस्य साक्षात्परोक्षरूपस्यापि यथार्थत्ववन्निर्गुणब्रह्मोपासनस्यार्थतथात्व
विवेचकनिर्विचिकित्समूलप्रमाणानिरपेक्षस्य दहराद्युपासनावदुपासनाशास्त्रमात्रमवलम्ब्य क्रियमाणस्यापि वस्तुतो यथार्थत्वेन दहराद्युपासनेनेव नि
र्गुणोपासनेन जन्यस्य स्वविषयसाक्षात्कारस्य श्रवणादिप्रमाणजन्यसाक्षात्कारवदेव तत्त्वार्थविषयत्वस्याविशेषाभावाच्च उपास्तिविशेषः मतिवैयर्थ्यरहितस्य
धर्मः श्रवणादिप्रमाणात्याब्रह्मसाक्षात्कारो फलति सिध्यतीति सांख्यमार्गो मुख्यः कल्पः उपास्त्यादिविलम्बेनेति योगमार्गोऽनुकल्प इति नन्वस्मिन्नद्वयेपि

पास्तेर्विषयवस्तुयाभावाद्यथार्थत्वमिति भावः ननु प्रकृतोपासनस्य निर्विचिकित्सतत्त्वज्ञानपूर्वकत्वादेव श्रवणमननोत्तरकालीननिदिध्यासनस्येव यथार्थत्वसंभवात्
किमिति दैवयोगाद्यथार्थत्वं समर्थितं तत्राह ग्रंथं तथात्वेति ग्रंथस्य ब्रह्मणः तथात्वं प्रत्यक्स्वरूपत्वनिष्प्रपंचत्वादि तस्य विवेचकं निर्णायकं यन्निर्विचिकित्सप्रम
माणादि ते वाक्यं सत्यमूलप्रमाणं श्रुतिरूपं तन्निरपेक्षस्येत्यर्थः निदिध्यासनस्येव प्रकृतनिर्गुणोपासनस्य विचारपूर्वकत्वाभावान्न निर्विचिकित्सितत्वनिर्णयपूर्वकत्व
प्रयुक्तं यथार्थत्वमिति भावः ननु विचारपूर्वकप्रसंगाभिन्नब्रह्मनिर्णयाभावे कथमहं ब्रह्मास्मीति प्रत्ययसंततिरूपोपास्तिरनुष्ठीयते तत्राह दहरादीनि यथा तत्
णस्येश्वरस्य विचारपूर्वकं जीवाभिन्नत्वनिर्णयाभावेपि तस्य सगुणेश्वराभेदचिंतनेकर्तव्यमित्येवरूपं सगुणोपासनाविधिशास्त्रमवलंब्य सगुणोपासने क्रिय
ते तथाहि निर्गुणोपासनकर्तव्यमित्येवमाम्नकशास्त्रमात्रमवलंब्य निर्गुणोपास्तिरनुष्ठीयत इत्यर्थः निर्गुणोपासनस्य साक्षात्कारहेतुत्वे दृष्टांतमाह दहराद्युपा ५६
सनेनेवेति प्रावप्रपभाविकत्वादिति समानविषयकध्यानसामर्थ्यादिविषयावाधाच्चेत्यर्थः सांख्ययोगमार्गयोस्तुल्यकल्पत्वभ्रममपनयति इयांस्त्विति उ

द्धिमांद्यादिप्रतिबंधरहितस्य विविदिषोर्बुद्धिर्हित्वा भेत्तसिं सांख्यमार्ग एवानुष्ठेयः तस्य श्रवणादिसिद्धिहेतुत्वात् सांख्यालाभे तु योगोनुष्ठेय इत्ययं कल्पः सुसमर्थ न
त्वस्मिन्निति सांख्ययोगमार्गद्वयेपीत्यर्थः ननु योगमार्गे निर्गुणोपासनस्य सगुणोपासनदृष्टान्तो दृढत्वेन साक्षात्कारकारणत्वसाधकमस्तु न त्वात्मस्वरूपसाक्षा
रणेन समत्वानुपपत्तिरिति चेन्नैव दोषः उपासनस्य साक्षात्कारकारणत्वं प्रमाणाभिप्रायेण प्रश्नोपपत्तेः तत एव तत्प्रमाणं वक्ष्यति न चेत्यादिना ग्रंथवाक्यमेवं चेत्स
गुणोपासनदृष्टान्तेन निर्गुणोपासनस्य हेतुत्वमात्रमुक्तं न तु कारणत्वं तथा च योगमार्गे उपासनमेव करणं किं वा प्रमादिति प्रश्नाभिप्रायः सगुणकृत इति भावः
मार्गद्वयेपि साक्षात्कारोदयकाले प्रसंख्यानस्यानुवृत्तिमाह योगमार्गे इत्यादिना निष्कलं निर्विशेषं परमात्मानं ध्यायमानस्तेनोत्थानतां प्रपन्न इत्यर्थः कामा
द्वेति कामातुरस्यासन्निकृष्टकामिनीसाक्षात्कार इत्यर्थः न त्वसन्निकर्षाभावेन च दृष्टः कारणत्वात्संभवात् मनसो बहिःस्वातंत्र्याच्च कामिनीगोचरमतं।

ब्रह्मसाक्षात्कारे किं करणं केचिदाहुः श्रवणाभ्यासरूपं प्रसंख्यानमेव योगमार्गे प्राप्तित्वादारभ्योपासनारूपस्य सांख्यमार्गे मननानंतरं निदिध्यासनरूपस्य
वतस्य सत्त्वात् न च तस्य ब्रह्मसाक्षात्कारहेतुत्वे मानाभावः ततस्तु तं पश्यति निष्कलं ध्यायमान इति श्रुतेः कामातुरस्य व्यवहितकामिनीसाक्षात्कारे प्र
सांख्यानस्य करणत्वे लोके श्रुत्याप्रामाण्यात्तत्रापि हि दृष्टप्रमाधिकरणे विकल्पो विशिष्टफलत्वादिप्रमाधिकरणे च दहराद्यहंग्रहोपासकानां प्रसंख्या
नानुपास्यसगुणब्रह्मसाक्षात्कारांगीकाराच्च ननु च प्रसंख्यानस्य प्रमाकरणेष्वपरिगणनात् तज्जन्यो ब्रह्मसाक्षात्कारः प्रमा न स्यात् न च काकता
लीयसंवादिवराटिकसंख्याविशेषाहार्यज्ञानवदर्थाबाधेन प्रमाणत्वोपपत्तिः प्रमाणमूलकस्य प्रमात्वापवादात् आहार्यहृते स्वप्नोपस्तिनाहुतिवत्प्र
ज्ञानमिव प्रमा न सक्रियारूपनयाइक्कादिवद्बाधितार्थविषयत्वेपि प्रमात्वानभ्युपगमात् मैवम् लोके प्रमाकरणमूलकत्वेपि ईश्वरमा

ख्यानमेव कारणमिति भावः सगुणोपासनं प्रयाणपर्यंतमावर्तनीयं ऋतुः तत्रापि मरणकालेपि योगिनो ब्रह्मवित्तस्य स्मृतिसिद्धत्वात्स
दाप्रत्ययाभ्यासं विना मरणकाले तदसंभवादिति सूत्रार्थः अहंग्रहोपासनानां विकल्पः उपास्यदेवतासाक्षात्कारलक्षणस्य फलस्याविशेषाद
त्वादेकार्थानां विकल्पस्य प्रसिद्धत्वादिति सूत्रार्थः ब्रह्मसाक्षात्कारस्य प्रमाकरणजन्यत्वाभावेपि विषयाबाधात् प्रमात्वमसाक्षात्कथमिति चेत् न च
काकतालीयेति याहृच्छिकेत्यर्थः लोके सज्ञानकरणजन्यस्य ज्ञानत्वमेव नास्ति प्रमात्वे तु हृतापत्तिमिति अभिप्रायेणाह प्रमाणमूलकस्येति संवि
संवादिवराटिकसंख्याविशेषगोचराहार्यहृते इत्यपि ज्ञानत्वमसिद्धमित्याह आहार्यहृते इति अबाधितार्थज्ञानत्वं हि प्रमात्वं न त्वबाधितार्थकत्वमा
प्रमतिप्रसंगादिति मत्वाह इच्छादिवदिति ननु प्रसंख्यानस्येत्यादिना प्रामाण्यबोधं परिहरति मैवमिति मायाहुतिवदिति न च मायाहुतेरपि मात्वं।

सि॰ले॰
द॰टी॰
५७

ज्ञानत्वमिति वाच्यं तथासतीश्वरीयमायावृत्तेः यः सर्वज्ञ इत्यादिश्रुतिप्रतिपन्नायास्तस्यान्वर्थत्वाभावप्रसंगादिति भावः नौत्वादिति न चैकाद्यावृत्तिप्रसंग इति वाच्यं तद्वि
त्तेत्वेन विशेषणलोपप्रत्तेरिति भावः प्रसंख्यानजन्यसाक्षात्कारस्य प्रमाणमूलकत्वात्प्रमाणत्वमिति समाधानान्तरमाह मार्गद्वयेपीति अविचारितेत्यादिना ।
यामप्रामाणिकाभिप्रायं वेदान्ताद्यापातावगतिस्तन्मूलकतयेत्यर्थः न च विचारितादविचारिताद्वा यद्ब्रह्मावगतिर्जाता तर्हि किमर्थं प्रसंख्यानमिति वाच्यं प्रसं
ख्यानात्स्वविषयविद्यानिवर्तकाभिव्यक्तब्रह्मावगतेरुत्पत्त्यभावात्तद्दर्शनदावश्यकमिति भावः प्रमाणजस्यापि प्रमाणप्रयोज्यत्वमात्रेण प्रमात्वे स्मृतिमा
त्रं उक्तेरिति ज्ञानभावनाज्ञानाभ्यासरूपप्रसंख्यानं तज्जन्यमपरोक्षज्ञानमित्यर्थः मूलप्रमाणं वेदान्तवाक्यतज्जन्यप्रमा वा तस्य पारोक्ष्येनाविप्रतिपन्नप्रामाण्य
कत्वमिति बोध्यं प्रसंख्यानजन्यसाक्षात्कारनिष्ठप्रामाण्यप्रयोजकत्वं मूलप्रमाणस्यापेक्षायामपासिद्धोतापात इति पाकाते नेति प्रसंख्यानजसाक्षात्कारनिष्ठप्र
याह्यतिवत्प्रमात्वोपपत्तेः विषयावाधतौल्यात् मार्गद्वयेपि प्रसंख्यानस्य विचारितादविचारिताद्वा वेदान्तात्तु ह्यत्वे क्वापि मूलकतया प्रसंख्यानज
न्यस्यापि ब्रह्मसाक्षात्कारस्य प्रमाणमूलकत्वाच्च उक्तंहि कल्पतरुकारैः वेदान्तवाक्यजज्ञानभावनाजापरोक्षधीर्मूलप्रमाणदार्ढ्येन न भ्रमत्वमश्नु
यात् न च प्रामाण्यं परतस्त्वमापतितं मत्ज्यते अपवादनिरासाय मूलशुद्ध्यनुरोधनादिति अमेनुपथोऽणुरात्मा चेतसा वेदितव्यः इत्यप्रतेत्वप्रपाठ्यथा
का॰ इत्यादिश्रुतेर्मनःपदब्रह्मसाक्षात्कारकरणं तस्य सोपाधिकात्मगमहतेति रूपप्रमाकरणत्वल्लक्षः स्वप्नप्रपंचाविपरीतप्रमात्रादिज्ञानसाधनस्यान्तःक
रणस्येत्यादिपंचपादिकाविवरणग्रन्थे नापितत्प्रामाण्यतिपादनात् अत एव दंतवर्तवासीति मतं तेऽस्य परमो लोक इति श्रुतेः केवलस्य ब्रह्मसाक्षात्का
रे एवमन्तःकरणत्वसंप्रतिपत्तेश्च तदाकरणान्तराभावात् प्रसंख्यानं तु मनसः सहकारिभावेनोपयुज्यते वाक्यार्थभावनापरिपाकसहितमन्तःक

पिप्रामाण्यं नियमेन स्यात् अत आह कस्मादिभास्यमेवेति न तत्प्रामाण्यप्रयोजकत्वं मूलप्रमाणानुसरणं किंतु प्रसंख्यानजन्यव्यवहितकामिनीसाक्षात्कारस्याप्रमा
त्वदर्शनात्प्रसंख्यानजन्यब्रह्मसाक्षात्कारेपि कदाचिदप्रामाण्यशंका संभाव्यते तन्निरासाय मूलप्रमाणानुसरणमिति नाप्रसिद्धान्त इति भावः अपवादे
ति अप्रामाण्यशंकाऽपवादः प्रसंख्यानमात्रं न साक्षात्कारे करणं किंतु तत्सहकृतं मनस्तत्र करणमिति मतं दर्शयति अन्ये त्विति अणुरेष विज्ञेयः अन्ये त्वप्रसं
ख्यानसहकृतं मनस्तेवानुद्रष्टव्यमित्यादिश्रुतिरादिपदार्थः जीवसाक्षात्कारे मनसः करणत्वे सम्मतिमाह स्वप्नमेवेति प्रातिभासिकस्वप्नप्रपञ्चापेक्षयाविप
रीतो व्यावहारिकः प्रमात्रादिस्तत्प्रकाशकज्ञानसाधनस्येत्यर्थः आदिपदप्रमेयादिसंग्रहार्थं नयेति प्रमाणोपहितसोपाधिकात्मसाक्षात्कारे मनसः करणत्वेति ५७
तथा चायमर्थः निरुपाधिकात्मसाक्षात्कारेपि मनसः करणत्वं सूचितमित्याह अत एवेति इहैकस्थं येऽणसर्ववेत्तस्वतनुस्थं यमानेसर्वात्मकेअहस्सेवाहमासिततःस

वोऽस्मीति स्वमेव ब्रह्म विजानत इत्यर्थः ननु स्वमेव ब्रह्मविदो महावाक्यानुसंधानसंभवाद्वाक्यमेव करणं किं न स्यादिति मतमाशंक्य न देति स्वमेव महावाक्यानुसंधानस्यातिपतनवा
क्यस्यापरोक्षार्थहेतुत्वानुपगमाच्चेति भावः समानिमाह वाक्यार्थेति महावाक्यार्थ इत्यर्थः स्थूलसूक्ष्मकारणोपाधीनां नेति नेतीत्यादिवाक्यैर्निषेधपूर्वा
वशेषितो यस्तत्पदार्थः स्वप्रकाशचैतन्यात्मकस्तस्य पूर्णतामाविर्भावयति आविर्भावयच्च वृत्तिसाक्षात्कार इत्यर्थः यत्तु निष्कलं ध्यायमानस्ततो ध्यानात्तं प
श्यतीति योजनामभिप्रेत्य ध्यानस्य साक्षात्कारकरणत्वं श्रुतिसिद्धमित्युक्तं न तु पश्यति ज्ञानप्रसादेनेति करणत्वश्रवणात् ज्ञानपदं चित्तपरं ज्ञानस्य प्रसादः प्र
काशनं तच्चाध्यायमानो ध्यानान्नालभ्येत ज्ञानप्रसादेन पश्यति इति योजना विवक्षितेति भावः यच्च योजनायां विनिगमकं पूर्वोदाहृतानि मनसः करणत्व
बोधकवचनान्येवेत्यभिप्रेत्य प्रसंख्यानमात्रस्य करणत्वं दूषयति नचेति महावाक्यमेव तत्र करणमिति मतमाह अपरे त्विति अपरेपि तत्पदेन तत्त्वमसि

रणं तत्पदार्थस्यापरोक्षत्वं तत्र हेतुरुपाध्याकारनिषेधेन तत्पदार्थतामाविर्भावयतीति भामतीवचनात् ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्क
लं ध्यायमान इति श्रुताविव चित्तज्ञानप्रसादशब्दितचित्तैकाग्र्यहेतुत्वेनैव ध्यानोपादानात् न तु प्रसंख्यानेन स्वयं करणत्वं न स्य कस्यचिदपि ज्ञानकारणत्वाक्लृप्तेः
कामानुरक्तकामिनीसाक्षात्कारादावपि प्रसंख्यानस्य सहकृतस्य मनस एव करणत्वोपपत्त्या सूक्ष्मज्ञानकारणतया कल्पनायोगादित्याहुः श्रुत्वैतद्धास्य
विमिंज्ञो तमसः पारं दर्शयति आचार्यवान् पुरुषो वेदेत्यस्ता वेदत्वविरमित्यादिश्रुतिश्च आचार्योपदेशानन्तरमेव ब्रह्मसाक्षात्कारोदयं जीवन्मुक्तिं च ब
र्णयन्ति वेदान्तविज्ञानसुनिश्चितार्था इति ज्ञानान्तरनैरपेक्ष्यश्रवणात् तं त्वौपनिषदं पुरुषमिति ब्रह्मण उपनिषदेकगम्यत्वश्रवणात् औपनिषदं महावाक्यमे
व ब्रह्मसाक्षात्कारे करणं न मनः यन्मनसा न मनुत इति तस्य ब्रह्मज्ञानकरणत्वनिषेधात् न चापक्वमनोविषयमिदं येनाहुर्मनो मतमिति वाक्यशेषम
विजिज्ञो साक्षात्कारं कृतवानहं किं त्वित्यर्थः पारमार्थिकं ज्ञानमत्र तत्र तस्य चिंशषस्तावानेव विलंबो विदेहकैवल्यं प्रति यावत्प्रारब्धान्न विमोक्ष्ये इत्यर्थः वेदान्तेति
अत्र वेदान्तजन्यज्ञानादेव ब्रह्मात्मैक्यलक्षणस्यार्थस्य सुनिश्चितत्वोक्त्या वाक्यार्थावगमनन्तरं प्रसंख्यानानुष्ठानं नापेक्षितमिति प्रतीयते इदं च तन्निरपेक्षत्वं वा
क्यादेवापरोक्षज्ञानोत्पत्तिपक्षे संगच्छते अन्यथापरोक्षज्ञानाय तस्यापेक्षितत्वात्तन्नैरपेक्ष्यं न संगच्छते अतो वेदान्तविज्ञानशब्दं महावाक्यमेवापरोक्षज्ञाने करणमिति
निश्चीयते इति भावः महावाक्यमेवेति सांख्यमार्गानुष्ठानेन योगमार्गानुष्ठानेन वा दृष्टादृष्टलक्षणसकलप्रतिबंधक्षये प्रतिबंधरहिते सति वाक्यमेव साक्षा
त्कारं जनयतीति वाक्यस्य करणत्वपदेन सांख्ययोगमार्गयोर्वैयर्थ्यं शंक्यमिति मंतव्यं लोको महतां तथा चैतस्मिन् मनुते तदेव त्वं ब्रह्म विद्धीति योजनान मनुत इति
वाक्यमप्युद्धमनसैव ब्रह्मज्ञानकरणत्वं न बोधयतीति न चेत्यत्राहेतमाह येनाहुरिति येन चैतन्येन मतं प्रकाशितं मन इति वाक्यशेषे अपक्वमनस एव चैतन्य

सि॰ले॰ भास्यमिति वक्तुमशक्यत्वात् तत्र मनोमात्रग्रहणमावश्यकं तदेकरूप्यायनमनुत इति सर्ववाक्येऽपि मनोमात्रग्राह्यत्वमित्यर्थः नचैवमिति मनोमात्रस्य ब्रह्मज्ञा
टी॰ नकरणत्वनिषेधोपगम इत्यर्थः अनभ्युदितमिति अभ्युपगतमित्यर्थः न वचा वेदस्य वेदान्तातिरिक्तग्राह्यपरत्वं स्वीक्रियत इति वाच्यं यच्चापि येन वागभ्युदितं
५८ मिति वाक्यशेषे ग्राह्यमात्रस्य चैतन्यप्रकाशात्मप्रतिपादनेन तदेकरूप्याय सर्ववाक्येऽपि वाचैतन्यस्य ग्राह्यमात्रपरत्वादित्याशयवानाह ग्राह्यस्यापीति मनोमात्र
स्येव ग्राह्यमात्रस्यापीत्यर्थः सर्वग्राह्यमात्रस्य ब्रह्मज्ञानकरणत्वनिषेधानितरथापि ग्राह्यस्य मात्रत्वात् ब्रह्मज्ञानकरणत्वनिषेधपरं तद्वचनं न तु लक्षणयापि त
त्करणत्वनिषेधपरमौपनिषदत्वश्रुतेर्निरालंबनत्वश्रवणादिति समाधानमभ्युपेत्य विपक्षे परेषामपि बाधकं सूचयति मनःकरणत्ववादिनापीति वेदा
न्तानां लक्षणयापि ब्रह्मबोधकत्वानभ्युपगमे ब्रह्मणः प्रत्वाक्षिप्यापत्तामनःकरणत्ववादिभिरपि नेयो ब्रह्मज्ञाने करणत्वस्याभ्युपगंतव्यत्वादित्यर्थः परब्रह्मवा
नोमात्रग्रहणात् नचैवं यद्वाचानभ्युदितमिति ग्राह्यस्यापि तत्करणत्वं निषिध्यत इति वाच्यं मनःकरणत्ववादिनापि निर्विशेषपरोक्षज्ञानकरणत्वस्याभ्यु
पगतत्वेन तस्य यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्यनुरोधेन ग्राह्यार्थस्यापि तत्प्राप्तिश्रुत्वेन ग्राह्यस्य तत्कारणत्वनिषेधतात्पर्यस्य वक्तव्यतया
शक्यसंबंधसत्पलक्षणानुरोधेन तस्य तत्कारणत्वाविरोधात् नच मनसैवानुद्रष्टव्यमिति श्रुतिसिद्धं मनसोऽपि तत्र कारणत्वं न प्रत्यक्षं ग्राह्यमिति वा
च्यं ग्राह्यमात्रात्कारजननेऽपि तदेकाक्यस्यापत्तिं न त्वेन तत्तन्मात्रेणेत्युपपत्तेः मनसैवप्रचयति मनसा ह्यैणे तीत्यादौ तथा दर्शनात् गीताविव
रणे भाष्यकारीय मनःकरणत्ववचनस्य मततोनराभिप्रायेण प्रवृत्तेरित्याह नतु तथापि ग्राह्यस्य परोक्षज्ञानजनकत्वस्वभावस्य नापरोक्षज्ञानजन
जनकत्वं संगच्छत इति चेत् अत्र केचित् सतो समर्थोपि ग्राह्यः ग्राह्यश्रवणमननपूर्वकमनन्यपाभ्यासजनितसंस्कारप्रचयलब्धब्रह्मैकाग्र्यचि
त्तजन्यब्रह्मसाक्षात्कारेऽपरोक्षं भवतां मते अस्माकं मते तु तदपरोक्षमिति विशेषः स्याशयेनाह परोक्षेति वेदान्तानां शक्त्या ब्रह्मबोधकत्वनिषेधपरं यद्वाचानभ्युदि
तमिति वचनमिति अवस्थायां श्रुत्यन्तरमनुसंलपति तस्येति यद्वाचानभ्युदितमिति निषेधवचनस्येत्यर्थः अप्राप्येति श्रुत्या ब्रह्मणोऽपि विषयग्राह्यानाम
मिति निषिध्यते सा च ग्राह्यशक्तिरेव तस्यां ग्राह्यानामौत्सर्गिकत्वादिति भावः वक्ष्यत इति मनःकरणत्ववादिभिरपीति शेषः तस्येति ग्राह्यस्येत्यर्थः तदि
ति ब्रह्मसाक्षात्कारेत्यर्थः ब्रह्मणि च वहति मति कारणत्वं न तत्तीयां श्रुत्यर्थः सर्वदा हन्तश्रुतिविरोधात् किं तेन अस्य मनसः तो मन्तृपोपादानतया हेतु
त्वमात्रं तदर्थ इत्याह ग्राह्यसाक्षात्कारजननेऽपीति तथेति चाक्षुषज्ञानादौ मनसः कारणत्वाभावेन हेतुत्वमात्रेणापि तत्तीयादर्शनादित्यर्थः शमदमादि ५८
संस्कृतमनएव चात्मदर्शने करणमिति गीताभाष्यवचनविरोधं परिहरति गीतेति मतान्तरेति हन्तिकारमतेत्यर्थः नन्वस्वमताभिप्रायेण उक्तम

माणविरोधादिति भावः नन्वनध्यायीति शाब्दस्य ब्रह्मसाक्षात्कारकरणत्वपक्षे कृतिभावविरोधाभावेपि शाब्दप्रमाणस्वभावविरोधात्प्रमाणत्वा कथं चक्षुरसाक्षा-
त्कारे करणमित्यर्थः शाब्दस्वभावमनुरुध्यैवेतस्यापरोक्षज्ञानकरणत्वं साधयति अत्र केचिदिति प्रचयः समूहः मचयपलत्वं यच्छब्दे कार्य्यं तद्वाच्यं तमेव दर्प-
णतदनुगृहीतेत्यर्थः यथा चक्षुः स्वतः प्रतिबिंबानुभवजननासमर्थमपि दर्पणगृहीतं सन्तदनुभवं जनयति तद्वदिति सूचयति चित्तदर्पणेति शास्त्रीये-
ति यथा श्रवणाध्ययनादिजनितसंस्कारसहितान्याधिकरणकहोमस्तावदपूर्वं न जनयति अन्याधिकरणकहोममात्रस्य सर्वजननस्वभावाभावात् शास्त्रीयसंस्कार-
विशिष्टान्याधिकरणकहोमस्त्वपूर्वं जनयतीति तद्वदित्यर्थः ननु दृष्टान्ते शास्त्रबलात्तथा स्वीक्रियते प्रकृते न तथा शास्त्रेनोपलभ्यत इत्यत आह तरतीति नन्वनधा-
त्माविदालमत्यन्तस्यैवाकोपलालितकर्तृत्वाद्यध्यासस्यात्मवेदनान्निवृत्तिरुच्यते न तु शाब्दस्यापरोक्षज्ञानकरणत्वमित्यत आह अपरोक्षस्येति यथा दृष्टान्ते हो-
माधिकरणस्याध्ययनादिसंस्कृतत्वश्रवणमध्यानुपपत्त्या शास्त्रीयसंस्कारसहितान्याधिकरणकहोमोऽपूर्वं जनयतीति कल्प्यते तथात्मज्ञानस्याप
तदर्पणानुगृहीतेः परोक्षज्ञानमुत्पादयति शास्त्रीयसंस्कृतान्याधिकरणकश्चेद्धोमोऽपूर्वमिति कल्प्यते तरति चोकमात्मविदिति शास्त्रप्रामाण्याद्य-
रोक्षस्य कर्तृत्वाद्यध्यासस्यापरोक्षाधिष्ठानज्ञानं विना निवृत्त्ययोगात् तं त्वौपनिषदं ब्रह्मणि मानान्तरासंहतेः शाब्दादप्यपरोक्षज्ञानानुत्पत्तौ निर्मोक्षप्रसङ्गा-
णादित्याह अन्ये तु भावनाप्रचयसहितेत्यादि हि ससमर्थस्यापि मनसो नष्टवस्तुसाक्षात्कारजनकत्वदर्शनात् निदिध्यासनसाहित्येन शाब्दस्याप्यपरोक्ष-
ज्ञानजनकत्वं युक्तमिति दृष्टान्तानुरोधेन समर्थयन्ते अपरे तु परोक्षार्थविषयत्वं ज्ञानस्यापरोक्षत्वे नाम प्रमाणिकः अर्थापरोक्षत्वेन तु नापरोक्षज्ञानवि-
रोधाध्यासनिवर्तकत्वश्रवणमध्यानुपपत्त्या आत्मज्ञानजनकवेदान्तानामेवापरोक्षज्ञाने करणत्वं कल्प्यत इत्यर्थः अयोगादिति सम्यपि श्रवणजनितप-
रोक्षज्ञाने कर्तृत्वाद्यध्यासनिवृत्त्यदर्शनात् परोक्षज्ञानमात्रेणाध्यासनिवृत्तौ मननादिविधिवैयर्थ्यप्रसङ्गाच्चापरोक्षाध्यासस्य सत्यपदिग्भ्रमादिवदित्याख्या।
त्यादिसाक्षात्कारं विना निवृत्त्यदर्शनाच्चेति भावः ननु कर्तृत्वाद्यध्यासनिवर्तकमधिष्ठानात्मतत्त्वसाक्षात्काररूपं ज्ञानं मननेनैव सम्भवति किं शाब्दस्य तत्करण-
त्वकल्पनयेति तत्राह औपनिषदेति अंतरिंद्रियस्य मनसः स्वतन्त्रप्रमाणत्वेन ब्रह्मणस्तज्जन्यत्वे उपनिषदेकगम्यत्वश्रुतिपादकश्रुतिवाक्यप्रसं ग इति भावः
नन्वौपनिषदत्वश्रुतिविरोधेन ब्रह्मणि मानान्तरासंहतेः शाब्दस्वभावविरोधेन शाब्दस्यापि ब्रह्मसाक्षात्कारजनकत्वे सहते न संभवति तथा च ब्रह्मसाक्षात्कार-
करणस्यैवालाभात् मास्तु तत्साक्षात्कारस्तत्राह शाब्दादपीति तथा च मोक्षप्रमाणश्रुतिप्रामाण्याय शाब्दस्यैव साक्षात्कारकरणत्वं कल्पनीयमिति भावः ॥

सि.ले. शास्त्रप्रामाण्यमनुपजीव्यापि प्राह स्वापरोक्षज्ञानकरणत्वं साधयति अग्रमेविति इदानीं प्राह स्वपरोक्षज्ञानजननस्वाभाव्यमेवासिद्धमतो निस्त्यापरोक्षत्वं प्रमाणानि वेदान्तानां साक्षा
टी. त्करणत्वे निरयवाद्यमिति मतान्तरमाह अपरे त्विति न त्विन्द्रियजन्यज्ञानत्वादिकमेव ज्ञानस्यापरोक्षत्वं ब्रह्मगोचरस्यापि ज्ञानस्य तदभावान्नापरोक्षत्वमित्यत आह अग्रमानि
५९ ति केवेति इंद्रियजन्यज्ञानत्वादेरप्यनुपपत्तिरेवावसाने निरस्तत्वादिति भावः नन्वर्थस्यापरोक्षत्वमपरोक्षज्ञानविषयत्वम् अस्य निर्वचनात् तथा चान्योन्याश्रयः
अर्थस्यापरोक्षत्वज्ञाने ज्ञानस्यापरोक्षत्वज्ञानं ज्ञानस्यापरोक्षत्वज्ञाने चार्थस्यापरोक्षत्वज्ञानमिति स्यात् अनिर्वचनमासिद्धमित्यभिप्रेत्याह अर्थापरोक्षत्वं त्विति तत्त
नेनेः दिति तत्तत्प्रमातृचैतन्याभिन्नत्वं तस्य तस्य विषयस्य प्रमातारं प्रत्यपरोक्षत्वं तत्तत्प्रमातृचैतन्याभिन्नार्थविषयकज्ञानं तत्तत्प्रमातृ तत्प्रमातृचैतन्याभिन्ने विषयेऽप
रोक्षत्वं नामित्यर्थः न चार्थापरोक्षत्वादावननुगमः इति वाच्यं ज्ञानगतस्यानुगतापरोक्षत्वस्य जातिरूपस्य उपाधिरूपस्य वा प्राङ्निरस्तत्वेन तदभावादेवार्थापरोक्ष
स्याप्यननुगतस्यासंभवेन तस्यादोषत्वादिति भावः ननु प्रमातृचैतन्याभिन्नत्वरूपस्यार्थापरोक्षत्वस्य जडरूपापरोक्षार्थेष्वव्याप्तिः चैतन्यजडयोरैक्यस्य बाधितत्वादित्यत आ
ह अंतःकरणेति तदभेदसत्त्वादिति साक्षिण्यध्यस्तप्रमातृचैतन्याभेदसत्त्वादित्यर्थः तथा चार्थापरोक्षनिर्वचने कल्पिताकल्पितसाधारणाभेदस्य विवक्षितत्वेन प्रमा

षयत्वेनाध्यासोन्याश्रयो भवेत् किं च तत्तत्पुरुषचैतन्याभेदः अंतःकरणतद्धर्माणां साक्षिणि कल्पिततया तदभेदसत्त्वात् बाह्यचैतन्ये कल्पितानां घटादीनां
बाह्यचैतन्ये वृत्तिकृततत्तत्पुरुषीयचैतन्याभेदाभिव्यक्त्या तदभेदसत्त्वाच्च न क्वाप्यव्याप्तिः न चांतःकरणधर्माणां ज्ञानादीनामिव धर्माधर्मसंस्काराणामपि सा

त्वेचैतन्ययोरिव प्रमातृचैतन्यजडयोरकल्पिताभेदाभावेऽपि जडस्य दिति सामानाधिकरण्यानुभवसिद्धकल्पिताभेदसत्त्वान्नाव्याप्तिरिति भावः अंतःकरणजडपदा
र्थेषु प्रमातृचैतन्याभिन्नत्वमुपपाद्य बाह्यापरोक्षार्थेषु तदुपपादयति बाह्येति अंतःकरणतद्धर्माणां तदभेदसत्त्वात् घटादीनां तदभेदसत्त्वाच्च न क्वाप्यव्याप्तिरर्थे बाह्यार्थे वा
व्याप्तिरिति संबन्धः घटादीनां तत्तत्पुरुषीयचैतन्याभेदसत्त्वे हेतुमाह बाह्यचैतन्ये तत्तत्पुरुषीयचैतन्याभेदाभिव्यक्त्येति ननु बाह्यचैतन्यस्य तत्तत्पुरुषीयचैतन्यस्य च वस्तु
तः सदाभेदसत्त्वेऽपि तदभेदाभिव्यक्तिः कुतः इत्यत आह वृत्तिकृतेति बाह्ये विषयावच्छिन्नचैतन्ये चक्षुरादिद्वारा निर्गताया वृत्तेः संसर्गे सति वृत्तिवृत्तिमतोरभेदात् वृत्तिमदन्त
करणस्यापि तत्संसर्गो लभ्यते तथा च वृत्तिसंसर्गाद्बाह्यचैतन्यमेवान्तःकरणसंबन्धात् तत्तत्पुरुषीयचैतन्यं भवतीत्यनेन प्रकारेण बाह्यचैतन्ये वृत्तिकृता तत्तत्पुरुषीयचैतन
याभेदाभिव्यक्तिर्भवतीत्यर्थः ननूक्तप्रकारेण बाह्यचैतन्यस्य प्रमातृचैतन्याभिन्नत्वसिद्धावपि घटादीनां प्रमातृचैतन्याभिन्नत्वमसिद्धमेवेत्याशंक्याह बाह्यचैतन्ये क ५९
ल्पितानामिति बाह्यचैतन्ये तावद्घटादीनामभेदः प्रागेव सिद्धस्तत्र तेषां कल्पितत्वात्तथा च बाह्यचैतन्यस्य वृत्तिकृततत्तत्पुरुषीयचैतन्याभेदाभिव्यक्तिदशायां घटादीनाम

पितत्तत्तुकर्षीयचैतन्याभिन्नत्वं सिद्ध्यतीतिभावः अर्थापरोक्षलक्षणस्यातिव्याप्तिमाशंक्य निराकरोति नचेत्यादिना धर्मेति धर्मादीनामप्यधिष्ठानभूतप्रमातृचैतन्येनस
हाभिन्नसत्ताकत्वरूपाभेदसत्वादितिभावः उद्भूतत्वे सतिप्रमातृचैतन्याभिन्नत्वमर्थापरोक्षमुद्भूतत्वं च फलबलकल्प्यस्वभावविशेषः स च धर्मादेर्नास्तीति परिहारार्थः एवं
शब्दस्य ब्रह्मसाक्षात्कारे करणत्वसिद्ध्यर्थमुपोद्घातं कृत्वा प्रकृतं निदर्शयति एवंचेति ज्ञानापरोक्षस्यार्थापरोक्षफलकत्वे सतीत्यर्थः अभिन्नत्वादिति जीवरूपप्रमातृब्रह्मा
भेदस्य प्रकृतिसिद्धत्वादितिभावः इदं च ब्रह्मणो जीवाभिन्नत्वं जडस्य प्रमातृचैतन्याभिन्नत्ववत्काल्पनिकं न भवति किंतु वास्तवं कुतः रूपमित्याशयेनाह स्वत एवेति
ब्रह्मणो नित्यापरोक्षप्रमातृचैतन्याभेदस्वाभाविकमाह यत्साक्षादिति ब्रह्म जडवत्स्वव्यतिरिक्तप्रमातृचैतन्यमपेक्ष्यापरोक्षं न भवति किंतु साक्षात्प्रमातृचैतन्यस्वरूपत्वा
देवापरोक्षमित्यर्थः ज्ञानापरोक्षमर्थापरोक्षं च प्रकारांतरेण निरूपयति अथ वेत्यविद्याचार्यास्त्विति सर्वोक्तं ज्ञानापरोक्षलक्षणमव्याप्त्या दूषयति नापरोक्षेति
स्वरूपस्यैव स्वापरोक्षत्वे स्वरूपज्ञानेऽव्यापनादित्यर्थः नन्वात्मस्वरूपस्यैवानुभवस्य साक्षादिचैतन्यरूपस्य स्वप्रकाशत्वाभ्युपगमात् स्वप्रकाशत्वस्य च स्वविषय

त्रिगुणकल्पितत्वाविशेषादपरोक्षापत्तिः तेषामनुद्भूतत्वात् उद्भूतस्यैव जडस्य चैतन्याभेदः अपरोक्षमित्यभ्युपगमात् एवं च सर्वज्ञः सर्वप्रकृष्टचैतन्याभिन्न
त्वात् यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुत्युक्तरीत्या स्वतएवापरोक्षं ब्रह्मेत्यपरोक्षार्थविषयत्वाच्छाब्दस्यापि ब्रह्मज्ञानस्यापरोक्षत्ववाचोयुक्तिर्युक्तेत्याह अथ वे
त्यविद्याचार्यास्तु नापरोक्षार्थविषयत्वं ज्ञानस्यापरोक्षत्वं स्वरूपस्यैवापरोक्षरूपस्वरूपज्ञानाव्यापकत्वात् स्वविषयत्वलक्षणस्वप्रकाशत्वनिषेधात् किंतु
यथा तत्तदर्थस्य स्वव्यवहारानुकूलचैतन्याभेदोऽर्थापरोक्षं एवं तत्तद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभेदो ज्ञानापरोक्षं तथा च चैतन्यधर्मस्य वेद्यस्यापरो
क्षत्वरूपत्वात् स्वरूपस्यैव विषयकत्वे तदपरोक्षरूपे स्वरूपज्ञाने निरपवादमित्यत आह स्वविषयकत्वलक्षणेति एकस्मिन्नेव चैतन्ये विषयविषयीभावलक्षणसंबंधो
न भवति संबंधस्य द्विष्ठत्वात् स्वविषयत्वं विनापि स्वसत्ताप्रयुक्तसंशयाद्यगोचरत्वादिलक्षणस्य स्वप्रकाशत्वस्याकरेण निरूपितत्वादितिभावः किंतर्हि ज्ञाना
परोक्षमित्यत आह किंत्विति ज्ञानापरोक्षनिर्वचनं प्रतिदृष्टांततया तेन प्रथममर्थापरोक्षं निर्वक्ति यथेति अर्थस्य स्वव्यवहारानुकूलचैतन्याभिन्नत्वमपरोक्षत्वमस्ति चा
तः करणतद्धर्मादीनां स्वव्यवहारानुकूलेन साक्षिचैतन्येनाभिन्नत्वं तत्र तेषामध्यस्तत्वात् घटादीनामपि स्वव्यवहारानुकूलेन घटादिगोचरवृत्त्युपहितेन घटाद्यधि
ष्ठानचैतन्येनाभिन्नत्वमस्ति तथा च ब्रह्मणोऽपि स्वव्यवहारानुकूलेन स्वगोचरवृत्त्युपहितेन साक्षिचैतन्येनाभिन्नत्वमस्तीति न काप्यव्याप्तिः घटाद्यर्थस्य चैतन्ये कल्पित
त्वाच्चैतन्याभिन्नत्वं सदा वर्तते अपरोक्षत्वं तु सर्वदा नास्तीति व्यवहारानुकूलेत्युक्तं घटादिगोचरवृत्तिदशायामेव घटाद्यधिष्ठानं चैतन्यं घटादिव्यवहारानुकूलं भवति न
त्वसर्वदेति नातिप्रसंगः नन्वेतद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभिन्नत्वमपरोक्षत्वमस्तु नाम तथापि ज्ञानापरोक्षं नोक्तमेव वृत्तिरूपज्ञानस्य चैतन्यापेक्षया भिन्नत्वा

दित्वनग्राह्य तथा चेति चैतन्यस्यैव तत्तदर्थव्यवहारानुकूलत्वे विवक्षितेऽसतीत्यर्थः तथा च ज्ञानापरोक्षत्वमित्यत्र ज्ञानपदं चैतन्यपरमेव न वृत्तिज्ञानपरमिति नानुपपत्तिर्दोष इति भा
वः तत्तदर्थव्यवहारानुकूलत्वे सतीति तत्तदर्थाभिन्नत्वरूपज्ञानापरोक्षत्वं तु चैतन्यधर्म एवेत्यत्र फलितमाह अत एवेति चैतन्यधर्मत्वाभ्युपगमादेवेत्यर्थः तस्य वृत्तिधर्मत्वे तु सुखदुः
खादिगोचरापरोक्षत्वं नैमित्तिकापरोक्षत्वं न स्यात् सुखदुःखादिभासकसाक्षिचैतन्ये वृत्तिधर्मस्यासंभवाच्च सुखदुःखादेरपरोक्षत्वानुभवविरोधः स्यादिति भावः लक्षणे सत्यन्तेन वह्न्यादिगो
चरानुमितिवृत्तौ यद्यपि जीवचैतन्ये वह्न्यादिव्यवहारानुकूलत्वे गतमिति तत्रातिव्याप्तिवारणाय विशेष्यं अनुमितिवृत्तेर्विषयदेशे गमनाभावेन तदवच्छिन्नचैतन्यस्य तदवच्छि
न्नत्वमिति नातिव्याप्तिः घटादिगोचरवृत्त्यभावदशायां घटाद्यवच्छिन्नचैतन्ये घटाद्यपरोक्षत्वविरक्षितेन घटाद्यर्थाभिन्नत्वमस्तीति तद्वारणाय सत्यन्तं तदा तस्य चैतन्यस्य
हेतुत्वेन घटादिव्यवहारानुकूलत्वाभावान्नातिव्याप्तिरिति मंतव्यं न चेति ज्ञानापरोक्षस्य चैतन्यधर्मत्वे घटादिगोचरवृत्तौ वृत्तित्वात्को मीमांसादिमकारेणापरोक्षत्वानुभव
विरोध इत्यर्थः वृत्तिचैतन्ययोस्तादात्म्येन वृत्तिसाक्षात्कारत्वानुभवस्य चैतन्यगतापरोक्षत्वविषयकत्वोपपत्तेरित्यर्थः ननु हृदयनाडीयमीयधर्मादिगोचरयावृत्तिरन्तःकरण
शरीरव्यापिनी जायमाना दैवयोगाद्धृदयनाड्याद्यवच्छिन्नान्तःकरणप्रदेशोयद्विजायेत तदा हृदयादिरूपविषयावच्छिन्नचैतन्यस्य हृदयादिगोचरवृत्त्यवच्छिन्नस्य चाभेदा

त्तेनत्वच्छाशिनित्वेऽव्याप्त्यादि वदंतः करणवृत्तिधर्मः अत एव सुखादिप्रकाशरूपे साक्षिणि स्वरूपसुखप्रकाशरूपे चैतन्ये चापरोक्षत्वं न च चक्षुरादीन्द्रियकवृत्तेरोतदनुभव
विरोधः अनुभवस्य वृत्त्यवच्छिन्नचैतन्यगतापरोक्षत्वविषयत्वोपपत्तेः ननु केज्ञानार्थयोरापरोक्षं हृदयादिगोचरयावृत्ति तद्विषययोरतिप्रसक्तेन तद्देवात्कदाचिद्
त्तिविषयसंसर्गेसति वृत्त्यवच्छिन्नचैतन्यस्य विषयाभिन्नचैतन्यस्य चाभेदाभिव्यक्तेरवर्जनीयत्वादिति चेन्न परोक्षवृत्तेर्विषयावच्छिन्नचैतन्यगतावज्ञाननिवर्तनाक्षमतया

अभिव्यक्तिरपरिहार्या घटादिस्थले वृत्तेर्विषयसंसर्गेसति वृत्तिविषयावच्छिन्नचैतन्ययोरभेदाभिव्यक्तिस्वीकारात् तथा च हृदयादिगोचरयावृत्त्यानुमित्यादिवृत्त्यवच्छिन्नचैतन्यरूपेपरो
क्षज्ञाने हृदयाद्यर्थाभिन्ने हृदयादिव्यवहारानुकूले ज्ञानापरोक्षलक्षणमतिव्याप्तं तथा हृदयादिरूपेपरोक्षार्थे स्वव्यवहारानुकूलयावृत्त्यादिवृत्त्यवच्छिन्नचैतन्याभिन्ने अर्थो
परोक्षलक्षणमतिव्याप्तमिति शंकते ननूक्तमिति यथोक्ते चैतन्ययोरभेदाभिव्यक्तिरिष्यते तयोरुभयोरप्यनावृतत्वमप्यपेक्षितमस्ति तच्चैतन्यस्यावरणद्वयाभावेन योरभेदस्य
अप्रसक्तत्वलक्षणाभिव्यक्तयोगात् तथा च हृदयादिगोचरयावृत्तिस्थले नातिव्याप्तिस्तत्र विषयचैतन्यस्यावृतत्वादिति परिहरति न परोक्षवृत्तेरिति अपरोक्षत्वासक्तेरिति परोक्ष
हृदयादिविषयस्य हृदयादिगोचरयावृत्त्यवच्छिन्नचैतन्यरूपपरोक्षज्ञानस्य चेति शेषः तथा च हृदयादिगोचरयावृत्त्यवच्छिन्नचैतन्यरूपपरोक्षज्ञानस्य हृदयादिव्यवहा
रानुकूलज्ञानत्वेसत्यपि हृदयादिविषयेण सहाभिव्यक्ताभेदाभावाद् अभिव्यक्तत्तदर्थाभिन्नत्वे सति तदर्थव्यवहारानुकूलज्ञानत्वलक्षणं ज्ञानापरोक्षत्वं नास्ति तथा हृदया
द्यर्थस्यापि स्वव्यवहारानुकूलवृत्त्यवच्छिन्नसाक्षिचैतन्याभेदसत्वेपि तदभेदाभिव्यक्त्यभावेन स्वव्यवहारानुकूलचैतन्याभेदाभिव्यक्तिमत्त्वलक्षणमर्थापरोक्षत्वं नास्तीत्यर्थः

नचाहं सुखी दुःखीत्याकारके सुखादिसाक्षिणि सुखदुःखादिरूपविषयाभेदोऽविद्यमानोऽपि नाभिव्यज्यते सुखादिसाक्षिणो जीवस्य सुखादेश्चाध्यासाद्येयभावप्रतीतेः
तथा च सुखदुःखादिप्रतीतेरभिव्यक्तिविषयाभेदाभावादव्याप्तिरिति वाच्यं घटादिप्रमन्तृरूपे घटादिस्फुरणे घटः स्फुरतीत्याकारानुभवमादाय तद्विषयाभेदाभिमत्व
स्यैव सुखं स्फुरति दुःखं स्फुरतीत्याद्याकारकानुभवमादाय सुखदुःखादिप्रमन्देसुखाद्यर्थाभेदाभिव्यक्तिमत्त्वात् नच घटः स्फुरतीत्यनुभवे घटस्य स्फुरणाश्र
यत्वमेव भाति न तु स्फुरणाभेद इति वाच्यं घटः स्फुरतीति प्रयोगे देवदत्तो गच्छतीत्यत्र गमनकर्तृभिन्नो देवदत्त इति वाक्यार्थवत्स्फुरणाभिन्नो घट इति वाक्यार्थस्य
वक्तव्यत्वात् तथा च घटः स्फुरतीति प्रयोगमूलभूते घटः स्फुरतीत्यनुभवेऽपि स्फुरणाश्रयभूतचिदात्माभिन्नतया घटस्य भानावश्यंभावात् नच घटस्य स्फुरणाश्रयाभेदाभि
व्यक्तावपि स्फुरणाभेदाभिव्यक्तिरव्याप्तिर्नोपपादितैवेति वाच्यं घटस्य स्वरूपमित्यस्मदर्थे घटमेव च घटस्य स्वरूपतयाऽयथा विषयीकरोतीति तथा घटः स्फुरतीति प्रम
त्वमपि घटादिवृत्तिद्वारा घटाद्यधिष्ठानभूतमनावृतचिदात्मानमेव स्वप्रकाशचिदात्माभिन्नस्फुरणरूपेण विषयीकरोतीत्यभ्युपगमेन घटे स्फुरणाश्रयाभेद
भानस्यैव स्फुरणाभेदभानरूपत्वात् एतदुक्तं भवति घटस्य स्वरूपमिति शाब्दप्रयोगप्रवर्तकं घटतत्स्वरूपयोर्भेदो भासते न तु तन्मूलभूते घटस्य स्वरूपमिति प्रमन्दे भ्रमः।

तत्राज्ञानेनावृतस्यापि विषयचैतन्यस्यानावृतेनाहंकारावच्छिन्नसाक्षिचैतन्येनाभेदाभिव्यक्तेरभावादपरोक्षता प्रसक्तेः अत एव जीवस्य संसारदशायां वस्तुतः सत्यपि ब्रह्म
भेदेन तदापरोक्षत्वं अज्ञानावरणकृतभेदसत्त्वात् न चैवं ब्रह्मणोऽपि जीवापरोक्षत्वासंभवादसर्वज्ञत्वापत्तिः अज्ञानस्येश्वरं प्रत्यनावरकतया तत्प्रति जीवभेदानापा
दानात्तु तस्यैव ब्रह्मत्वप्रसंगात् घटतत्स्वरूपयोर्भेदाभावात् न च तस्य प्रमत्वमभ्युपगन्तुं शक्यते बाधकाभावादेवं स्फुरतीति व्यवहारप्रयोजकमेव स्वप्रकाशात्मनः स्फुरणतदा
श्रयभावेन भेदभाने न तु स्फुरतीति प्रमन्दे तन्त्रस्फुरणादित्वानुपलम्भादिति न च ब्रह्मगोचरशाब्दवृत्तेरपि विषयतत्स्वरूपयाविषयगताज्ञाननिवर्तनक्षमत्वदर्शनेन तद्वदन्या
दिगोचरशाब्दवृत्तेरपि विषयसंसर्गाविशेषे कथं तस्यास्तद्विषयचैतन्यगताज्ञाननिवर्तनक्षमत्वं नेति वाच्यं वृत्त्यादिगोचरशाब्दवृत्तेः सत्यपि विषयसंसर्गे तस्यावृत्ता
वज्ञाननिवर्तकत्वप्रयोजकाभावेनाज्ञाननिवर्तकत्वस्य प्रथमपरिच्छेदावसाने दर्शितत्वादिति भावः अर्थस्य सत्यव्यवहारानुकूलचैतन्याभेदाभिव्यक्तिमत्त्वमेवा
परोक्षत्वं न तु ज्ञानाभेदवत्त्वमात्रमित्यत्र लिंगमाह अत एवेति अभेदाभिव्यक्तेरेवापरोक्षत्वप्रयोजकत्वे लोकादेवेत्यर्थः संसारेति तत्त्वसाक्षात्कारात्पूर्वकाल इत्यर्थः
जीवस्य ब्रह्माभेदे सत्यपि तेन ब्रह्मणः सव्यवहारानुकूले जीवचैतन्याभिन्नत्वे सत्यपि तस्यार्थविवक्षितः तथा च संसारदशायां सुख्यवहारानुकूले जीवचैतन्याभि
न्नस्यापि ब्रह्मणो जीवं प्रत्यपरोक्षत्वाभावस्य परोक्षाभेदाभिव्यक्त्यभावादेवेति वक्तव्यतया अभेदाभिव्यक्तेरापरोक्ष्यप्रयोजकत्वं युक्तमिति भावः नचैवमिति अज्ञानकृत
भेदस्याभेदाभिव्यक्तिप्रतिबंधकत्वमित्यर्थः असंभवादिति जीवसाक्षात्कारोऽस्मि जीवो ममापरोक्ष इति जीवगोचरव्यवहारानुकूलज्ञाने ब्रह्मणो मयाऽनुस्मृतिरित्येवम्
चैतन्यमेव तथा च ब्रह्मकर्तृकव्यवहारविषयस्य जीवस्य ब्रह्मकर्तृकव्यवहारानुकूलताद्रूप्याद्ब्रह्मचैतन्याभिन्नत्वसत्त्वेऽप्यभिव्यक्त्यसंभवात् तन्त्राभावाज्जीवस्य ब्रह्म
प्रत्यपरोक्षत्वं न संभवति नच ब्रह्मणो जीवगोचरापरोक्षज्ञानासंभवेऽपि न सर्वज्ञत्वभंगः जीवगोचरापरोक्षज्ञानमात्रेणापि तत्संभवादिति वाच्यं ईश्वरस्यापरोक्षज्ञाना।

सि॰ ले॰
न॰ टी॰
९१

नेगीकारादितिभावः अज्ञानं हि जीवधर्मिकब्रह्मप्रतियोगिकभेदप्रयोजकं जीवस्य नाहं ब्रह्मेति ब्रह्मभेदानुभवसत्वात् न तु ब्रह्मधर्मिकजीवप्रतियोगिकभेदप्रयोजकं ब्र
ह्मणो नाहं जीव इत्यनुभवे मानाभावात् तथा च ब्रह्मप्रति जीवस्य ब्रह्माभेदाभिव्यक्तिप्रतिबन्धकस्याज्ञानकृतभेदस्याभावात् नोक्तदोष इति परिहरति अज्ञानस्येति अज्ञानाव
रकत्वेति ईश्वरस्याहमज्ञ इत्यनुभवे मानाभावादज्ञानमीश्वरं प्रति जीवावरकं न भवति न चेश्वरस्यापि लीलाविग्रहस्वीकारकाले नदीयनेववचनेन तस्याज्ञत्वानु
भवोस्तीति गम्यत इति वाच्यं तदीयस्य तदीयाज्ञत्वभ्रमकवचनस्यासम्यासिद्धेश्चानुपपरिक्लेदेवत्वमात्रत्वादिति भावः तमिति ईश्वरं प्रति जीवप्रतियोगिकभेदाप्रयो
जकत्वादित्यर्थः तेप्रति जीवानावरकस्यापि जीवभेदापादकत्वे किं तस्यादित्यत आह यं प्रतीति यं जीवं प्रति यदज्ञानं विषयचैतन्यावरकं तं प्रत्येव तस्याज्ञानस्य स्वाश्रय
भूतविषयचैतन्यप्रतियोगिकभेदापादकत्वाभ्युपगमादित्यर्थः उक्तव्यवस्थायां नियामकमाह अत एवेति यं प्रति यदज्ञानमित्यादिव्यवस्थाभ्युपगमादेव चैत्रस्य घटा
परोक्षानुभवानुपपत्तिरपि नेति संबंधः घटादौ किं चैत्रं मैत्रं प्रति घटचैतन्यावरकमज्ञानं यथा वर्तते तथा मैत्रं प्रत्यपि घटचैतन्यावरकमज्ञानं तत्रास्ति तथा च मैत्रीय
घटज्ञानेन चैत्रस्य घटाज्ञाने चैत्रं प्रति स्वाश्रयभूतविषयचैतन्यप्रतियोगिकभेदापादके निवृत्ते सति चैत्रीयघटज्ञानेनानिवृत्ते चैतन्यगते मैत्रं प्रति घटावरकाज्ञाने मैत्रं प्र
ति स्वाश्रयभूतघटचैतन्यप्रतियोगिकभेदापादकेन तन्मैत्राज्ञाने चैत्रं प्रति घटचैतन्यानावरकमपि चैत्रं प्रति स्वाश्रयभूतघटचैतन्यप्रतियोगिकभेदापादकं तथा सति

दकत्वात् यदज्ञानं यं प्रत्यावरकं तं प्रत्येव स्वाश्रयभेदापादकत्वात् अत एव चैत्रज्ञानेन तस्य घटाज्ञाने निवृत्तेति हेतं मैत्राज्ञानं मैत्रं प्रत्येव विषयचैतन्यस्य भेदापा
दकमिति न चैत्रस्य घटापरोक्षानुपपत्तिरपि नन्वेवं वृत्तिविषयचैतन्याभेदाभिव्यक्तिलक्षणस्यापरोक्षस्याविषयचैतन्यगताज्ञाननिवृत्तिप्रयोज्यत्वे तस्याज्ञाननिवृ
त्तिप्रयोजकत्वायोगात् ज्ञानमात्रमज्ञाननिवर्तकं भवेदिति चेन्न परोक्षानमुत्पद्यमानस्य कारणमहिम्ना विषयसंस्पृष्टमेवोत्पद्यते न देवाज्ञाननिवर्तकमिति विशेषणा

चैत्रीयघटज्ञानेन चैत्रीयाज्ञाने निवृत्ते सति तत्कृतभेदनिवृत्तावपि चैत्रस्य घटचैतन्यस्य च मैत्राज्ञानकृतभेदसत्वेनाभेदाभिव्यक्त्यभावाच्चैत्रस्य घटापरोक्षानुभवानुपपत्तिरे
व स्यादतो मैत्राज्ञाने मैत्रं प्रति जीवचैत्रं प्रति स्वाश्रयभेदापादकं न भवति चैत्रं प्रति स्वाश्रयचैतन्यानावरकत्वादिति वृत्त्यैव तथा चोक्तव्यवस्थासिद्धेरित्यर्थः ननु परोक्षज्ञान
मज्ञाननिवर्तकमिति रीत्या ज्ञानस्याज्ञाननिवर्तकत्वे अपरोक्षत्वं प्रयोजकमिति वक्तं न शक्यते ज्ञानगतापरोक्षत्वस्यैवाज्ञाननिवृत्त्यधीनत्वात् न च मास्तु ज्ञानापरोक्ष
स्याज्ञाननिवृत्तिप्रयोजकत्वमिति वाच्यं तथा सति ज्ञानमात्रस्याज्ञाननिवर्तकत्वापत्त्यापरोक्षज्ञानस्याप्यज्ञाननिवर्तकत्वप्रसंगादित्याशयेन शंकते नन्वेवमिति एवं घ
ह्याभेदं मे वाह वृत्तीति वृत्त्यवच्छिन्नचैतन्यस्य पेज्ञानेन घटादिरूपविषये वहत्सव च्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोरभेदाभिव्यक्तिघटितस्येत्यर्थः अज्ञाननिवृत्तिप्रयोज्यत्वे
ति प्रमातारं प्रति विषयचैतन्यावरणद्वारा विषयचैतन्यप्रतियोगिकभेदापादकस्याज्ञानस्य निवृत्तिं विनाद्यर्थस्य ज्ञानस्य वा अपरोक्षासंभवस्योक्तत्वादापरोक्षस्याज्ञान
निवृत्तिप्रयोज्यत्वमित्यर्थः ज्ञानस्याज्ञाननिवर्तकतायामापरोक्षस्य प्रयोजकत्वाभावेपि न हानिः प्रयोजकान्तरस्य प्रथममपरिच्छेदे नेदर्शितत्वादित्याशयेन परिहरति नेति ९१
तथात्वादिति सन्निकर्षरूपकारणमहिम्ना विषयसंस्पृष्टतयैवोत्पद्यमानत्वादित्यर्थः अत उभित्यादिहतीनामतथात्वे नातिप्रसंगाभावाच्चैत्यपि इष्टत्वं न न्वनुमेयवह्न्यादि

गोचरानुमितिवृत्तेरिव ब्रह्मगोचरप्रमावृत्तेरपि स्वविषयभूतेन ब्रह्मचैतन्येन संसर्गाभावान्मूलाज्ञाननिवर्तकत्वं न स्यात् तथा च तत्त्वज्ञानानन्तरमपि ब्रह्मापरोक्षं न स्यादित्य
त आह एवं चेति एवमेवेत्यर्थः ऐन्द्रियकवृत्तिवदेवेति यावत् ब्रह्मगोचरवृत्तेः स्वविषयसंसर्गनियमे कारणमाह सर्वोपादानेति जायमानस्य सर्वस्य ब्रह्मसंसर्गनियमे सा
ति ब्रह्मगोचरवृत्तेः स्वविषयसंसर्गनियमः किं वक्तव्यमित्याशयेन सर्वोपादानेत्युक्तं कार्यस्योपादानसंसर्गनियमात् तथा च ब्रह्मगोचरवृत्तेर्नानुमित्यादिगोचरानुमिति
वृत्तितुल्यतेति भावः अपरोक्षं चेति न तु ज्ञानापरोक्षस्याज्ञाननिवृत्तावप्रयोजकत्वमनेन वेदान्तजन्यज्ञानस्यापरोक्षत्वप्रसाधनमस्मिन् ग्रन्थे अपरोक्षवादेऽस्माभिरिति चेन्न अज्ञा
ननिवर्तकज्ञानमपरोक्षरूपमिति नियमस्य दशमस्त्वमसीत्यादिजन्यज्ञाने दृष्टत्वात् ब्रह्माज्ञाननिवर्तके ब्रह्मगोचरप्रमावृत्तिज्ञानेऽव्यभिचारत्वमस्त्येव तथा तत्साधनं स्यादित्यत्वावपये न
मूलाज्ञाननिवर्तके ब्रह्मगोचरप्रमावृत्तिज्ञाने अपरोक्षत्वस्य नैयत्यं स्यात् इष्टमस्यादि स्फुरत्या ब्रह्मसाक्षात्कारोमीति विरुद्धत्वमेवेन च सिद्धस्य तत्र तत्साधनेन विना प्रयुपपत्तेश्चेति
भावः घटादिगोचरवृत्तिकालेऽप्यपरोक्षं तत्तु परमेतु न रक्तानानन्तरकृतभेदप्रास्यात्वव्यवहाराऽनुकूलं चेतनस्याभेदाभिव्यक्त्यभावान्न पुरोक्षं ब्रह्मणेति मूला
ज्ञाननिवृत्तौ पुनरावरणकृतभेदाप्रसक्त्या ब्रह्मज्ञानानन्तरं सदैवापरोक्षमिति विशेषं सूचयति तदामिति नन्वेवमध्ययनविहीनेति नियमेन यज्ञानविषयस्य स्वरूपतयो
देति तज्ज्ञानमज्ञाननिवर्तयत्येवेति नियमो यत्रामस्तमेवं ग्राह्यार्थः आपातज्ञानस्यापि स्वविषयब्रह्मसंसर्गनियमे वोपपन्नत्वादिति भावः तज्ज्ञानिस्वरूपत्वमपि निवर्तकज्ञा

ऐन्द्रियज्ञानानां तथात्वात् एवं च श्रवणादावुत्पद्यमानमपि ब्रह्मज्ञाने सर्वोपादानभूतस्वविषयब्रह्मचैतन्यसंसृष्टमेवोत्पद्यत इति तस्याज्ञाननिवर्तकत्वमज्ञाननिवृ
त्तौ तत्फलभूतभेदप्रविलयाद्यपरोक्षं चेत्युपपद्यते तत्रां नन्वेवमध्ययनगृहीतवेदान्तजन्येनापि तज्ज्ञानेन मूलाज्ञाननिवृत्त्या अपरोक्षं किं न स्यात् न च तत्सत्ता
निश्चयरूपत्वाभावान्नाज्ञाननिवर्तकमिति वाच्यं तथापि कृतश्रवणस्य निर्विचिकित्सक्षणवृत्तिज्ञानेन तन्निवृत्त्या मननादिवैयर्थ्यापत्तेरिति चेन्न समनयि श्रवणादि
र्विचिकित्सज्ञाने चित्तविक्षेपदोषेण प्रतिबन्धात् अज्ञाननिवृत्त्यात्तन्निराकरणेन मननिदिध्यासनेनियमविधेरर्थात् श्रवणस्याप्यर्थवत्त्वात् मननीयमननाद्यनुष्ठान

न विशेषणमतो नोक्तातिप्रसंग इति शंकते न च तदिति विचारप्राचीनमध्ययनगृहीतवेदान्तजन्यज्ञानं न तत्कृतार्थः विशेषणमभ्युपगम्याप्यतिप्रसंगमाह तथापीति
श्रवणत्वस्यापि निवर्तकज्ञानविशेषणमतो नोक्तातिप्रसंगोऽपीति समाधत्ते न समपीति ननु मननादेर्विक्षेपशान्तिः संभावनाविपरीतभावनानिवृत्त्यर्थत्वेऽपि स्यादवि
द्यायिकारिणोऽज्ञानतीयमननादिसफलत्वश्रवणानुष्ठानेन समस्तो विक्षेपदोषो निरस्तस्तस्योपदेशमात्रेणापि सत्तानिश्चयरूपप्रमृतिवन्धं च ब्रह्मज्ञानं जायते तथा च
तस्येहजन्मनि श्रवणमननाद्यनुष्ठानं विनापि मूलाज्ञाननिवृत्तिर्ब्रह्मापरोक्षं च स्यादित्यत आह भवान्तरीयेति तथा चेष्टापत्तिरिति भावः अथैवमपीति विक्षेपदोष
निवृत्त्यर्थमननाद्यपेक्षायामपीत्यर्थः हेतुनिदिध्यासनस्यापि कारिणो घटादिज्ञानेनापि मूलाज्ञाननिवृत्तिः किं न स्यात् घटादिवृत्तेरपि मूलाज्ञानाविषयचैतन्य
विषयकत्वाविशेषादित्याक्षेपाभिप्रायः मूलाज्ञानघटज्ञानयोः समानविषयत्वमासिद्धमिति सिद्धान्ती निःशङ्कामनस्तयतिराकरोति न च तस्येति घटादिज्ञानस्येत्यर्थः
तत इति घटादिज्ञानादित्यर्थः घटः स्फुरितस्याध्याकारायावृत्तेर्ब्रह्मचैतन्यविषयकत्वाभ्युपगमो सिद्ध इति सिद्धान्तो शंकते न च तत्रेति तत्रेत्यादि तच्छब्दवृत्तेर्घटादिपरत्वे स्

ति ब्रह्मणइत्यर्थः घटाद्यवच्छिन्नचैतन्यस्य घटादिवृत्तिविषयत्वं पूर्ववादीसाधयति तदभावइत्यादिना चैतन्यस्य घटादिवृत्तिविषयत्वाभावे सतीत्यर्थः ननु यदि घटमात्रविष
यकज्ञानेन घटावच्छिन्नचैतन्यविषयकाज्ञाननिवृत्तिर्न संभवति तयोः समानविषयकत्वाभावात् तर्हि घटज्ञानेनाज्ञानस्य समानविषयकत्वसंपत्तये ब्रह्मज्ञानमपि घटादिज्ञ
ड्ब्रह्मात्रविषयकमेवास्त्वित्याह पूर्ववादी जडइति जडस्य जडत्वादेव प्रमाणनवताऽदृश्यायामप्रकाशोपपत्त्या जडस्य प्रकाशार्थमावरणकल्पनायोगादित्यर्थः ह्ययं
फलं तथा च वेदान्तजन्यज्ञानवद्घटादिज्ञानस्यापि ब्रह्मचैतन्यविषयकत्वावश्यंभावेन मूलाज्ञानसमानविषयकत्वान्नतापि तन्निवृत्तिप्रसंगइतिस्थिते तत्र सिद्धान्तीशंकते
न चेति ह्येवं हि वेदान्तजन्यज्ञानमपि ब्रह्माज्ञाननिवर्तकं न स्यादिति पूर्ववादीदूषयति वेदान्तजन्येति अखंडत्वमनवच्छिन्नत्वं वेदान्तजन्यज्ञानस्याखंडत्वादिधर्मविशिष्टावगा
हित्वोपगमेबाधकमाह वेदान्तानामिति मूलाज्ञाननिवर्तकज्ञानस्य वेदान्तजन्यत्वमपि विशेषणं विवदितमतोघटादिज्ञाने नातिप्रसंगइत्याशयवतामाशंकामनूद्यदू
षयति एवं वादी न च वेदान्तेत्यादिना वेदान्तजन्यज्ञाने स्वरूपसम्बन्धमूलाज्ञाननिवर्तकत्वप्रयोजकरूपस्य मूलाज्ञानसमानविषयत्वस्य सत्त्वात् निष्प्रपंचरूपत्वप्रतिवच्छत्वलक्षणस्या
तिरिक्तावित्ताविदेयस्यापदेशमात्रात्प्रभापरोक्तस्येष्प्रमाणत्वात्संभवात्। अथैवमपि कृतनिदिध्यासनस्य वेदान्तजन्यब्रह्मज्ञानेनैव घटादिज्ञानेनापि ब्रह्माज्ञाननिवृत्तिः
किं न स्यात् न च तस्य ब्रह्माविषयत्वात् ततो ब्रह्माज्ञाननिवृत्तिरितिवाच्यं घटः सन्नित्यादिबुद्धिवृत्तेः सद्रूपब्रह्मविषयत्वोपगमात् न च तत्र घटाद्याकारवृत्त्यात्तज्ज्ञान
निवृत्तौ स्वतः स्फुरणादेव न तदवच्छिन्नचैतन्यं तदितिप्रकाशेतेन तस्य घटाद्याकारवृत्तिविषयत्वमितिवाच्यं तदभावे घटविषयज्ञानेन तदवच्छिन्नचैतन्यविषयमज्ञानमसि
ति भिन्नविषये नज्ञानेन तन्निवृत्तेरयोगात् जडेऽप्रावरणकृत्याभावेन तद्वस्या ज्ञानाविषयत्वात् न च घटादिवृत्तेस्तदवच्छिन्नचैतन्यविषयत्वेऽप्यखंडानंदाकारत्वाभावा
त्ततो मूलाज्ञाननिवृत्तिरितिवाच्यं वेदान्तजन्यसाक्षात्कारेऽपि तदभावात् न हि तत्राप्यखंडत्वमानन्दत्वं वा कश्चिद्दस्ति प्रकारः वेदान्तानां संसर्गागोचरप्रमाजन
कत्वलक्षणखंडार्थत्वहानापत्तेः न च वेदान्तजन्यज्ञानादेव तन्निवृत्तिनियमइतिवाच्यं स्वरूपाज्ञाननिवर्तकत्वप्रयोजकरूपस्य ज्ञानान्तरेऽपि तत्त्वावेतत्यान्नियतत्व
शंकात्वात् न च घटाद्याकारवृत्तिविषयस्यावच्छिन्नचैतन्यस्य कल्पितत्वेन यन्मूलाज्ञानाविषयभूतसत्स्वमनवच्छिन्नचैतन्यं तद्विषयत्वाभावात् घटादिवृत्तेर्ना
निवर्त्यत्वाभिमताज्ञानसमानविषयत्वलक्षणस्वरूपसम्बन्धप्रयोजकमेव नास्तीतिवाच्यं तत्रावच्छेदकांशस्य कल्पितत्वेऽप्यवच्छेद्यांशस्याकल्पितमूलाज्ञानविषयचैत
निदिध्यासनपरिपाककाले च दृग्रादिजन्यघटादिज्ञानेऽपि सत्त्वे सति वेदान्तजन्यज्ञानादेव मूलाज्ञाननिवृत्तिर्न तु घटादिज्ञानादितिनियंतुमयुक्तत्वात् वेदान्तजन्यत्वस्यापि
तत्ताविस्वरूपत्वादेरिव प्रयोजकविशेषणत्वे गौरवान्मानाभावाच्चेतिभावः तर्हि वेदान्तजन्यज्ञाने स्वरूपसम्बन्धप्रयोजकं तदेव घटादिज्ञानेनास्तीतिशंकते न च घटाद्याकारेति
अवच्छिन्नत्वकल्पितत्वेऽहेतुरनवच्छिन्नत्वसत्यत्वहेतुः घटादिवृत्तीनां कल्पितचैतन्याविषयकत्वेन सत्यब्रह्मविषयकत्वाभावादित्यर्थः घटाद्यवच्छिन्नचैतन्यकल्पितमित्यत्र च
तस्यांशस्याकल्पितत्वकल्पितत्वे वा विवादितुनाऽयइत्याह तत्रेति अवच्छिन्नचैतन्यमित्यर्थः अवच्छेद्यचैतन्यांशस्य घटादिवृत्तिविषयस्याकल्पितत्वेन मूलाज्ञानविषय
ब्रह्मचैतन्यतद्रूपत्वादित्यर्थः तथा च घटाद्यवच्छिन्नचैतन्यगोचरवृत्तेरपि निवर्त्यत्वाभिमतमूलाज्ञानसमानविषयकत्वरूपं वेदान्तजन्यज्ञाने स्वरूपसम्बन्धप्रयोजकमस्तीतिभावः ६२

द्वितीयकल्पेपि घटादिवृत्तेर्मूलाज्ञाननिवर्तकत्वप्रयोजकमस्तीति दर्शयन्नन्तं कल्पं दूषयति नन्वाकल्पितत्वस्येति अवच्छेद्यचैतन्यांशस्येत्यर्थः वक्तव्यतयेति अवच्छेद्यचैतन्यांशस्य कल्पित
त्वपक्षे तस्य जडत्वापत्त्या जडस्य तस्याज्ञानाविषयत्वासंभवादवस्थाज्ञानस्यापि मूलाज्ञानविषयब्रह्मचैतन्यमेव विषय इति वक्तव्यं निर्विषयाज्ञानासंभवात् तथा च ब्रह्मचैतन्यवि
षयकावस्थाज्ञाननिवर्तकत्वाय घटादिवृत्तीनामपि मूलाज्ञानविषयब्रह्मचैतन्यविषयत्वमपरिहार्यं घटादिवृत्तीनां ब्रह्मविषयकत्वाभावे अवस्थाज्ञानेन सह समानविष
यकत्वाभावात्तस्यास्तदवस्थाज्ञाननिवर्तकत्वं न स्यादित्यर्थः तन्निवर्तकेति अवस्थाज्ञाननिवर्तकेत्यर्थः तद्विषयत्वेति मूलाज्ञानविषयब्रह्मचैतन्यविषयकत्वेत्यर्थः तस्य तेपीति अवच्छेद्य
चैतन्यस्य कल्पितत्वमिति द्वितीयकल्पेपीत्यर्थः नन्विति घटादिज्ञानादित्यर्थः अपरिहारादिति घटादिज्ञानस्यापि वेदान्तजन्यस्येव मूलाज्ञानसमानविषयकत्वादिति भावः अत्राह
इति घटादिज्ञानमपि मूलाज्ञाननिवर्तकं स्यात् चैतन्यविषयकत्वाद्वेदान्तजन्यज्ञानवदिति चोद्ये हेत्वसिद्धिमाहुरित्यर्थः अस्यात्मनो रूपं संदृशे चक्षुषो योग्यत्वेन न तिष्ठति दृ
पादिहीनत्वादतो न कश्चिदेनमात्मानं चक्षुषा पश्यति पराञ्चि पराग्विषयाणि खानि इन्द्रियाणि व्यतृणत् हिंसितवानीश्वरो जडार्थविषयकत्वेनैव करणानि सृष्टवानित्यर्थः

अतद्रूपत्वात्तस्य कल्पितत्वेपि घटवज्जडतया अवस्थाज्ञानं ब्रह्मापि विषयत्वायोगेनावस्थाज्ञानस्य मूलाज्ञानविषयाकल्पितचैतन्यविषयत्वस्य वक्तव्यतया तन्निवर्तकघटादि
ज्ञानस्यापि तद्विषयत्वावश्यंभावेन तस्य वेदान्तजन्यज्ञानवन्मूलाज्ञाननिवृत्तिप्रसङ्गस्यापरिहारात् अत्राहुराचार्याः न चैतन्यमेव घटादिजन्यवृत्तिविषयो न संदृशे तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चिदेनं पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् इत्यादिश्रुत्या तस्य परमात्मन एवादिवृत्त्यगोचरत्वोपदेशात्तदुपहितमपि
तिविशेषणत्वं न च सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते इत्यादिवार्तिकविरोधः तस्य घटाद्याकारवृत्त्युदयसमये स्वावरणाभिभवात्मसमये तद्रूपब्रह्मचैतन्यः सन्निहितत्वात्॥
अवकार्यं भवति सोपचारिकघटादिवृत्तिवेद्यत्वपरत्वात् स्वावरणाभिभावकत्वे च घटादिज्ञानस्य घटादिविषयत्वादेवोपपत्तेर्घटादेरज्ञानविषयत्वात् घटेतज्ञाना
भिज्ञत्वज्ञानेन घटाज्ञानेन नष्टमिन्नवस्थाज्ञानानां घटादिविषयत्वासंभवात् न च तत्रावरणकृत्याभावादज्ञानाङ्गीकारो निष्फलः तज्जासकस्य तदवच्छिन्नचैतन्यस्यावर॥
त् तस्मात्त्वात्मतत्त्वात्पराङ् पराञ्चं सर्वलोक इन्द्रियैरुपलभते नान्तरात्मानं चैतन्यस्वभावमित्यर्थः न च तत्प्रागसत्त्वात् इत्यादिश्रुतिशब्दितपदार्थः तस्येति चैतन्यस्येत्यर्थः न तु घटादीन्द्रिया
योग्यत्वोपदेशादुपनिषदेकगम्यत्वप्रवणं च चैतन्यं घटादिवृत्तिविषयो न भवतीत्युपपद्यते तर्हि वार्तिकविरोध इत्याशंक्य न च सर्वेति यः सर्वत्र प्रतीयते तत्सर्वसाक्षिरूपमेव
प्रतीयते तथा चानुभवबलात्तद्रूपं ब्रह्म सर्वप्रत्ययवेद्यतया व्यवस्थितमित्यर्थः चैतन्यस्य सर्वप्रत्ययवेद्यत्वं गौणमेव वार्तिककाराणामभिमतं न घटादिवन्मुख्यमुदाहृतमर्क
तिविरोधात् तथा च न वार्तिकविरोध इति समाधत्ते तस्येति वार्तिकवचनस्येत्यर्थः यथा घटस्य घटगोचरवृत्त्यधीनव्यवहारविषयत्वं तथा ब्रह्मणोपि विद्यानरूपप्रत्ययगोचरत्वेपि च
घटादिवृत्त्यधीनव्यवहारविषयत्वमस्तीत्यनेनांशेन तद्रूपं ब्रह्म घटादिप्रत्ययवेद्यमिति वार्तिककारैरुच्यत इत्यर्थः न चैवं घटादिवृत्तेर्विषये स्वावरणाभिभवाभावाङ्गीका
तिरज्ञनं संभवतीति वाच्यं वार्तिके प्रत्ययपदस्यावरणाभिभावकवृत्तिपरत्वोपपत्तेरिति भावः न तु घटादिवृत्तेर्घटाद्यवच्छिन्नचैतन्याविषयकत्वाभावे चैतन्यावरकाज्ञाना
भिभावकत्वं न संभवति ज्ञानाज्ञानयोः समानविषयकत्वाभावादिति नन्वाह आवरणाभिभावकत्वं चेति जडस्याप्यज्ञानविषयत्वमनुभवबलात्स्वीकार्यमित्याह घटा

सि॰ ले॰
स॰ टी॰
६२

देरपीति अवस्थापदं मूलाज्ञानव्यवच्छेदाय तस्य ब्रह्ममात्रविषयकत्वानुभवान्न जडविषयत्वमिति भावः नचतत्रेति जडवस्तुनीत्यर्थः नयुक्तइति अज्ञा
नाश्रयत्वं जडे नयुक्तं तेनावरणाभावात् तदभावश्च फलाभावादित्यर्थः घटं नजानामीत्यनुभवस्तु घटतदधिष्ठानचैतन्ययोस्तादात्म्याच्चैतन्यविषयत्वेनाप्युपपद्यत इति भा
वः ननु जडस्यावरणाभावे कथमप्रकाशः संभवति नचतत्प्रकाशकचैतन्यसंसर्गाभावादेवाप्रकाशो नत्वावरणबलादिति वाच्यं जडस्य स्वप्रकाशचैतन्येऽध्यस्तत्वेन तया
तस्य सदावभासकचैतन्यसंसर्गसत्वाद् अतो जडस्याप्रकाशएव जडावरणफलमित्यत आह तद्भासकस्येति अत्रतच्छब्दत्रयं जडपरं उक्तमर्थमपेति तज्ज्ञावरणकृताभावाद् ज्ञा
नांगीकारो न फलइति वाक्येन जडे साक्षादज्ञानाश्रयत्वस्य साक्षादज्ञानविषयत्वस्य च प्रतिक्षेपेऽप्यर्थः ननु तत्प्रकाशस्य जडे साक्षादज्ञानविषयत्वप्रतिक्षेपपरत्वं किमिति क
ल्प्यते साक्षात्परंपरासाधारणाज्ञानविषयत्वमात्रप्रतिक्षेपपरत्वसंभवादित्याशंक्य तथासति तद्भासकस्य तदवच्छिन्नचैतन्यस्यावरणादेव तदप्रकाशोपपत्तेरित्युत्तरवाक्ये
न जडेऽपि परंपरयाज्ञानविषयताभ्युपगमविरोधप्रसंगादित्याशयेनाह जडावच्छिन्नेत्यादिना अप्रकाशस्येत्यदप्रकाशोपपत्तेरित्यनेनांशेन जडे भ्रान्तिप्रकाशने अपि चैतन्येवमात्म
कल्पकत्वाद्योग्यत्वलक्षणमावरणमभ्युपगते चैतन्यस्यावरणादेवेत्यनेनांशेन जडावरणस्य कारणत्वेन चैतन्यावरणमभ्युपगतमिति प्रतिपादयति अज्ञानेनेति तत इति
चैतन्यावरणादित्यर्थः चैतन्यस्य स्वप्रकाशतया तस्य यथा सदाभासकप्रकाशात्वमावरणकल्पकमस्ति तथा जडस्यापि सदा चैतन्यप्रकाशसंसृष्टतया सदाभासकप्रकाशत्वमा
णादेव तदप्रकाशोपपत्तेरिति वाक्ये उक्तमर्थमपि जडस्य साक्षादज्ञानविषयत्वप्रतिक्षेपेऽपि जडावच्छिन्नचैतन्यप्रकाशस्याज्ञानेनावरणं तज्ज्ञानिसं चैतन्यप्रकाशसंसर्गो
ऽपि जडस्य नास्ति न प्रकाशत इत्यादिव्यवहारयोग्यत्वमिति परंपरया अज्ञानविषयताभ्युपगमात् साक्षात्परंपरया वा यदज्ञानावरणीयं तद्विषयस्यैव ज्ञानस्य तदज्ञान
निवर्तकत्वप्रयोजकशरीरे निवेशात् नचैवं घटादीनां शुक्तिरूप्यमूलाज्ञानविषयत्वमपि स्यादिति घटादिसाक्षात्कारादेव मूलाज्ञाननिवृत्त्यापातः फलबलात्
तदज्ञानकार्यातिरिक्ततद्विषयस्यैव तन्निवर्तकत्वेनोक्तत्वात् अथवा मूलाज्ञानस्यैव जडे न विषयः अवस्थाज्ञानानां तु तदवच्छिन्नचैतन्याश्रितानां तन्न जडमेव विषयः अन्य
वरणकल्पकं तत्त्वमिति सूचयति निम्न चैतन्यप्रकाशसंसर्गेऽपीति इतिपाठः प्रकारवचनः ननु शुक्तिरूप्यावच्छिन्नचैतन्यनिष्ठमेवस्याज्ञानं जडं तदवच्छिन्नचैतन्ययोरप्यावर
कमिति लभ्यते तथा च घटादिज्ञानस्य जडमात्रविषयकत्वस्वीकारेण तस्याज्ञानेन सह सर्वांशे समानविषयकत्वाभावाद् ज्ञाननिवर्तकत्वं न स्यादित्यत आह साक्षादिति ज्ञा
नस्याज्ञानसमानविषयकत्वमात्रं विरोधमात्रं विरोधप्रयोजकशरीरे प्रविष्टं न तु सर्वांशेऽपि समानविषयकत्वं गौरवादिति भावः नचैवमिति ज्ञानाज्ञानयोः सर्वांशे समा
नविषयकत्वानादरे इत्यर्थः उक्तरीत्येति अवच्छिन्नचैतन्यस्य स्वरूपेण समनतया प्रसन्नरूपस्यावस्थाज्ञानविषयत्वं च मूलाज्ञानविषयत्वमप्यस्ति तथा चावस्थाज्ञानतचैतन्याव
रणबलाज्जडस्यापि परंपरयावस्थाज्ञानविषयत्वमिव शुक्तिरूप्यमूलाज्ञानकृतचैतन्यावरणबलान्मूलाज्ञानविषयत्वमपि जडस्य ब्रह्मदेरस्यादित्यर्थः ततः किंतत्राह घटा
दीति यथावस्थाज्ञानं प्रति परंपरयाविषयभूतजडसाक्षात्काराद्देवावच्छिन्नचैतन्यनिष्ठावस्थाज्ञानस्य निवृत्तिस्तथा मूलाज्ञानं प्रत्यपि परंपरयाविषयभूतजडसाक्षात्कारादेव ६२
ब्रह्मचैतन्यनिष्ठमूलाज्ञानस्यापि निवृत्त्यापात इत्यर्थः मूलाज्ञाननिवृत्त्यापातेन चेमवतेनुमाह फलबलादित्यादिना घटादिसाक्षात्कारेऽस्मिन्नपि मूलाज्ञाननिवृत्तिरूपफलबला

दित्यर्थः मूलाज्ञानतत्कार्याविति किंच यो मूलाज्ञानविषयाश्रिमात्रं न हि विषयकत्वस्यैव ज्ञाने मूलाज्ञाननिवर्तकत्वेनेत्यत्रत्वकल्पनात् घटादिसादाकारे च तदभावात् मूलाज्ञाननि
वर्तकत्वापात इत्यर्थः जडमात्रगोचरस्य त्वाकथमवच्छिन्नचैतन्यावरकाज्ञाननिवृत्तिः भिन्नविषयत्वादिति मेकायामवस्याज्ञानमवच्छिन्नचैतन्यावरणद्वारा जडमप्यावृणोतीत्य
तो जडमात्रगोचरयापि वृत्त्या वस्याज्ञाननिवृत्तिः संभवतीति प्रतिपादितमिदानीं तस्यामेवाकायां प्रकारान्तरेण समाधानं दर्शयति प्रथ्यवेति प्रथ्यवा चैवस्याज्ञानानां तज्जड
मेव विषय इति संबंधः तदेतज्जानामीमांसादिदृष्टीक्ता तु भवादेवेतिभावः तथैवस्याज्ञानानामाश्रयोपि तज्जडमेवस्यात् तथाचापसिद्धान्त इत्यत आह अवच्छिन्नचैतन्याश्रितानां
मिति ननु जडस्याज्ञानविषयत्वोपगमे जडमज्ञातस्य विषयो न भवतीति सिद्धान्तस्य का गतिरत आह मूलाज्ञानस्यैवेति जडस्याज्ञानाविषयत्वसिद्धान्तो मूलाज्ञानमात्रविषय
इति भावः प्रथमपक्षे इति जडस्यानावृतत्व इत्यर्थः वेदनत्वं जडगोचरचाक्षुषवृत्त्या तदवच्छिन्नचैतन्यमभिव्यज्यते न वा आद्ये दोषमाह तत्तातेति इति वेदननिष्ठगन्धस्यापि वेदन
त्वापरोक्षत्वापत्तिरभिव्यक्तचैतन्यतत्संसर्गित्वस्योभयत्राविशेषात् जडस्यानावृतत्वपक्षेतनायं दोषः चाक्षुषवृत्त्या गन्धावरणानिवृत्तेरित्यर्थः द्वितीये दोषमाह तदनभिव्यक्तावपीति
घ्राणजवृत्त्या वेदनत्वेन चैतन्याभिव्यक्तौ तु तत्संसर्गिणो गन्धस्यापरोक्षत्वापत्तेः तदनभिव्यक्तौ वेदनतद्रूपयोरपि अप्रकाशापत्तेः न च चाक्षुषवृत्त्या वेदनतद्रूपावच्छिन्नचैतन
योरभिव्यक्त्यानयोः प्रकाशः गन्धाकारवृत्त्यभावेन गन्धावच्छिन्नचैतन्यस्यानभिव्यक्त्यान तस्याप्रकाश इति वाच्यम् चैतन्यस्य हि गुणिकृतभेदस्याभावेनैकद्रव्यगुणानामा
श्रये सर्वत्र व्याप्य वर्तमानानां पृथक् पृथक् गगनावच्छेदकस्यैव चैतन्यावच्छेदकत्वस्याप्यसंभवात् तेषामेकस्य प्रद्रव्यावच्छिन्नचैतन्ये न वृक्षकीदमंशावच्छिन्नचैतन्ये न शु
क्ति रजतवत् प्रकाशतया तस्याभिव्यक्तौ गन्धस्यापि प्रकाशस्यानभिव्यक्तौ रूपादेरप्यप्रकाशस्य वापत्तेः न च गन्धाकारवृत्त्युपरक्तमेव चैतन्यं गन्धः प्रकाशत इति निय
मः प्रकाशसंसर्गस्यैव प्रकाशमानता व्यवहारार्थत्वेन तस्याभावेपि तदाकारवृत्त्यनावृतप्रकाशसंसर्गिणः प्रकाशमानत्वकल्पनस्य विरुद्धत्वात् अभिव्यक्तस्य गन्धयोपादाने चै
अप्रकाशापत्तेरिति वेदनगोचरचाक्षुषवृत्तिकाले वेदनतद्रूपप्रकाशाभावो निष्ट इति भावः वेदनत्वं वृत्त्यवच्छिन्नघटादिद्रव्याणामिवैकद्रव्यवृत्तिगुणानामपि चैतन्यावच्छेदकत्वसंभवात्
सुभिन्नमत्राशंकते न चेति एकद्रव्ये रूपरसगन्धादिभेदेन चैतन्यभेदो नास्ति मानाभावादित्याह चेतनस्येति चैतन्यस्य निरवयवतया द्रव्यभेदेनैकावच्छेदकेनैकावच्छेदेन चैतन्यभेदोपहति
नेसंभवतीत्यर्थः यद्येकद्रव्ये प्रदेशाभेदेन गन्धादयः स्युस्तदा तद्वद्गन्धादिभेदेन चैतन्यभेदशंकापि स्यान्न त्वेतदस्तीति गन्धादीनां व्याप्यवृत्तित्वानुभवादित्याशयेनाह व्याप्येति ग
गनेति यथा घटादिद्रव्याणां गगनभेदकत्वमस्ति तथा गन्धादीनां गगनभेदकत्वं नास्ति गन्धादिभेदेन गगनभेदानुभवादिति भावः गन्धादिभेदेन चैतन्यभेदाभावे सिद्धे चन्द
नचैतन्याभिव्यक्त्यनभिव्यक्तिहेतोः सर्वोक्तदोषो दुष्परिहर इत्याह तेषामिति शुक्तीति यथा शुक्तीदमंशावच्छिन्नचैतन्ये रजतस्याध्यासात् रजतशुक्तीदमंशचैतन्येनेवाव
भासस्तु नान्ति इदमंशावच्छिन्नचैतन्यापेक्षया पृथग्भूतेन तस्यावच्छिन्नचैतन्येनावभासस्तथा द्रव्यावच्छिन्नचैतन्ये कल्पितानां रूपादयोपि द्रव्यावच्छिन्नचैतन्येनैव प्रकाशन्त इत्यर्थः ननु
इतनगन्धस्याभिव्यक्तचैतन्यप्रकाशसंसृष्टस्यापि मेयगोचरवृत्त्यभावाद्देवापरोक्षताभाव इति शंकामनूद्य निराकरोति ननु गन्धाकारेति नियमेन च समवेतमित्यत आह प्रकाशसंसर्ग
स्यैवेति ननु हस्तुपहितानावृतप्रकाशसंसर्गस्य प्रकाशमानताव्यवहारार्थत्वे तद्वदिति चक्षुर्गोचरस्य तत्पतितसादिप्रकाशसंसर्गिणः स्वतादात्म्यप्रकाशमानप्राच्यहार्थाभावप्रसंग इत्यर्थः
गन्धस्याभिव्यक्तचैतन्यसंसर्ग एव नास्तीत्याशंक्याह अभिव्यक्तस्येति चकारस्यासंभवादित्यनेन सम्बन्धः उपादानपदमधिष्ठानपरं असंभवादिति तथा च जडस्यानावृत

सि॰ ले॰
न॰ टी॰
६४

त्वपदेवंचंदनचैतन्याभिव्यक्तिद्वारायोगंधस्याप्यपरोक्षायतिरपरिहार्येतिभावः जडस्यावृतत्वपदेन नोक्तप्रसक्तिविरन्यात् तस्मादिति जडेप्यावरणस्यसिद्धत्वादित्यर्थः ननुजडा
स्यावृतत्वपदेपिचंदनगोचरचाक्षुषवृत्त्यैवगंधावरणस्यापिनिवृत्तिः स्यात् गुणगुणिनोस्तादात्म्यात् तथा चचंदनापरोक्षत्वदशायांगंधस्यापरोक्षत्वदोषोवापिनतुल्यइतिपा
कोदृष्टांतेनपरिहरति यथेति नान्यप्रमावरकाज्ञानस्यापिनिवृत्तिरितिनेत्रकार्थः तस्यैवेति चेत्रस्यैवघटप्रकाशोनान्यस्यमैत्रादेरित्यर्थः तथेति गुणगुणिनोस्तादात्म्येपि
भेदस्यापिसत्वात्त्रचंदनगोचरवृत्त्यागंधादेरपरोक्षप्रसक्तिरित्यर्थः ननुचंदनसंविदभिन्नस्यगंधस्यापिकथं नापरोक्षत्वमित्याशंक्यानावृतत्वस्यापावेवप्रसौविद्भेदस्यापरोक्ष
प्रयोजकत्वदर्शनान्नैवमित्याह प्रमावृतार्थस्यैवेति नत्वेकत्रचंदनावच्छिन्नचैतन्ये प्रवस्याज्ञानस्य चैत्रमतिचंदनावरकस्यैकत्वात् तस्य च चंदनगोचरवृत्त्यातन्निवृत्तौवृद्ध
वृत्तिकालेगंधस्यावरणमयुक्तमित्याशंक्यानिराकरोति इतिप्रमातृभेदेनैवेति यथाप्रमातृविषयेचैत्रमैत्रादिभेदेनाज्ञानमनेकमस्ति तथाप्येकत्रापिचंदनावच्छिन्नचैतन्ये
गंधादिविषयभेदेनाप्यज्ञानमनेकमस्तीतिवक्तव्यं चेदनापरोक्षदशायांगंधापरोक्षत्वादर्शनादेवेत्यर्थः हेतुः प्रकृतपरामर्शिनेतिपदे नसमर्थ्यते तथाचचंदनापरोक्षकाले
गंधादेरावरणसम्भवान्नाक्तदोष इतिभावः जडविषयकत्वमितीति जडविषयकत्वादित्यर्थः नकदाचिदनुपपत्तिरिति घटादिवृत्तीनांचैतन्यविषयकत्वाभावेनाज्ञाननिवृत्त्ययोगः

तस्यगंधयास्तस्मर्गात्यसंभवात् तस्माद्यथाचैत्रस्यघटवृत्तौतत्प्रमावरकस्यैवाज्ञानस्यनिवृत्तिरितितस्यैवविषयप्रकाशोनान्यस्यतथात्तत्तद्विषयाकारवृत्त्यातत्तदावरकाज्ञा
नस्यैवनिवृत्तेर्नविषयांतरस्यापरोक्षमनावृतार्थस्यैवसंविदभेदापरोक्षमित्युपगमादितिप्रमातृभेदेनेवविषयभेदेनाप्येकत्रचैतन्येवस्याज्ञानभेदस्यचैत्यचैतन्यात्स्व
स्याज्ञानानांतत्तज्जडविषयकत्वमितिघटादिवृत्तीनामचस्याज्ञाननिवर्तकत्वेनकदाप्यनुपपत्तिः नवामूलाज्ञाननिवर्तकत्वानुपपत्तिः नचैवमपिजीवविषयायाअ
हमाकारवृत्तेर्मूलाज्ञाननिवर्तकत्वापत्तिः तस्याः स्वयंप्रकाशमानचित्तवलिताचिदंशमात्रविषयत्वात् सोहमितिप्रत्यभिज्ञायाअपिस्वयंप्रकाशचेतन्येतः कारणेवेपा
ह्यनसहस्रवीपरकालवैशिष्ट्यमात्रविषयत्वेनचैतन्याविषयत्वाभावादिति केचित्तुघटादिवृत्तीनांतदवच्छिन्नचैतन्याविषयत्वमभ्युपगम्यसर्वमानप्रत्तोचसर्वमानक
समानविषयकत्वरूपंविरोधप्रयोजकंनसंभवति तासांजडमात्रगोचरत्वाद्ज्ञानस्यचचैतन्यमात्रविषयकत्वादितिपूर्वोक्तानुपपत्तिर्नास्तिप्रवस्याज्ञानस्यापिजडमात्रविषयकत्वाभ्यु
पगमात् तथाजडस्यावरणाभ्युपगमेपारिशेष्यापत्तिरूपानुपपत्तिरपिनास्तिजडावरणानभ्युपगमेस्यमूलाज्ञानविषयत्वात्तथाचतत्तज्जडावरकाज्ञानानानात्वाभ्युपगमेमदेक
त्वसिद्धांतविरोधरूपानुपपत्तिरपिनास्ति तदेकत्वाभ्युपगमस्यापिमूलाज्ञानविषयत्वात् जडावरकाज्ञानानानात्वावस्थारूपत्वादिकमभिप्रेत्यनकदाचिदनुपपत्तिरित्युक्तपरम
प्रकृतमाह नचेति घटादिवृत्तीनामपिमूलाज्ञाननिवर्तकत्वापत्तिरितियुक्तवादिनस्थायमादोषप्रकृतेतत्रास्येवघटादिवृत्तीनांमूलाज्ञानविषयचैतन्याविषयत्वानभ्युपगमादित्य
र्थः नचैवमपीति चसदिवृत्तीनांचैतन्यविषयकत्वाभावेप्यहमर्थरूपजीवस्यचिदाचित्तवलितरूपतयाप्रवृत्तेश्चैतन्यविषयत्वावश्यम्भावादित्यर्थः तस्मादिति स्वप्रकाशतया ६४
स्वयमेवप्रकाशमानायाश्चितिश्चित्तवलितः चित्तादात्म्येनाध्यस्तोयोयमविद्यांशमात्रविषयकत्वादहमाकारवृत्तेर्नतस्याअपिचैतन्यविषयकत्वमौपनिषदत्वश्रुतिविरोधादेव

वेत्यर्थः ननु योऽहं स्वप्ने मध्ये हस्तममन्वभूवं सोऽहं जागरेऽनुस्मरामीत्यादिप्रत्यभिज्ञायाश्चैतन्यविषयकत्वमावश्यकमन्यथानपायाच्चेदात्मनः स्यायित्वं सिद्धान्तव्यतिरिक्तत्वं चेतनस्ति
ध्येदित्यत आह सोहमिति प्रत्यभिज्ञापि स्वप्रमेव प्रकाशमाने चैतन्ये तस्मिन्नेतः करणतादात्म्यमिव तत्तादात्म्यादिद्वैविध्यमपि विषयीकरोति न तु स्वप्रकाशचैतन्यमस्ति
न्नेति विषयात्मनः स्यायित्वादेः प्रतीतिवलादेव सिद्धेर्न प्रत्यभिज्ञायाः प्रतिबोधे घटादिवृत्तीनामपि चैतन्यविषयकत्वाविशेषाद्वेदान्तजन्यज्ञानवन्मूलाज्ञाननिवर्तकत्वाप
त्तिरिति चोद्ये हेतोरेवासत्त्वान्नोक्तातिप्रसंग इति समाधानमुक्तमिदानीं तासां चैतन्यविषयकत्वाभ्युपगमेऽपि नोक्तदोषप्रसंग इत्याह केचित्त्विति अभ्युपगम्येति नेदेवमभ्यु
पगमे चैतन्यस्य चक्षुरादिविषयत्वनिषेधश्रुतीनां बाधः स्यादिति वाच्यं तासां निरुपाधिकचैतन्यस्य विषयत्वाभ्युपगमेनाबाधके न चैतन्यस्य चक्षुरादिवृत्तिविषयत्वे तद्वि
रोधाभावादिति भावः अत एव ब्रह्मचैतन्यस्य सर्वप्रत्ययवेद्यत्वप्रतिपादकं सर्वविदाहुः तद्वार्तिकवचनमपि संगच्छते अज्ञातज्ञापकत्वाद्धि प्रमाणस्य अज्ञातं च वस्तु चैतन्यमे
व तस्यैव स्वप्रकाशतया सदा प्रसक्तप्रकाशस्याज्ञानविषयत्वकल्पनोचितत्वात् अवभासके चैतन्यस्यावरणे सति जडानवभाससंभवेन तस्य पृथगावरणकल्पनायोगात्
अज्ञानस्य चैतन्यमात्राश्रितत्वनियमेन तस्य तमस इव स्वाश्रयादन्यत्रावरणहेतुत्वानुपपत्तेश्च तथा च प्रमाणानामपि प्रामाण्यसिद्ध्यै घटाद्यवच्छिन्नचैतन्यविषयकत्वमेव स्वीक
ार्याश्रयात् श्रोतव्येति वचः प्राप्तवेदान्तावर्तत्वयेदिति वार्तिकोक्तेः श्रोतव्यवाक्यार्थवेदान्तनियमविध्यनुसारेण वेदान्तजन्यमेव नियमादृष्टसहितं ब्रह्मज्ञानमप्रतिबद्धं
ब्रह्माज्ञाननिवर्तकमिति न च घटादिज्ञानानां तन्निवृत्तिप्रसंग इत्याशङ्क्य अन्ये तु तत्त्वमस्यादिवाक्यजन्यं जीवब्रह्माभेदगोचरमेव ज्ञानं मूलाज्ञाननिवर्तकं मूलाज्ञानस्य त
देकविषयत्वादिति न चैतन्यस्वरूपमात्रगोचराद्घटादिज्ञानात्तन्निवृत्तिप्रसंगः न चाभेदस्य तत्त्वावेदकप्रमाणबोध्यस्य चैतन्यातिरेकेण द्वैतापत्तेश्चैतन्यमात्रमभेद इति
तत्कोचेद्घटादिज्ञानमप्यभेदगोचरमिति वाच्यं न तदभेदज्ञानमिति विषयतो विशेषे ब्रूमः किं तत्तत्पदवाच्यार्थधर्मिस्वरूपमात्रमर्थादिरूपकारणविशेषाधीनेन स्वरू
पं ननु जडमात्रविषयकत्वमेवं सर्वेषामेव मानानां फलपातितचैतन्यविषयकत्वादस्य तत्त्वसाधने ब्रह्मदर्शने सर्वेषां मानानां कारणत्वप्रसक्तौ वेदान्तानामेवाविरोधे कथं नियमेनैको
या श्रोतव्येति वचः वेदान्तानामेव विचारः कर्तव्य इत्यनुमंत्थि प्राहेति वार्तिकार्थः घटादिवृत्तीनां तु चैतन्यविषयकत्वेऽपि वेदान्तजन्यत्वाभावेन श्रोतव्यमिति विधिसिद्धनियमाद
ष्टाभावान्न मूलाज्ञाननिवर्तकत्वप्रसंग इति भावः अभ्युपगम्येति नियमादृष्टेन प्रतिबन्धकदुरितस्य क्षीणत्वादिति भावः तत्त्वमस्यादिवाक्योत्थज्ञानमात्रस्य साध
नमिति नावद्यवचनात् तत्त्वमस्यादिवाक्योत्थयज्जीवपरमात्मनोस्तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनमिति भगवत्पादीयवचनदर्शनाच्च मूलाज्ञानस्य जीवब्रह्माभेदाव
रकत्वात् जीवब्रह्मणोः कालत्रयेण तादात्म्यविषयकं यज्ज्ञानमिदमेव मुक्तिसाधनमतो नोक्तातिप्रसंग इति समाधानान्तरं दर्शयति अन्ये त्विति वाक्यजन्याभेदज्ञानमज्ञाननिवर्त
कमिति स्थिते तदंशागोचरात् घटादिज्ञानान्न मूलाज्ञाननिवृत्तिप्रसंग इत्यर्थः न चेति जीवब्रह्माभेदश्चैतन्यात्मैवेतन्यातिरिक्त इति वक्तुं न शक्यते तथा सति वेदान्ततात्पर्यगोचरस्याभेद
स्य सत्यत्वाच्चप्रपञ्चेन च चैतन्यस्याद्वितीयत्वहानापत्तेर्वेदान्ततात्पर्यविषयस्याभेदस्यासत्यत्वे वेदान्तानां तत्त्वावेदकत्वलक्षणप्रामाण्यस्य सिद्धान्तसमतस्य भंगापत्तेरित्यर्थः

सि॰ ले॰ र॰ टी॰ ६५

श्रुतत्वमिदं परमार्थवस्तु परं न हीति श्रवणादिज्ञाने ब्रह्मविषयकेऽपि जीवब्रह्माभेदो न विषयः महावाक्यार्थज्ञाने तु तयोरभेदो विषय इत्येवं श्रवणादिज्ञानापेक्षया महावाक्यजन्यज्ञानस्य
विषयतो विशेषस्तु ब्रह्मः येनोक्तदोषतादवस्थ्यं स्यादिति चेत् न विद्वं रजतमिति भ्रमे यावानधिष्ठानांशोऽवभासते तावदपेक्षया शुक्तित्वादिविशेषविषयकस्य शुक्तित्वादिज्ञा
नस्य रजतभ्रमविरोधित्वं दृष्टं तथा च प्रकृते स्फुरति चेदं इत्यादिभ्रमे शुद्धावदधिष्ठानमन्ते चैतन्यविषयस्तावदपेक्षया अधिकाभेदविषयकत्वस्य वाक्यजन्यज्ञानेऽस्यनभ्यु
पगमे वाक्योत्थज्ञानस्य भ्रमनिवर्तकत्वं न स्यादतो विषयतो विशेषोऽभ्युपगन्तव्य इति शंकते किं चेति भ्रमाधिकविषयाणामेव ज्ञानानां भ्रमनिवर्तकत्वमिति नियमो नास्ति
भ्रमानधिकविषयाणामपि भ्रमनिवर्तकत्वदर्शनेऽव्यभिचारात् तथाहि वस्तुतो बोधाय प्रवृत्तेन गंगातीरे यस्य तटाकतीरत्वभ्रमेण तटाकतीरे घोष इति भ्रमोऽस्ति तं प्रति गंगायां
घोष इति वाक्यप्रयोगे सति तस्माद्वाक्यात् तस्य पुरुषस्य गंगातीरे घोष इति बोधो जायते तेन च बोधेन तस्य गंगातीरे तटाकतीरत्वभ्रमो निवर्तते न च तद्भ्रमाविषयगंगातीरत्वप्रमा
पेक्षया वाक्यजन्यबोधे कश्चिद्विशेषो विषयो दृष्टः न च दृष्टवाक्यजन्यज्ञाने तटाकतीरत्वावर्तकस्य गंगातीरत्वरूपविशेषस्य विषयत्वदर्शनाद्विशेषविषयकत्वमस्त्येवेति
वाच्यं प्रतीतिरेवमात्रप्रकारकतात्पर्येण गंगायां घोष इति प्रयोगस्त्वे तस्य भ्रान्तस्य तात्पर्यग्रहश्च तत्र गंगातीरत्वप्रकारकबोधाभावेऽपि भ्रमनिवृत्तिदर्शनेन व्यभिचारोऽभ्रान्ततया
येन केनचित् कपालेन तुषोपवापः कर्तव्य इति भ्रमवतः पुरुषस्य प्रति कपालत्वमात्रप्रकारकतात्पर्येण प्रयुक्तात् तन्मात्रेण तत्र यावत् पुरोडाशकपालेन तुषानुपवपतीति वाक्या
त्पुरोडाशकपालेनैव तुषोपवापः कर्तव्य इत्येवं तस्य पुरुषस्य बोधो जायते तत्र कपालान्तरात् कपालान्तरव्यावर्तकविशेषाग्रहणेऽपि पुरोडाशकपालातिरिक्तकपालेऽपि तुषोपवापसाधनत्वभ्रमः
निदर्शनेन तत्रापि व्यभिचारात् तस्मात्तीरे घोष इति शाब्दबोधस्य गंगातीरत्वरूपविशेषविषयकत्वाभावेऽपि तद्धेतुपदार्थोपस्थितिकाले तीरस्य गंगासंबंधित्वेनोपस्थितत्वात्तदुप लां॰
स्थितिमहिम्ना वस्तुगत्या गंगातीरविषयकस्य भ्रमानधिकविषयस्यापि भ्रमनिवर्तकत्वमिति वक्तव्यं तथा कपालेन तुषोपवापः कर्तव्य इति शाब्दबोधस्य स्वपकपालान्तरव्यावर्तक
विशेषविषयकत्वाभावेऽपि तादृशशाब्दबोधहेतुपदार्थोपस्थितिकाले कपालस्य पुरोडाशसंबंधित्वेनोपस्थितत्वात्तदुपस्थितिमहिम्ना तस्य भ्रमानधिकविषयस्यापि
भ्रमनिवर्तकत्वमिति वक्तव्यं तथा च ज्ञानस्य भ्रमविरोधित्वे सामग्रीविशेषप्रयोज्यत्वं प्रयोजकं न तु भ्रमाधिकविषयत्वं व्यभिचारात् किं च महावाक्यजन्यज्ञानस्य सत्तारूपभ्रमवि
रोधित्वं स्फुरति सदिति विवृद्धभ्रमे ॥ सिद्धं महावाक्यानां च चतुर्णामखण्डरूपमात्रबोधकत्वं द्वितीयपरिच्छेदे शुक्तिसाधने महावाक्यजन्यज्ञानं प्रति चैतन्यमात्ररूपविषयनियामकस्को
मुदाहरणेनास्माभिः साधितं प्रपञ्चितं निबन्धने एतत् तथा च शुक्तिरजतादिस्थले भ्रमाधिकविषयकशुक्तिज्ञानादेर्भ्रमविरोधित्वे भ्रमाधिकविषयकत्वस्य विशेषाभावात् दुर्घटत्वेन सा
मग्रीविशेषाधीनत्वस्यापि दृष्टत्वेनाद्वैतसिद्धिकृद्वेदान्तानुसारेणोदाहृतव्यभिचारस्य लाघवेन च ज्ञानस्य भ्रमविरोधित्वे सामग्रीविशेषाधीनत्वमेवानुगतं प्रयोजकं कल्प
यितुं युक्तं न तु भ्रमाधिकविषयत्वमिति स्वाभिप्रेतं महावाक्यार्थज्ञानस्य भ्रमानधिकविषयस्यापि भ्रमनिवर्तकत्वं संभवतीति समाधत्ते नत्वमिति तत्त्वंपदार्थयोर्वाच्यार्थभूतौ जीवे
श्वरावेव धर्मिद्वयं तस्य तत्त्वंपदाभ्यां प्रथमं यावत्यास्यतिरूपः परामर्शस्तदनन्तरं तत्त्वंपदसामानाधिकरण्यबलाज्जीवेश्वराभिन्न इति तयोर्विशेषणविशेष्यभावेनावगतिस्त ६५
दनन्तरं च विशिष्टयोरैक्यं न संभवतीति विरोधप्रतीतेस्तदनन्तरं च तत्त्वंपदाभ्यां वाच्यार्थरूपविशिष्टान्तर्गतयोर्विशेष्ययोश्चैतन्ययोः प्रथमयोरभेदयोग्ययोर्लक्षणया प्रतीतिः ततश्च विशे

व्यक्त्याभेदगोचरस्याहृतेऽप्यइति क्रममभिप्रेत्यादिपदं वाक्यजन्यज्ञानस्य स्वविषयचैतन्येन स्वरूपः स्वरूपसंबंधविशेषः सामग्रीविशेषाधीन तु प्रयत्नलस्तेन तु संबंधेन चैतन्यस्यो
चरत्वे च घटज्ञानादिव्याहृतं तद्देवदत्तस्याभेदज्ञानत्वं तत्फलादेव तत्प्रकलाज्ञान मिथ्याज्ञानादि विरोधित्वामित्यर्थः मनावाक्यजन्यज्ञानस्य घटादिज्ञानापेक्षया चैतन्यांशे विषयतो विशे ११
षाभावे पि सामग्री विशेषादेव घटादिज्ञानापेक्षया भेदज्ञानत्वरूपवैलक्षण्यमेव स्यात्तु माह यथा हीति विशिष्टज्ञानस्येति देवोऽयं पुरुष इति ज्ञानस्येत्यर्थः विशेषणविशेष्ययो
रसंसर्गाग्रहणमात्रादिपदार्थः समफलत्वे वेनेति देवोऽयं पुरुषसंयोग इति ज्ञानेनेत्यर्थः तदुक्तं चिंतामणौ कृता कारणकृत इति विशिष्टज्ञानस्य समफलत्वेनापेक्षया विशेषणज्ञानादि
प्रकारणकृतो विशेष इति तदर्थः स्याण्वेति स्थाणुत्वविरुद्धपुरुषत्ववानिति निश्चयासंशयस्य समानविषयकोऽयमाहार्यहानिरूपस्ताहृतमित्यर्थः विशेषदर्शनदशायामे
तादृशनिश्चयासंभवादाहार्यमुक्तं विषयत इति विशिष्टज्ञानेस्याणुः पुरुषो वेति संशये चेति भावः नकेवलं तत्त्वमसि वाक्यजन्यज्ञानस्याभेदज्ञानत्वे रूपेरीतिः सोऽयं देवदत्तः सो
ऽयं देवदत्त इत्यादिवाक्यजन्यज्ञानस्यापि केवलघटप्रत्यह देवदत्तपाद्यादिजन्यज्ञानव्याहृताभेदज्ञानत्वापायेरीतिरन्यमनेनाह तथा घटादावपीति प्रतीतिरित्यन्ते केवलघटमाह।

यसंबंधविशेषेण चैतन्यविषयत्वमेव नतदभेदज्ञानत्वे यथाहि विशेषण विशेष्यतत्त्वं चान्यगोचरत्वाविशेषेऽपि विशिष्टज्ञानस्य विशेषणज्ञानादिकारणविशेषाधीनस्व
रूपसंबंधविशेषेण तद्विषयगोचरत्वमेव समफलत्वेन व्याहृतं विशिष्टज्ञानत्वं यथा वा स्थाणुत्वपुरुषत्वे चानिमात्तार्यहृतिव्याहृतमसंशयत्वविषयतो विशेषानिरूपणात्त
था घटादावपि सोऽयं घट इत्यादिज्ञानस्य स्वरूपसंबंधविशेषेण घटादिविषयत्वमेव केवलघटपाद्यादिजन्यज्ञानव्याहृतं तदभेदज्ञानत्वमतिरिक्ताभेदानिरूपणात्प्रभा
वसाहृष्यादीनामपि करणमतियोग्यादिभिः स्वरूपसंबंधफलानामपि करणेनाथाराधेयभावरूपः स्वरूपसंबंधविशेषः प्रतियोगिना प्रतियोगपत्रयोगिभावरूपः
सादिप्रकारेण स्वरूपसंबंधे वांतरविशेषकल्पनं च वृत्तीनां विषयेऽपि संयोगतादात्म्ययोरतिप्रसक्त्या विषयैर्विषयविषयीभावरूपस्वरूपसंबंधवतीनां विषयविशेष
देवदत्तपाद्यादिजन्यज्ञानविषयघटस्वरूपापेक्षया सोऽयमिति वाक्यगम्याभेदस्यातिरिक्तत्वे मानाभावात् तथा च विषयतो विशेषासंभवात् सोऽयं घट इत्यादावपि तत्त्वमसीत्यत्रेव सोऽय
मिति पदद्वयवाच्यार्थरूपधर्मिद्वयपरामर्शादिरूपकारणविशेषाधीनस्वरूपसंबंधविशेषेण घटादिस्वरूपविषयकत्वमेव घटाद्यभेदज्ञानत्वं नान्यदिति वक्तव्यमिति भावः न
नु केवलघटपाद्यादिजन्यज्ञानस्यापि विषयेण स्वरूपसंबंधपूर्वतया चकयस्वरूपसंबंधकृताभेदज्ञानत्वाद्व्यवस्था नच वृत्तिज्ञानानां विषयैः सह नविषयविषयीभावप्रयोजकत्व
रूपसंबंधानामविशेषेऽपि तेषु च विषयतज्ज्ञानस्वरूपात्मकसंबंधे पुंसामग्रीविशेषाधीनत्वप्रयुक्तपरस्परवैलक्षण्यकल्पनयाव्यवस्थोपपादनं कर्तुं शक्यत इति वाच्यं स्वरू
पसंबंधेषु वैलक्षण्यस्य क्वाप्यदृष्टत्वेन तथा कल्पनानुपपत्तेरित्यत आह प्रभावसाहृष्यादीनामिति ननु वृत्तीनां विषयैः सह विषयविषयिभावः स्वरूपसंबंधकृत एव न सं
बंधांतरकृत इति किं न संयोगादिकृत तत्तया च तासां तैः सह स्वरूपसंबंधानामेव वास्तिकृत्वात्तेषु वैलक्षण्यात्मकविशेषकल्पनाकृतापास्तेत्यत आह संयोगेति वृत्तिसंयोगस्य वृत्तिविषयत्वप्रयो
जकत्वे च वृत्तिगोलकादेरपि घटादिवृत्तिसंयोगित्वेन तद्विषयत्वप्रसंगात् वृत्तितादात्म्यस्य वृत्तिविषयत्वप्रयोजकत्वे वृत्त्युपस्थानतया हि वृत्तितादात्म्यापन्नस्य घटाद्यवच्छिन्नचैतन्यस्य घटा
दिवृत्तिविषयत्वं संभवेऽपि घटादेर्वृत्तितादात्म्यरहितस्य तद्विषयत्वप्रसंगात् तद्विपरीणामत्वांतःकरणस्य घटादिवृत्तिविषयत्वप्रसंगाच्च परिणामपरिणामिणोस्तादात्म्यादि

सि॰ले॰ त्यर्थः ननु तत्त्वमस्यादिवाक्यजन्यज्ञानस्यापि विषयेण सह यः स्वरूपसंबंधस्तेन मतभेदो चरज्ञानोभयस्वरूपात्मकत्तत्वमसी विशेषबलादपि विषयस्वरूपात्मकेसंबंधे विशेषो
न॰टी॰ निरूपयितुं न शक्यत इत्यत आह विषयविशेषनिरूपणासंभवइति विषयेति विशेषश्चेत् तात्मके विशेषाधानसंभवेपि स्वरूपसंबंधांतर्गतितया तत्स्य एवज्ञानस्वरूपात्मकेसं
६६ बंधस्तामग्री विशेषबलाद्विशेषाधानसंभवान्नोक्तदोष इति भावः यद्वा वृत्तीनां विषयेपि संयोगतादात्म्ययोरतिप्रसक्त्या विषयविशेषनिरूपणाभावे विषयैर्विषयविषयिभाव
रूपसंबंधवतीनामिति संबंधः अभावस्याहृष्या दीनामपि कस्मादावित्वहृत्तीनामपि विषयेसंयोगतादात्म्ययोरतिप्रसक्तत्वेन ताभ्यां वृत्तिप्रति विषयविशेषनियमनासंभ
वेसतिपरिशेषाद्विषयविषयिभावप्रयोजकस्वरूपसंबंधवतीनामित्यर्थः रूपपदनियामकपरं विषयविषयिभावस्य स्वरूपसंबंधनियम्यत्वेन तत्प्रारंभेदस्य रूपपाह्य
र्थस्यायोगात् न च संयोगतादात्म्ययोर्विषयविशेषनियामकत्वाभावेपि वृत्तीनां विषयेस्वरूपसंबंधपरिशेषान्नसंभवति स्वरूपसंबंधातिरिक्तसंबंधांतरस्य कल्पनो
चयनेरित्यत आह लक्षणयैवेति स्वरूपसंबंधस्य वृत्त्यादिरूपतया तत्स्यलक्षणत्वात् लक्षणयैव स्वरूपसंबंधे विशेषकल्पनायां लाघवे संबंधांतरकल्पनायां तस्मिन् संबंधांतरे
भेदज्ञानत्वादिनिवर्तकत्वविशेषकल्पनायां गौरवमतो वृत्तीनां विषये सह स्वरूपसंबंधस्यैवमेवेति भावः ननु तत्त्वमसिवाक्याज्जीवस्य ब्रह्मज्ञानोपगमे तद्भेदस्यैव संसर्गो विषया
निरूपणासंभवे लक्षणयैव स्वरूपसंबंधस्य संबंधांतरविशेषकल्पने नाभेदज्ञानत्वादिपरस्परं वेलक्षण्यनिर्वाहाच्च एवं च ब्रह्मज्ञानस्याभेदांशे किंचित्संसर्गगोचरत्वानभ्युपगमा
त्तनेवेदांतानामखंडार्थत्वहानिरपीत्याह नन्वहंकारादिज्ञानवद्ब्रह्मज्ञानस्यापि न मूलाज्ञाननिवर्तकत्वं फलतः निवर्तकत्वेतद्वस्थानासक्तिस्तु स्वरूपस्य विरोधस्यतेत्वात्
कार्यस्य चोपादानेन सह नाहशाविरोधाभावादितिचेत् न कार्यकारणयोरन्यत्र ताहशाविरोधादर्शनेपि पक्षविषयज्ञानाज्ञानप्रफलकस्य ताहशाविरोधस्यान्यत्रासत्वात् का
र्यकारणयोरप्याग्निसंयोगघटयोस्ताहशाविरोधदर्शनात् न चाग्निसंयोगेसत्यवयवविभागप्रक्रियया असमवायिकारणसंयोगनाशादेवघटनाशो नाग्निसंयोगादिति
वाच्यं दग्धपटेपि सर्वतंतूनामनिवृत्तिदर्शनेन मुद्गरचूर्णीकृतघटवदवयवविभागादर्शनात् तत्रावयवविभागादिकल्पनाया अप्रामाणिकत्वात् नापि चतत्रतंतूनाम
भावाद्देहांतानां संसर्गगोचरश्मितिजनकत्वरूपाखंडार्थत्वासंभवानहानिरिति तस्यायं निरवकाशमित्याह एवं चेति महावाक्यजन्यज्ञानगताभेदज्ञानत्वस्याभ्युपगमादितत्वेनाभे
दसंसर्गाभावेनानेपत्तायांसत्यामित्यर्थः हानिरपीति वृत्त्यादिवृत्तीनां मूलाज्ञाननिवर्तकत्वापत्तिर्नास्ति अखंडार्थत्वहानिश्च नास्तीत्यपि बोध्यं वेदांतजन्यज्ञानस्यापि मूलाज्ञा
ननिवर्तकत्वमापद्यते न त्वितिताहशेति कार्यस्य लोकउपादानास्थितिविरोधित्वादर्शनादित्यर्थः ब्रह्मगोचरवृत्तिमात्रतःकरणस्येवोपादानत्वेन तोभ्यज्ञानस्यानुपपादनत्वा
त्तन्निवर्तकत्वसंभवतीतिमत्वाहनेति उपादानत्वमुपेत्याप्याह कार्येति उपादानोपादेययोर्निवर्त्यनिवर्तकभावप्रयोजकतया लोके लक्षणसमानविषयकत्वाज्ञानाज्ञानभावस्य
शौ॰ विशेषरूपतया तेनसामान्यरूपस्योपादानोपादेयभावप्रयोजकविरोधस्य वाधोपपत्तेरित्यर्थः लोकेउपादानोपादेययोर्निवर्त्यनिवर्तकभावप्रयोजकविरोधादर्शनमसिद्धं चेत्याह
कार्यकारणयोरपीति अग्निसंयोगरूपकार्यस्योपादानपटनाशकत्वदर्शनादित्यर्थः ननुतत्राग्निसंयोगस्य नाशकत्वदर्शने भ्रांतिरितिमत्वा शंकते न चाग्नीति प्रक्रियेति ६६
अग्निसंयोगानंतरं क्रियाततस्तंत्वोविभागः ततस्तेषां पटासमवायिकारणसंयोगनाशः ततः पटनाश इति वैशेषिकप्रक्रियातेन तुविभागप्रक्रियैवघातिमूलेन्याह दग्ध

परेपीति पूर्वसंयोगनाशयुक्तावस्था अतिरेककारणं नाशकत्वमिति यथा गुरुत्वादौ कृतस्य घटस्यावयवे तु विभागो हि भवति तथावयवद्वयस्थानं तत्र द्रव्यत्वं तच्च वि-
भागादर्शनेनेत्यर्थः तत्रेति तत्तुल्यमित्यर्थः वैशेषिकमतेऽपि नाशमपि प्रतिमूलमेवेत्याह नापेक्षादिना तत्रेति पटद्रव्यस्थलइत्यर्थः अग्निसंयोगस्य कुचिदुपाद
नद्रव्यनाशकत्वात्पाकजत्वपक्षत्वात्पटनाशकत्वमपि नेष्यतेत्याह यतइति यतो घ्राणकादयस्तादृ घ्राणकावयवस्य परमाणोर्नाशः तत्र घ्राणके विघमा
नाग्निसंयोगादेव तदुपादानभूतघ्राणकादिनाशस्याभावात् न च तत्रावयवविभागप्रक्रियया परमाणुद्वयसंयोगनाशादेव घ्राणकनाशइति वाच्यम्
अवयवविभागप्रक्रियया विलम्बात् तथा चाग्निसंयोगस्यैवोपादानपटनाशकत्वमनिवार्यमिति भावः तत्स्मिन्देवमिति यत्र प्रमात्राने मेघाने करणे
द्वारा तत्रोपादानाज्ञाननाशकमस्तीत्यर्थः तथापीति शुक्तिज्ञानस्य तद्विलासाज्ञाननाशकत्वेपीत्यर्थः तत्कार्यज्ञाननाशकस्याज्ञाननाशकालेऽभावाभ्य
श्रवणमनननिदिध्यासनानांदर्शनवत्ज्ञानत्वपत्वेनक्रियात्वपत्वेपिवस्तुमाणविधयानित्यप्राप्तत्वेनचविध्ययोगपत्वादेवेत्यर्थः किमर्थानि
नीतिव्यर्थानिस्युरितियावत् आदिपदेश्रोतव्यइत्यादेःसंग्रहार्थः विधिछायानीति अध्येतव्यइतिप्रसिद्धविधितुल्यानीत्यर्थः अत्र

अतएवसमन्वयसूत्रे आत्मज्ञानविधिनिराकरणानंतरंभाष्यं किमर्थानिवातर्हि आत्मावाअरेद्रष्टव्यइत्यादीनिवचनानि
विधिछायानिस्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीतिब्रूमइत्यादि

तव्यप्रत्ययैर्दर्शनश्रवणादिगताप्रशंसालक्ष्यते तथाच योहिमुमुक्षुरात्मदर्शनश्रवणादीन्येवमुक्तिसाधनानीतिज्ञात्वापिसंन्यासब्रह्मच
र्यादिसहितश्रवणाद्यनुष्ठानक्लेशमनुसंचिंत्यननत्रसर्वोत्साहेनप्रवर्त्तंते किंतुयथाप्राप्तान्येववर्णाश्रमानुरूपाणिकर्माण्युपासनानि
वाऽनुतिष्ठंत तत्रापिनिवृत्तिंनलभंते तेरात्यंतिकपुरुषार्थालाभानुसन्धानेनतं प्रत्यात्मदर्शनश्रवणादिप्रशंसार्थंप्रवर्त्तंते आत्मावा
अरेद्रष्टव्यइत्यादिवाक्यं तस्यसर्वोत्साहेनश्रवणादावेवप्रवृत्तिर्भवत्वित्याशयेन अतोनविधिप्रत्ययानांवैयर्थ्यमितिभाष्यकारःपरिहरति
स्वाभाविकेति आदिपदेनयोहिवहिर्मुखःप्रवर्त्तते पुरुषः इष्टंमेभूयादनिष्टंमेमाभूदितिनचतत्रात्यंतिकंपुरुषार्थंलभते तमात्यंति
कपुरुषार्थवांछिनंस्वाभाविकात्कार्यकारणसंघातप्रवृत्तिगोचराद्विमुखीकृत्यप्रत्यगात्मस्रोतस्तयाप्रवर्त्तयंत्यात्मावाअरेद्रष्टव्य
इत्यादीनीत्यंतंभाष्यंसंगृह्यतेस्वाभाविकत्वंविषयविशेषणं संग्रहभाष्यंविवृणोति योहीति प्रवर्त्ततइतिनानाविधकर्मोपासनान्यनुतिष्ठ

ॐ सि॰ ले टी १९

नीत्यर्थः इष्टं मे भूयादनिष्टं मे माभूदित्यनेन दुःखसामान्यास्पृष्टसुखकामनाब्रह्मानन्दरूपात्यंतिकपुरुषार्थगोचरा इह विवक्षितास्तन्न

एवाह नचैतन्नात्यंतिकंपुरुषार्थं लभतेइति वाद्यसाधनं तत्र शब्दार्थः स्वाभाविकादिति स्वभाव अविद्या तत्कार्यभूतादित्यर्थः संघातस्य प्र

वृत्तिः कर्मोपासनयोरनुष्ठानं तद्गोचरात यष्टव्यदेवतामंत्रादिरूपादित्यर्थः प्रत्यगात्मनि विषयत्वेन श्रिन्नप्रावण्यस्य सप्रत्यगात्म

त्वेनतत्स्वभावत्वात्तात येन्यर्थः तं वाद्यसाधनाद्विमुखीकृत्य श्रवणादिष्वेव प्रवर्तयन्तीत्यर्थः एवं श्रवणादेर्ज्ञानरूपत्वान्न तत्र कोपि वि

धिरित्युक्तं इदानीं श्रवणादेः क्रियारूपत्वमुपेत्यापि न तत्र कोपि विधिरित्याह यद्यपीति तस्य क्रियारूपत्वे चवार्तिककारैरेवोक्तं श्रव

णादि क्रियातावत्कर्तव्याह प्रयत्नतः इति आदिपदेन मननस्य संग्रहो न ध्यानस्य वार्तिककारमते श्रवणमनननानंतरं ध्यानानुष्ठानाभा

वस्योक्तत्वात् नच ध्यानस्यानुष्ठेयत्वे ॐमित्येवं ध्यायथ आत्मानं विद्यामेतां योगविधिं च कृत्स्नमित्यादि बहुवाक्यविरोध इति वाच्यं

यदि च वेदांततात्पर्यविचारः श्रवणं तदा तस्य तात्पर्यनिर्णयद्वारा वेदांततात्पर्यभ्रमसंशयरूपप्रतिबन्धकनिरास एव फले

तेषां सांख्ययोगाभिप्रायमिति श्रुतिगतयोगपदोदितमार्गांतरप्रतिपादकतया स्तृतीयपरिच्छेदे ध्यानदीपोक्तप्रकारेणावष्टम्भात्

नच तत्कारणमिति श्रुतिगत सांख्यपदोदित विचारमार्गेपि ध्यानांतर्भावः पूर्वमुक्त इति वाच्यं निदिध्यासनपदस्य ध्यानार्थकत्वम

नाभिप्रायेण तदंतर्भावस्योक्तत्वात् ध्यानस्य सांख्यमार्गाद्बहिर्भाव एव भाष्यकाराणामपि सम्मतः तथाच ते न योगः प्रत्युक्त इत्यधिक तं॰

रणभाष्ये तत्कारणं सांख्ययोगाभिपन्नमित्यत्र वैदिकमेव ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्यते इति ज्ञानपदं ज्ञानाभ्यासपरं ध्यानपदं ध्यानाभ्या

सपरं वैदिकं वेदोक्तं एतेन वेदविरोधादिना योगशास्त्रं निराकृतमिति तेन सूत्रार्थः सांख्यमार्गे ध्यानाभाव मेभिप्रेत्यैव सर्वज्ञात्म राम

मुनिभिरपि निदिध्यानपदस्य ज्ञानार्थकत्वमुक्तं श्रवणमननवद्धोर्जातयोर्यत्फलं तन्निपुणमतिभिरस्वेच्छयेत्यन्ते दर्शनाय १९

अनुभवनविहीनायैवमेवेतिबुद्धिः आनमननसमाप्तौतन्निदिध्यासनंहिइति अस्यश्लोकस्याश्रमश्रीचरणानांव्याख्यानमिदं निदिध्यासनेपदमाह
श्रवणेति श्रवणमननबुद्ध्योर्जातयोर्यत्फलंतद्दर्शनायनिपुणमतिभिरुक्तैरुच्यतइतिसंबन्धः एतदेवविशदयति अनुभवनविहीनेति आते
श्रवणंदीर्घकालादरनैरंतर्यानुष्ठानेनश्रवणमननपरिपाकेसतीत्यर्थः अनुभवनविहीनासाक्षात्काररहिताअविद्यानिवर्तकवृत्तिसा
क्षात्कारभिन्नेतियावत् एवमेवेतिबुद्धिः अहंचिदात्माब्रह्मस्वभावएवब्रह्मचचिदेकरसप्रत्यगात्मस्वभावएवेतितत्त्वपदलक्ष्यैनि
र्णयात्मिकाबुद्धिस्तदेवनिदिध्यासनंनामनध्यानं अस्मिन्पक्षेश्रवणमननयोरेवानुष्ठेयत्वंनिदिध्यासनंतुनानुष्ठेयंदीर्घकालान
फल नुष्ठितश्रवणमननरूपाबुद्धिर्यदाभवतितदैवसाक्षात्कारोत्पत्तेः पूर्वपक्षेतुनिदिध्यासनमपिपृथगनुष्ठेयमितिभेदइतिसांख्यमा
र्गेध्यानाभावमभिप्रेत्यैवयावज्ज्ञानोदयंविचारस्यैवकर्तव्यत्वंध्यानदीपेविद्यारण्यगुरुभिरप्युक्तं विचार्यापरोक्षेणब्रह्मात्मा
नंलभतेचेत् अपरोक्षावसानत्वाद्भूयोभूयोविचारयेत् विचारयन्नामरणंनैवात्मानंलभतचेत् जन्मांतरेलभेतैवप्रतिबन्ध
क्षयेसतीति एवमानंदपंचकेपिआत्मानंदावसानेसांख्यमार्गस्यध्यानराहित्यस्यापिध्यानेनसर्वांशेपितुल्यफलत्वंबहुधा
प्रपंचितमितिसंक्षेपः एवकारव्यवच्छेद्यमाह नेति वाकारोनत्वनुकर्षणार्थः विचारस्यप्रतिबन्धनिवृत्तिद्वाराब्रह्मावगमोप
योगसंभवेपिनसाक्षात्तत्फलकत्वंज्ञानस्यप्रमाणफलत्वादित्युक्तत्वादितिभावः ननूक्तप्रतिबन्धनिरासद्वाराविचारस्य
विद्यानिवर्तकसाक्षात्कारोपयोगित्वप्राप्तावपितादृशसाक्षात्कारप्रतिबन्धकपापनिवृत्तिद्वारासाक्षात्कारसाधनत्वस्य
मानांतरादप्राप्तत्वाच्छ्रोतव्यइत्यत्रश्रवणस्यपापनिवृत्तिद्वाराविद्यासाधनत्वमुपदिश्यते नचविद्याप्रतिबन्धकपापनि
वृत्तेर्यज्ञादिनैवसिद्धत्वाद्विधिवैयर्थ्यमितिवाच्यं प्रतिबन्धकपापानामानंत्येनकेषांचिद्यज्ञानुष्ठानेनकेषांचिच्छ्रवणानुष्ठा
नेननिवृत्तिरितिविभागकल्पनोपपत्तेः तथाचप्राप्तेपुनरपूर्वविधित्वं एवंचसहकार्यन्तरविधिरित्याधिकरणभाष्ये

(भिन्नपाप)

पंडितनाशाद्दितस्यश्रवणेऽपूर्वत्वोक्तिश्चसंगच्छतेइतिशंकांवारयति नप्रतिवंधकांतरनिरासइति तात्पर्यभ्रमसंशयरूपप्रतिबन्ध काद्येतयाऽन्यत्वाप रूपप्रतिबन्धकेम

ॐ ति ॰निवंधकांतरंतन्निरासोनश्रवणफलमतोनतद्द्वाराज्ञानायश्रवणंविधेयमित्यर्थः अयंभावः श्रोतव्यइत्यस्यापूर्वविधित्वमयुक्तं नस्या

द्वृत्त्यधिकरणेनिरस्तत्वात् विवरणाद्युक्तरीत्यावेदांतश्रवणस्यान्वयव्यतिरेकप्रमाणसिद्धंतात्पर्यभ्रमादिलक्षणप्रतिवन्धनिवृ

ले॰ टी तिरूपदृष्टफलकत्वमुपजीव्यश्रवणेनैवज्ञानंप्रतिवन्धनिवृत्तिंचसंपादयेदितिनियमविधित्वसंभवेस्वाभाविकप्रवृत्तिविष

आश्रित

२० यविमुखीकरणार्थानीतिब्रूमइत्यादिभाष्यानुसारेणब्रह्मप्रतिपत्तिसाधनश्रवणादिस्तुतिद्वारातत्रप्रवृत्तिविशेषकारणत्व

मात्रेणब्रह्मप्रकरणनिवेशसंभवेवाऽपूर्वविधित्वायोगात् भाष्यकारीयापूर्वत्वोक्तेः पाक्षिकप्राप्तिनिवारकत्वसंभवाच्चेति दि

तत्फलकत्वेचेतिभ्रमादिरूपप्रतिवन्धनिरासफलकत्वेचेत्यर्थः ननुप्राप्तत्वेपिनियमविधित्वासंभवात्कथंविधित्रयाभावइत्य

नप्रतिवन्धकांतरनिरासोब्रह्मावगमोवातत्फलकत्वंचतस्यलोकतएवप्राप्तंसाधनांतरंचकिंचिद्विकल्प्यसमुच्चित्य

वानप्राप्तमितिनतत्रविधित्रयस्याप्यवकाशः विचारविध्यभावेपिविज्ञानार्थतयाविधीयमानंगुरूपसदनम्

तस्याहसाधनांतरंचेति ननुगुर्वधीनविचारेणसहगुरुरहितविचारस्यविकल्पेनप्राप्तिरस्तीत्यतस्याह विचारविध्यभावेपीति

अतएवेति उपगमनविधितएवेत्यर्थः व्यावृत्तिरित्यनंतरंलभ्यतइतिश्रोतव्यवाक्येगुर्वधीनविचारेनियमविधिरनर्थकइ राम

तिशेषः नचोपगमनविधेर्विचारविध्यंगतयातदभावेउपगमनविधेरात्मलाभएवनास्तीत्युक्तमितिवाच्यम् ॥ २०

गुरूपसदनस्य ब्रह्मज्ञाने प्रतिष्ठाद्यपेक्षायां लोकसिद्धस्यैव गुर्वधीनविचारस्य द्वारत्वेन स्वीकारोपपत्तेश्चोत व्याविध्यपेक्षाभावेन तच्छेषत्वा
सिद्धेर्विचारवदुपगमनस्यापि विध्यंगत्वोपपत्तेश्चेति भावः पूर्वोक्तातिप्रसंगं परिहरति अध्ययनविध्यभावे तु लिखितपाठादिव्यावृ
त्त्यसिद्धेस्सफलोध्ययननियमविधिरिति संबन्धः तदर्थमिति अक्षरावाप्त्यर्थमित्यर्थः अध्ययनांगोपगमनस्य विद्यार्थोपगमनापे
क्षया विशेषाय कस्तुशब्दः तमेवाह उपगमनमित्यादिना अध्ययनस्याक्षरावाप्तिफलकत्वं विवरणादौ साधितमिति भावः व्याव
र्त्यान्तरं दूषयति नच तात्पर्यादीति ननु वस्तुतस्तन्निरासकत्वाभावेपि भिन्नात्मज्ञाने मुक्तिसाधनमिति द्वारा ते तद्भ्रमात् तत्र प्रवृत्तिः भ्रम॰

दृष्टद्वारसंभवेऽदृष्टकल्पनायोगाद्गुरुमुखाधीनवेदान्तविचारद्वारैव विज्ञानार्थपर्यवस्यतीति अत एव यत्नप्रयत्नसाध्य
विचारव्यावृत्तिः अध्ययनविध्यभावे तु गुरूपगमने विधीयमानमक्षरावाप्त्यर्थत्वेनाविधीयमानत्वान्न तदर्थं गुरुमुखो
च्चारणानूच्चारणमध्ययनं द्वारीकरोतीति लिखितपाठादिव्यावृत्त्यसिद्धेः सफलोऽध्ययननियमविधिः नच तात्पर्या
दिभ्रमनिरासाय वेदान्तविचारार्थिनः कदाचित् द्वैतशास्त्रेपि प्रवृत्तिः स्यात् तत्रापि तदभिमततये वेदान्तविचारसत्वात् ॰ज नया

संभवतीत्युक्तमिति नेत्याह तन्निरासकत्वमेवेति इहजन्मनि जन्मान्तरे वा यज्ञाद्यनुष्ठानजनितदृढविविदिषावतस्साधनचतुष्टयसं
पन्नस्य श्रवणविध्यधिकार इत्यविवादं यज्ञादिजनितादृष्टं च निष्प्रपंचाद्वितीयब्रह्मसाक्षात्कारस्य सांगाध्ययनलब्धे वेदान्ते मुक्तिसा
धनत्वनिश्चयं संपादयता दृष्टब्रह्मसाक्षात्कारे दृढेच्छात्वविविदिषाशब्दितामुत्पाद्य तद्द्वाराद्वितीयात्मसाक्षात्कारसाधनभूताद्वितीय
यात्मश्रवणादावेव मुमुक्षुं प्रवर्तयति नतु जीवभिन्नात्मज्ञानस्य मुक्तिसाधनत्वभ्रमापादनद्वारा भिन्नात्मज्ञानसाधनविचारादा

विद्याप्रवृत्यादिकमप्युत्पादयति नहि द्यादेर्भिन्नात्मविचारद्वारा यज्ञादि फलभूत निष्प्रपंचब्रह्मसाक्षात्कारहेतुत्वाभावात्
तथाच स्मृतिः ईश्वरानुग्रहादेव पुंसामद्वैतवासनेति यज्ञादिसंपादितादीश्वरानुग्रहादेव पुंसामद्वैते ब्रह्मज्ञाने छारूपा नद्वासनाभ
ॐ सि वतीतितदर्थः तथाच ययोक्तभ्रमवतो द्वैतब्रह्मतत्वसाक्षात्कारादाविच्छाश्रद्धादिशून्यस्य श्रवणविधावनधिकारान्न तं प्रतिनिय
ले० टी मविधिरर्थवानित्याह ईश्वरानुग्रहेति पराभिमतेति अतावात्मशब्दस्तावज्जीवपर एव न परमात्मपरः आत्मनस्तु कामाय सर्वे
२१ पि प्रियं भवतीति पूर्ववाक्ये जीवस्य प्रकृतत्वात् नच इदं सर्वं यदयमात्मेति वाक्यशेषे सर्वात्मकस्य परमात्मनः प्रतिपादनाच्छ्रु
त्यद्वैतात्मपरत्वे द्वैतविचारोऽर्थवानितिवाच्यं स्वयमेवतात्पर्यभ्रमहेतोस्तस्य तन्निरासकत्वाभावेन साधनांतर
प्राप्त्यभावात् नचनिरासकत्वभ्रमेन तत्प्राप्तिकस्य चित्प्रवृत्तिः स्यादित्येतावता श्रोतव्य इति नियमविधेरभ्युपगम
इत्यपिन ईश्वरानुग्रहफलाद्वैतश्रद्धारहितस्य श्रोतव्यवाक्येपि पराभिमतयोजनया सद्वितीयात्मविचारविधि
परत्वभ्रमसंभवेन भ्रमप्रयुक्तायाश्चान्यत्र प्रवृत्तेर्विधिशतेनाप्यपरिहार्यत्वात् नच व्यापारांतरनिवृत्त्यर्था परिसं
ख्येति युक्तं असंन्यासिनो व्यापारांतरनिवृत्तेरशक्यत्वात्
तद्यवाक्यस्य मात्मपदं सद्वितीयात्मपरमिति वाच्यं तत्रापि तत्प्र
तिपादनासिद्धेर्नहि प्रपंचपरमात्मनोरभेदः संभवति चेताचेतनयोरैक्यस्य विरुद्धत्वात् श्रुतेर्भेदध्यानविधिपरत्वोपपत्तेश्चेत्यादि राम
योजनापराभिमता दृष्टव्या अन्यत्रेभिन्नात्मविचार इत्यर्थः परिसंख्याविधिं दूषयति नचेति श्रवणविधिना किं गृहस्थादेर्व्यापा २१
रांतरनिवृत्तिरुपदिश्यते किं वा संन्यासविधिसिद्धस्य संन्यासिन इति विकल्प्य मनसि निधाय क्रमेणाद्यं दूषयति असंन्यासिन इति

अशक्यत्वादिति विध्यंतरविरोधापत्तिरशक्यत्वेहेतुः तन्निष्टत्वेऽसिद्धत्वयोपदेशस्यवैयर्थ्यत्वादितिसम्बन्धः ब्रह्मसंस्थोऽमृतत्वमेतीति
श्रुत्यंतरस्यब्रह्मसंस्थाधर्मकसंन्यासाश्रमविधायकत्वंपरामर्शजैमिनि इत्यधिकरणभाष्येस्फुटमितिभावः विचारविषयत्वेन
वेदांतनियमविधिरितिपक्षंदूषयति नचविचारेति सन्निधानादेवेति अधीतसांगस्वाध्यायस्यवेदांतैरापातप्रतिपन्नब्रह्मात्म
जिज्ञासोर्जिज्ञासानिवर्तकनिर्णायकर्त्तव्यत्वेनविचारेप्राप्तेसतिविचारविषयमन्वेषमाणस्यवेदांतानांबुद्धिस्थत्वात्वेदांता
एवमयाविचारणीयाइतिबुद्धिरुत्पद्यते तथाचविधिंविनैववेदांतनियमस्यलब्धत्वेनविधिनातन्नियमनंव्यर्थमित्यर्थः विधिविने

संन्यासिनस्तन्निष्ठत्वेब्रह्मसंस्थयासहसंन्यासविधायकेनब्रह्मसंस्थोऽमृतत्वमेतीतिश्रुत्यंतरेणासिद्धिनयासंन्यासविधाय
कश्रुत्यंतरमपेक्ष्यश्रोतव्यवाक्येनतस्यव्यापारांतरनिष्टत्त्युपदेशस्यव्यर्थत्वात् नचविचारविध्यसंभवेपिविचा
रविषयवेदांतनियमविधिःसंभवतिभाषाप्रबन्धव्यावर्त्यसत्वादितिशक्यं सन्निधानादेववेदांतनियमस्यलब्ध
त्वेनविधिविषयत्वायोगात् स्वाध्यायोऽध्येतव्यइत्यर्थावबोधनार्थनियमविधिबलादेवाध्ययनगृहीतवेदोन्यादिते

ववेदांतनियमस्य....तरमाह स्वाध्यायइति अर्थावबोधेति मीमांसकमतमाश्रित्योक्तम् तत्रावाप्तिफलकोऽध्ययनविधि
रितिसिद्धांतेपियेषांवाक्यानामध्ययनाम्नानामर्थज्ञानद्वारापुरुषार्थोपयोगस्संभवतितेषांवाक्यानामर्थज्ञानमध्ययनलब्ध
वाक्यैरेवोन्यादितंफलपर्यवसायिनतदतिरिक्तभाषाप्रबन्धादिजनितमितिरीत्या अध्ययनविधिफलोत्तरावाप्तेःपुरुषा
र्थपर्यवसानकल्पनान्नभाषाप्रबन्धादिप्रसक्तिरित्यर्थः इतिहासपुराणमादिपदार्थः श्रवणादीनामविधेयत्वेसूत्र

ॐ सि· ले· टी २२

भाष्याविरोधं शंकते नचेति अभ्युपगत इति सूत्रभाष्यकाराभ्यामिति शेषः विरोधं परिहरति प्रथमं श्रवणादीनां विधियोग्यक्रियारूप
त्वेऽपि नित्यप्राप्तत्वान्न विधेयत्वमित्याह विचार इति तत्प्रत्ययेन तत्तत्पदं वस्तुपरं अवगमस्य वैशद्यं प्रतिबन्धराहित्यं सूत्रभाष्य
योर्विधित्वव्यवहारो गौणः मुख्यासंभवस्य दर्शितत्वादिति विरोधं परिहरति विधिच्छायार्थवादस्यैवेति विष्णुरुपांशुयष्टव्य इत्या
देरिवेत्यर्थः तथाहि उपांशुयाजमंतरायजतीत्याम्नाय पुनराम्नायते विष्णुरुपांशुयष्टव्यः प्रजापतिरुपांशुयष्टव्यः अग्नीषो

वेदार्थज्ञानं फलपर्यवसायि न कारणान्तरोत्पादितं भिन्नस्यार्थस्य लब्धत्वेन वेदार्थब्रह्मणि मोक्षाय ज्ञातव्ये भाषाप्रबंधा
दीनामप्राप्तेः नच सहकार्यन्तरविधिरित्यधिकरणे बाल्यपाण्डित्यमौनशब्दितेषु श्रवणमनननिदिध्यासनेषु विधिरभ्युप
गत इति वाच्यं विचारे विचार्यतात्पर्यनिर्णयहेतुत्वस्य वस्तुसिद्ध्यनुकूलयुक्त्यनुसन्धानरूपे मनने तत्प्रत्ययाभ्यासरूपे वस्तु:
निदिध्यासने च वस्त्ववगमवैशद्यहेतुत्वस्य च लोकसिद्धत्वेन तेषु विध्यनपेक्षणात् विधिच्छायार्थवादस्यैव प्रशंसाद्वा
राप्रवृत्त्यतिशयकरत्वमात्रेण तत्र विधित्वव्यवहारात्

मावुपांशुयष्टव्याविति अत्रान्तरावाक्यमाग्नेयाग्नीषोमीयपु
रोडाशयोरन्तरालकालविशिष्टयागविधायकं विष्ण्वादिवाक्यत्रयं तु मंत्रवर्णप्राप्तवैकल्पिकदेवतानुवादेनान्तरावाक्यविहितया
गस्तावकमर्थवादमात्रमिति व्यवस्थापितं पूर्वतंत्रे नेदं तद्दृष्टान्तत्वेनोदाहृतमिति द्रष्टव्यं यत्तु तत्कारणेसोऽव्ययोगाभिपन्नमिति श्रु
तो योगपदोपात्तस्याव्यावृत्तस्य संभवाद्विचारसमर्थाधिकारिणं प्रति तद्व्यावृत्तिफलको नियमविधिः संभवतीति तन्न ॥

राम २२

विचारसमर्थस्याधिकारिणः कालांतरे स्वोद्भावितानुपपत्तिवशेनोत्प्रेक्षावितानुपपत्तिवशेन वा पुनस्तत्त्वसंशये सति श्रवणधारणात्मकं
र्थ वेदांतर्ज्ञानेन संभवतीति योग्यत्वावशेन तं प्रति विधिं विना विचारस्यैव नित्यतया प्राप्तत्वात् यत्तु सगुणब्रह्मोपासनव्यावर्त्यमुक्तं
तन्न श्रवणविध्यधिकारिणः सर्वतो निस्पृहस्य ब्रह्मलोकप्राप्तिद्वारा मुक्तिसाधनसगुणोपासने पत्तेपि प्रवृत्तेरसंभवेन तस्य व्या
वर्त्यत्वासंभवात् सगुणोपासनस्यापि श्रवणादिद्वारैव विद्यासाधनत्वेन नखविदलनादेरवघाततुल्यकल्पत्ववत्सगुणोपास
नस्य श्रवणादिना सह विकल्पेन प्राप्त्यभावाच्च न तद्व्यावृत्तिफलको नियमविधिः संभवति न च सगुणोपासनया श्रवणादिकं
विनैव सगुणसाक्षात्कारवन्निर्गुणसाक्षात्कारोदयः संभवतीति वाच्यं प्रमाणप्रमेयासंभावनादि[illegible]प्रतिबन्धनिवृत्तिद्वारा श्रवणा
देः सत्त्वनिश्चयरूपब्रह्मज्ञानोपायत्वग्राहकतया पूर्वोक्तप्रमाणानुरोधेन श्रवणादेर्नित्यवदनुवादलिंगेन सगुणोपास
नयाक्रमेण परमुक्तिप्रतिपादकशास्त्रस्यापि श्रवणादिद्वारकज्ञानोत्पत्त्यविरोधित्वकल्पनात् श्रवणादिकं विना सगुणो
पासनमहिम्नैव तत्त्वज्ञानोदयोपगमे देवताधिकरणविरोधाच्च तदधिकरणे हि देवतादीनां शरीराद्यभावात्सगुणब्रह्मोपा
सनेषु निर्गुणब्रह्मविद्यासाधनश्रवणादिषु च नास्ति सामर्थ्यमतो न तेष्वधिकार इति पूर्वपक्षयित्वा मंत्रार्थवादेतिहासपुराण
प्रामाण्यात् तेषामपि शरीरादिसद्भावात्तस्याधिकार इति सिद्धांतितं न चेदं पूर्वपक्षप्रयोजनं उक्तं देवतानां श्रवणाद्यधिकाराभावे क्र
ममुक्तिफलकब्रह्मोपासनया प्राप्तदेवभावस्यापि श्रवणाद्यसंभवेन विद्योदयासंभवात् पुनरावृत्त्यापत्तेः क्रममुक्तिकामस्य सगु
णोपासनेषु प्रवृत्त्यभाव इति सिद्धांते तु देवानां श्रवणाद्यधिकारसत्त्वादुक्तप्रवृत्तिसिद्धिरिति प्रयोजनं दर्शितं इदं च प्रयोजनं दे
वताधिकरणावसानभाष्यस्वरसाद्दर्शितं तथा च भाष्यं न तत्रार्थित्वादिसंभवादुपपत्तौ देवादीनामपि ब्रह्मविद्याया

मधिकारः॰ऊ मनुष्यादिदर्शनान्यप्येवमेवोपपद्यन्तेइति एवमेवेत्यस्य देवादीनांश्रवणाद्यधिकारे सत्येवेत्यर्थः तेषांश्रवणाद्यधिका
ॐ सि· रेयानिश्चोनलिंगानि पूर्ववदुपन्यस्तानि तद्यथा यो देवानांप्रत्यबुध्यत सएवतदभवत्तथर्षीणामेकाश्रंतेहवैववर्षाणिमघवान्प्र
जापतौब्रह्मचर्यमुवासेत्येवमादीनि नानियथाउपपद्यन्ते तथेत्यपिप्राह्यार्थः ननुसगुणब्रह्मोपासकानामपि सर्वेषांश्रव
ले·टी· णादिनैवज्ञानोदयइतिनियमोनास्तिसगुणोपासकस्यापिहिरण्यगर्भस्य बृहदारण्यभाष्येपुरुषविधब्राह्मणव्याख्याना
२३ वसरे श्रवणादीनांप्रणिपातादीनांचाभावेपिज्ञानजन्मप्रतिपादनादितिचेत् न हिरण्यगर्भस्यापिवामदेववज्जन्मांतरी
यश्रवणादिनैवज्ञानजन्मसंभवात् तत्रैवभाष्ये श्रवणमनननिदिध्यासनैर्नासाक्षात्ज्ञेयविषयत्वादितिवाक्ये साक्षात्प
देन श्रवणादेर्ज्ञेयब्रह्मव्यंजकस्य प्रणिपातादेस्तपसश्चावश्यकत्वसूचनेनजन्मांतरीयश्रवणादिकल्पनस्यतद्भाष्यवाक्या
भिप्रेतत्वेऽवगम्यमानेसतितत्पूर्वभाष्येश्रवणादिकंविनाकार्यकारणशुद्ध्यादिमात्रेणज्ञानजन्मप्रतिपादनस्याभ्यु
पगमवादत्वोपपत्तेर्हिरण्यगर्भस्यवामदेवस्येवजन्मांतरीयज्ञानसाधनेकल्पनीयेसतितत्र श्रवणादिकल्पनस्यैव
न्याय्यत्वाच्च नचहिरण्यगर्भस्य पूर्वजन्मनिसगुणोपासननिष्ठत्वेननिर्गुणविचारःसंभवतीतिवाच्यं हिरण्यगर्भस्यपूर्व
कल्पजन्मभेदेन सगुणनिर्गुणोपासनयोःसंभवात् नह्येकस्मिन्जन्मनिकृतात्सगुणोपासनमात्रादेवहिरण्यगर्भ
पदप्राप्तिरस्ति तथासतिसगुणोपासकानांसर्वेषामेव साक्षाद्धिरण्यगर्भत्वप्रसंगात् किंतुहिरण्यगर्भस्यब्रह्मलोकस्वामि राम
त्वंसरस्वतीभर्तृत्वेजन्मप्रभृतितत्त्वसाक्षात्संपन्नत्वंसर्वज्ञत्वंसकलभौतिकजगत्सृष्ट्यादिसामर्थ्यंभक्तानांत्रैलोक्यैश्वर्य २३

श्रदानसामर्थ्येकार्यविशेषुशिवविस्न्वादिप्रवर्त्तकत्वंललाटाद्रुद्रप्रादुर्भावहेतुत्वंमहाविष्णुनाभीकमलजातत्वाद्यैश्वर्यंचश्रुत्या
दिभ्योनिश्चित्यागामिकल्पेयथोक्त हिरण्यगर्भत्वायतत्साधनानिसगुणनिर्गुणोपासनानितयोर्विशेषरूपाणिचवहूनुजन्मसुध्रु
वप्रह्लादवामदेवविश्वामित्रागस्त्यभृग्वादिवदनुष्ठितवतोमहापुरुषस्यकस्यचिद्देवनिरतिशयेश्वरप्रसादाद्धिरण्यगर्भत्वंसंपद्यतइति
हिरण्यगर्भस्यापिजन्मान्तरीयश्रवणादिकल्पनेवामदेवस्येव नानुपपन्नं हिरण्यगर्भस्यपूर्वजन्मन्यनुष्ठितश्रवणादेर्हिरण्यगर्भप
दप्राप्तिकामनयाप्रतिबंधत्वेनतदातत्वसाक्षात्कारानुत्पादकत्वोपपत्तेः तदुक्तंवृद्धैः ब्रह्मलोकाभिवांछायांसम्यक्सत्यांनिरुध्य ^श्रवणादि
तां विचारयेद्यआत्मानंनतुसाक्षात्करोत्ययमिति नचज्ञानोत्पत्तिस्थलेसर्वत्रनियमोनास्तियोगमार्गप्रवृत्तस्यश्रवणाद्यभावेपि
तत्वसाक्षात्कारस्वीकारादितिवाच्यं ॐमित्यात्मानंयुंजीत ॐमित्येवंध्यायथ आत्मानमित्यादिध्यानविधिवलेनतत्कारणांगं
त्वयोगाभिपन्नेविद्यमामेतांयोगविधिंचकृत्स्नमित्यादिश्रौतलिंगसहकृतेनविचारासमर्थस्ययोगमार्गेऽधिकारइति
तृतीयपरिच्छेदेवक्ष्यमाणतयाविचारसमर्थस्यविचारंविनाज्ञानोत्पत्त्यनभ्युपगमात् एवंयद्यत्साधनमदृष्टद्वारातत्वज्ञा
नसाधनत्वेनशास्त्रसिद्धंतत्सर्वंसगुणोपासनवददृष्टसामग्रीभूतसांख्यमार्गेणतदशक्तौयोगमार्गेणवातत्वज्ञानसाधनमि
तिकल्प्यतेनत्वदृष्टमात्रात्ज्ञानलाभःकल्पयितुंयुक्तः अन्यथाजीर्णादृष्टमात्राद्देवदत्तस्यपानादिप्रवृत्तिकल्पनापत्त्यात
त्रापीष्टसाधनतास्मरणंजन्मान्तरीयसंस्कारहेतुकं सर्वसंप्रतिपन्नंकल्पनीयंनस्यात् लोकेपिदृष्टकारणंविनाकार्योत्पत्त्ययो
गस्योभयत्रतुल्यात्वात् अतएव पंचदश्यांतत्वज्ञानंप्रतिमार्गद्वयनियमउक्तः सांख्ययोगप्रकृत्य इतिमार्गाविचार्याथजगा
दपरमेश्वरः इतिसंग्रहकर्त्तापि तृतीयपरिच्छेदेसांख्ययोगशब्दितमार्गद्वयमेवविद्यावाप्त्युपायत्वेनवक्ष्यति ॥

ओं सि
ले॰ टी
२५

एवंश्रवणमननादिसाधनानुष्ठान श्रवणस्यविद्यावाप्तिरित्यस्मिन्वर्थेसर्वसंप्रतिपन्नेस्मिन्नेभारतीतीर्थाःध्यानदीपेविद्यावा
प्तौउपायान्तरमप्याहुरितिग्रन्थेन तदयनिष्कर्षः विद्याधिकारिणोविचारसमर्थस्यप्रतिषेधाभावेवेदान्तश्रवणमनुष्ठे
यंसतितुप्रतिषेधेइतिहासपुराणभाषाप्रबन्धादिश्रवणमनुष्ठेयं विद्याधिकारिणोविचारासमर्थस्यतुत्रैवर्णिकस्ययोग
शास्त्रोक्तनिर्गुणोपासनमनुष्ठेयंमार्गद्वयासंभवेचतत्संभवयोग्यजन्मप्राप्त्यानन्यतरानुष्ठानद्वाराज्ञानलाभइति
तथाचश्रवणाधिकारिणःश्रवणस्यनित्यप्राप्तत्वात्तत्तुल्यकालत्वस्यतयासाधनान्तरस्यकस्यचिद्विकल्पसमुच्चित्यप्राप्त्यभावा
त्तेनतत्रविध्यवकाशइतिसिद्धं एवंब्रह्मसाक्षात्कारंप्रतिश्रवणादेर्नित्यप्राप्तत्वात् विधिंविनैवश्रवणाद्यनुष्ठानंसिद्ध्यतीति

एवंचश्रवणविध्यभावात्कर्मकाण्डविचारवद्ब्रह्मकाण्डविचारोप्यध्ययनविधिमूलइत्याचार्यवाचस्पतिपक्षानु
सारिणः

प्रतिपादितं इदानींविचारानुष्ठापकविध्यपेक्षायामपियथाकर्मकाण्डश्रवणंकर्मवाक्यविचारःकर्तव्यइतिपृथग्विध्यभावे
प्यध्ययनविधिबलादेवसिध्यति एवंवेदान्तश्रवणमपितद्बलादेवसिध्यतीतिनश्रोतव्यवाक्येपृथग्विध्यपेक्षास्तीत्याशये
नोपसंहरति एवंचेति लोकतएवश्रवणादेःप्राप्तत्वेसतिश्रवणविध्यपेक्षाभावादित्यक्षरार्थः श्रोतव्यवाक्यार्थ राम
विचारेणप्रथमसूत्रार्थः संगृहीतः क्रमप्राप्तंद्वितीयसूत्रार्थंसंगृह्णाति २५

॥म॥

विचार्यस्येचेति चकारोऽवधारणार्थः स च अन्यनेनसंबध्यते अन्यैवलक्षणमुक्तं ननु व्याघ्रादिलक्षणवत्पुरुषोत्पत्तेस्तिनमित्यर्थः येन
ज्ञानानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्यशेषस्थादिपदार्थः अत्रौयन इतिपञ्चमेन ब्रह्मवल्लीनिरूपि
तं सत्यज्ञानानंदात्मकं ब्रह्म परिगृह्यते सर्वनाम्नः प्रकृतप्रधानपरामर्शित्वस्वाभाव्यात् ननु अस्य च श्रुतिसामर्थ्याद्देव ब्रह्मणः सच्चि
दानंदस्वरूपात्मकं स्वरूपलक्षणं लभ्यते पंचमी च प्रकृतित्वहेतुत्वसामान्यवाचकीति हेतुत्वसामान्येन च प्रकृतिकर्तृभयसाधार
णमित्यविशेषात् भिन्ननिमित्तोपादानत्वरूपं लक्षणं लभ्यते इदं शब्देन प्रत्यक्षाद्युपस्थितं सर्वमुच्यते भूतशब्दस्य पृथिव्यादिमहा
भूतेषु प्राणिषु च रूढः प्रकृते च विनिगमनाविरहेण रूढ्योरनुन्मेषात् भवंतीति व्युत्पत्त्या कार्यमात्रं भूतशब्देनोच्यते जीवंति स्थि

विचार्यस्यैव ब्रह्मणो जगज्जन्मस्थितिलयकारणत्वं लक्षणमुक्तं यतो वा इमानि जायंत इत्यादिश्रुत्या

तिं लभंते प्रयंति लीयमानानि संति यदभिसंविशंति येन नाशमुपगच्छंतीति यावत् तत्कारणं ब्रह्म तद्विजिज्ञासस्व विशेषेण सच्चिदानंदे
कारसम्पूर्णप्रत्यग्रूपेण ज्ञातुं साक्षात्कर्तुमिच्छ सद्गुरुमनाचेणेति साक्षात्कारालाभात्त्वन्त्रत्ययेन विचारो लक्ष्यते उक्तं लक्षणमुपवने
ब्रह्म विचारयेत्यर्थः अत्र यतो भूतानि जायंते तद्ब्रह्म येन जीवंति तद्ब्रह्म यदभिसंविशंति तद्ब्रह्मेति श्रुतिपाठे सति जगज्जन्मका
रणत्वं तत्स्थितिकारणत्वं तल्लयकारणत्वं च प्रत्येकमेव अन्या ब्रह्मलक्षणमुक्तं स्यात् ननु तथा पाठोऽस्ति यतो जन्मादित्रितयकार
णत्वं अन्या लक्षणमुक्तमिति प्रतिभाति न दोषापत्तिः अत्र जगज्जन्मस्थितिलयेष्विति निर्द्धारणार्था सप्तमी यतो भूतानि

जायंत इत्युपक्रम्य तद्ब्रह्मेति श्रुत्या लक्ष्यते ब्रह्मणि कारणत्वस्य सत्त्वप्रतिपादनान्नासंभवः तदुक्तं प्रत्येकवचनेन लक्ष्यब्रह्मण्यते
ॐ सि॰ रेकत्वावगमान्नाव्याप्त्यवकाश इति निर्दोषद्वयाभावं सिद्धं कृत्वाऽतिव्याप्तिरपि नास्तीत्याह अनन्यगामित्वादिति ब्रह्मान्य
गामित्वाभावादित्यर्थः ननु प्रधानेऽतिव्याप्तिस्तस्याः सांख्यैरुपादानत्वाभ्युपगमेन उपादानतया जगज्जन्महेतुत्वस्याधा
ले॰ टी॰ रत्वात् स्थितिहेतुत्वस्य लयाधारतया लयहेतुत्वस्य च तत्रापि सत्त्वादिति चेन्न तत्कर्तृत्वस्यापि लक्षणविशेषणत्वेन वि
२५ वक्षितत्वात् तया जडे प्रधाने तदयोगात् न च तत्कर्तृत्वमेव प्रत्येकं लक्षणमस्तु किं तदुपादानत्वरूपविशेष्येणेति वाच्यं अदृष्ट

अत्र जगज्जन्मस्थितिलयेषु प्रत्येकं कारणत्वमपि अनन्यगामित्वाल्लक्षणं भवितुमर्हतीति चेत् सत्यम्

द्वारा जगज्जन्मादिकर्तरि जीवेऽतिव्याप्तिवारकत्वात् परिच्छिन्नजीवस्य च तदुपादानत्वायोगात् न च साक्षाज्जगज्जन्म
कर्तृत्वं नियंतृतया जगत्स्थितिहेतुत्वं संजिहीर्षया जगत्संहर्तृत्वं लक्षणमिति विवक्षायां जीवेऽतिव्याप्त्यभावादुपादानत्वरू
पविशेष्यं व्यर्थमेवेति वाच्यं तर्हि उपादानत्वमपि पृथगेव लक्षणमस्तु मायायाः ब्रह्मोपादानमाया च घटकत्वेन पृथगुपा राम
दानत्वालाभात् प्रधानादिकारणान्तरस्य चाप्रामाणिकत्वेनातिव्याप्तेरभावादिति भावः प्रत्येकं लक्षणत्वसंभवमंगीकरोति २५
सत्यमिति तर्हि श्रुत्या त्रितयकारणत्वं कथं लक्षणमुक्तमित्याशंक्य श्रुतेरपि प्रत्येकलक्षणमेव तात्पर्यं मेलनस्य प्रयोजना
भावादित्याशयेनाह

लक्षणत्रयमेवेविमिति इदंजगत्कारणत्वंजन्मादीनां एकैकनिरूपितंपरस्परंनिरपेक्षं सल्लक्षणत्रयमेवश्रुत्यभिमतं ननुत्रितयनि
रूपितकारणत्वरूपमेकंलक्षणमित्यर्थः त्रयपदमनेकपरं ननुत्रित्वविशिष्टमपरं ततोप्याधिक्यस्यशंकावसरेदर्शितत्वादितिवा
ध्यंजगत्संहर्तृत्वादेः प्रत्येकंब्रह्मलक्षणत्वेसूत्रकारादिसंमतिमाह अतएवेति अत्त्रादिपदेन अन्तर्याम्यधिकरणजगद्वाचित्वा
धिकरणयोः संग्रहः अयमर्थः कठवल्ल्यांपठ्यते यस्य च ब्रह्म च क्षत्रं चोभे भवत ओदनं मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स
३५ इति अत्र ब्रह्मक्षत्रयोः प्रयुक्तओदनशब्दस्तावन्नमुख्यः किंतुगौणः लोकेओदनशब्दमुख्यार्थस्यादनीयत्वप्रसिद्धं दनीय
त्वगुणेन तयोरोदनशब्दः प्रवर्तते तथा च यस्य ब्रह्मक्षत्रे यस्य ओदनवदद्नीये इत्युक्तौ यच्छब्दार्थस्यात्तृत्व प्रतीयते अनेनैवा

लक्षणत्रयमेवेदं परस्परनिरपेक्षं अतएवात्ताचराचरग्रहणादित्याद्यधिकरणेषु सर्वसंहर्तृत्वादि
कं प्रत्येकं ब्रह्मलिंगतयोपन्यस्तमितिकौमुदीकारः

भिप्रायेणोक्तं सूत्रे अत्तेति ओदनपदवाच्यार्थस्यादनीयत्वंहि
विषमत्तिभुजिक्रियाकर्मत्वात्मकभोज्यत्वरूपमेकं विनाश्यत्वरूपमपरं परंतुभोज्यत्वगुणः प्रसिद्धः ननुविनाश्यत्वगुणः गौ
णप्रयोगे च प्रसिद्धगुण एव गृह्यते अग्निर्माणवक इत्यत्राग्निगतशुचित्वादिगुण एवोपादीयते प्रसिद्धत्वान्नतुतक्षतो
पिविनाश्यत्वादिगुणः एवंप्रकृतेपिलोकप्रसिद्धत्वलाद्भोज्यत्वगुणएवौदनशब्दात्प्रतीयते अस्ति च ब्रह्मक्षत्रयोरपिस्त्री
पिंडरूपयोर्भोज्यत्वं एमासेन प्रतिब्रह्मक्षत्रयोश्च भोज्यत्वप्रतीतौ सत्यांतन्त्रेति संबन्धिनियच्छब्दार्थे पूर्वप्रतीतमत्तृत्वमात्तृ

ॐ सि
ले॰ टी
२९

त्वरूपजीवलिंगंपर्यवस्यति यदात्वोदनपदस्यमृत्यूपसेचनसन्निधानाद्ब्रह्मक्षत्रयोर्विनाशित्वगुणःस्वीक्रियतेतेनतुभोज्यत्वगु
णःस्वीपिंडरूपब्रह्मक्षत्रयकमेकभुजिक्रियायांमृत्योरुपसेचनत्वासम्भवेनमृत्युर्यस्योपसेचनमित्यंशस्यानन्वयप्र
संगात् ब्रह्मक्षत्रयोर्विनाशनेतुमृत्योःसहायत्वमस्तीतिनतदनन्वयप्रसक्तिः तदात्तेति संवन्धियच्छब्दार्थपूर्वप्र
तीतमतृत्वेसंहर्तृत्वरूपंपर्यवस्यति विनाशित्वगुणग्रहणपक्षेत्वयंविशेषोलभ्यते लोकेहिदध्यादिरूपमुपसेच
नेनत्वमिश्रितान्नादिनाशसाधनंदृष्टमितिमृत्यावुपसेचनपदप्रयोगवलात्तस्यमृत्युकस्यचराचरात्मकस्यजगतोपिवि
नाशनेप्रतीयतेतदनुसारात् ब्रह्मक्षत्रयपदयोरजहल्लक्षणयाकृत्स्नजगत्परत्वंचप्रतीयतेतेनात्तेति संवन्धिन्यपिय
च्छब्दार्थकृत्स्नजगत्संहर्तृत्वरूपंब्रह्मलिंगंभाति एवंस्थितेप्रथममदनीयत्वगुणयोगात् प्रतीतोत्ताकिंजीवःउतपरमात्मे
तिसंशयः तत्रपूर्वपक्षः जीवएवेति लोकप्रसिद्ध्यनुसारेणात्तृत्वस्यभोक्तृत्वरूपताप्रतीतेर्नपरमात्मा अनश्नन्नितिव
चनेनतस्यभोक्तृत्वनिषेधादिति सिद्धांतस्तु अत्तापरमात्मा कुतः चराचरग्रहणात् मृत्यूपसेचनपदानुरोधेनपूर्वोक्त
रीत्या अत्तृत्वस्यचराचरात्मकसकलजगत्संहर्तृत्वरूपत्वप्रतीतेर्नचपरमात्मनोन्यस्यजगत्संहर्तृत्वंसंभवति नच
लोकप्रसिद्धिवलादत्तृत्वंभोक्तृत्वरूपंभातीतिउक्तमितिवाच्यम् तत्प्रसिद्ध्यपेक्षयावाक्यशेषाधीनविनाशगुणप्र
सिद्धेः शीघ्रतरत्वेनवलवत्वादतोत्तापरएवेतिनिर्णयः ससंहर्तापरमेश्वरोयत्रनिर्विशेषभेदकल्पनयावत्त
तेनेतिविशेषंपरमात्मानमित्थाकोवेदनकोपीतितस्यदुर्विज्ञेयत्वमुदाहृतेमंत्रचतुर्थपादेनविवृत्तमितिवोध्यं
अन्तर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात् यइमंचलोकंपरंलोकंचसर्वाणिभूतानियोन्तरोयमयतीत्युपक्रम्यय:

राम
२९

च   व

पृथिव्यां तिष्ठन्नित्यादिना कांश्चित्पर्यायानुक्त्वाऽस्त्यधिदैवतमित्युपसंहृत्य पुनः यः सर्वेषु भूतेषु तिष्ठन्यः सर्वेषु लोकेषु यः सर्वेषु वेदेषु
यः सर्वेषु यज्ञेष्वित्यादयः केचन पर्यायाः काण्वमाध्यंदिनपाठभेदेनाम्नाताः तत्राधिदैवादिषु देवभूतलोकवेदयज्ञादिष्वंतर्
यामी परमात्मा उक्तः तद्धर्मव्यपदेशात् तद्धर्मस्य परमात्मधर्मस्य विशेषेण सर्वस्थितिकर्तृत्वरूपसर्वनियंतृत्वस्य येन ज्ञाता
नि जीवंतीति श्रुतिसिद्धस्य वाक्योपक्रमे य इमं च लोकमित्यादिना व्यपदेशान्न जीवादिरंतर्यामी तस्योक्तधर्मासंभवादिति सू
त्रार्थः जगद्वाचित्वात् कौशीतकिब्राह्मणे बालाकि अजातशत्रुसंवादे बालाकिं ब्राह्मणं प्रति अजातशत्रोर्वचनं श्रूयते यो वै बा
लाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य [illegible] इति अत्र वेदितव्यत्वेनोक्तः पुरुषः जीवः परो वेति संशये
जीव इति पूर्वपक्षः पुरुषपदस्य जीवे रूढत्वात् पुण्यो वै पुण्येन कर्मणा भवति कर्म हैव तदूचतुरिति श्रुत्यादौ वेदे लोके च पुण्यकर्म
ण्ययतः सावीवत्ते तद्व्युत्पादोऽकर्मपदस्य धर्मादौ प्रयोगदर्शनेन तत्र न च रूढत्वाच्च उक्तं च तुः आर्तभागयाज्ञवल्क्याविन्यर्थः
कर्मसंबंधी पुरुषो जीव एव न परमात्मा तस्य धर्माद्यभावात् न चैतेषां पुरुषाणां कर्तेति वाक्ये न वेदितव्यपुरुषस्य प्रकृतादित्य
चंद्रादिपुरुषकर्तृत्वमुच्यमानं जीवे कथं संभवतीति वाच्यं भोगोपकरणभूतानामादित्यादिपुरुषाणां प्रतिभोक्तृ जीवस्या
दृष्टद्वारा कर्तृत्वोपपत्तेः अत एव यस्य वैतत्कर्मेति वाक्यं सफलमदृष्टद्वारा प्रकृतपुरुषकर्तृत्वोपपादकत्वात् इत्येवं प्राप्ते सि
द्धांतः कर्मशब्दस्य न धर्मादौ रूढिः चलनात्मकं कर्मेति प्रसिद्ध्यनुरोधेन परिस्पंदनस्य रूढत्वात् कथं तर्हि धर्मादौ तत्प्र
योगनिर्वाहः विहितप्रतिषिद्धरूपदेहादिपरिस्पंदजन्ये धर्मादौ लक्षणया प्रयोगोपपत्तेः न च देवताध्यानादिरूपम
नोमात्रव्यापारजन्ये धर्मादौ परिस्पंदजन्यत्वाभावेन लक्षणाया अप्रयोगापत्तेः योगे सति परिस्पंद इव धर्मादावपि रूढिरपरि

ॐ सि
ले· टी·
२७

हार्येतिवाच्यं तर्हि प्रकृतेर्विनिगमनाविरहेण ब्रह्मणोरनुन्मेषेनतिक्रियतइतिकर्मेति युत्पत्त्याकर्मपदंकार्यमाह एतत्पदमपिप्रत्यक्तायुप
स्थितवस्तुमात्रमाह प्रकृतस्यतत्परामर्शयोग्यस्यकस्यचिदभावात् तथाच एतत्कृत्स्नंजगत्यस्यकर्मकार्यमित्यर्थलाभेनवेदित
व्यपुरुषस्याशेषजगदुत्पत्तिकर्तृत्वसिद्धाविति तस्यब्रह्मलिंगं आदित्यादिपुरुषकर्तृत्वमपिनमुख्यंजीवस्यसंभवति एतेषांपु
रुषाणांकर्तृत्वंत्वत्रमुख्यकर्तृग्रहणासंभवेगौणकर्तृग्रहणायोगात् नचाशेषजगत्कर्तृत्वोक्तौनतएवआदित्यादिकर्तृत्वस्यापि
लाभात् पृथगुक्तिर्व्यर्थेतिवाच्यं मंत्रार्थवादेषुआदित्यचंद्रादिपुरुषाणांमहामहिमसंकीर्तनेनतेषुसंजातपरब्रह्मत्वभ्रा
न्तिनिवर्तकत्वेनपृथगुक्तिसाफल्यात् पुरुषपदस्यापिनजीवेरूढिः पूरणात्पुरुषइतिव्युत्पत्त्यायोगेनेवकृत्स्नजगद्व्यापिनिब्रह्म
णीवकृत्स्नशरीरव्यापिनिजीवेपिप्रयोगोपपत्त्यातत्ररूढेरकल्पनातत्कल्पनेपियोगवत्त्रू रूढेरपिजीवब्रह्मसाधारणेचेनतु
मात्रेकल्पनोपपत्तेश्च नपुरुषश्रुतिर्जीवपक्षपातिनीश्रुतिपोडवाचित्पुरुषपदाश्रवणाच्च तथाचायंसूत्रार्थो वेदितव्यः पु
रुषः परमात्माकृत्स्नजगत्कर्तृत्वात् नचहेत्वसिद्धिःकर्मपदस्यजगद्वाचित्वात्तस्माद्वेदितव्यः पुरुषः परमात्मेतिसिद्धं एवंचसर्वसं
हर्तृत्वादिकमित्यत्रादिपदेनांतर्याम्यधिकरणोक्तं सर्वनियंतृत्वरूपमर्थं स्थितिकर्तृत्वंजगद्वाचित्वाधिकरणोक्तं सर्वजगदुत्प
त्तिकर्तृत्वंचगृह्यते ननुयतइत्यादिश्रुत्याजीवव्यावृत्तेश्वरस्यतत्पदवाच्यस्यब्रह्मणोलक्षणमुक्तंमितिनान्यर्थवर्णनमयु[illegible]म
तद्धिजिज्ञासस्वतद्ब्रह्मेतिवाक्यशेषानुसारेणश्रुतेर्वाक्यार्थभूताद्वितीयब्रह्म जिज्ञास्यब्रह्मलक्षणा[illegible]प्रतिपादकत्वस्यैवाव
गमादित्याशंक्यश्रुतेस्तथाभूतब्रह्मपरत्वलक्षणमुपगच्छतांमतमाह अन्येत्विति चेतनाचेतनात्मककृत्स्नभूतोपादानत्व
प्रतिपत्तिर्हिब्रह्मणःद्वितीयत्वबाधहेतुः नचचेतनानांनित्यत्वात्कथंतदुपादानत्वंब्रह्मणइतिवाच्यं तेषांस्वरूपेणानित्यत्वेपिश
रीरहृदयविशिष्टतयाकार्यतोपगमात् नचैवमपिब्रह्मापेक्षयाद्वितीयस्यतत्कार्यस्यविद्यमानत्वात् कथंतदुपादानत्वमद्वितीयत्व रा २९

प्रत्यायकत्वमितिवाच्यं कार्यस्य हि उपादानमेव वास्तवं रूपं न तदतिरिक्तं वास्तवं रूपमस्ति नामरूपात्मकं जगद्रूपं तु मिथ्याभूतमित्यप्रमा
णाधिकरणेषु व्यवस्थापनत्वात् अतः सर्वोपादानत्वे सर्वस्य वास्तवं स्वरूपं ब्रह्मैवेति बोधनद्वारा ब्रह्मणो वास्तवो द्वितीयत्वबोधहेतुर्भव
ति अद्वितीयब्रह्मबोधश्च मुक्तिहेतुरिति मुक्तिप्रयोजनकब्रह्माद्वितीयहेतुभूतोपादानत्वप्रत्यायनार्थं यत्प्रयन्त्यभिसंविशंतीतिश्रु
तिभागेन ब्रह्मणः सर्वभूतलयोद्दर्शिन इत्याह उपादानत्वेति ननु घटाद्युपादाने मृदादौ घटादिलयाधारत्ववज्जन्मादिकारणत्व
स्यापि सत्त्वेन तद्बलाद्युपादानत्वे प्रत्ययः स्यादिति नेत्याह जन्मकारणत्वस्येति निमित्तं कुलालदंडचक्रादि तर्हि अतो जन्मा

अन्ये तु जगज्जन्मकारणत्वस्य स्थितिकारणत्वस्य च निमित्तसाधारण्यादुपादानत्वप्रत्यायनाय प्रपंचस्य ब्रह्मणि ल
योदर्शितः अस्तु ब्रह्म जगदुपादानं तज्जन्म हि घटजन्म हि कुलालवन्नास्थितो राज्यस्थितौ राजवच्चोपादानादन्य
देव निमित्तं भविष्यतीति शंकाव्यवच्छेदाय तस्यैव जगज्जननजीवननियामकत्वमुक्तम्

दिकारणप्रतिपादनं व्यर्थं लयमात्रप्रतिपादनादेवेष्टसिद्धेरित्याह अस्त्विति घटजन्मनि उपादानमृदतिरिक्तः कुलाल इव जगज्जन्म
न्यपि उपादानब्रह्मापेक्षया अन्यत्कर्तृरूपं निमित्तं भविष्यतीति भ्रमव्यवच्छेदाय तस्यैव ब्रह्मणः अतो जगज्जननकर्तृत्वमुक्तं तथा रा
ज्ञस्येपि पालनरूपे पालनीयप्रजाद्युपादानातिरिक्तराजवज्जगतः स्थितौ जगदुपादानब्रह्मापेक्षया अन्यन्निमित्तं नियंतृतया स्थिति
हेतुभूतं भविष्यतीति शंकाव्यवच्छेदाय तस्यैव ब्रह्मणो जगज्जीवननियामकत्वं अन्यथोक्तमित्यर्थः तथा चेति जगज्जननजीवननिया
मकत्वाभ्यां जगदुपादानब्रह्मण एव तन्निमित्तत्वप्रतीतौ सिद्धायामित्यर्थः इदं अत्युक्तं लक्षणमुक्तं तदेवाभिन्ननिमित्तोपादानत्वे पर्य

वस्तद्द्वितीयं ब्रह्म लक्षयति ब्रह्मव्यतिरिक्तवस्त्वस्तित्वशंकानिराकरणद्वारेण ज्ञापयति ननु प्रत्येकलक्षणं स्यादित्यर्थः निमित्तं च तदुपादा
उ॰ सि॰ नं चाभिन्नं च तत् तन्निमित्तोपादानं चेति पुनः कर्मधारयः आदिकर्मधारयादेव निमित्तोपादानयोरभेदे सिद्धेपि पुनरभिन्नपदं कर्मधा
रयावगतोऽभेद एव लक्षणं एव न नीलोत्पलादौ गुणगुणिनोरिव तादात्म्यरूप इति ज्ञापनार्थमिति बोध्यं ननु यत इति पंचमीश्रु
ले॰ टी॰ त्या सर्ववस्तुलयाधारत्वलिंगेन च निश्चितं ब्रह्मण उपादानत्वं प्रधानस्येव परिणामित्वरूपं वा परमाणूनामिवारंभकत्वरूपं
२८ वा रज्वादेरारोपितसर्पाद्युपादानस्येव जगद्रूपविवर्त्ताधिष्ठानत्वरूपं वाच्य तत्र नाद्यः ब्रह्मणः कूटस्थत्वात् परिणामवादे हि

तथा चैकमेवेदं लक्षणमभिन्ननिमित्तोपादानतयाऽद्वितीयं ब्रह्म लक्षयतीत्याह ब्रह्मणश्चोपादानत्वमद्वितीय
कूटस्थचैतन्यरूपस्य न परमाणूनामिवारंभकत्वरूपेण वा प्रकृतेरिव परिणामित्वरूपेण किंतु अविद्यया वियदादि
प्रपंचरूपेण विवर्त्तमानत्वलक्षणं वस्तुनस्तत्समसत्ताकोऽन्यथाभावः परिणामः

परिणामपरिणामिनोर्वास्तवाभेदस्वीकारेण ब्रह्मणो परिणामित्वे परिणामजन्मादयोपि ब्रह्मणि प्रसज्येरन् तथा च जन्ममरणादिवि
कारशून्यत्वलक्षणं श्रुतिसिद्धकूटस्थत्वं तस्य भज्येत न तेश्च कूटस्थत्वात् तस्य परिणामित्वं न संभवति न द्वितीयः अद्वितीयत्वात् ब्रह्म
णः सद्वितीयत्वे हि परमाणुद्वयस्य संयोगवत् समवायिकारणलाभसंभवादारंभकत्वं भवेदित्याशयेनाह ब्रह्मणश्चेति तृतीयः
प्रकारः परिशिष्यत इत्याह किंत्वित्यादिना ननु ब्रह्मतद्विवर्त्तप्रपंचयोरभेदः सिद्धांते उपेयते आरंभवादे तु आरभ्यमारंभकाद
त्यंतं भिन्नमुपेयत इति आरभ्यविवर्त्तयोर्भेदः स्पष्टः सिद्धांत इव परिणामवादेपि सांख्याद्यभिमते परिणामपरिणामिनोरभेदाभ्युप
गमात् विवर्त्तपरिणामयोर्भेदः कथमवगंतव्य इत्याशंक्य लक्षणभेदादित्याह वस्तुन इति वस्तुन उपादानत्वाभिमतस्य

अन्यथापूर्वरूपापेक्षयारूपांतरेणभावः भवनं अवस्थाने अन्यथाभावः अवस्थाविशेषइतियावत् तत्समसत्ताकः तेनवस्तुनासमान
सत्ताकस्यान्यथाभावस्यसत्वात् तथाच उपादानत्वाभिमतवस्तुसत्तासमानसत्ताकत्वेसतितदवस्थाविशेषरूपत्वंतत्परिणामत्वमिति त्व
परिणामलक्षणंपर्यवस्यति तत्रविवर्तवारणायसत्यंतंघटस्यतंतुपरिणामत्ववारणायविशेष्यं विवर्तलक्षणमाह तदिति वस्तु
तत्तदसमसत्ताकोऽन्यथाभावोविवर्तइतिसंबन्धः उपादानत्वाभिमतवस्तुसत्ताविषमसत्ताकत्वेसतितदवस्थाविशेषरूपत्वंतद्वि
त्व वर्तत्वमितिविवर्तलक्षणं उपादानत्वाभिमतमृद्वस्तुसत्ताविषमसत्ताकत्वंचैतन्यस्याप्यस्तीतितस्यमृद्वस्तुविवर्तत्ववारणायविशेष्य
परिणामवारणायसत्यंतंब्रह्मचैतन्यस्यपारमार्थिकीसत्ताघटादिप्रपंचस्यव्यावहारिकीसत्ताशुक्तिरजतादेःप्रातिभासिकीसत्तेति

अन्यथाभावो तदसमसत्ताकोविवर्तइतिवा कारणसलक्षणोऽन्यथाभावः परिणामस्तद्विलक्षणोविवर्तइतिवा
कारणाभिन्नकार्यंपरिणामः तदभेदंविनैवतद्व्यतिरेकेणदुर्वचंकार्यंविवर्तइतिवाविवर्तपरिणामयोर्विवेकः ॥

सत्तात्रैविध्यांगीकारमतेलक्षणभेदउक्तः ब्रह्मणिघटादौशुक्तिरजतादौचसर्वत्रब्रह्मस्वरूपभूतैकैवसत्तानतदतिरिक्तेतिमतेसा
धारणेनलक्षणांतरमाह कारणसलक्षणइति उपादानत्वाभिमतवस्तुसलक्षणत्वेसतितदवस्थाविशेषत्वमितिपरिणामलक्ष
णं अत्रसलक्षणंजडरूपेबोध्यं परिणामपरिणामिनोर्जडत्वनियमात् नकाप्यव्याप्तिशंका मृद्वस्तुनोघटपरिणामत्ववारणाय
विशेष्यं प्रपंचस्यसंविन्परिणामित्ववारणायसत्यंतं विवर्तलक्षणमाह तदिति उपादानत्वाभिमतवस्तुविलक्षणत्वेसतितद
वस्थाविशेषत्वंतद्विवर्तत्वमितिविवर्तलक्षणमत्रचित्वजडत्वरूपवैलक्षण्यंविवक्षितं वियदादिप्रपंचवत्शुक्तिरजता

देरपितत्तद्वच्छिन्नचैतन्यएवाध्यासांगीकारात्जडमात्रे चैतन्यविवर्त्तेनहिलक्षणत्वमस्तीतिलक्षणासंगतिः उपादानत्वाभिमतजडविल
ॐ सि क्षणे चैतन्येजडविवर्त्तत्ववारणाय विशेष्यं मृत्परिणामेघटादौ मृद्विवर्त्तत्ववारणायसत्यंतं प्रकारांतरेणविवर्त्तपरिणामयोर्लक्षण
ले टी० माह कारणाभिन्नमिति कारणत्वाभिमतवस्त्वभिन्नत्वेसतितत्कार्यत्वंतत्परिणामत्वं वियदादौ ब्रह्मकार्यत्वमस्तिनतत्परिणाम
त्वंतुनास्तीतितद्वारणायसत्यंतं ब्रह्मप्रपंचयोरारोपिताभेदसत्वेपिलक्षणोविवक्षितस्य धर्मिद्वयसमानस्वाभाव्याभेदस्याभा
२९ वान्नातिव्याप्तिः परिणामवादे मृदोपिंडघटयोभिन्नत्वमस्तीतितस्याघटादिपरिणामत्ववारणाये विशेष्यं तदभेदमिति वस्तु
तस्तुतदभेदं विनैवेत्यर्थः व्यतिरेकोभेदः अस्मिंल्लक्षणेकार्यत्वमविवक्षितं अनाद्यविद्यादेरपिविवर्त्तत्वांगीकारात् यद्वाकार्य
स्यैवविवर्त्तरूपस्येदंलक्षणं तथाच उपादानाभिन्नवस्तुनःसकाशाद्वस्तुतोभेदाभेदाभ्यांदुर्निरूपत्वेसतिकार्यत्वंकार्यरूपवि
वर्त्तलक्षणं यत्राविद्यापतिउपादानत्वाभिमतचैतन्याद्वस्तुतोभेदाभेदाभ्यांनिरूपयितुमशक्यायामविद्यायामतिव्याप्तिवार
णायविशेष्यं आरंभवादे उपादानादभेदेनदुर्निरूपेकार्येऽतिव्याप्तिवारणायाभेदेत्युक्तं परिणामवादे उपादानाद्भेदेन
दुर्निरूपेकार्येऽतिव्याप्तिवारणायाभेदेत्युक्तं सिद्धांतेकार्यकारणयोर्भेदोपगमात्संभववारणायवस्तुतइत्युक्तं ननुकार्यकारण
योर्वस्तुतोभेदाभेदौकथंदुर्निरूपाविति उच्यते तत्रतयोर्भेदस्तावत्दुर्निरूपः निम्नोन्नतादियुक्तमृद्वस्तुव्यतिरेकेणघटाद्य
नुपलंभात् संयोगविशेषयुक्तंतंतुव्यतिरेकेणपटानुपलंभाच्च मृद्घटः तंतवःपटःसुवर्णंकुंडलमित्यादिनासामानाधिकर
ण्याच्च नहिवस्तुतोभिन्नयोःसामानाधिकरण्यप्रत्ययःसंभवति किंचकारणव्यापारात्पूर्वंमृदादौघटादेःसत्त्वमभ्युपगन्त राम
व्यं तदसत्त्वेशशशृंगादिवदुत्पत्त्यनुपपत्तेः उत्पत्तिक्षणेउपादानेन[redacted]संबन्धा[redacted]पूर्वमसतःकार्यस्योत्पत्ति २९

क्रियां प्रति कर्तृत्वानुपपत्तेश्च पूर्वसिद्धस्यैव कर्तृत्वदर्शनात् उत्पत्तिक्षणे उपादानेन सह कार्यस्य संबन्धानुपपत्तेश्च पूर्वक्षणे कार्य
स्यासत्वात् पूर्वसिद्धयोरेव पश्चात्संबन्धसंभवः अन्यथा शशशृंगादेरपि कारणसंबन्धस्य दुर्वारत्वात् कारकव्यापारात्पूर्वं का
र्यस्य तुच्छत्वेन लक्षणानंगीकारे नहि दृष्ट एव पश्चादात्मलाभासंभवस्य दुर्वारत्वाच्च सिद्धं च प्राक्कार्यस्य सत्वे प्राक्काले कार्यकारणयो
र्भेदमानाभावादभेदः सिद्धः पश्चादपि तयोरभेद एव स्वीकर्तव्य इति कार्यकारणाभेदवादिनः सांख्यादयः तद्भेदवादिनस्ता
र्किकादयस्तु वदंति कार्यकारणयोरभेदो न संभवति तद्भावविरोधात् नहि तस्यैव तत्कार्यत्वं तत्कारणत्वं च संभवति अर्थ
क्रियाभेदाभावप्रसंगाच्च नहि जलाहरणाद्यर्थक्रिया मृद्वस्तुनः संभवति घटोत्पत्तेः प्रागपि तत्प्रसंगात् नापि मृदोर्थक्रि
या घटस्य संभवति मृद्वद्घटस्यापि घटोत्पादकत्वप्रसंगात् कार्यस्य कारणव्यापारात्पूर्वं सत्वे च कारकव्यापारवैयर्थ्य
प्रसंगात् तदा मृद्वदेव उपलंभप्रसंगाच्च तदुक्तं पंचदश्यां सघटो न मृदोभिन्नो वियोगे सत्यनीक्षणात् नाप्य
भिन्नः पुरा पिंडदशायामनवेक्षणात् इति योगे सति मृदः सकाशाद्घटादिविवेचनेन क्रियमाण इत्यर्थः एवं कार्य
कारणयोर्भेदवादिभिरभेदवादिभिश्च दर्शितैः परस्परं प्रति क्षेप्तुमशक्यैर्न्यायैः कार्यस्य कारणाद्भेदाभेदाभ्यां प्रागुत्प
त्तेः सत्वासत्वाभ्यां च दुर्निरूपत्वात् न स्यात् ननु वे सिद्धं कारणं तु कार्योत्पत्तेः पूर्वकाले कार्यकाले कार्यनाशकाले चा
नुवर्तमानं कार्याद्भेदेन सत्वेन च निरूपयितुं शक्यत्वात् सत्यमेव कार्यापेक्षया एवं मृदादेरपीतरकारणस्य तत्तत्कार्या
पेक्षया सत्यत्वे सिद्धेपि परमार्थसत्यत्वं नोपपद्यते आत्मात्मव्यतिरिक्तस्य सर्वस्यैव बाधितत्वात् ब्रह्मणस्तु परमा
र्थसत्यत्वं सर्वात्मनो बाधशून्यत्वात् अभ्युपगम्यते अत एव जगत्कारणस्य सत्यत्वे मृदादिसत्यत्वं जगतो मिथ्यात्वे

ॐ सि·ले टी· ३१

चमृदादिकार्यस्यघटादेरनृतत्वे चदृष्टांतत्वेन श्रुत्योपादीयते तदुक्तं पंचदश्यां एवंमायामयत्वेनविकारस्यानृतात्मतां वि
काराधारमृद्वस्तुसत्यत्वंचाब्रवीच्छ्रुतिरिति श्लोके विकारानृतत्वादौ पूर्वोक्तन्यायकलापः एवंशब्दार्थः दृष्टांतत्वेनेतिशेषः
तदुक्तंभामतीनिबंधने तदनेन प्रमाणेन विकारजातस्यानिर्वाच्यतया सिद्धमनृतत्वंकारणस्यनिर्वाच्यतया सिद्धं
सत्यत्वं मृत्तिकेत्येवसत्यमित्यादिनासंबन्धनदृष्टांततयानुवदति श्रुतिरिति वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवस
त्यमितिश्रुतिरित्यर्थः विकारोघटादिर्वाचाघटशरावादिरस्तीतिशब्देनारभ्यतेव्यवह्रियतइत्यारंभणंवाचाव्यव
ह्रियतएवनवस्तुतोऽस्तिविकारस्तस्यदुर्निरूपत्वादितिभावः कथंतर्हिमृद्वस्तुनःसकाशात्घटादिर्जातइतिकार्यका
रणयोर्भेदव्यवहारइत्यतआह नामधेयंभेदव्यवहारोनाममात्रमर्थशून्यः यथाराहोःशिरःपुरुषस्यचैतन्य
मितिव्यवहारः विकारवद्भेदोऽप्यनिर्वचनीयइतिभावः किंतर्हिसत्यंतत्राह मृत्तिकेति अनेनमृत्तिकात्वेनरूपेणघटश
रावादिविकारेषुप्रतीयमानेनकारणरूपंवस्तुसत्यंविकारसत्यत्वमेवकारणेव्यवच्छिद्यते तत्सिद्धवचनत्वंचकारणा
द्भेदाभेदाभ्यांकार्यस्येतिप्रकृतिग्रंथेति ननुवाक्यार्थभूतशुद्धब्रह्मणएवश्रुतौलक्षणमुक्तं तर्हिजिज्ञासस्येति
वाक्यशेषेलक्षणीयस्यब्रह्मणोजिज्ञास्यत्वाभिधानात् तथाचनिश्चितार्थेप्रश्नानुपपत्तिरितिचेन्न यथाशुद्धस्यजि
ज्ञास्यत्वं एवंतत्त्वंपदार्थभूतयोर्जीवेश्वरयोरपिशुद्धब्रह्मप्रतिपत्तिहेतुत्वेनजिज्ञास्यत्वमस्ति तथातयोरपिवक्ष्यमा
णरीत्याभिन्ननिमित्तोपादानत्वंचसंभवतीतिजिज्ञास्यत्वेकारणत्वयोःसाधारण्येनप्रश्नोपपत्तेरितिभावः जीवेशा
चविशुद्धाचित्तथाजीवेशयोर्भिदा अविद्यातच्चितोर्योगःषडस्माकमनादयइतिसंप्रदायविद्वचनेचैतन्यत्रैवि राम ३०

धस्यैव प्रसिद्धत्वात्तदनुसारेण त्रैधा प्रश्नः सामान्यज्ञानस्य विशेषबुभुत्साहेतुत्वात् ब्रह्मणः सामान्यरूपेणोपादानत्वज्ञानानंत
रमथ यथाद्यार्थः ईश्वररूपं जीवरूपं वा ब्रह्मोपादानमिति विकाराद्यर्थः जन्माद्यस्य यत इति सूत्रे जन्म आदिरस्येति बहुव्रीहिः जन्म
स्थितिभंगं अन्यपदार्थः जन्मादीति नपुंसकैकवचनेन अन्यपदार्थे समाहारद्वन्द्वसूचनात् अन्यपदार्थभूतजन्मस्थितिभंगेष्वितरेत
रयोगद्वन्द्वाश्रयणेन जन्मादय इति सूत्रापत्तेः जन्मन आदित्वं च जायमानपदार्थेषु स्थितिभंगावपेक्ष्य दृष्टमिति सूत्रे जन्मनः
प्राथम्यस्य निर्देशः अस्येति सर्वनाम्ना सूत्रकर्तृबुद्धिस्थसकलप्रपंचनिर्देशः षष्ठ्या च जगतो जन्मादेः संबन्धनिर्दे
शः यत इति कारणनिर्देशः सूत्रे तत्पदाध्याहारः पूर्वसूत्रात् ब्रह्मपदानुषंगः तथा च यतः कारणादस्य जगतो जन्मादि तद्ब्रह्मे

अथ शुद्धं ब्रह्मोपादानमिष्यते ईश्वररूपं जीवरूपं वा अत्र संक्षेपशारीरकानुसारिणः केचिदाहुः

तिसूत्रार्थः ज्ञेयब्रह्मेति वाक्यार्थभूतशुद्धब्रह्मण एव प्राधान्येन लक्षणीयत्वात् तस्यैव जन्मादिसूत्रे लक्षणमुच्यते अथातो ब्रह्म
जिज्ञासेति पूर्वसूत्रे शास्त्रविषयसमर्पकेण ब्रह्मपदेन शुद्धब्रह्मण एवोपात्तत्वेन तस्यैव लक्षणाकांक्षणाच्चेति भावः नन्वात्मन
आकाशः संभूतः सोऽकामयत यः सर्वज्ञः स सर्ववित् इत्यादिकारणवाक्येषु ईश्वररूपब्रह्मणः कारणत्वमुच्यते शुद्धस्य तस्याका
मयितृत्वसर्वज्ञानकर्तृत्वाद्यनुपपत्तेरतस्तद्वाक्यगतात्मपदतत्पदसर्वज्ञादिपदानां शबलवाचित्वान्न कारणवाक्येभ्यः शुद्ध
स्योपादानत्वसिद्धिरिति नेत्याह तथा चेति जन्मादिसूत्रतद्भाष्ययोः स्वारस्येन शुद्धस्योपादानत्वावगमे सतीत्यर्थः लक्ष
णैव स्वीक्रियते अतः कारणवाक्येभ्यः शुद्धस्य कारणत्वावगतिर्युक्तेति भावः अथ शुद्धं ब्रह्मोपादानमित्यादि प्रश्ने द्वितीय

ॐ सि॰ ले टी॰ ३१

पक्षमादाय प्रतिवचनमुत्थापयति विवरणेति यस्माद्भवतःसंभूतयोनेः पूर्वमंत्रोपात्तंतपः ज्ञानमयंस्वरूपज्ञानाविकारः मायावृ
त्तिप्रतिबिंबरूपमितियावत् तस्मात्सर्वज्ञाद्भूतयोनेःसकाशादेतत्संनिहितंअपरकालीनकार्यरूपमितियावत् ब्रह्महिरण्य
गर्भाख्यंजायते इति श्रुतेरीश्वररूपमेवब्रह्मउपादानमिति संबंधः नशुद्धंजीवरूपंचेत्येवकारार्थः सर्वज्ञत्वादीत्यादिपदेन
सर्वज्ञत्वकामयितृत्वसर्वेश्वरत्वादीनिगृह्यंते मायोपाधिनिरूपितविंबत्वविशिष्टंसर्वज्ञत्वादिगुणयुक्तं चयदीश्वररूपं
ब्रह्मचैतन्यं तदेवोपादानमित्यर्थः अथ शुद्धब्रह्मोपादानमिष्यतेइति प्रश्नस्य प्रतिवचनावसरेईश्वररूपमेवब्रह्मोपादा
नमित्येतावतिवक्तव्येतस्यमायाशबलत्वविशेषणमीश्वरोपिशुद्धचैतन्यमेवेतिभ्रांतिनिरासार्थं तस्य सर्वज्ञत्वाद्यनेकवि
शेषणोपादानंचेश्वररूपब्रह्मण उपादानत्वेयःसर्वज्ञइत्यादिकारणवाक्यानांसर्वेषामेकवाक्यताप्रदर्शनार्थमिति मन्तव्यम्
जीवशुद्धब्रह्मव्यावृत्तेश्वररूपब्रह्मण उपादानत्वेभाष्यसंमतिमाह अत एवेति ईश्वररूपब्रह्मणएवोपादानत्वाभ्यु

शुद्धमेवोपादानंजन्मादिसूत्रतद्भाष्ययोरुपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वोक्तेः तस्माद्वात्मनआकाशःसंभूतइत्यादि
कारणवाक्येषु शबलवाचिनामात्मादिशब्दानां शुद्धेलक्षणेवेति विवरणानुसारिणस्तु यःसर्वज्ञःससर्ववित् यस्य
ज्ञानमयंतपः तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतेइत्यादिश्रुतेःसर्वज्ञत्वादिविशिष्टमायाशबलमीश्वररूपमे
वब्रह्मोपादानं अत एवभाष्येतत्तद्धर्मोपदेशात्सर्वत्रप्रसिद्धोपदेशादित्यादि अधिकरणेषु सेवक्तृके

पगमादेवेत्यर्थः इत्यादिश्रुत्युक्तंसर्वोपादानत्वप्रयुक्तंसर्वात्मकत्वमीश्वरलिंगमित्युपवर्णितंभाष्येइतिसंबंधः यस्यस रा
र्वोपादानत्वंतस्यसर्वात्मकत्वमुपादानोपादेययोस्तादात्म्यात्नान्यस्येत्यविवादं यदिप्रतिबिंबत्वविशिष्टचैतन्यरूपे ३१

जीवे बिंबत्वविशिष्टचैतन्यरूपे ईश्वरे च विशेष्यतयाऽनुस्यूतशुद्धचैतन्यरूपब्रह्मणः सर्वोपादानत्वमिष्यते तदा तस्यैव सर्वा
त्मकत्वं स्यान्नेश्वरस्येति सर्वात्मत्वस्य भाष्ये जीवव्यावृत्तेश्वरलिंगत्वोपन्यासो न स्यात् न च विशेष्यभूतशुद्धब्रह्मगतसर्वा
त्मकत्वं बिंबत्वविशिष्टचैतन्यरूपेश्वरलिंगतया भाष्ये वर्णितमिति वाच्यं तथा सति तस्य जीववृत्तित्वेन स्यात् विशेष्यधर्म
स्य सर्वात्मकत्वस्य ईश्वरधर्मत्ववज्जीवधर्मस्यापि सत्वादित्याशयेनाह जीवेश्वरानुस्यूतेति छांदोग्ये श्रूयते य एषोंतरादि
त्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्व एव सुवर्ण इत्युपक्रम्य तस्य ऋक्साम च गेष्णौ वि
तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म सर्वकर्मा सर्वकामः सर्वगंधः सर्वरस इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्रयुक्तं सर्वात्मकत्वं
जीवव्यावृत्तमीश्वरलिंगमित्युपवर्णितं जीवेश्वरानुस्यूतचैतन्यमात्रस्य सर्वोपादानत्वेतु तज्जीवव्यावृत्तमीश्वर
त्युक्ता उत्तरत्वय एषोंतरक्षिणि पुरुषो दृश्यते सैव ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्मेति चोक्ता न य इमे वीणायां गायंति एतं ते गा
यंतीति अस्यार्थः आदित्ये अंतर्यः पुरुषः शास्त्रतो दृश्यते एव हिरण्मयः ज्योतिर्मयः स्वतः स्वप्रकाशचैतन्य इत्यर्थः तस्योपा
सनार्थं शरीरमापेस्य ऋक्सामनी गेष्णौ पर्व लोकरीत्या स्तुतिसाधनीभूते इत्यर्थः इदं ऋक्साम गेष्णत्वं समस्तऋक्सा
मत्वं नयत्तू पहिरण्मयपुरुषविशेषणेन स्यवेदे ऋक्सामसत्वेन तथा प्रसिद्धं ढोयात्मकत्वमादाय पर्यवस्यति हिरण्म
यपुरुषस्येंद्रादिभ्यस्तस्काशाद्भिन्नत्वेतु तद्विशेषणेन सिध्यति अन्यस्तु तैरन्यविषयकत्वायोगात्तस्यैव पुरुषस्यादित्यस्था
नवदुपासनार्थं स्थानांतरमाह य एषोंतरक्षिणि इति सैव ऋगित्यादौ विधेयापेक्षया लिंगव्यत्यासः स एव ऋगेव सः पुरु

ऊं
सि· ले
टी
३२

ष: स साम्नस्तउक्थं स: यजु: स: ब्रह्मवेद: ब्रह्मपदं ऋगाद्यतिरिक्तवेदपरं तथा गेष्णवाक्येन सर्वदेवात्मकत्वमुक्तं सैव ऋगि
तिवाक्येन सर्ववेदात्मकत्वमुक्तं तथा येऽद्य मे प्रसिद्धा गायका वीणायां लौकिकपुरुषं गायंति ते प्येतं पुरुषं गायंतीत्युक्त्वा
इंद्राद्यात्मकत्ववत् लौकिकपुरुषात्मकत्वमपि सिद्धमिति तथा च सर्वदेवात्मकत्वसर्ववेदात्मकत्वसर्वलौकिकपुरुषात्म
कत्वानि मिलित्वा सर्वात्मकत्वे पर्यवस्यंति तिर्यगात्मत्वस्याप्युक्तप्रायत्वात् एवं स्थिते संशयः आदित्ये अक्षिणि चांतः
श्रूयमाणो हि हिरण्मयः पुरुषः मंडलाभिमानिनी देवताविशेषो वा नित्यसिद्धः परमेश्वरो वेति तत्र देवताविशेष एव
हिरण्मयः पुरुषस्तस्य संसारित्वेन हिरण्यश्मश्रुत्वादिरूपसत्वोपपत्तेः सर्वात्मकत्वस्याप्युपासनार्थं तत्रारोपोपपत्तेश्च ःत
न परमेश्वरस्तस्य शरीरासंभवादिति प्राप्ते एवं प्राप्ते ब्रूमः अंतस्तद्धर्मोपदेशादिति आदित्यादावंतरवस्थितो हिरण्म
यपुरुषो नित्यसिद्धः परमेश्वर एव कुतः तद्धर्मस्य सर्वात्मकत्वस्य सैव ऋक् तत्सामेत्यादावुपदेशात् सर्वात्मकत्वं
हीश्वरस्यैव धर्मः तस्य सर्वोपादानत्वेन सर्वात्मकत्वोपपत्तेः न च मुख्यसंभवे सत्यारोपकल्पना न्याय्या परमेश्व
रस्यापि साधकानुग्रहार्थमिच्छावशान्मायागतशुद्धसत्वांशपरिणामरूपशरीरसंभवात् उमासहायं परमेश्वरं प्र
भुमित्यादिश्रुतिषु जन्म कर्म च मे दिव्यमित्यादिस्मृतिषु प्रसिद्धत्वाच्चेति निर्णयः सर्वं खल्विदं ब्रह्मेति प्रकृत्य स क्रतुं
कुर्वीतेति वाक्येन क्रतुशब्दवाच्यमुपासनं विधाय उपास्याकांक्षायां पठ्यते मनोमयः प्राणशरीरो भारूपः सत्यसं
कल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मांतर्हृदय इति राम
अयमर्थः मनोमयः मनःप्रधानः प्राणः शरीरमस्येति प्राणशरीरः भाश्चैतन्यरूपमस्येति भारूपः सत्याः अप्रति ३२

हन्नाः संकल्पांऽहृष्याद्विगोचरा अस्य आकाशवदात्मा व्यापकत्वनिर्लेपत्वसूक्ष्मत्वादिगुणकं स्वरूपमस्य सर्वाणि कर्माणि क्रि
यन्त इति व्युत्पत्त्या कार्याण्यस्य यद्वा भूतगुणगंधरसादिसन्निधानात्कर्मपदं परिस्पन्दपरं सर्वे परिस्पंदा अस्येत्यर्थः सर्वे
कामा इच्छारूपा अस्य सत्त्वविशेषरूपा वा सर्वे गंधाः पुण्यरूपा अस्य पुण्यो गन्धः पृथिव्यां चेति स्मृतेः सर्वे रसा अस्य इदं
रूपं सर्वम् अभि अभिमुखेन तादात्म्येन अततः व्याप्तः वागेव वाकः वाकोऽस्यास्तीति वाकी न वाकी अवाकी वागिन्द्रियशून्य इ
त्यर्थः वाग्ग्रहणं कर्मेन्द्रियाणां मुख्यप्राणस्य चोपलक्षणं क्रियाशक्तिमत्त्वाविशेषात् आदरः कामः सोऽस्य नास्तीत्य
नादरः आदरनिषेधेन तत्परिणामि मनो निषिद्धं भवति मनोनिषेधेन च ज्ञानेंद्रियाणां निषेधः सिद्धो भवति ज्ञानशक्ति
मत्त्वाविशेषात् अत्र परिस्पंदेच्छागन्धरसवत्त्वं तदाश्रयैर्वायुमनःपृथिवीजलैर्भूतविशेषैस्तादात्म्यं विना न संभवतीति
सर्वकर्मत्वादिवचनेनाविशेषेण सर्वतादात्म्यप्रतिपादकसर्वमिदमभ्यात्त इतिवचनेन च मनोमयत्वादिगुणकस्य
सर्वात्मत्वं प्रतीयते तच्च ब्रह्मण्येवोपपद्यते तस्य सर्वोपादानत्वेन सर्वात्मकत्वोपपत्तेः न जीवो मनोमयत्वादिगुण
कस्तस्य सर्वात्मत्वासंभवात् न च मनोमयत्वप्राणशरीरत्वयोर्जीवधर्मयोर्ब्रह्मण्यसंभव इति वाच्यं भूततादात्म्येन
गन्धादिमत्त्ववत् जीवतादात्म्येन मनोमयत्वाद्युपपत्तेरिति सूत्रार्थस्तु मनोमयत्वादिगुणकं ब्रह्मैवोपास्यत्वेनेह नि
र्दिश्यते कुतः सर्वत्र वेदांतेषु प्रसिद्धस्य ब्रह्मणः सर्वं खल्विदं ब्रह्मेति पूर्ववाक्यस्थशब्देनैवोपदेशादस्मिन्नपि वाक्ये
प्राणशरीरमस्येत्यादिविग्रहवाक्येषु प्रकृतब्रह्माकर्षकसर्वनाम्नः श्रुतीनां सत्त्वाच्च ब्रह्मैव सगुणमुपास्यमत्रेति सि
द्धं सर्वोपादानत्वेऽपि शुद्धब्रह्मवत् जीवस्य सर्वोपादानत्वोपगमेऽपि सर्वात्मकत्वं जीवे व्याहतमीश्वरलिंगं न स्या

ॐ सि॰ ले॰ टी॰ ३३

दितितुशब्दार्थः ननुसंक्षेपशारीरके मायाशवलस्योपादानत्वंनिरस्तमितितन्नविरोधइत्यतआह संक्षेपशारीकइति माया
याम्त्रपिविंवभूतेश्वरे विशेषणतयोपादानत्वाश्रयकोटौ निवेशएवतत्रदूषितः ननुविंवत्वविशिष्टचैतन्यरूपेश्वर
स्यतन्निरस्तमितिननतद्विरोधइत्यर्थः ननुशवलस्योपादानत्वनिराकृत्यजगदुपादानत्वस्यज्ञेयब्रह्मलक्षणत्वसम
र्थनपरस्यसंक्षेपशारीरकग्रन्थस्यकथमेवमभिप्रायःकल्पयितुंशक्यते स्वरसतस्तस्यविंवप्रतिविंवानुगतशु
द्धब्रह्मोपादानत्वप्रतिपादनपरत्वावगमादितिनेत्याह तत्रैवेति संक्षेपशारीरकपूर्वेत्यर्थः नचतत्पदार्थवृत्तित्व शी॰
तत्पदलक्ष्यार्थवृत्तित्वविवक्षितं लक्ष्यार्थस्यशुद्धब्रह्मेतिसंक्षेपशारीरकग्रंथस्यपूर्वापरविरोधः नवातेनविम्वभूतेश्वर

२॰ संक्षेपशारीकेशवलोपादानत्वनिराकरणमपिमायाविशिष्टोपादानत्वनिराकरणाभिप्रायं नतुनिष्कृष्टेश्वर
रूपचैतन्योपादानत्वनिराकरणपरं तत्रैवप्रथमाध्यायेजगदुपादानत्वस्यतत्पदार्थलक्षणत्वोक्तेः ॥

स्योपादानत्वलाभइतिवाच्यंलक्ष्यार्थत्वस्य वाक्यार्थसाधारणतयातत्पदार्थवृत्तित्वविशेषणवैयर्थ्यापत्तेस्तत्पदार्थवृ
त्तित्वंतत्पदवाच्यार्थवृत्तित्वमेववक्तव्यमितितद्विरोधायसर्वज्ञत्वादिगुणकेश्वरस्यजगत्कारणत्वप्रतिपादकव
हस्यविरोधायचशवलोपादानत्वनिराकरणं मायाविशिष्टोपादानत्व निराकरणरूपमेववक्तव्यमितिनसं
क्षेपशारीकविरोधइतिभावः तर्हिजन्मादिसूत्रतद्भाष्ययोर्ज्ञेयब्रह्मलक्षणत्वोक्तिविरोधइतिनेत्याह॥ ॥ राम
ण॰

एवं चेति अभिन्ननिमित्तोपादानत्वरूपलक्षणस्यांतस्तद्धर्माधिकरणभाष्यपर्यालोचनया विवक्षितत्वावगततत्वे सिद्धे तत्तीय
र्थः अपि शब्दः चैतन्यमिति नेन संबध्यते कारणत्वमित्यनंतरमीश्वरमित्यध्याहृततया बोध्यमित्यादिति शेषः तदनुगतमिति विव
र्तत्वविशिष्टचैतन्यस्वरूपेश्वरानुगतमित्यर्थः अविकृतचैतन्यमिति विशेष्यभूतशुद्धचैतन्यमित्यर्थः तटस्थत्वं लक्षणस्य स्वरूपबहिर्भूतत्वं।
त्वे वा लक्ष्यावृत्तित्वे वा उपलक्षणत्वं वा बोध्यं क्वचिद्दृष्टिप्रयोगे शाखायामिन्दुरिति भवति तत्र यथा शाखादिगतत्वेन तदध्याहृतं
चंद्रमुपलक्षयति तथा ईश्वरगतकारणत्वमीश्वरमित्यध्याहृततया बोध्यं यत् सतटस्थतयेश्वरानुगतमविकृतचैतन्यमपीत्यध्या
हृततया उपलक्षयितुं शक्नोत्येवेत्यर्थः ईश्वरगतेनाभिन्ननिमित्तोपादानत्वेन विवर्तत्वविशिष्टचैतन्यस्वरूपेश्वरस्य जगदुपादानत्वसं
भवमप्याज्ञीवानां तत्कर्तृत्वसंभवरहितात्तथानाद्येश्वरस्य कायागस्याऽवृत्तेस्मास्मानां यासत्त्वा विशेष्यभूतज्ञेयब्रह्मणः प्रधानादि

एवं चेश्वरगतमपि कारणत्वं तदनुगतमविकृतचैतन्यं शाखाचंद्रमसमिव तटस्थतयोपलक्षयितुं शक्नोतीति तत्स्य ज्ञेयब्र
ह्मलक्षणत्वोक्तिरिति मन्यन्ते वियदादिप्रपंचईश्वराश्रितमायापरिणामभूतितेनेश्वरउपादाने व्यावृत्तिर्गम्यते इत्यभिप्रेत्य
तस्य ज्ञेयब्रह्मलक्षणत्वं जन्मादिसूत्रतद्भाष्ययोस्तत्रैव शारीरकेऽवोचमिति भावः एवं तटस्थलक्षणेन प्रधानादिव्यावृत्तत्वेनाव
गतब्रह्मकीदृक्स्वरूपं तदिति विशेषजिज्ञासायां सत्यासत्यज्ञानानंदात्मकं ब्रह्मेति स्वरूपलक्षणं वर्तते अनेनैवाभिप्रायेण भाष्य।
कारैरुक्तं न सच निर्णयवाक्यमानंदाद्ध्येव खल्विमानि भूतानि जायन्त इति यतो वा इमानि इत्यादिवाक्ये यस्मात्कारणादिमानि भूतानि
भूतानि जायन्त इत्युक्तं तद्ब्रह्म तत्र सत्यज्ञानानंतस्वरूपादानंदादेव नामस्मात्कारणादिमे तादृशप्रसिद्धं सर्ववस्तूनामिति मुख्यार्थः अने

सि॰ले॰
प्र॰टी॰
९४

नतस्वरूपलक्षणेन विंबभूतेश्वरानुगतं तत्सदलक्षं वस्तुतो वा कार्थभूतं तेयं ब्रह्मविशेषतो निर्धारितं भवति इयं च स्वरूपलक्षणविव
ह्याम्लेखुं स्वेष्टुपदेन सत्विता जगत्प्रकृतिभूतमायाप्रतिविंबईश्वरः माया चेश्वराश्रिता न च प्रतिविंबस्य मायायाः कल्पितत्वात्त
द्विशिष्टचैतन्याश्रितत्वं मायाया न संभवति प्रतिविंबत्वकल्पनायाः पूर्वं तस्याश्चैतन्याश्रितत्वस्य वक्तव्यत्वादिति वाच्यं मायावच्छ
तिविंबत्वस्यापि अनादित्वेन तस्यास्तद्विशिष्टचैतन्याश्रितत्वोपपत्तेः वस्तुतो निर्विशेषचैतन्ये मूलादिकालमारभ्य कल्पितप्रति
विंबत्वस्थितेरनिर्वचनीयमायाधीनत्वमात्रेण प्रतिविंबत्वस्य तत्कल्पितत्वं न च प्रतिविंबत्वस्य विषयद्वादेरिव मायापरिणामत्वमु
पेयते तथात्वे प्रतिविंबभूतेश्वरस्य सादित्वप्रसंगात् न च मायायाः मूलादिकालमारभ्य चैतन्ये प्रतिविंबत्वस्य तत्कल्पितत्वं चेदुये
दिति तद्विशिष्टमेव च चैतन्यमाश्रयत इति कथं भावयितुं शक्यमिति वाच्यं मायायाश्च घटितघटनापटीयस्त्वात् न च शुद्धचैत
न्याश्रितैव माया तत्र प्रतिविंबभावं चोदयतीति कुतो नाश्रीयत इति वाच्यं मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतिवि
रोधात् मायिनमिति पदेन मायाया ईश्वराश्रितत्वप्रतीतेः जीवास्तु विद्याप्रतिविंबाः जीवेशावाभासेन करोतीति श्रुतेः प्रकृता
मूलप्रकृतिर्जीवेशौ प्रतिविम्बरूपौ करोतीत्यर्थः नह्युपाधिभेदं विना प्रतिविंबभेदः संभवति न चैकस्मिन्नपि दर्पणे अनेकप्र
तिविंबदर्शनात्प्रतिविंबभेद उपाधिभेदव्याप्यो न भवतीति वाच्यं एकस्मिन्दर्पणे विंबभेदेन प्रतिविंबभेदेपि सूर्यादिविंबैकस्य
लेउपाधिभेदं विना प्रतिविंबभेदादर्शनात् विंबभूतचैतन्यस्य चैकत्वात् तस्मादीश्वरोपाधिमायापेक्षया भिन्ना एव जीवोपाधि
भूताश्चविद्याः स्वीकर्तव्या न च मूलप्रकृतिप्रकृतमप्रकृताया जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतौ ९४
जीवेशरूपप्रतिविंबाधारयोर्मायाविद्ययोः स्वयमेवेत्यनेन प्रकृतमूलप्रकृत्यात्मकत्वप्रतिपादनमायाविद्ययोर्भेदपक्षे विरु

ष्यत इति वाच्यं मायाया वियदादिप्रकृतित्ववत् अविद्याया अपि लिंगशरीरादिप्रकृतित्वस्य वक्ष्यमाणत्वेन मायाविद्ययोः प्रकृतित्वे
नैकीकृतत्वस्य मेवेत्येकप्रकृत्यात्मकत्वप्रतिपादनस्याविरोधात् अविद्यायाश्चैकत्वेऽपि ज्ञानाभिप्रायत्वोपपत्तेः नतु ज्ञानात्ववि
रोधोऽपि विवेकस्य स्थलेऽप्युपाधिभेदं विना प्रतिबिंबभेदासंभवस्य दर्शितत्वात् प्रतिबिंबजीवानां च नानात्वात् अहंपदत्वाधिकरण
भाष्ये व्याकृतमीश्वराश्रयत्वस्येवोपाधिभूतामिति मायाया ईश्वरोपाधित्वं तदाश्रयत्वयोरुक्तत्वात् तथाध्यानुमानिकाधिकर
णभाष्ये मुक्तानां न बन्धनरूपत्वात् तस्या अविद्या जीवशक्तेर्विद्यया दाहादित्यत्र जीवनानात्वस्य तदुपाधिभूताविद्यानानात्वस्य
च स्पष्टमभिहितत्वात् भामती निबंधनेन ब्रह्माश्रयस्य जीवोपाधिभूताविद्यैकत्वनिराकरणेन तयैव व्याख्यातत्वाच्च आभास एवेति सू

अंतःकरणादिकं त्वीश्वराश्रितमायापरिणामत्वाभूतोपरस्पष्टजीवाविद्याकृतभूतस्वत्वकार्यमिति तत्रोभयोरुपादा
नत्वं अंतएवव्यक्तमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं यांतीति श्रुतौ कलाशब्दवाच्यानामं

अतः ब्रह्माध्ययोर्जीवानां प्रतिबिंबत्वरूपतायाः स्पष्टमभिहितत्वाच्च तथा च मायाविद्याभेदः स्फुटादिति मतइति येन संमते तेषां मतत्व
पमस्ति वियदादिप्रपंच इत्यादिना सर्वमत ईश्वररूपो ब्रह्मोपादानमित्युक्तं तत्त्वमेव परं तु ब्रह्मविज्ञानतिजीवस्याप्युपादानत्व
मभ्युपगंतव्यमिति अभिप्रायेण स्वमतस्य प्रवृत्तिर्वा अथ ईश्वराश्रितमायापरिणाम इति मायां तु प्रकृतिं विद्यादिति श्रुतेरिति ।
भावः तत्रेति वियदादावीश्वर एव उपादानमित्यर्थः अंतःकरणादौ तु शब्दः स्वांतं विशेषं दर्शयति ईश्वरेति भूतैरुपष्टंभक
लत्वादौ स्पष्टं त्वभूतोपष्टंभत्वात् च जीवाविद्याकृता नाम भूतस्वत्वाणां विशेषणं भूतानां स्वत्वं परिछिन्नत्वं अंतएवेति

ष्टेतः कारणदोषोजीवाविद्यापरिणामस्तत्तद्भूतानांतदुपष्टंभकतयामायापरिणाममहाभूतानांचउपादानतयाश्रवणात्तादेवेमर्थः
यथाभिमाद्यानद्यःसमुद्रंप्राप्यास्तंगच्छंतिएवमेवास्यविदुषःपरितःसर्वज्ञात्मानंपुरुषंप्राप्यताःकलाःलिंगशरीरैकदेशभूताः
यथाभिमाद्यानद्यःसमुद्रंप्राप्यास्तंगच्छंतिएवमेवास्यविदुषःपरितःसर्वज्ञात्मानंपुरुषंप्राप्यतःकलाःलिंगशरीरैकदेशभूताः
पुरुषायणाःपुरुषश्रितात्माश्रयनमधिष्ठानंयासांताःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंतिपुरुषेलीयंतेइत्यर्थःदर्शितइति
पुरुषइतिशेषःश्रुतिस्थाइतिद्वितीयावहुवचनंमायापरिणामात्मकमहाभूतानीतिद्वितीयावहुवचनांतार्थःपंचदशकलाः
श्रुतिष्ठाःप्रतिगतातास्मलीनाइतियावत्तदनिवर्त्यतेईश्वरोपाधिभूतमायायाजीवगतविद्यानिवर्त्यत्वाभावादितिभावःयदि

णमतःप्रभृतीनांविदुषोविदेहकैवल्यसमयेप्यविद्यानिवृत्याविद्याकार्यांशाभिप्रायेणविद्ययोच्छेदोदर्शितःगताःक
लाःपंचदशप्रतिष्ठाइतिश्रुतंतत्रैतदनिवर्त्यमायाकार्यमहाभूतपरिणामरूपोपष्टंभकांशाभिप्रायेणतेषांस्वस्वप्रकृ

कलानांजीवाविद्यामात्रपरिणामत्वेतदातासामशेषतःपुरुषप्रलयःस्यात्तथाचतासांभूतेषुलयप्रतिपादकवचनंनिर्विष
यस्यादतोमायाकार्यमहाभूतानामपिलिंगशरीरोपादानत्वंवाच्यमिति तत्रोभयोरुपादानत्वेश्रुतिद्वयस्यव्यवस्थासिद्धिरेवफल
मित्यर्थःनचमायायास्तत्वज्ञाननिवर्त्यत्वाभावेमिथ्यात्वसिद्धिर्नस्यादितिवाच्यंब्रह्मणिसर्वदृश्यनिषेधश्रुतिवलाद्दृश्यत्वादि।
लिंगैश्चतन्मिथ्यात्वसिद्धेःनचमायायाविद्ययानिवृत्त्यभावेनिवर्तकांतराभावात्सर्वमुक्तावपितद्वृत्तिप्रसंगाइतिवाच्यंमहा
प्रलयकालेसर्वप्राणिभोगप्रदकर्मणांयुगपदुपरमेसतिईश्वरसंकल्पमात्रादेवसर्वप्रपंचलयवत्सर्वमुक्तिकालेइतःप्रवस।
कार्याया मायायाःप्रयोजनंनास्तीमनुसंधानवतईश्वरस्यसत्यसंकल्पस्यमायायास्तकार्यैःसहमपिवस्तुतस्थितेदेकरसेनिःशेषलययोग्या ३५

त्विति एवं रूपादेव मायापरिणामत्वलक्षणसंकल्पात्तल्लयोपपत्तेः श्रुतिस्मृतिपुराणादिषु तत्त्वज्ञानान्मायानिवृत्तिप्रतिपादक
ग्रंथजातमविद्यानिवृत्त्यभिप्रायं यद्वा तत्त्वज्ञानमात्रमविद्याया इव मायानिवर्तने योग्यमपि नानाप्राणिकर्मप्रतिबंधात्तत्स्यानि
वर्तकं चरममुच्यमानस्यैव तु तत्त्वज्ञानं प्रतिबंधकाभावात्तन्निवर्तकमित्यादि कल्पनीयमिति संक्षेपः अंतःकरणादावुभयोरु
पादानत्वमसिद्धं श्रुतिद्वयव्यवस्थाया भाष्यकारैरेवान्यथा प्रतिपादितत्वादिति मतांतरं दर्शयति यथा वियदादीति तत्त्वविदोह
प्सितत्वसाक्षात्कारः प्रत्यग्रूपदेन तत्फलभूतः कलालयो विवक्षितः न हि विषयाः पुरुषे कलाप्रलयश्रुतिविषयार्थः भूतेषु कला

निष्कलयोर्दर्शितः इति मायाविद्याभेदवादिनः यथा वियदादिप्रपंच ईश्वराश्रितमायापरिणाम इति तत्रेश्वरोपादानं तथां
तःकरणादि जीवाश्रिताविद्यामात्रपरिणाम इति तत्र जीव एवोपादानं न चांतःकरणादौ मायाकार्यमहाभूतानामप्यनु
प्रवेशोऽस्तीति श्रुतिद्वयव्यवस्थानुपपत्तिः कलानां विद्ययोच्छेदश्रुतिस्तत्त्वविद्दृष्टिविषया गताः कला इति श्रुतिस्तु वि
यमाणेन तत्त्वविदि समीपवर्तिनः पुरुषानपश्यतस्तद्वत्तदीयशरीरादीनामपि भूम्यादिषु लयं मन्यत इति तटस्थपुरुषप्र।
तीतिविषयेति व्यवस्थायाः कलाप्रलयाधिकरणभाष्ये स्फुटत्वात् इति मायाविद्याभेदवादिष्वेकदेशिनः तदभेदवादिष्व

प्रलयवचनं तु कलानामपि मायापरिणाममहाभूतकार्यत्वभ्रमवतां भ्रांतिसिद्धार्थानुवादकमिति भावः तूष्णींभावपर्यंतो घटना।
शोऽयमभ्रमो दृश्यते न तत्त्वं मन्यत इत्यत्रार्थः प्रतीतिविषयेति प्रतीतिरत्र भ्रांतिरूपा तद्विषया तद्विषयकेत्यर्थः स्वस्वत्वादितता
निपरे तथा ह्याहेति तदधिकरणसूत्रं तानि परे तथाह्यादीनि परे पुरुषे निरवशेषे लीयंते तथा हि श्रुतिराह एवमेवास्यस्याद्या श्रु।
तिर्निरवशेषं लयमाहेति सूत्रार्थः अंतःकरणादीनां मायाकार्यत्वाभावे ईश्वरस्यांतःकरणाद्युपादानत्वप्रतिपादकश्रुति
विरोध इत्याशंक्य सूचयति एकदेशिन इति मायैवाविद्या सा चेश्वरस्यैवोपाधिर्जीवानां तु प्रतिबिंबरूपाणामंतःकरणस्यैवोपाधयः

सि॰ले॰ प्र॰टी॰ ३९

इति मायाविद्ययोरभेदवादिनोऽपि केचिदन्तःकरणादौ जीवस्यैवोपादानत्वं तद्भेदवादिन इव वदन्तीत्याह तद्भेदवादिष्वपीति अपि
शब्दः केचिदित्येतदर्थमतसाम्यार्थकः नन्वस्मिन्नपि मते तथापीत्यादिना स्पष्टं भविष्यति नन्वियदादिप्रपञ्चेऽपि जीव एवोपादानं किं न स्या
दित्यत आह यद्यपीति ईश्वराश्रितमायापरिणामत्वात् ईश्वर एव वियदादावुपादानं न जीव इत्यर्थः ननु मायाविद्ययोरभेदा
पक्षे ऽपि अविद्यापरिणामान्तःकरणादीनामपीश्वराश्रितमायापरिणामत्वाविशेषादीश्वरस्यैवान्तःकरणाद्युपादानमिति व
क्तुमुचितमिति नेत्याह तथापीत्यादिना जीवेति अहंकर्ताहं शृणोमि अहंकाराः अहमज्ञः अहं स्थूल इत्यादिशरीरेणान्
तःकरणादीनां शरीरान्तानां जीवतादात्म्यं प्रतीयते न त्वनेवं जीवे ऽध्यस्तत्वं विना न संभवतीति जीवस्यैव तदधिष्ठानत्व

पि केचिद्यद्यपि वियदादिप्रपञ्चस्येश्वर उपादानं तथाप्यन्तःकरणादीनां जीवतादात्म्यप्रतीतेर्जीव एवोपादानं अत एवा
ध्यासम्भवाच्चान्तःकरणादीनां जीवाध्यासो दर्शितः विवरणे च प्रतिकर्मव्यवस्थायां ब्रह्मचैतन्यस्योपादानतया घटादिसं
गित्वं जीवस्य तदसंसर्गित्वेऽप्यन्तःकरणादिसंसर्गित्वं च वर्णितमित्याहुः

रूपमुपादानत्वेन चेश्वरस्येत्यर्थः प्रतिकर्मव्यवस्थाया
मिति ब्रह्मणः स्वरूपचैतन्येन सर्वदा सर्वभासकत्वरूपे सर्वज्ञत्वे ऽङ्गीकृते न हि जीवस्यापि स्वरूपचैतन्येनैव सर्वदा सर्वज्ञत्वमिति।
दोषप्रसक्तौ जीवं प्रति विषयव्यवस्थाप्रतिपादके ग्रन्थ इत्यर्थः ब्रह्मेति विवर्तचैतन्यरूपब्रह्मणः सर्वोपादानतया घटादिना तादात्म्य
रूपः संसर्गः स्फुरण इत्यर्थः अविद्याया व्यापकत्वेन तत्प्रतिबिम्बरूपजीवस्य व्यापकत्वेऽपि न घटादिभिस्तस्य तादात्म्यमुपादानत्वा
भावादन्तःकरणादिभिस्तु जीवस्य तादात्म्यलक्षणः संसर्गोऽस्तीति प्रतिपादितं विवरण इत्यर्थः अनेन जीवस्यान्तःकरणाद्युपा
दानत्वमुक्तं भवति अन्यथा घटादिभिरप्युक्तसंसर्गित्वं जीवस्य तत्सोपादानत्वाभावाविशेषादिति भावः अत्रान्तःकरणादिपरि ३९

णामुपादानभूताया अविद्याया ईश्वराश्रितमायया सहाभेदांगीकारे ईश्वरस्यैवांतःकरणस्योपादानत्वं वक्तुमुचितं यदि जीवना-
दात्म्यप्रतिपत्त्यादिभिन्नकर्तृत्वाभिज्ञो जीवस्यैवांतःकरणादावुपादानत्वं वक्तव्यमंतःकरणादिपरिणामिभूताविद्याया जीवा-
श्रितत्वमीश्वराश्रितमायायाः सकाशाद्भिन्नत्वं च वक्तव्यं कार्यात्मना परिणममानप्रकृत्याश्रयत्वातिरिक्तस्यैव तन्मते नोपादानत्व-
स्याभावादतो मायाविद्ययोरभेदांगीकारो जीवस्यैवांतःकरणादावुपादानत्वांगीकारश्च परस्परविरुद्ध इत्यस्वरसस्तदभेदवादि-
ष्वपीत्यपिशब्देन सूचितः ईश्वरस्यांतःकरणादावप्युपादानत्वमुपेत्यापि तस्य कार्यमात्रे उपादानत्वं नास्तीति विशेषं वक्तुं मतांतर-
मवतारयति येन स्मात् प्रकृतादीश्वरादित्यर्थः प्रकृतित्वं पंचम्यर्थः तथाह्यवधारणार्थः समप्रपंचस्येत्यनंतरमुपादानमित्यनु-

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी इत्यादिश्रुतेः कृत्स्नस्यावका-
रिकप्रपंचस्य ब्रह्मैवोपादानं जीवस्तु प्रातिभासिकस्य स्वप्नप्रपंचस्य कृत्स्नप्रसक्तिर्निरवयवत्वशब्दाकोपो वेत्यधिकरणे
ब्रह्मणो जगदुपादानत्वेन तस्य कार्त्स्न्येन जगदाकारेण परिणामे विकारातिरेकेण ब्रह्माभावो वा एकदेशेन परिणामे नि-
रवयवत्वश्रुतिविरोधो वा प्रसज्येतेति पूर्वपक्षे आत्मनि चैवं विचित्राश्च हीति सूत्रेण विवर्तवादाभिप्रायेण समाहितत्वाज्जी-

षंगः किं कृत्स्नं ब्रह्म जगदाकारेण परिणमते एकदेशेन वा नाद्य इत्याह कृत्स्नेति यथा दध्याकारेण परिणतस्य क्षीरस्य सर्व-
रूपात्प्रच्युतिः एवं ब्रह्मणोपि स्वरूपात्प्रच्युतिः स्यादित्यर्थः ब्रह्मण एकदेशः परिणमत इति द्वितीयं विकल्पं दूषयति एकदे-
शेनेति पूर्वपक्ष इति उभयथापि ब्रह्मण उपादानत्वं न संभवतीति पूर्वपक्षाभासे सतीत्यर्थः यदि च ब्रह्मण उपादानत्वं क्षीरदधा-
थ्यादिवत्परिणामित्वरूपमभ्युपगम्येत तदा कृत्स्नप्रसक्त्यादिदोषः प्रसज्येत न तु तथाभ्युपगम्यते किं तु रज्ज्वादेः सर्पाद्युपादा-

सि॰ ले॰
सं॰ टी॰
९२

नन्वेवं विवर्तोपादानत्वं ब्रह्मण उपपद्यते अतो नोक्तदोषावकाश इति सिद्धांतयति आत्मनि चैवेति एवकारो यथाशब्दसमानार्थः
द्वितीयोऽवधारणार्थः हिशब्दो हेत्वर्थः ततश्च यथात्मनि जीवे स्वप्नद्रष्टरि विचित्रा रथादिसृष्टयो जीवचैतन्यस्वरूपोपमर्दनं
विनैव भवंति स्वप्नावस्थानिवृत्त्यनंतरमपि तु रथादिसत्त्वात् तथा जीवचैतन्यस्य यथापूर्वमवस्थानात् एवं ब्रह्मणि तत्स्वरूपप्रच्युतिं विनैव
विचित्रा वियदादिसृष्टयः संभवंति सृष्टिस्थितिसंहारेषु सच्चिदानंदस्वरूपेण ब्रह्मणोऽनुवृत्तेः श्रुतिसिद्धत्वादिति तत्रार्थः अपृथ
क्त्वं ब्रह्मोपादानमित्यादिप्रश्नोत्तरीयपक्षमादाय प्रतिवचनमवतारयति जीव इति परिपूर्णचिदात्मा अविद्यया अविच्छेदप्रतिबिंब
भावो विनापि या मत्जीवभावः सन् आत्मानमेव सर्वेश्वरं कल्पयति आत्मन ईश्वरभावात् तस्मादेव गगनादिसृष्टिं कल्पयति स्वस्य स्व

वात्मनि स्वरूपानुपमर्दनेनानेकाकारस्वप्नप्रपंचसृष्टिवत् ब्रह्मणि वियदादिसृष्टिरुपपद्यत इति सिद्धांतितत्वादिसमन्वे जीव
एव स्वप्नद्रष्टृवत् स्वस्मिन्नीश्वरादिसर्वकल्पकत्वेन सर्वकारणमित्यपि केचित् प्रथमायां तृतीयप्रकृतिर्विंशादिसृष्टिर्मायाजा

ल्पितादीश्वरादेर्दंतनियम्यत्वं च कल्पयति तथा क्रमेण मनुष्यादिभावं कल्पयति यथा वियदादिप्रपंचो व्यावहारिकसत्यः स्वप्नप्र
पंचः प्रातिभासिक इति पक्षे स्वप्नद्रष्टा जीव एव देवतिर्यङ्मनुष्यभावेन तन्नियंतृपरमेश्वररूपेण ततोऽभिन्नत्वादिरूपेण चात्मानं क
ल्पयति तद्वत्तथा च तस्मिन्नेव सर्वप्रपंचकल्पकत्वात् जीवभावापन्नब्रह्म सर्वोपादानमिति दृष्टिसृष्टिवादिनः प्राकृतोऽर्थः जीवभा
वापन्नब्रह्मणः सर्वोपादानत्वमित्यस्मिन् पक्षे जीवाद्धिकस्येश्वरस्याभावादीश्वरस्य सर्वजीवनियंतृत्वप्रतिपादकश्रुतिस्मृतिन्याय
सूत्रभाष्यादिविरोधो बंधमोक्षव्यवस्थानुपपत्तिश्चेति दोषं सूचयति इत्यपि केचिदिति तथा च जीवेति व्यासभावादीश्वररूपमेव ब्र ९२

ह्मसर्वोपादानमितिस्थितं इदानीं ब्रह्मलक्षणस्योपादानत्वस्यासंभवमाशंक्य ते ग्रथेति श्रुतौ न यद्यहो माया या:प्रकृतित्वमवधारय
ति यथा मृदादिगतस्य लक्षणत्वादेर्घटादावनुगमात् घटादौ मृदादेरुपादानत्वं तथा मायागतजाड्यस्य जगत्यनुगमात् मायास्तदुपा
दानत्वमिति युक्तिमप्याह मायाजाड्यस्येति कथमिति ननु ब्रह्मण उपादानत्वं कुत इत्यत आह रणेन संवर्दर्शितं सत्यं ह शीतेततत्तनसं
भवति निरवयवस्य तस्य मृदादेरिव परिणाम्युपादानत्वासंभवात् नच विवर्तोपादानत्वं निरवयवस्यापि संभवति गगनादौ ने
लाद्यारोपदर्शनादिति वाच्यं परिणामिष्विव विवर्ताधिष्ठानेष्व लोके उपादानत्वप्रसिद्ध्यभावेन तत्रोपादानत्वाभ्युपगमस्यपरि।

अस्य च घटादिष्वनुगमात्तु माया जगदुपादानं प्रतीयते कथं ब्रह्मोपादानं अत्राहुः पदार्थतत्त्वनिर्णयकाराः ब्रह्म माया चेत्यु
भयमुपादानमित्युभयसंपत्त्युपपत्तिः सत्ताजाड्यरूपोभयधर्मानुगत्युपपत्तिश्च तत्र ब्रह्म विवर्तमानतयोपादानमविद्या
परिणममानतया नच विवर्ताधिष्ठाने पारिभाषिकमुपादानत्वं स्वात्मनि कार्यजनिहेतुत्वस्योपादानलक्षणस्य तत्रा
प्यविशेषादिति केचित् उक्तामेव प्रक्रियामभ्युपगम्य विवर्तपरिणामोपादानद्वयसाधारणमन्यल्लक्षणमाहुः स्वाभिन्न
भावमात्रत्वादित्याद्युपाभिप्रायः उपादानत्वघटितब्रह्मलक्षणस्यासंभवं निराचष्टे अत्राहुरित्यादिना सत्तेति नच वाध्यायोग्यस
रूपमसत्ता यास्तस्या ब्रह्मस्वरूपत्वात् सत्तायास्तद्धर्मत्वोक्तिरयुक्तेति वाच्यं राहोः शिर इतिवद्भेदकल्पनया तद्धर्मत्वव्यवहारोपपत्तेरि
तिभावः ननु उपादानद्वयं कथमितिनेत्याह तत्रेति मायाब्रह्मणोर्मध्ये इत्यर्थः आद्येपाभिप्रायमनूद्य निराचष्टे नचेति मृदादि
प्रसिद्धस्योपादानलक्षणस्य विवर्ताधिष्ठानेष्वपि सत्त्वात् नेषूपादानत्वाभ्युपगमस्य परिभाषामात्रत्वं नास्तीत्यर्थः स्वात्मनीति
अत्रस्वशब्द उपादानत्वाभिमतवस्तुपरः तथा च कार्याधारत्वे सति कार्यजनिहेतुत्वमुपादानत्वं निमित्तकारणवारणाय सत्यंते मृ

सि॰ ले॰
प्र॰ टी॰
३८

तत्वादेरुपिकार्याधारत्वात्कारणयविशेषं तत्रापीति विवर्ताधिष्ठानेपीत्यर्थः उक्तमेवेति प्रपंचेऽभयोरपिमायाब्रह्मणोरु
पादानत्वं तत्रपरिणामितया मायायाउपादानत्वं अधिष्ठानतया च ब्रह्मणउपादानत्वं उभयोरुपादानत्वेश्रुतिस्मृत्योरुपपत्ति
श्चेत्येतामितन्नर्थः स्वाभिन्नेति स्वस्माच्चेनतु घटाद्युपादानम्मृदादिजगत्परिणाम्युपादानम्भूतमज्ञानंजगद्विवर्तोपादानम्भूतं ब्रह्म
चगृह्यते तत्र घटादेर्मृदादेः सकाशादभेदः स्फुटः मृदेवघट इत्यनुभवात् अज्ञाने ब्रह्मणि च कार्याभेदमनुभवेनदर्शयति अ
स्तिचेति ननु मृद्घट इतिवत् ब्रह्मघटः ब्रह्मपट इत्यनुभवोनास्ति तथा अज्ञानेघट इत्याद्यनुभवोपिनास्तिअतःप्रपंचस्याज्ञान
तब्रह्मणश्चकथमभेदोस्तीतिशंकानिरासायब्रह्मणः सद्रूपत्वं विशेषणं दत्तं अज्ञानस्यजडत्वे तथा च ब्रह्माज्ञानाभ्यां सत्वब्रह्म

कार्यजनकत्वमुपादानत्वं अस्ति च प्रपंचस्य सद्रूपेण ब्रह्मणा विवर्तमानेन जडेनाज्ञानेन परिणामिना चाभेदः सन्घटः ज
डो घट इति सामानाधिकरण्यानुभवात् न च तदनन्यत्वमारंभणशब्दादिभ्य इति सूत्रे अनन्यत्वव्यतिरेकेणाभावः ॥

त्वाज्ञानत्वाकारेणाभेदानुभवाभावेपि सत्त्वजडत्वरूपेण ताभ्यां सह प्रपंचस्याभेदानुभवोस्तीत्याह सन्घट इत्यादिना ननु घटोसते:
सर्वत्र कारणद्रव्यसत्त्वानुभवात् मृत्स्वकारणधर्मत्वेसिद्धे सतिमृद्घट इति प्रसत्तानुभवः कार्यकारणद्रव्ययोरभेदावगाही
तियुक्तं सत्वजडत्वयोस्तु कारणधर्मत्वे किं मानं येन सन्घटजडो घट इत्यनुभवबलेन सद्रूपजडरूपाभ्यां ब्रह्माज्ञानाभ्यां प्रपंचस्या
भेदः सिद्ध्येदिति चेदुच्यते ब्रह्मणः सद्रूपत्वं सदेवेत्यादिश्रुतिसिद्धं तदेतज्जडमोहात्मकमिति श्रुत्या अज्ञानस्य जडत्वं सिद्धं तथा च
घटादौ मृत्तद्द्रव्याभेदात् मृत्त्वानुभववत् सद्घटत्वादिरूपकारणद्रव्याभेदादेव प्रपंचे सत्त्वजडत्वानुभवोपपत्तौ पृथक्सत्त्वादियमौ ३८

नोपपद्यते तथा च सन्नत्र दोषस्तद्वदिहाप्युभयोरपि कार्यकारणयोरभेदावगतीति भावः ननु जडरूपाज्ज्ञानस्वरूपं च अभेद इति
ज्ञावपि मायायाः किं मायात्मिति वा तयोरभेदाभ्युपगमादिति भावः कार्यकारणयोरभेदाभ्युपगमे युपसिद्धान्ते शंकते न
चेति कार्यकारणयोरनन्यत्वमभ्युपगतमेव कुतः आरंभणशब्दादिभ्यः वाचारंभणश्रुतिरारंभणशब्दस्यार्थः आत्मैवेदं सर्वमि।
त्यादिसार्वात्म्यप्रतिपादकश्रुतिर्नेह नानास्ति किंचनेत्यादिनिषेधश्रुतिश्चादिशब्दार्थः वाचारंभणश्रुतिर्विवर्तलक्षण
कथनावसरे व्याख्याता कार्यस्य कारणव्यतिरेकेण जगत्कारणस्य ब्रह्मणः सर्वात्मकश्रुतिरनुपपन्ना स्यात् तथा ब्रह्मोपादानक
स्य जगतः सत्त्वे ब्रह्मणि जगन्निषेधो न स्यादतः कारणीभूतब्रह्मानन्यत्वं प्रपंचस्याभ्युपगतमेवेति भावः ननु सौत्राननन्यत्व
पदेन कार्यकारणयोरैक्यं प्रतीयते तदनुपपन्नं कार्यकारणभावविरोधात् चिज्जडयोर्ब्रह्मप्रपंचयोरैक्यायोगाच्चेति शंकाति

नत्वेवमनन्यत्वमित्यभेदं ब्रूमः किंतु भेदं व्यासेधाम इति भाष्यमामतीनिषेधाभ्यां प्रपंचस्य ब्रह्माभेदनिषेधाद्भेदा

शंकेत सौत्राननन्यत्वपदं व्याचष्टे भाष्यकारः अनन्यत्वं व्यतिरेकेणाभाव इति न च कारणव्यतिरेकेण कार्यस्याभावे कथं कार्यकारण
भाव इति वाच्यं कारणसत्तव्यतिरेकेण कार्यसत्ताभावस्य विवक्षिततया कार्यस्य स्वरूपापलापशंकानवकाशात् सौत्राननन्यत्वपद
तात्पर्यप्रदर्शकं भामतीनिबंधने वाक्यमवतारयति नत्वेति अनन्यत्वमितिपदेन कार्यकारणयोरभेदं न ब्रूमः चेतनाचेत
नयोरभेदानुपपत्तिस्तन्निषेधे हेतुः खल्वशब्देन द्योत्यते तर्हि कारणब्रह्मविज्ञानात्सर्वविज्ञानश्रुतिसिद्धं न भवेत् अभेदानभ्यु
पगमादिति शंकते किं त्विति परिहरति भेदमिति कार्यकारणयोः तत्त्वभेदं व्यासेधामइत्यर्थः तथा च कारणस्वरूपमेव तत्त्वम
मेव कार्यस्य वास्तवस्वरूपमिति तस्मिन् विदिते तद्व्यतिरिक्ते सर्वं तत्त्वतो विदितं भवतीति नैकविज्ञानेन सर्वविज्ञानविरोधः न

चैकस्य स्वरूपज्ञानेन सर्वप्रपंचस्य वास्तवस्वरूपे विदितेऽपि तत्तदसाधारणरूपज्ञानासंभवात् प्रतिज्ञाविरोधस्तदवस्थ एवेति वाच्यं अज्ञात
नि विदिते सर्वं विदितं भवत्यादिप्रतिज्ञावाक्ये सर्वपदस्य सर्वतत्त्वपरत्वेन तत्तदसाधारणरूपेण सर्वज्ञानस्याविवक्षितत्वात् न च तथाकस्य
नाप्यं किं विनिगमकमिति वाच्यं सर्वप्रपंचतत्त्वज्ञानमात्रेण द्वितीयब्रह्मज्ञानमात्रस्य शुक्तिरसायनस्य लाभेन तदसाधारणरूपज्ञानेनैष्फ
ल्यस्यैव विनिगमकत्वात् कारणे ब्रह्मणि विदितेऽपि सर्वप्रपंचगततत्तदसाधारणरूपज्ञानस्यासंभवेन सर्वज्ञानश्रुतेस्तत्परत्वे मानाभा
वप्रसंगाच्च भेददर्शनस्यानर्थहेतुतया श्रुतिभिर्नवृत्तत्वान्निंदितत्वाच्च प्रतिज्ञाश्रुतेर्न नानारूपज्ञाने तात्पर्यं तदुक्तं पंचदश्यां अद्वैते भित्तिवि
कल्पमेवाद्वैकस्य बोधतः सर्वबोधः श्रुतो नैव नानात्वस्य विवक्षयेति अस्यार्थः अत्र वेदांतेष्वेकस्य ब्रह्मणो बोधेन सर्वस्य प्रपंचबोधः अद्वैते ब्र
ह्मणि मृन्मयमभिप्रेतीकृतमेवमुक्त्वा द्वितीयब्रह्मबोधार्थमेव श्रुतः इत्यर्थः अद्वितीयब्रह्मबोधश्च सर्वस्य ब्रह्मैव वास्तवं स्वरूपमिति ज्ञान

भ्युपगमे प्रसिद्धांत इति वाच्यं तयोर्ब्रह्मरूपधर्मिसमानसत्ताकाभेदनिषेधे तात्पर्येण द्वैत तयोर्विप्रातीतिकाभेदाभ्युपगमेऽपि
विरोधाभावादिति

मात्रास्तीत्यतीतिभावः ननु ब्रह्मणि विदिते सर्वं वि दितं भवतीति श्रुतौ स्वरसतः प्रतीयमानं तत्तदसाधारणरूपेण स
र्वज्ञानमेव श्रुत्यर्थः किं तस्मादिति नेत्याह नैवेति नानात्वबोधविवक्षया सर्वबोधो नैव श्रुत इति योजना प्रयोजनाभावात् बाधितत्वान्निंदित
त्वाच्चेति तयोरिति भाष्यभामत्योर्निर्वर्थयोरित्यर्थः न च प्रपंचब्रह्मणोर्वास्तवाभेदनिषेधे सति वास्तवभेदः स्यादिति वाच्यं भेदस्य वास्तवत्वं
हि धर्मिप्रतियोगिनोर्वास्तवत्वापेक्षं न च ब्रह्मणो वास्तवत्वेऽपि प्रपंचस्य आरंभणशब्दादिभ्यो मिथ्यात्वावगमेन तयोर्भेदस्य सत्यत्वायोगा
दिति भावः प्रातीतिकेति यथा इदं रजतमिति भ्रांतिसिद्धं रजतेदमर्थयोरभिन्नत्वं तयोः सन्न च रजतस्याधिष्ठानातिसिद्धाभेदोपगमे सिद्धांतवि
रोधाभावादिति भावः मायांतप्रकृतिं विद्यादिति श्रुत्या प्रवधारणार्थकतच्छब्दवत्या मायाया एवोपादानत्वावगमेन ब्रह्मण उपादान ३५
त्वाभावादुपादानत्वं च दितब्रह्मलक्षणस्यासंभव इत्याशंक्य मायाब्रह्मणोरपि प्रकृतित्वमस्तिश्रुतिनियुक्तयोरविशेषात् मायां त्विति श्रु
तौ तु शब्दो नावधारणार्थः ॥

किंच तद्रूपब्रह्मापेक्षया मायायां वैलक्षण्यद्योतनार्थः तच्च वैलक्षण्यं परिणामित्वरूपं प्रकृतित्वं मायाया इत्याशयवतां पद्मा
दीनत्वनिर्णयकारादीनां मतभेदे न लक्षणासंभवशंकापरिहृता इदानीं ब्रह्मैवोपादानं न मायाश्रुतेन लक्षणासंभवशं
काव काशाइति मन्यमानानां मतद्वयमाह संक्षेपशारीरककृतस्त्विमित्यादिना नहि विवर्ताधिष्ठानमायेति नेत्याह कूटस्थस्येति यदि
मायां विनैव ब्रह्मोपादानं स्यात्तदा ब्रह्मणः स्वतः परिणामित्वमेव स्यात् तथा च परिणामवादिभिः परिणामपरिणामि
नोर्वास्तवाभेदाभ्युपगमात् परिणामस्य जन्मादिविकारैर्ब्रह्मापि विकारवदेव स्यात् न चेष्टापत्तिरत्र वक्तुं शक्यते जन्माद्य
तइस्मादिवकुक्षतिश्रुत्या ब्रह्मणो जन्मादिविकाररहितस्वरूपकूटस्थत्वप्रतिपादनविरोधात्तो मायाद्वारा ब्रह्मणः कारणत्व
वक्तव्यमिति न च यर्थामायेत्यर्थः यथा मृदस्तु न उपादानत्वेपि तज्जन्यक्षणत्वादिसंस्कारोद्वारकारणं न ह्यसंस्कृतस्य मृदः।
संक्षेपशारीरककृतस्तु ब्रह्मैवोपादानं कूटस्थस्य स्वतः स्वतः कारणत्वानुपपत्तेर्मायाद्वाराकारणं प्रकारणमपिका।
स्त्वनोद्वारकमुपादानत्वं संहते न याकूटस्थस्य चैतन्यरूपे ब्रह्मणि समारोपिता माया तत्र जगत्प्रकृतित्वं घटयन्ती सहकारिका
रणमुपपद्यत इति भावः न च मायाया उपादानत्वाभावे मायां प्रकृतिं विद्यादिति श्रुति विरोध इति वाच्यं ब्रह्मगतप्रकृतित्वनि
र्वाहकमात्रेण तस्याः प्रकृतित्वश्रुत्युपपत्ते मायायां प्रकृतित्वनिर्वाहकमात्रेण स्वतः प्रकृतित्वमस्तीत्याशयेनैव तस्यां शक्ति
व्यवहारः श्रुतौपपत्ते परास्य शक्तिर्विविधैव श्रूयत इति नहि मृदादिपदार्थगतशक्तेः किंचित्कार्यं प्रत्युपादानत्वं प्रसिद्धं
लोके अतएव विनिगमकाभावान्मायाब्रह्मणोरुभयोरप्युपादानत्वमिति निरस्तं मायाया ब्रह्मशक्तित्वेन स्वतउपादानत्वा

सि॰ ले॰
प्र॰ टी॰
कृ॰
१५०

संभवात् न चेतस्याः प्रकृतित्वानुपपत्तेर्जगतः परिणाम्युपादानेन न स्यात् ब्रह्मणः परिणामित्वापातः कूटस्थत्वविरोधेनासत्कत्वयुक्त्वादिति वाच्यं वाचस्पतिमते इव प्रपंचस्य चिदध्यस्तत्वमायाविषयीकृतब्रह्मविवर्तत्वमात्रांगीकारोपपत्तेः न च संक्षेपशारीरकग्रन्थेन तु मायायाः परिणामित्वव्यवहारविरोध इति वाच्यं तथाव्यवहारस्य मतांतराभिप्रायत्वोपपत्तेः ननु जडभूतमायायाः प्रकृतिकत्वाभावे प्रपंचस्य जाड्यं न स्यादिति नेत्याह अकारणमपीति अनुपादानमपीत्यर्थः जगदनुगतं जाड्यं न कारणगुणः किंतु जगत एव स्वाभाविकमतस्तत्सिद्धये मायाया उपादानत्वं कार्यानुगतद्वाराकारणत्वं वा न कल्पनीयमित्याशयेनाह वाचस्पतिमि

यैं तु गच्छति स्मदइवत्कृतस्य सत्तापात्वादेरपि चटे तु गमदर्शनादित्याहुः वाचस्पतिमिश्रास्तु जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपंचाकारेण विवर्तमानतयोपादानमिति मायासहकारीमात्रं न कार्यानुगतं द्वारकारणं

श्रास्त्विति जीवाश्रितेति ननु तत्र ब्राह्मणो आकाशशबलितमायायाः अक्षरशबलितनिर्मित्वे तत्स्याश्रितत्वस्य प्रतिपादितत्वात् कथं तस्या जीवाश्रितत्वमुपेयते मायिनं तु महेश्वरमिति श्रुतिविरोधाच्च अत्र मायिनमित्यनेन महेश्वरशबलितब्रह्माश्रितत्वप्रतिपादनात् किंच जीवस्य स्वमायाश्रयत्वे तस्यैव जगदुपादानत्वं स्यात् प्रपंचस्य मायापरिणामत्वात् प्रपंचपरिणामिमायाश्रयत्वं हि ब्रह्मणः प्रपंचोपादानत्वं जीवस्य मायाश्रयत्वे तु तस्यैव जगदुपादानत्वं स्यान्न ब्रह्मणः किंच जीवाश्रितमायाविषयीकृतब्रह्मोक्तिमते ब्रह्मण उपाधित्वेनांगीकारेण नियतत्वं जगत्कर्तृत्वादेरभावप्रसंगश्चेति चेत् उच्यते जीवाश्रितेति पदेन जीवत्वविशिष्टचेतनस्याश्रितत्वं विवक्षितं तेन न भवति किंतु अवच्छेदकत्वाश्रयाणामविरोधेन चेतनस्याश्रितत्वस्यैव जीवत्वं तु मायापदवेदनीयाविद्यया चेतनस्य तु नो अवच्छेदकामिति जीवाश्रितमायेत्युच्यते न च जीवस्यापि चेतनस्य तु तो माया एवावच्छेदका वाच्येति परस्पराश्रयप्रसंग इति वाच्यं इष्टत्वगुणाश्रयत्व १५०

योऽपि च परस्परस्थितिप्रयोजकतया परस्परापेक्षत्वलक्षणपरस्पराश्रयत्वसादोषत्वात् परस्पराश्रयोऽस्तु मनीषितमो वा दोषो भवेत् सच प्रकृ-
तेनास्ति अविद्याजीवत्वयोरनादित्वात् नित्यसिद्धाभासत्वाच्च नच जीवत्वस्याविद्यास्थितिप्रतिनियामकत्वकल्पने व्यर्थमिति वाच्यं ब्र-
ह्मणः तस्याः स्थितिनिवारकत्वान्निरवद्यं निरंजनमिति श्रुत्या ब्रह्मणो निर्दोषत्वावगमेन तस्याऽविद्यारूपदोषाश्रयत्वानुपपत्तेः नच व-
स्तुतो निर्दोषत्वपरा श्रुतिरिति वाच्यं तथा संकोचे मानाभावादीश्वरस्वरूपब्रह्मवज्जीवस्यापि वस्तुतो निर्दोषत्वाच्च नच मायिनं तु महेश्वरमि-
ति श्रुतिविरोधः गृहीयतो देवदत्त इत्यादौ देवदत्तस्य गृहाश्रयत्वाभावेपि मत्वर्थस्य स्वस्वामिभावलक्षणसंबंधान्तरबोधकत्ववत्
महेश्वरशब्दितब्रह्मणो मायाश्रयत्वाभावेपि मायाब्रह्मणोर्विषयविषयिभावलक्षणसंबंधान्तरबोधकतया मायिनमिति श्रुत्युपपत्तेः
प्रपंचस्य च जीवाश्रितमायाविषयीकृतब्रह्मविवर्तमात्रत्वाभ्युपगमात् जीवस्य जगदुपादानत्वप्रसंगः ब्रह्मण उपाध्यभावेपि सर्वतिमत्

मित्याहुः सिद्धान्तमुक्तावलीकृतस्तु मायाशक्तिरेवोपादानं न ब्रह्म तदेतद्ब्रह्मापूर्वमनपरमबाह्यं न तस्य कार्यं करणं च वि-
द्यत इत्यादिश्रुतेः जगदुपादानमायाधिष्ठानत्वेन तत्रोपचाराडुपादानता ईदृशमेवोपादानत्वलक्षणं विवक्षितमित्याहुः अथ

त्वादिजीवाविद्याविषयीकृतब्रह्मविवर्ततया ब्रह्मधर्मत्वेनैव कल्पने न जीवाविद्यापरिणामतया जीवधर्मत्वेनानुभवविरोधात् ब्रह्म-
णश्च सर्वनियन्तृत्वसर्वज्ञत्वादिप्रतिपादकशास्त्रस्य कल्पकस्य सत्त्वात् तस्मात् सिद्धं जीवाश्रितमायाविषयीकृतं ब्रह्म प्रपंचाकारेण
विवर्तमानतया उपादानमिति उक्तं वाचारम्भणाधिकरणभाष्ये मूलकारणमेवान्त्यात्कार्यात्तेन तेन कार्याकारेण नटवत्सर्वव्यवहारा-
स्पदत्वं प्रतिपद्यत इति ग्रंथात् कार्यादिति अन्तकार्यपर्यन्तमित्यर्थः नटो हि द्रष्टृभिरविज्ञातनिजरूप एव तत्तदभिनेयात्मस्वरूपतां प्रति-
पद्यते एवं जीवैरविज्ञाततत्त्वं सत् ब्रह्मास्म वियदादिप्रपंचाकारतां तद्द्वारा व्यवहारविषयतां च प्रतिपद्यत इति भाष्यार्थः अत्र नटदृष्टा-
न्तोक्त्या वाचस्पतिमतं भाष्याभिमतं निश्चीयते तदुक्तं कल्पतरौ अज्ञाननटवद्ब्रह्मकारणं शंकरोऽब्रवीत् जीवाज्ञानं जगद्बीजं जगौ वा-

सि॰ ले॰
प्र॰ टी॰
४१

वस्यतिस्तथेति इदानीं मायायाएव मायांतु प्रकृतिंविद्यादिति श्रुतिस्वारस्यानुरोधेन मुख्यमुपादानत्वमितिस्वीकृत्यापि ब्रह्मलक्षण
संभवं परिहरति सिद्धांतमुक्तावलीकृतास्त्विति तन्मतं तत्र तद्ध्यादिसत्तिरूपं सर्वं कारणं न विद्यते यस्य तदपूर्वं अपरं कार्यं न वि
द्यते यस्य तदनपरं तस्य ब्रह्मणः कारणं च जगत्सृष्टिसाधनं चेत्यर्थः इत्यादिश्रुतेर्न ब्रह्मोपादानमित्यर्थः नहि ब्रह्मणो जगदुपाद
नत्वप्रतिपादकश्रुतिसूत्रभाष्यादिविरोध इत्यत आह जगदिति तु शब्दोवधारणे तादृशमेवेति जगदुपादानमायाधिष्ठानत्वमित्य
र्थः सर्वज्ञईश्वरस्य जगदुपादानत्वमुक्तं जीवाश्रितमायेत्यादौ जीवेपिस्ववृत्तं इदानीं तयोः स्वरूपं निरूपयितुं प्रश्नमवतारयति
अथेति मायांतु प्रकृतिमितिश्रुतौ याभूतप्रकृतित्वेन मायाप्रसिद्धा तस्यां चेतनप्रतिबिंब ईश्वरः ननु मायिनं तु महेश्वरमिति वाक्यशे

कईश्वरः कोवाजीवः अत्रोच्यते प्रकृतार्थविवरणेऽनादिरनिर्वाच्याभूतप्रकृतिश्चिन्मात्रसंबंधिनी माया तस्यां चित्प्रतिबिंब
ईश्वरः तस्याएव परिच्छिन्नानंतप्रदेशेष्वावरणविक्षेपशक्तिमदविद्याभिधानेषु चित्प्रतिबिंबो जीव इति

धेमायाया ईश्वराश्रित
त्वप्रतिपादनादीश्वरस्य मायाप्रतिबिंबत्वं न संभवति उपाधेः प्रतिबिंबाश्रितत्वादर्शनादितिशंकां निराचष्टे चिन्मात्रसंबंधिनीति चिन्मा
त्राश्रितेत्यर्थः मात्रपदेन बिंबत्वादेर्व्यवच्छेदः वाक्यशेषेपि महेश्वरपदं चिन्मात्रलक्षकमिति भावः सांख्याभिमतप्रकृतेरिव मायायाः
स्वतंत्रत्वं वारयति अनिर्वाच्येति माया तावत् ब्रह्मचैतन्यान्न वस्तुतो भिन्ना ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वप्रतिपादकश्रुतिविरोधेन वस्तुत
स्तस्यास्ततो भेदासंभवात् नाप्यभिन्ना चैतन्यजडयोरैक्यायोगात् नापि चैतन्याद्भिन्नाभिन्ना एकत्र भिन्नाभिन्नत्वयोर्विरोधेनासंभवात्
एवं न तावन्माया सती अद्वैतश्रुतिविरोधादेव नाप्यसती भूतप्रकृतित्वानुपपत्तेः नापि सदसती सत्वासत्वयोरेकत्र विरोधादेव न तावत्सा
या सावयवा तस्याः सादित्वप्रसंगेन तत्प्रतिबिम्बभूतेश्वरस्यापि सादित्वप्रसंगात् मायायाः सादित्वे तत्प्रकृतित्वेन मायांतरापेक्षायामनवस्था ४१
प्रसंगाच्च नापि निरवयवा प्रकृतित्वाभावप्रसंगात् सावयवपदार्थानामेव लोके प्रकृतित्वदर्शनात् ॥

नाप्युभयरूपासावयवत्वनिरवयवत्वयोरेकत्र विरोधात् तस्मात्सर्वप्रकारेण निर्वक्तुमशक्यतया मायायाः अनिर्वाच्यत्वमित्यर्थः तस्याः परिच्छिन्न
नंतप्रदेशेषु चैतन्यप्रतिबिंबो जीवः न साक्षात्तत्स्यामेव विश्राति बिंबो जीवः स्मेवकारार्थः प्रदेशानां परिच्छिन्नत्वविशेषणं तत्प्रति बिंबरूपजी
वानां परिच्छिन्नत्वलाभार्थं तथा च भाष्ये तत्र तत्र जीवानां परिच्छिन्नत्वनिरूपणं संगच्छते तथा हि सर्वत्रोपदेशादित्यधिकरणे सौ च शारीरपद
व्याख्यानरूपभाष्यं शारीर इति शरीरे भवः इत्यर्थः ननु ईश्वरोपि शरीरे भवति सर्वशरीरे भवति न तु शारीर एव भवति आकाशवत्सर्वे
गतत्वान्नित्यत्वात् इति व्यापित्वश्रवणात् जीवस्तु शारीर एव भवति तस्य भोगाधिष्ठानात् शरीरादन्यत्र वृत्त्यभावादिति तथा शक्रत्वाद्यधिकर
णगतं भाष्यं न चोपाधिपरिच्छिन्नस्य विभोः प्राणभृतो स्वभावाधायतनत्वं सम्यक् संभवतीति प्राणभृत्तो जीवस्य स्वभावादिशब्दितजरा
यतनत्वमनुरूपेण संभवति अविभुत्वादिति भाष्यार्थः परस्पराभेदकल्पितवत् एवमायायामप्रदेशसंसृष्टिः तस्यानादित्वात् किंतु मायायो

न तत्त्वविवेकेऽत्र त्रिगुणात्मिकायां मूलप्रकृतेर्जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिसिद्धौ तौ
रूपभेदो रजस्तमोनभिभूतशुद्धसत्त्वप्रधाना माया तदभिभूतमलिनसत्त्वात्त्वविद्येति मायाविद्याभेदं परिकल्प्य मायाप्र

विक्षेपावरणशक्तीनामानंतापि विक्षेपावरणशक्तिमज्ञानप्रदेशापचविवक्षितास्यां स्यायेनाह आवरणविक्षेपशक्तिमदिति ब्रह्म
चैतन्यावरणानुकूलाशक्तिरावरणशक्तिः आवरणं च ब्रह्म नास्ति न प्रकाशते इति व्यवहारयोग्यत्वं विक्षेपपदेन तत्तज्जीवसाधार
णकर्तृत्वादिकं विवक्षितं तदनुकूलशक्तिर्विक्षेपशक्तिरित्यर्थः ननु मायाप्रदेशानां जीवोपाधित्ववर्णनमनुपपन्नं आनुमानिकाधि
करणभाष्यादावविद्याजीवोपाधित्वव्यवहारविरोधप्रसंगादत आह अविद्याभिधाने स्थिति मायाशब्दे शानामेव भाष्यगतोविद्याप
दाभिलप्यत्वान्न तद्विरोध इति भावः एकस्यामेव मूलप्रकृतौ प्रदेशप्रदेशीभावेनानिर्वचनीयं भेदं कल्पयित्वा जीवेश्वरयोः प्रतिबिंब
रूपत्वमुक्तम् इदानीं तस्यामेव प्रकारांतरेण रूपभेदं कल्पयित्वा तदुपपादयति न तत्त्वविवेकेनेति भेदकल्पनावैलक्षण्यद्योतनार्थं

स्तु शब्दः रूपभेदाविति स्त इति शेषः रजस्तमोनभिभूतत्वमेव सत्वस्य शुद्धत्वं शुद्धसत्वप्रधाना प्रकृतिर्माया मलिनसत्वप्रधाना प्रकृतिरवि
द्येत्यर्थः रजस्तमोभ्यां तत्वमेव सत्वस्य मलिनत्वं सत्वशुद्ध्यशुद्धिभ्यां मायात्वाविद्यात्वाभ्यां प्रकृतेस्तु रूपभेदौ निरूप्य विक्षेपावरणशक्ति
भेदेन प्रकृतेस्तत्रूपभेदावेव निरूपयति पकैवेति अतएवेति जीवस्यावरणशक्तिमदुपाधिमत्वादेवेत्यर्थः तस्यांशत्तु जीवेश्वरोपाधिभू
तायाः प्रकृतेः प्रतिबिंबरूपजीवेश्वरसाधारणबिंबचैतन्याश्रितत्वेपीत्यर्थः नेश्वरस्येति अत्रापि अतएवेत्यस्यानुषंगः आवरणशक्ते
रीश्वरोपाधिकोटावननुप्रवेशादेवेतितदर्थः तथाच जीवेश्वरौ प्रतिप्रकृतेः साधारणत्वादेकस्य सर्वज्ञत्वमपरस्याल्पज्ञत्वमिति यद्य
त्वत्तणपंक्तस्य नुभवसिद्धं तत्कथं संभवतीति शंका या अनवकाशइतिभावः मतांतरमाह संक्षेपेति क्रतौ कारणपदमविद्यापरं का
तिबिंबईश्वरः अविद्याप्रतिबिंबोजीवइत्युक्तं पकैवसत्वप्रकृतिर्विक्षेपप्रधानेन मायाशब्दितेश्वरोपाधिः आवरणप्रधा
न्येन विद्याशब्दिताजीवोपाधिः अतएवतस्याजीवेश्वरसाधारणत्वेनात्रसंवंधित्वेपि जीवस्यैवाज्ञोस्मीत्यज्ञानसंवंधा
नुभवो नेश्वरस्येतिजीवेश्वरविभागः क्वचिदुपपादितः संक्षेपशारीरकेत कार्योपाधिरयंजीवः कारणोपाधिरीश्वरइति
श्रुतिमनुसृत्याविद्यायां चिदाभासोप्रतिबिंबईश्वरः अंतःकरणे चिदाभासोप्रतिबिंबोजीवः नचांतःकरणरूपेणाद्वयेण व्यवधानेनाका
र्यपदमंतःकरणपरमिति मत्वाआह अविद्यायामित्यादिना ननुजीवेशावाभासेन करोति मायाचाविद्याचस्वयमेवभवतीति श्रुतिवि
रोधः तस्यांश्रुतौजीवस्यकारणोपाधिकत्वप्रतीतेरिति चेदुच्यते जीवेशावाभासेन करोतीति पूर्वभागेन हि जीवेश्वरयोरुभयोरपिप्र
तिबिंबभावः प्रतीयते ननु बिंबकास्यलेडुपाधिभेदं विना प्रतिबिम्बभेदः संभवति सूर्यादिप्रतिबिंबस्थलेडुपाधिभेदं विना प्रतिबिंबभे
दादर्शनात् तथा चोदाहृतश्रुतौप्रतिबिंबरूपयोर्जीवेशयोर्यथाक्रमंमायाविद्याप्रदाभ्यामुपाधीसमर्प्यते मायापदंचात्र मायाकार्यांतः ५२
करणपरं नचैवंसत्वप्रकृतिप्रकृतत्वप्रवृत्तायांजीवेशाविति श्रुतौमायाचाविद्याचस्वयमेवभवतीतिवाक्येनमायाविद्ययोरुभयोरपि

मूलप्रकृत्यभेदोपपादनविरोध इति वाच्यं मूलप्रकृत्याविद्ययोरिव मायाशब्दितान्तःकरणमूलप्रकृत्योर्मुख्याभेदाभावेपि प्रकृति
विकारभावप्रयुक्ताभेदसत्त्वेन तावता मायाया विद्यात्वस्यमेव भवतीति वाक्यशेषोपपत्तेरिति भावः नन्वविद्यावच्छिन्नचैतन्यमे
वेश्वरोस्तु तथान्तःकरणावच्छिन्नचैतन्यमेव जीवोस्तु प्रविश्यान्तःकरणाधिष्ठानचैतन्ययोस्तदवच्छिन्नत्वसत्त्वात्तदतिरिक्त
प्रतिबिंबकल्पनायां गौरवात्तेनाशयेन शंकते नचेति ननु प्रतिबिंबचैतन्यमित्येवकारार्थः जीवग्रहणमीश्वरस्याप्युपलक्षणं
जीवेश्वरयोः प्रतिबिंबतायाः श्रुतिसिद्धत्वान्न कल्पनागौरवदोषोस्तीत्यभिप्रेत्य जीवस्यावच्छिन्नत्वपक्षे दोषमाह इहेति श्रुति
गतौ॰ न लोके ब्राह्मणादिशरीरान्तःकरणावच्छिन्नचैतन्यप्रदेशस्य कर्मकर्तृत्वात् लोकांतरे देवादिशरीरगतान्तःकरणावच्छिन्न

प्रासैव चैतन्यस्यावच्छेदसंभवात्तदवच्छिन्नमेव चैतन्यं जीवोस्त्विति वाच्यं इह परत्र च जीवभावेनावच्छेद्यचैतन्यप्रदेशस्य
भेदेन कृतहानाकृताभ्यागमप्रसंगात् प्रतिबिंबस्तूपाधेर्गतागतयोरवच्छेदकगतागतयोरवच्छेद्यवन्न भिद्यत इति प्र
तिबिंबपक्षेनायं दोष इत्युक्तं एवमुक्तेष्वेतेषु जीवेश्वरयोः प्रतिबिम्बविशेषत्वपक्षेषु यत्बिंबस्थानीयब्रह्म तन्मुक्त

चैतन्यप्रदेशस्य चाकर्तृभोक्तृत्वात् कृतहानादिप्रसंगः येन कर्म कृतं न तस्य भोगः येन कर्म न कृतं तस्याकृतकर्मफलाभ्यागम
इत्यर्थः नच ब्राह्मणादिशरीरगतस्यैवान्तःकरणस्य लोकान्तरे गमनाभ्युपगमात्तदवच्छिन्नचैतन्यप्रदेशस्यैव तत्रापि गमनम
स्त्विति वाच्यं तद्देहस्य देशान्तरगमनेपि तदवच्छिन्नाकाशप्रदेशस्य गमनादर्शनादिति भावः प्रतिबिंबस्यावच्छेद्यचैतन्यापेक्षया वै
लक्षण्यद्योतनार्थस्तुमाह गतागतयोरिति गमनागमनयोः सतोरपि स्वावच्छेद्यप्रदेशवन्न भिद्यत इत्यर्थः सूर्यादिप्रतिबिंबव
तिजलशरावादौ देशान्तरानीयमानेपि प्रतिबिंबभेदादर्शनादिति भावः ननु चंद्रादिप्रतिबिंबवतां जलपात्राणां मध्ये एक

सि॰ ले॰ प्र॰ टी॰ ५३

स्वनाशो न तु तत्तया प्रतीतस्य प्रतिबिंबस्य बिंबेनैकीभावः प्रसक्तेरणनुभूयते न तथा प्रतिबिंबांतरेण एवं प्रतिबिंबरूपजीवस्या
पि विदेहकैवल्यसमये बिंबभूतशुद्धब्रह्मभावएवस्यात्न तु प्रतिबिंबांतरेश्वरभावापत्तिरिति विरोधादित्याशंकामिमाप्रसापरिहर
ति एव मुक्तेष्विति बिंबस्थानीयमिति लोकप्रसिद्धचंद्रादिरूपबिंबस्थानीयमित्यर्थः ननु बिंबत्वविशिष्टचेतनं कथं शुद्धमि
ति चेन्न शुद्धपदेन सर्वज्ञत्वसर्वकर्तृत्वादिधर्मराहित्यस्य विवक्षितत्वादिति चित्रदीपे चैतैर्विध्यप्रक्रियां विहाय चेतनस्य चातु
र्विध्यं परिकल्प्य जीवेश्वरविभागो दर्शित इति संबंधः तथा च चित्रदीपवचनं कूटस्थो ब्रह्मजीवेशावित्येवं चिच्चतुर्विधा घटाका

प्राप्यं शुद्धचैतन्यं चित्रदीपे जीवईशो विशुद्धा चिदिति त्रैविध्यप्रक्रियां विहाय यथा घटावच्छिन्नाकाशो घटाकाशस्त
दाश्रिते जले प्रतिबिंबितः साभ्रनक्षत्रो जलाकाशः अनवच्छिन्नो महाकाशः महाकाशमध्यवर्तिनो मेघमंडले वृष्टि
लक्षणकार्यानुमेयेषु जलरूपतदवयवेषु तुषाराकारेषु प्रतिबिंबितो मेघाकाश इति वस्तुतएकस्याकाशस्य चातु

र्ध्यं महाकाशो जलाकाशाभ्रं चेयथेति एतच्छ्लोकोपात्तदृष्टांतभागं संघट्टयति घटेत्यादिना तदाश्रित इति घटांतःस्याकाशा
श्रित इत्यर्थः अभ्रनक्षत्रसाहित्यविशेषणं आकाशस्य जले प्रतिबिंबाभावशंकानिरासार्थं इत्यं च तन्निरासप्रकारो विवक्षितः
यदा जले अभ्रनक्षत्राणां प्रतिबिंबोऽनुभूयते तदा तैः सहाकाशप्रतिबिंबोप्यनुभूयत एवेति नाकाशप्रतिबिंबाभावशंकावका
श इति अनवच्छिन्न इति घटानवच्छिन्न इत्यर्थः मेघमंडले येन जलरूपास्तदवयवास्तेषु प्रतिबिंबित इति संबंधः तच्छब्दो मेघमं
डलपरः मेघमंडले जलानि संति चेत्कुतो नोपलभ्यंत इत्याशंकानिराकरोति तेषां तुषारवत्सूक्ष्मरूपत्वादित्याशयेनाह तुषारे ५३
ति तत्र जलसत्त्वे मानमाह वृष्टिलक्षणेति श्लोकोपात्तदार्ष्टांतिकभागं संघट्टयति तथेति स्तदमेति घ्राणरसनचक्षुःश्रोत्र

त्वगाद्याख्यानि पंचज्ञानेंद्रियाणि वाक्पाणिपादपायूपस्थाख्यानि पंचकर्मेंद्रियाणि प्राणापानादयः पंच वायवः मनोबुद्धिश्चेत्यंतःकरणद्वि
यमित्येतत्सप्तदशकं लिंगशरीरं दार्ष्टांतिके घटस्थानीयस्तत्स्थूलदेह शब्दार्थः देहद्वयावच्छिन्नचैतन्यं घटाकाशस्थानीयं कूटस्थशब्दा
र्थः चैतन्यस्य देहद्वयावच्छिन्नत्वे हेतुरधिष्ठानतया विवर्तमानत्वं कूटविशेषणलभ्याय: पिंडविशेषः कूटस्थशब्दार्थः तद्वदचलतया
तिष्ठतीति कूटस्थः तत्र कूटस्थे कल्पितं घटगतजलस्थानीयं यदंतःकरणं तस्मिन्प्रतिबिंबितमित्यर्थः कूटस्थचैतन्यानिविक्ताचि
दाभासकल्पनायाः प्रयोजनमाह संसारेति कूटस्थचैतन्यस्य न संसाराश्रयत्वं तत्संसारजन्ममरणादिलक्षणसंसाराश्रयत्वे कूटस्थत्वव्या

तयास्थूलसूक्ष्मदेहद्वयस्याधिष्ठानतया विवर्तमानं तदवच्छिन्नं चैतन्यं कूटवन्निर्विकारत्वेन स्थितं कूटस्थं तत्र कल्पितेंतःकर
णप्रतिबिंबितं चैतन्यं संसारयोगी जीवः अनवच्छिन्नचैतन्यं ब्रह्म तदाश्रिते मायातमसि स्थिताः सर्वप्राणिनां धीवासनास्तत्प्रति
बिंबितं चैतन्यमीश्वर इति चैतन्यस्य चातुर्विध्यं परिकल्प्यांतःकरणधीवासनोपरक्ताज्ञानोपाधिभेदेन जीवेश्वरविभागोद
र्शितः अयं चापरस्तदभिहितो विशेषः चतुर्विधेष्वेषु चैतन्येषु जीवोहमिति प्रकाशमानः कूटस्थे विद्यातिरोहितासंगानंद

त्वादिति भावः महाकाशस्थानीयब्रह्माश्रिते मेघमंडलस्थानीये मायाख्यतमसि स्थिता या धीवासनास्तासु प्रतिबिंबितमित्यर्थः जा
ग्रत्स्वप्नावस्थाद्वयगतानि स्थूलान्यंतःकरणानि धियः तासां सुषुप्त्यवस्थागतास्सूक्ष्मावस्था वासना विवक्षिता अंतःकरणेति अंतः
करणं च धीवासनोपरक्ताज्ञानं च तयोर्भेदेनेत्यर्थः धीवासनानामानंत्यात्तासु प्रतिबिंबितचैतन्यरूपेश्वरस्य नाना
त्वशंकायामाह धीवासनोपरक्ताज्ञानोपाधिकत्वमुक्तं एवंसति बिंबप्रतिबिंबयोर्भेदमात्रं कल्पितं स्वतस्तयोरभेद एवेतीममर्थं सि
द्धं कृत्वा अस्मिन्मते ततो विशेषमाह अयं चेति अस्मिन्मते पूर्वं विज्ञानविध्यलक्षण एको विशेष उक्तः तदपेक्षयायमपरः अन्यः श्रुतिवि
वमिथ्यात्वरूपो विशेषस्तदभिहितः तत्र चित्रदीपे अभिहित इत्यर्थः अपरं विशेषमेव दर्शयति चतुर्विधेष्विति अहमिति प्रकाशमानो

ति॰ ले॰
प्र॰ टी॰
४४

जीवः शुक्तौ रूप्यवदध्यस्त इति संबंधः नन्विदंत्वेन सामान्यरूपेण ज्ञाते शुक्तित्वादिविशेषरूपेण ज्ञाते शुक्त्यादौ रूप्याद्यध्यासो दृष्टः इह तु तथा सामान्यरूपेण ज्ञातं विशेषरूपेण चाज्ञातं किंचिदधिष्ठानं च नोपलभ्यत इत्याशंक्याह कूटस्थ इति नन्वविद्यया कूटस्थस्यासंगत्वानंदत्वपूर्णत्वादिविशेषांशस्यावृततया शुक्तित्वादिवदप्रतीतावपि शुक्तेरिदंत्वेनेव कूटस्थस्य केनचित्सामान्यरूपेण प्रकाशो नेष्टव्यते किं चेदं रजतमित्यत्राधिष्ठानसामान्यांशस्यारोप्यविशेषस्य च सह प्रकाशो दृश्यते प्रकृते त्वहमर्थरूपो विशेष एवाहमिति प्रकाशते न तु सामान्यांशः कश्चिदतो ऽहमर्थस्य रूप्यवदध्यस्तत्वकल्पनं न युक्तमित्याशंक्याह अत एवेति अहमर्थस्य कूटस्थेऽध्यस्तत्वकल्पनादेवेत्यर्थः स्वयंत्वाहंत्वयोरिति कूटस्थस्य हि स्वयंत्वं सामान्यरूपं न कूटस्थत्वं तस्य शास्त्रैकगम्यत्वात् स्वयंत्वं च कूटस्थस्याहमर्थारो

रूपविशेषांशयोः शुक्तौ रूप्यवदध्यस्तः अत एवेदंत्वरजतत्वयोरिवाधिष्ठानसामान्यांशाध्यस्तविशेषांशरूपयोः स्वयंत्वाहंत्वयोः सह प्रकाशः स्वयमहं करोमीत्यादौ अहंत्वस्याध्यस्तविशेषांशरूपं पुरुषांतरस्य पुरुषांतरे व्यवहाराभावेन आवृतत्वात् स्वयंत्वं चान्यत्वप्रतियोग्यपि अधिष्ठानसामान्यांशरूपं स्वयं देवदत्तो गच्छतीति पुरुषांतरेऽपि व्यवहारेणानावृतत्वात् ॥

एककाले तेन सह प्रकाशात् तेन सर्वकालेऽपि स्वयंत्वस्य भानमविरुद्धं तस्य नित्यचैतन्यात्मककूटस्थस्वरूपत्वाभ्युपगमात् स्वयंत्वकूटस्थचैतन्ययोः राहोः शिरः पुरुषस्य चैतन्यमितिवद्भेदकल्पनया धर्मधर्मिभावोपपत्तेश्चातः कूटस्थस्य स्वयंत्वेन सामान्यरूपेण सदा प्रकाशसत्त्वादहमर्थरूपचिदाभासाध्यासाधिष्ठानत्वमविरुद्धमिति भावः अहमर्थस्य रूप्यवद्विशेषरूपत्वं दर्शयति अहंत्वं त्विति अहमर्थ इत्यर्थः अध्यस्तविशेषांशरूपमिति शुक्त्यादावध्यस्तो यो विशेषांशो रूप्यादिस्तद्रूपं तत्सदृशमित्यर्थः साम्यं च आवृतत्वं आवृतत्वादिति आवृतत्वावगमादित्यर्थः तेन न हेतुसाध्ययोरभेदः आवृतत्वावगमे हेतुर्व्यवहाराभावः स्वयंत्वस्येदंत्ववत्सामान्यरूपत्वं दर्शयति स्वयंत्वं चेति ४४
स्वयमन्य इति लोकव्यवहारे स्वयंत्वमन्यत्वप्रतिद्वंद्वितया प्रसिद्धमिति दर्शयितुमन्यत्वप्रतियोगीति स्वयंत्वस्य विशेषणमिति तदुक्तं चित्र

दीपे देवदत्तः स्वयं गच्छेत्त्वं वीक्षस्व स्वयं तथा अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यत इति नत्वस्वयमहमिति प्रकाशमानयोः कूटस्थ
जीवयोः शुक्तिरजतयोरिव भेदस्तत्त्वं सर्वेषां कुतो भेदो नोपलभ्यत इत्यत आह एवमिति अहमर्थजीवस्य शुक्तौ रूप्यवत् कूटस्थाध्य
स्तत्वे सतीत्यर्थः परस्परेति तयोरभेदाध्यासादेवाविवेकः विवेकाभावो भेदाननुभवाभाव इत्यर्थः नन्विदं रजतमिति भ्रमस्थले शु
क्तिरियमिति विशेषदर्शनेन नेदं रजतमिति प्रतीतयोः सामान्यविशेषपदार्थयोः शुक्तिरजतत्वरूपविरुद्धधर्मवत्त्वनिश्चयात्
तयोर्भेद इष्यते इहत्वजीवकूटस्थयोः कथं भेदोऽवगन्तव्यः तदभावेऽहं स्वयमहमिति सामान्यविशेषभावेन प्रकाशमानयो
स्तयोः शुक्तिरजतस्थले रजतेदमर्थयोरिव वस्तुतः ऐक्यापत्त्या अहमर्थरूपजीवस्य स्वयंशब्दार्थभूतकूटस्थैकत्वं स्यात्तथास्त्विति चेत्

एवं परस्पराध्यासादेव कूटस्थजीवयोरविवेको लौकिकानां विवेकस्तु तयोर्बृहदारण्यके प्रज्ञानघन एवैतेभ्यो भूतेभ्यः
समुत्थाय तान्येवानुविनश्यतीति जीवाभिप्रायेण मात्रोपाधिविनाशानुविनाशप्रतिपादनेनाविनाशी वारेयमात्मेति कू
टस्थाभिप्रायेणाविनाशप्रतिपादनेन च स्पष्टः अहमर्थस्य जीवस्य विनाशित्वे कथमविनाशीब्रह्माभेदः ॥

शंकाप्रकृत्या तयोर्भेदं दर्शयति विवेकस्त्विति नशाह्यः शंकाव्यावृत्त्यर्थः विवेको भेदानुभवः एतेभ्यः सन्निहितेभ्यो देहादिसंघात
रूपेण परिणतेभ्य उपाधिरूपेभ्यो भूतेभ्यः समुत्थाय सामान्येनोत्थाय उपाधिरूपं बुद्ध्यादिकं तत्संयोगं प्राप्येत्यर्थः तान्युपाधि
भूतानि बुद्ध्यादीनि तत्त्वज्ञानेन नश्यन्ति तदा तान्यनुविनश्यतीति औपाधिकस्यात्मनो विनाशित्वं प्रतिपाद्यते न च अंतःकरण
प्रतिबिंबरूपस्योपाध्यायत्तस्य जीवस्य मिथ्यात्वे सति संभवति औपाधिकजीवस्य सत्यत्वे तु तस्य विनाशित्वप्रतिपादकवचनं न सं
गच्छेत तथा अयं प्रज्ञानघन आत्मा अरे मैत्रेयि अविनाशी वा अविनाशी एव न तु उपाधिनाशान्नश्यतीति कूटस्थचैतन्यस्य प्रकृता
नाशाभावः प्रतिपाद्यते एतदुक्तं भवति अयमात्मा प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थायेत्यादि प्रकृतो विदेकरस आत्मेवो

सि॰ ले॰
अ॰ टी॰
४५

पाध्युत्पत्तिमनूत्पद्यते तन्नाशमनु नश्यतीत्युपाधिकृतौ विनाशव्यतिरेकेणोत्पत्तिविनाशौ चिदात्मनः प्रतिपाद्येते श्रुतिवचनए
तौ तत्त्वदृशा वृथैयोगात् न चैतस्य स्वतो विनाशादिमत्त्वं संभवति अविनाशी वा अरेयमात्मेति वाक्येन विनाश न चनात्तेनाविनाशा
भावप्रतिपादनेन विरोधात् इति च्छिदात्मनः उत्पत्तिविनाशवत्ता प्रतिबिंबचैतन्यरूपजीवेन तादात्म्यमापन्नाया विनाशादिवचनमुपप
दनीयं ततश्च भ्रमस्थलीयरजतेदमर्थयोरिवात्रापि विनाशित्वाविनाशित्वरूपविरुद्धधर्मवत्त्वान्निश्चयादेव जीवकूटस्थयोर्भेदः
सर्वेष्टं भासत इति ततः प्राक्कूटस्थचैतन्ये जीवरूपाहमर्थस्याध्यासासिद्धिरिति उदाहृतनकस्यामतिविवक्तजीवस्य विनाशित्वोपरा
मे स्फुरत्तनत्रविरोधमाशंकते अहमर्थेति अभेदश्चानन्तरमहं ब्रह्मास्मीति वाक्येन प्रतिपाद्यते इति शेषः विनाश्यविनाशिनोरभे
दायोगादितिभावः परिहरति नेदमिति सोयमित्यादिसमानाधिकरणवाक्यस्य यथाभेदो वाक्यार्थो दृश्यते तथायं स्थाणुः

नेदमभेदे सामानाधिकरण्यं किंतु बाधायां यथायं स्थाणुरेषः पुमानिति पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्निवर्त्यते

सपुरुष इत्यादिसमानाधिकरणवाक्यस्य बाधारूपो वाक्यार्थो दृश्यते यः स्थाणुः स पुरुष इत्यत्र हि पुरुषेऽत्रारोपितस्य प्रतिभासक
स्य स्थाणोर्जीवत्वादिकपुरुषेण सहाभेदो न वाक्यार्थः बाधितत्वात् किंतु स्थाण्वारोपाधिष्ठानभूते पुरुषे वस्तुतः स्थाणुतादात्म्या
भावरूपा बाधा वाक्यार्थः तथा च यः स्थाणुः स पुरुष इति वाक्येन वस्तुतः स्थाणुतादात्म्याभाववान् यः पुरुष इति बोधो जायते
तेन च बोधेन पुरुषे स्थाण्वारोपः सविषयो निवर्त्यते एवमहं ब्रह्मास्मीति वाक्येनाहमर्थभूतजीवतादात्म्यस्य ब्रह्मैवास्मीति ज्ञा
ने जायते तेन ज्ञानेनाहंज्ञानाकर्तात्वादिदुःखीत्याद्यारोपः कर्तृत्वादिधर्मविशिष्टाहमर्थेन स्वविषयेण सह निःशेषं निवर्त्यते आ
रोपिताहमर्थनिवृत्तौ च सत्यां जीवस्य यद्वास्तवरूपं कूटस्थचैतन्यात्मकं तस्यैव ब्रह्मरूपेणावतिष्ठते इति न कश्चित्तत्र विरोध इति भा ४५
वः अत एवार्थस्त्वं सुंदब्रह्माहंपदयोः समानविभक्तिमत्त्वरूपं सामानाधिकरण्यमभेदरूपेऽर्थे नाभ्युपगम्यते येनाभेदासंभवो दोषः स्या

ननु त्वंपदार्थाभेदो वाक्यार्थः कस्तर्हि सः इति शंकते किं त्विति बाधायां वाक्यार्थो विवक्षितः इत्याह बाधायामिति शुद्धत्वपदेन कल्पितस्याज्ञानादे
स्तादात्म्याभाववत्त्वं विवक्षितं बाधायां वाक्यार्थत्वस्वीकारात् अहं ब्रह्मास्मीत्यत्रेति पदानंतरं वाक्यजन्येनेति शेषः अत्र वाक्यार्थज्ञान
स्याहं ब्रह्मास्मीत्याकारत्वाभावात् कूटस्थब्रह्मरूपत्वपदेनापि वस्तुतोऽहमर्थतादात्म्याभाववत्कूटस्थब्रह्मरूपत्वं विवक्षितं बा
धायाएव वाक्यार्थबोधविषयत्वावगमात् दृष्टांतदार्ष्टांतिकयोरधिष्ठाने सारोपितार्थाभाववत्त्वमारोपितात्यंताभावस्याधिष्ठा
नातिरिक्तत्वमिति मतमाश्रित्याभिहितमिति ध्येयं अध्यस्ताहमर्थरूपत्वमिति अध्यस्तो योऽहमर्थस्तद्रूपत्वं तादात्म्यं निवर्त्तत
इति बोधफलमुक्तं महावाक्यस्य बाधार्थकत्वं न स्वकपोलकल्पितं किं तु स्वरौम्यराचार्यैरुक्तमित्याह योयमिति मंदांधकारेयः

एवमहं ब्रह्मास्मीति कूटस्थब्रह्मरूपत्वबोधेनाध्यस्ताहमर्थरूपत्वं निवर्त्यते योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव
ब्रह्मास्मीति धियाशेषा ह्यहंबुद्धिर्निवर्त्यत इति नैष्कर्म्यसिद्धिवचनात् यद्विच विवरणे छाकरीत्सेदमभेदसामानाधिक

स्थाणुर्दृष्टौ पुरुषोयं पुमानित्याद्यवाक्यजन्यया पुंधिया वस्तुतोऽनात्मस्थाणुः किंतु पुमानिति धिया स्थाणुरयमिति धीरारोपितस्था
णुतादात्म्येन सह यथा निवर्तते एवमहं ब्रह्मास्मीति वाक्यजन्यया धियाऽहमर्थभूतजीवतादात्म्यमस्मिन्ब्रह्मण्येवास्मीत्याकारया
हं बुद्धिरहं करोमि भुंजे इत्यादिबुद्धिरशेषाध्यारोपिताहमर्थसहिता निवर्त्यते महावाक्यार्थज्ञानाद्दोषानर्थनिवृत्तिर्विद्वदनु
भवसिद्धेति द्योतनार्थो हि शब्दः ननु समानाधिकरणवाक्येष्वभेदरूपवाक्यार्थस्य मुख्यतयौत्सर्गिकत्वाद्धि विवरणादिष्व
कतेऽभेदरूपवाक्यार्थस्यैव स्वीकाराच्च भगवत्पादैरपि वाक्यवृत्तौ तादात्म्यमेव वाक्यार्थः तयोरेव पदार्थयोरिति श्लोकेन महा
वाक्यार्थेषु तत्त्वंपदार्थयोस्तादात्म्यशालित्वाभेदस्यैव वाक्यार्थतया स्वीकाराच्च वार्तिककारवचनस्य बाधायामपि शक्तत्वे वाक्यार्थ
त्वावकाशाकानत इति भेदिमाश्रित्य प्रवृत्तत्वोपपन्नेश्च तस्मादहं ब्रह्मास्मीत्यत्राभेदो वाक्यार्थ इति स्थिते विनाशिजीवस्याविनाशिब्र

सि॰ ले॰ म॰ टी॰ ४६ ब्रह्माभेदो न संभवतीति चोद्यं तद्वदवस्थमेवेति भ्रमस्तस्मादाह यदि चेति कूटस्थो ब्रह्म जीवेशावित्येवं चित्रदीपे इति श्लोकसंगृहीतानां कू
टस्थब्रह्मजीवेश्वराणां चतुर्णां मध्ये ब्रह्मचैतन्यं तावत् सत्यज्ञानादिवाक्येषु सुप्रसिद्धमिति तत्र वाक्यप्रमाणत्वेनेनोदाहृतं कूटस्थ
चैतन्येऽप्यविनाशी वा इति वाक्यं प्रमाणत्वेन दर्शितं उपाध्युत्पत्तिविनाशानुविधायुत्पत्तिविनाशवचनमन्तःकरणगतचैतन्यप्रति
बिंबरूपे जीवे प्रमाणमुक्तं परिशेषात् सर्वोक्तेश्वरे प्रमाणं वक्तव्यं तदाह यस्त्विति तच्छब्दो वधारणे यईश्वर उक्तः सोयंश्रुत्युक्तानंद
मय एव नान्य इत्यर्थः सुषुप्तस्थानमस्येति सुषुप्तस्थानः जागरणेऽपि विज्ञानमयाद्भिन्नान्तःकरणोपाध्यध्यासाद्विज्ञानमयत्वम
नोमयत्वकर्तृत्वादीनि रूपाणि संति तथा देहे स्थूलोऽहमित्याद्यभेदाध्यासात् स्थूलत्वकृशत्वब्राह्मणत्वादिरूपाणि संति तथा च
द्वयादिषु कारणेऽहं मूढोऽहमित्यादिरूपादध्यासात् कारणत्वादिरूपाणि संति एवमाकाशादिषु पञ्चस्वध्यासात् सिद्धानि आकाश

रूपं तदा जीवस्यापि नोऽहंशब्दस्य लक्षणया कूटस्थपरत्वमस्तु तस्यापि वाच्यस्य ब्रह्माभेदयोग्यत्वात् यत्तु मेवाकाशत्वं स्योधी
वासनाप्रतिबिंब ईश्वर उक्तः सोयं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुगिति मांडूक्यश्रुतिसिद्धः

मयो वा सुमयद्वा दिश्रुति संगृहीतानामनंतरूपाणां जीवस्येति सुषुप्ते तु व्याघ्रपाधिलयेन सर्वप्रकारध्यांतिलयाद्भ्रांतिसिद्धा
नि सर्वाण्यपि सर्वाणि रूपाणि लीयंते इत्यभिप्रेत्य एकीभूत इत्युक्तं तदुक्तं विज्ञानमयमुख्यैर्योरूपैर्युक्तः पुराधुना सलयेनैकतां प्र
गो वकुंतं डुलपिष्टवदिति पुरा स्तना सर्वकाले लयेन रूपाणां लये नेत्यर्थः प्रज्ञानघनत्वं तु जाग्रदादौ वृत्तिभेदेन भेदरूपं पोथि
ल्यं प्राप्य स्थितं सुषुप्ते वृत्तीनां विलयात् घनरेकत्वं प्राप्तमित्यभिप्रेत्य प्रज्ञानघनत्वमुक्तं आनंदोत्रबिंबस्तो ब्रह्मानंदो विवक्षितः तस्य
प्रतिबिंबभूतो जीवस्यानंदमयः स च स्वरूपभूतमानंदं सुषुप्तिकाले अविद्यावृत्तिभिर्भुक्त इत्यानंदभुगित्युक्तमित्यर्थः ननु जाग्रत्स्वप्नयोः ४६
स्थूलावस्थान्तःकरणप्रतिबिंबरूपो जीवो विज्ञानमयः स्थूलान्तःकरणस्य विज्ञानशब्दवाच्यत्वात् स एव विज्ञानमयो जीवः स्वापका

लेशस्तद्रूपेणविलीनावस्थांतःकरणोपाधिकः सन्नानंदमयशब्देनोच्यते तथाचानंदमयस्यजीवत्वादीश्वरत्वमसिद्धमित्याशंक्यसौषु
प्तानंदमयस्यैवेश्वरत्वं वाक्यशेषो दर्शयतीत्याह तत्रैवेति मांडूक्यश्रुतावेवेत्यर्थः सर्वेश्वरत्वं सर्वजगदुत्पत्तिकर्तृत्वं योनिरुपादानं आ
नंदमयस्य सर्वोपादानत्वे हेतुमाह प्रभवेति हि यस्माद्भूतानां प्रभवाप्ययौ जन्मलयौ सुषुप्तानंदमयाद्भवतः तस्मादेष सर्वस्य योनिरि
त्यर्थः आनंदमयस्य कथमुक्तसर्वज्ञत्वे युक्तिमप्याह सर्ववस्त्विति एकैकाधीः किंचित्किंचिद्विषयीकरोतीति सर्वाभिर्मिलित्वा सर्वज्ञ
द्विषयी क्रियते एवं च सर्वबुद्धीनां सर्वविषयकत्वे सिद्धे सति सर्वबुद्धिसूक्ष्मावस्थारूपाणां सर्वबुद्धिवासनानामपि सर्वविषयकत्वं सि
ध्यति तथा च सर्वप्राणिबुद्धिवासनोपाधिकस्यानंदमयस्य सर्वज्ञत्वसिद्धिरित्यर्थः ननु धीवासनोपरक्ताज्ञानोपाधिक ईश्वर इति युक्तं न

सौषुप्तानंदमयः तत्रैव तदनंतरमेष सर्वेश्वर एष सर्वज्ञ एषोंतर्यामी एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानामिति श्रुतेः सर्व
वस्तुविषयसकलप्राणिधीवासनोपाधिकस्य तस्य सर्वज्ञत्वं तत एव सर्वकर्तृत्वोपपत्तेश्च न चास्य बुद्धिवासनोपहितस्य क

चात्किं प्रतिबिंबेश्वरस्याज्ञानमेवोपाधिः किं वा वासनोपरक्ताज्ञानं अथवा सर्वधीवासना उत प्रत्येकं धीवासना नाद्यः धीवासनाप्रति
बिंबितं चैतन्यमीश्वर इत्युक्तिविरोधात् अज्ञानमात्रस्येश्वरोपाधित्वे धीवासनानुसरणवैफल्याच्च न चाज्ञानोपाधिकस्यैवेश्वरस्य सर्वज्ञ
त्वलाभार्थं सर्वविषयकधीवासनानुसरणमिति वाच्यं अज्ञानगतसत्त्वांशपरिणामरूपाभिः सर्वविषयकवृत्तिभिरेव सर्वज्ञत्वोपपाद
नसंभवेन तदर्थं धीवासनानामनपेक्षणात् न द्वितीयः अज्ञानमात्रस्य तदुपाधित्वसंभवात् युगपत्सर्वप्राणिनां सुषुप्त्यसंभवेन
सर्वबुद्धिवासनानां यौगपद्यासंभवाच्च न तासामज्ञानविशेषणतयेश्वरोपाधित्वसंभवः तासां यौगपद्यासंभवादेव न तृतीयोपि वि
कल्पः संगच्छते सर्वासु धीवासनासु व्यासक्तत्वेन एकस्येश्वरस्य प्रतिबिंबस्यासंभवाच्च लोके व्यासज्यवृत्तिप्रतिबिंबादर्शनात् तस्माच्च
तुर्थो विकल्पः परिशिष्यते तच्चानुभवविरोधमाशंकते न चास्मदिति अस्माकं प्राणिनामेकैकबुद्धिवासनोपहितस्यानंदमयस्य क

सि॰ ले॰
म॰ टी॰
५७

स्यापि स्वापकाले इदं सर्वं तत्र इत्यनुभवो नास्तीत्यर्थः वासनानामिति जाग्रदादौ स्थूलावस्थांतःकरणानामिव सुषुप्तौ वासनात्मकांतःक
रणानां साक्षिप्रत्यक्षयोग्यत्वाभावेन तदुपाधिकानंदमयानामपि नाहमनुभवयोग्यत्वमर्थः मांडूक्यश्रुत्युक्तानंदमयस्य सकलधीवास
नोपाधिकस्य उक्तरीत्या एकस्यासंभवात् प्रत्येकमेव धीवासनोपाधिक आनंदमयो वाच्यः स च जीव एवेत्याह ब्रह्मानंदे त्विति चित्रदीपे
श्रीविद्यारण्यगुरुभिरीश्वरत्वेनोक्तानंदमयस्य तैरेव ब्रह्मानंदाख्यग्रंथे जीवत्वोक्तिरूपविरोधापार्थकत्वमाह सुषुप्तिसंयोगादित्युपल
क्षणं वासनोपाधिकस्येश्वरत्वे जाग्रदादावीश्वराभावप्रसंगादेकैकवासनोपाधिकस्य नानात्वेनेश्वरनानात्वप्रसंगात्सकलवासनोपा
धिकस्य कस्यचिदसंभवाच्चेत्यपि द्रष्टव्यं तत्रोक्तप्रकारं दर्शयति तथाहीति जाग्रदादिषु भोगप्रदं यत्कर्म तत्सत्त्वे सतीत्यर्थः आदिपदस्व

स्वचित्तावृत्तिर्ज्ञानानुभूयते इति वाच्यं वासनानां परोक्षत्वेन तदुपहितस्यापि परोक्षत्वादिति ब्रह्मानंदे तु सुषुप्तिसंयोगान्मांडूक्यो
क्त आनंदमयो जीव इत्युक्तं तथाहि जाग्रदादिषु भोगप्रदस्य कर्मणः क्षये निद्रारूपेण विलीनमंतःकरणं पुनर्भोगप्रद ॥
कर्मवशात्प्रबोधे घनीभवति तदुपाधिको जीवो विज्ञानमय इत्युच्यते तथा स एव सर्वः सुषुप्तिसमये विलीनावस्थोपाधिकः
सन्नानंदमय इत्युच्यते स एव मांडूक्ये सुषुप्तिस्थान एकीभूत इत्यादिना दर्शित इति एवं सति तस्य सर्वेश्वर इत्यादिवचनं कथं
संगच्छतां इत्यत आह अधिदैवतमध्यात्मं च परमात्मनः सविशेषाणि त्रीणि त्रीणि रूपाणि तत्राधिदैवतं त्रीणि शुद्धचेतनं चेति चत्वा

अपरं वक्ष्यवचनं तु जाग्रत्स्वप्नयोः किं भेदापेक्षं निद्रारूपेणेति सुषुप्तिरूपेणेत्यर्थः तदुक्तं पंचीकरणे बुद्धेः कारणात्मनावस्थानं सुषु
प्तिरिति आनंदमयस्य जीवत्वे तस्येश्वरत्वप्रतिपादकवाक्यशेषविरोधं शंकते एवं सतीति सोऽयमजीवरूपानंदमयस्य वस्तुतः ईश्वरत्वा
भावेऽपीश्वराभेदविवक्षया तस्येश्वरत्ववचनं संगच्छत इति परिहरति शृत्यामित्यादिना मांडूक्यश्रुतौ जीवेश्वरयोरभेदविवक्षां दर्शयि ५७
तुं पीठिकां करोति संतीति परमात्मन अधिदैवतं सविशेषाणि त्रीणि रूपाणि संति तथा परमात्मनोऽध्यात्मं च सविशेषाणि त्रीणि रूपा

णिसंतीतिसंबंधः परमात्मनइत्यस्य निर्विशेषचैतन्यस्येत्यर्थः अधिदैवतानि महदेवतात्मकानीत्यर्थः अध्यात्मानि तस्य च जीवात्मकानीत्य
र्थः अधिदैवतमध्यात्मामिति च पदद्वयमवयं डकत्रं प्रपंचयति तत्रेति अध्यात्माधिदैवतरूपाणि मध्यस्थ इत्यर्थः जीवसत्त्वगुणस्य विशेषरूपा
णि तु यथ पदात्मकं निर्विशेषस्वरूपं रमादृश्वात्मतोक्तं च तो दर्शितानि ईश्वरसत्त्व निर्विशेषसविशेषरूपाणि तत्र श्रुत्यभिप्रेतान्यपि क्र
माकं च तोनोक्तानि तानि च श्रुतितात्पर्याभिज्ञैः श्रीविद्यारण्यगुरुभिश्चित्रदीपे तद्दृष्टान्तेन निरूपितानीत्याह चित्रपटेति तत्रायं द्वय
नसंग्राहकः श्लोकः स्वतः शुभ्रोत्र धौतः स्यात् घट्टितोन्नविलेपनात् मष्याकारैर्लांछितः स्याद्रंजितो वर्णपूरणादिति एतच्चतुष्कसंग्र
हश्लोकेन दृष्टान्तं विवृणोति यथेति स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते एवं इति श्लो
कसंग्रहेणेन दार्ष्टान्तिकं दर्शयति तथेति श्लोकेपरः स्वतश्चिदिति संबन्धः अमुमर्थं विवृणोति परमात्मेति श्लोकेन तत्र शुद्धावधारणे न

विरूपाणि चित्रपटदृष्टान्तेन चित्रदीपे समर्थितानि यथा स्वतः शुभ्रः पटो धौतः अन्नलिप्तो घट्टितः इति मष्यादिविकारयुक्तो
लांछितो वर्णपूरितो रंजित इत्यवस्थाचतुष्टयमेकस्यैव चित्रपटस्य तथा परमात्मा मायातत्कार्योपाधिरहितः शुद्धः मा
योपहितस्त्वीश्वरः अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः पंचीकृतभूतकार्यसमष्टिस्थूलशरीरो

पाधि परएव मायावी सन्नंतर्यामीति च अत इति संबंधः अमुमर्थमाह मायोपहित ईश्वर इति श्लोके परएव स्वतः सूक्ष्मसृष्टितः सूत्रात्मेति सं
बंधः अमुमर्थं व्याचष्टे अपंचीकृतेति अपंचीकृतानां भूतानां यत्कार्यमेकं सूक्ष्मशरीरं तदुपहित इत्यर्थः ननु सूत्रात्मनो हिर
ण्यगर्भशब्दितस्य श्रुतिस्मृतिसिद्धो जीवत्वप्रसिद्धेः कथं तस्येश्वररूपत्वमिति वाच्यं जीवरूपहिरण्यगर्भस्य समष्टिरूपशरीराभिमान
विशिष्टस्य सत्यलोकस्वामिनः ईश्वरात्मत्वाभ्युपगमात् ईश्वरस्य तु समष्टिसूक्ष्मशरीराभिमानाभावेपि समष्टिसूक्ष्मशरीरनियंतृ
तया तदुपाधिकस्य समष्टिसूक्ष्मोपाध्युपहितत्वगुणयोगेन हिरण्यगर्भसूत्रात्मपदाभ्यां निर्देशस्येह विवक्षितत्वात् तथा च गौणमी
श्वरस्य हिरण्यगर्भत्वमिति भावः अतएव चित्रदीपे ईश्वररूपहिरण्यगर्भापेक्षया सत्यलोकाधिपतेर्ब्रह्मणस्तत्र धाद्यभिमतेश्वरपरि

चि॰ दी॰
प॰ टी॰
४८

गणनावसरे पृथगुपादानं कृतमिति मंतव्यं श्लोके पूर्वपूर्वपरः स्थूलरूपा विराडित्युच्यत इति संबंधः अत्र मंशंकामाकुर्वन् संग्रहत्वात् पं
चीकृतेति अथ मीश्वररूपो विराट्पुरुषः पुरुषसूक्ते वैश्वानरविद्यावाक्यादिरूपश्रुतिसिद्धो द्रष्टव्यः सत्यलोकाधिपतेर्हिरण्यगर्भस
मुवरूपो विराट्पुरुषः समष्टिस्थूलाभिमानी जीवो बृहदारण्यकश्रुतिसिद्धो सप्तवेत्यपि द्रष्टव्यः इत्यवस्थेति उक्तक्रमेण दृष्टांतपके
स्यैव रूपचतुष्टयं द्रष्टव्यमित्यर्थः एवं प्रकृतोपयुक्तं रूपचतुष्टयं दर्शयित्वा प्रसंगादाह अस्मिन्निति नतु कृत्स्नस्य जगतश्चित्रस्थानीय।
त्वे तद्धेदवत्सर्वमेवाचेतनं स्यात् तथा च चेतनाचेतनविभागो न स्यादिति शंकां दृष्टान्तेन परिहरति यथेति वस्त्राभासा इति वर्णविशेषणात्म
कवस्त्राणां चित्राधारेण वस्त्रेण कृतिसाम्येपि सीतादि निवर्तकत्वाभावादाभासत्वं देहिनामिति स्थूलदेहवतां महाकारा मिन्यर्थः अतः

पद्धितो विराट्पुरुष इत्यवस्थाचतुष्टयमेकस्यैव परमात्मनः अस्मिंश्चित्रपटस्थानीये परमात्मनि चित्रस्थानीयः स्थावरजंग
मात्मको निखिलः प्रपंचः यथा चित्रगतमनुष्याणां चित्राधारवस्त्रसदृशा वस्त्राभासा लिख्यंते तथा परमात्माध्यस्तदेहि
नामधिष्ठानचैतन्यसदृशाश्चिदाभासाः कल्प्यंते ते च जीवनामानः संसरंतीति अथ आत्मनस्तु विश्वतैजसप्राज्ञभेदेन त्रीणि रूपा
णि तत्र सुषुप्तो विलीनेऽन्तःकरणेऽज्ञानमात्रसाक्षी प्राज्ञः योयमितानंदमयउक्तः स्वप्ने व्यष्टिसूक्ष्मशरीराभिमानी तैजसः जा
गरे व्यष्टिस्थूलशरीराभिमानी विश्वः तत्र माडूक्यश्रुतिरहसनुभवे प्रकाशमानस्यात्मनो विश्वतैजसप्राज्ञतुरीयावस्थाभेद

करणात्मकाहंकारे सुचैतन्यस्य प्रतिबिंबकल्पनस्य प्रयोजनमाह ते चेति तथा च चिदाभासयुक्ताः कार्यकारणसंघाताश्चेतनास्तेभ्यो
विसदृशास्त्वचेतना इति विभागसिद्धिरिति भावः एवमीश्वरस्य रूपाणि दर्शितानि जीवस्य च कानि सविशेषनिर्विशेषरूपाणि द
र्शयति अध्यात्ममिति तथा हीश्वरस्य सविशेषरूपाण्युपेदाय जीवस्य सविशेषरूपाणि वैलक्षण्यसूचनार्थः तदेव वैलक्षण्यं प्रदर्शय।
ति विश्वेति रूपाणीति सविशेषाणीति शेषः तत्रेति रूपत्रयमध्य इत्यर्थः विलीन इति अन्तःकरणे विलीने सति सूक्ष्मरूपेण विली। ४८
नेंऽतःकरणोपाधिकः संपद्यत इति भावः स्थूलांतःकरणादि सात्त्विकव्यवहारार्थमात्रग्रहणं न तु सर्वसाक्षित्वं जीवस्यानंदमय इ

स्मृतमिदानीं कथं स एव प्राज्ञ इत्युच्यते तत्राह योयमिति इहेति मांडूक्यश्रुतावित्यर्थः तत्रैवानंदभागित्यनंतरं चेतोमुख इत्याज्ञस्तृतीयः पा
द इति वाक्यशेषदर्शनादिति भावः चैतन्यासिचित्प्रतिबिंबोपेतान्तविद्यावृत्तिरूपाणि मुखानि स्वापकालातीतानंदानुभवसाधनानि यस्य चे
तोमुखः ननु सोयमजीवस्यानंदभुक्त्वं चेतोमुखत्वं च कथमपि कथमुपपन्नमिति चेदुच्यते सुषुप्तादुत्थितस्य सुखमहमस्वाप्स
मिति स्वापकालविशिष्टसुखस्य स्मरणं दृश्यते तच्च तदा सुखानुभवमंतरेण न संभवति अननुभूतस्य सुखस्य स्मरणायोगात् नच
सुषुप्तावात्मस्वरूपसुखविषयानंतःकरणवृत्तिभिरेवानुभवः संभवतीति वाच्यं तदा विलीनत्वात् अंतःकरणस्य वृत्त्युत्पादनयोग्यत्वाभावात्
नच मुक्तिकालइव स्वापकालेपि स्वरूपचैतन्येनैव सुखानुभवसंभवात् किमविद्यावृत्तिभिरिति विंबरूपचेतःकल्पनयेति वाच्यं जाग्र

रूपं पादचतुष्टयं सोयमात्मा चतुष्पादित्युपक्रम्य पूर्वपूर्वपादप्रविलापनेन निःप्रपंचब्रह्मात्मकतुरीयपादप्रतिपत्ति
सौकर्याय स्थूलसूक्ष्मसूक्ष्मतरोपाधिसाम्याद्विराडादीन्विश्वादिषु अंतर्भाव्य जागरितस्थानो बहिःप्रज्ञ इत्यादिना विश्वा
दिपादांस्तद्रूपवान् अंतःप्राज्ञ इति प्राज्ञं आनंदमये अव्याकृते ईश्वरे संतर्भाव्य सविवदितत्वात् तत्र सर्वेश्वरत्वादितद्धर्मव

त्स्वमयोस्मैतन्मप्रतिबिंबोपेतवृत्तिभिरानंदानुभवदर्शनेन सुषुप्तावपि तथा संभवे परिशेषायोगात् मुक्तिकाले चोपाधिमात्रविलया
भ्युपगमात् वृत्त्यसंभव इति वैषम्यसत्त्वात् सौषुप्तसुखानुभवस्य केवलनित्यसाक्षिरूपत्वे अननुभवनाशरूपसंस्काराभावप्रसंगेन सु
खमस्वाप्समिति अनुसंधानाभावापत्तेश्च तस्माद्यथोक्तार्थाङ्गीकार निरूपपन्नैव व्याख्येति परिच्छिन्नेत्यर्थः एते पादाः साक्षाच्छ्रुत्युक्ता इत्याह
तत्रेति उक्तरीत्या पादकल्पनोपपत्तौ सत्यामित्यर्थः श्रुतिं पादचतुष्टयमुपक्रम्य विश्वादिपादात्मरूपयदिति संबंधः एवं ह्युत्तेरात्मनेत्र
वगम्यते ब्रह्मात्मैक्यमेभिरिति पादा विश्वादयः इमांश्रुतिमभिप्रेत्य श्रौतपादकल्पनायाः प्रयोजनमाह पूर्वसर्वेति प्रथमर्थः सोयमा
त्मा चतुष्पादिति वाक्ये न जीवस्य पादचतुष्टयवत्त्वमुपक्रम्य जागरितस्थानो वैश्वानरः प्रथमः पाद इत्युक्ते अंशजीवपादानामेव बहु
लपक्रांतत्वात् विश्वः प्रथमः पाद इति वक्तव्ये वैश्वानरपाहितस्य विराडुरुषरूपेश्वरस्य प्रथमपादत्वोक्तिर्विश्वे वैश्वानरेश्वरस्यांतर्भा ।

सि॰ ले॰ प्र॰ टी॰ ४५

वेरूचयति न च हिरण्यगर्भस्यैव विहाय वैश्वानरस्यैव विश्वांतर्भावे किं नियामकं क्रमस्याभिमतत्वमिति वाच्यं तयोः स्थूलोपाधिकत्वरूप
साम्यस्य बहिर्हिरण्यगर्भव्यावृत्तस्य नियामकतया विवक्षितत्वात् तथा द्वितीयपादप्रतिपादकवाक्ये स्वप्नस्थानस्तैजसो द्वितीयः पा
द इत्युक्ते अत्र सूक्ष्मोपाधिकत्वसाम्येन हिरण्यगर्भस्य तैजसेंतर्भावो विवक्षितः वैश्वानरः प्रथमः पाद इत्युपक्रमान्तैजसानन्तर्यात्तृती
यपादप्रतिपादके सुषुप्तस्थान एकीभूत इत्यादिवाक्ये प्राज्ञोवोदाहृतं अत्रापि तृतीयपादत्वेनोक्ते प्राज्ञस्याहितानंदमयत्वस्त्वन्तरोपा
धिकत्वसामान्येनेश्वरस्यांतर्भावो विवक्षितः तथा च वाक्यशेषस्य एष सर्वेश्वर इत्यादेरानंदमयेश्वरयोरभेदविवक्षितत्वाभ्युपगमेनानु
उपपत्तिः तथा तुरीयप्रतिपादकमिदं वाक्यं अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं
शिवमद्वैतं चतुर्थं मन्यंत इति अदृष्टं चक्षुराद्यविषयं अव्यवहार्यं प्रवृत्तिनिवृत्तिलक्षणव्यवहारागोचरं अग्राह्यं कर्मेंद्रियागोचरं अ
लक्षणं असाधारणधर्मशून्यं अचिंत्यं अंतःकरणागोचरं अव्यपदेश्यं शब्दानामगोचरं एकात्मप्रत्ययसारं एकादिपदचतुष्टयस्य कर्म
धारयः स्वगतभेदशून्यत्वमेकत्वं सर्वदेहेषु पूर्णत्वमात्मत्वं प्रत्ययत्वं चिद्रूपत्वं सारत्वमानंदत्वं सारशब्दानंदः समर्थ इत्यानंदमयाधिक
रणभाष्यात् प्रपंचोपशमं प्रपंचाभावरूपं कल्पितपदार्थाभावस्याधिष्ठानानतिरेकात् यद्वा प्रपंचध्वंसरूपं ज्ञानसाध्यायाः सकारण
द्वैतनिवृत्तेरधिष्ठानात्मकतया वक्ष्यमाणत्वात् शिवं शुद्धं सर्वदोषरहितं अद्वैतं द्वैतरहितं चतुर्थं विश्वतैजसप्राज्ञरूपपादत्रयापेक्ष
या चतुःसंख्यापूरकं पादं मन्यंते चिंतयंतीति श्रुत्यर्थः अत्र विश्वतैजसप्राज्ञलक्षणपादेषु वैश्वानरहिरण्यगर्भेश्वराणामंतर्भाववचनं
तैस्तैरेषामेकत्वचिंतनपरं तथा विश्वादिपादानामोंकारावयवमात्राणां चैकत्वचिंतनमत्र विवक्षितं तथा च श्रुतिः पादा मात्रा मात्रा
श्च पादा इति तथा गौडपादीयवचनमपि ओंकारं पादशो विद्यात्पादा मात्रा न संशय इति न संशय इत्यस्यायमभिप्रायः विश्वादिपादा
नां मात्राणां च प्रायसंशयनिवृत्तिपूर्वकत्वं चिंतनीयमिति मात्रास्वरूपं च श्रुत्यैव दर्शितं अकार उकारो मकार इति एवं विश्वादिपादानां
वैश्वानरादीनां मात्राणां चैकत्वचिंतने सर्वेषामेतेषां निष्प्रपंचब्रह्मात्मकत्वे तुरीयपादे चिन्मात्रे प्रविलापनार्थं तत्र चायं क्रमः विश्ववैश्वान ४५
राकाराणामेकत्वं प्रथमं विचिंत्य पश्चात्तैजसहिरण्यगर्भोकाराणामेकत्वं चिंतयेत् तत ईश्वरप्राज्ञमकाराणामप्येकत्वं चिंतयेत् तथा

चिंताक्रमेणैव प्रविलापयेत् अकारादित्रयमुकारं उकारादित्रयं मकारे मकारादित्रयं चिदात्मन्येतदर्थपादे प्रविलापयेत् चिदात्मनि प्रविलाप्य चिंतन
नैव स्थापयेत् उकारादौ प्रविलापनं नाम अकारादित्रयमुकारस्थानीये केण नास्तीत्याद्यर्थनिश्चयः एवं प्रत्यगात्मप्रकारेण समाधिं कुर्वतो ब्रह्म
साक्षात्कारो भवति तत्र ब्रह्मस्वरूपस्याकृतकत्वेन नित्यत्वं माण्डूक्यश्रुत्यभिप्रायः इदं सर्वं माण्डूक्यश्रुत्यैव दर्शितं ग्रन्थेन तावत्सर्वं कथनपरस्य भाष्यकृ
द्भिः कृतपंचीकरणस्य व्याख्यानरूपे वार्तिके सुरेश्वराचार्यैरभिहितं अकारमात्रं विश्वः स्यादुकारस्तैजसः स्मृतः प्राज्ञो मकार इत्येवं परिपश्येत्
क्रमेण तु अत्र विश्वादिषु वैश्वानरादीनामन्तर्भावस्तिकृत्वा नत्वयपादानेकृत्वनमिति नवं समाधिकालात्प्रागेवं विचिन्त्याति यत्नतः
स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि प्रविलापयेत् अकारं पुरुषं विश्वमुकारे प्रविलापयेत् उकारं तैजसं सूक्ष्मं मकारे
प्रविलापयेत् अत्र समष्टिसूक्ष्मशरीरनियन्तृतया तदुपहितः परमेश्वरः सूक्ष्मपदार्थः मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत्
अत्रांतर्यामिमायामात्रोपाधिकः कारणपदार्थः चिदात्मा हि नित्यशुद्धबुद्धमुक्तसदद्वयः परमानन्दसन्दोहवासुदेवोहमोमिति यतो हि चि
दात्मावबोधतः अतो हि नित्यशुद्धबुद्धत्वादिरूपो वासुदेवः इत्यर्थः अंगीकारात्मकोंकारः इत्यर्थः इतिपादश्लोकान्वयीत्वा तत्त्वाविवेचके
चिंतनत्याहिति विलापयेत् इत्युक्तप्रकारेण केवलचिदात्मानमवशिष्टं ज्ञात्वा विवेचकविलापकं तच्चिंतनत्यादिति यथोक्तैवासदे
वे विलापयेत् स्थापयेदित्यर्थः चिदात्मनि विलीनं चेतश्चित्तं नैव चालयेत् पूर्णबोधात्मनासीनं पूर्णाचलसमुद्रवत् चिरकालं समाधि
कुर्यादिति वार्तिकार्थः एवं समाहितो योगी श्रद्धाभक्तिसमन्वितः जितेन्द्रियो जितक्रोधः पश्येदात्मानमद्वयं आदिमध्यावसानेषु दुःख
सर्वमिदं यतः तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा यस्तु तत्त्वनिष्ठाव्यतिरिक्तपुरुषार्थसाधनं नैव लोकशास्त्रसिद्धं सर्वकालत्रयेपि
दुःखाविनाभूतं तस्मात्सर्वं विधिना संन्यस्य ओंकारोपासनत्वनिष्ठासमाधिलक्षणं कुर्यादित्यर्थः तत्र देवाह इमां विद्यां प्रयत्नेन योगी संध्या
सु सर्वदा समभ्यसेदिह मनुष्मोगानासक्तधीः सुधीरिति इमां समाधिलक्षणां विद्यां सुधीरास्तिकतमो विरक्तो भूत्वा संध्यासु [illegible]
दाभ्यसेदित्यर्थः यः एवं प्रपश्यति सर्वदा संततमनंतात्मानमद्वयं न तेन किंचिदप्राप्यं ज्ञातव्यं वावशिष्यते कृतकृत्यो भवेद्विद्वान् जीवन्मुक्तो भवे
त्सदा अविद्यातिमिरातीतं सर्वाभासविवर्जितं आनंदममलं शुद्धं मनोवाचामगोचरं वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितं अज्ञान

सि॰ ले॰
पं॰ टी॰
५८

नु न मानं हृद्वेदस्य स्वप्रमाणमतेरिति प्रामाण्यपदं विहाय परं वा वाच्यमित्यादयः वाचका प्राकृताद्यः प्रकृतमनुसर देवंड: स्वंभाषेयं विषयस्य त्वमित्यर्थः तथा माण्डूक्ये तो समाधिनि सा विवक्षामभिप्रेत्य गौडपादीये प्युक्तं युज्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयं प्रणवे नित्ययुक्त स्य न भयं वि द्यते क्वचिदिति संक्षेपः ननु श्रवणादिनैव प्रत्यगात्मापरोक्षत्वं मार्गेणैव न तत्प्रतिपत्तिसंभवात् किं [illegible] योगविधिनेत्यत आह मतिपति सौकर्याय इति यस्य मन्दतोः सन्यासिनः बुद्धिमांद्याद्वाकौशलस्य वैपिन्याय [illegible] कुशलाचार्याभावाद्वा सांख्यमार्गेण न संभवतीति त स्यानायासेन ब्रह्मतत्वप्रतिपत्तिसाधनतया बुद्धिपूर्वकप्रविलापनक्रमेण समाधिविधानं माण्डूक्याद्युक्तं माण्डूक्योपनीयपंचीकरणा दौ विहितं ब्रह्मोपासनप्रकृत्यध्यानदीपे श्रीविद्यारण्यगुरुभिरधिकारी दर्शितः असंतबुद्धिर्यो सा साक्षात्कारावाप्त्यसंभवात् योविचारेन ल भते ब्रह्मोपासीनसो निशमिति अव्याकृतस्येति अनभिव्यक्तजगदाचिना अव्याकृतपदेन लक्षणया परमेश्वरस्तत्र तत्र व्यवहृत इति कृतात

इत्यमेव भगवत्सारे गौडपादीयविवरणे व्याख्यातं दृक्दृश्यविवेके च चित्रदीपकुसादितं कूटस्थं जीवकोशं तर्भाव्य चित्रेविषयस्य टि॰
क्रियैवावलंविनेतिविशेषः तत्र स्तुकं जलाशयतरंगतुच्छस्यायेनोपर्युपरि कल्पनाज्जीवस्त्रिविधः पारमार्थिको व्यावहारिकः प्रातिभा ८

न तन्निर्देशः कुतः माण्डूक्यारम्भकानंदमयपर्यंश्रवणवचनं तदभेदविवक्षयेति न माण्डूक्यश्रुतिव्याख्यानरूपस्य गौडपादीयस्य विवरणरूपे भा ष्ये भाष्यकारैरेवोक्तमित्याह इत्थमेवेति श्रीविद्यारण्यगुरुभिश्चित्रदीपे सोऽकं चित्रातविषयं विहाय यथा तत्र जीवेशौ च विमृश्याचिह्नितत्त द्भवचनसिद्धं त्रैविध्यमेवावलंव्य जीवस्य त्रैविध्याद्यो विशेषस्तमाह दृक्दृश्यविवेके त्विति तुशब्दः उक्तविशेषार्थकः कूटस्थस्य जीव कोशावन्तर्भावमेवदर्शयति तत्रेति दृक्दृश्यविवेकाख्यग्रन्थ इत्यर्थः हिशब्दः प्रसिद्धिद्योतकः जलाशयेनैवेति यथा समुद्रादिजलाशयेन तरंगादिपरिभावेनोत्तिष्ठति तेषु चोपरिभावेन बुद्बुदादिस्तिष्ठति इदं प्रसिद्धमिति हिशब्दार्थः न्यायोदृष्टान्तः एवं कूटस्थस्योपरि व्यावहारिकोन्तः ५८
करणपर्यन्तविवर्तो यावत्कल्पनाव्यवहारमनुवर्तमानो व्यावहारिकजीवः कल्पनेनैतस्य चोपरिभावेन स्वप्नकाले वासनामयप्रातिभासिकरथा

चिदाभासनामधेयान्तःकरणप्रतिबिंबरूपः प्रातिभासिकजीवः कल्प्यत इत्यर्थः तत्रेति त्रिविधजीवमध्य इत्यर्थः अवच्छिन्न इति देहद्वयाव
च्छिन्नकूटस्थचैतन्यरूप आत्मा पारमार्थिकजीव इत्यर्थः श्रुत्वा ब्रह्मास्मीति मत्वा कोपि जीवब्रह्मणोरभेदः प्रतिपाद्यते स च पारमार्थिक
जीवकल्पनेनेति निर्वहति अन्यथा व्यावहारिकप्रातिभासिकजीवयोः शुक्तिरूप्यादिवत्स्वरूपतो मिथ्यात्वेन सत्यब्रह्माभेदायोगात् दे
हद्वयावच्छिन्नकूटस्थरूपपारमार्थिकजीवकल्पनायाः प्रयोजनं दर्शयति तस्मिन्निति स्वावच्छेदकीभूतदेहद्वयस्य कल्पितत्वेपि स्व
तः सत्यत्वात्संभवति ब्रह्माभेद इति पारमार्थिकजीवकल्पनायाः प्रयोजनं दर्शयति तस्मिन्निति अवच्छिन्नजीव इत्यर्थः व्यावहारिकजीव
निरूपयति तमिति कूटस्थमात्मानमावृत्य विद्यायां स्थितायां सत्यां कूटस्थात्मनि कल्पितं यदन्तःकरणं तत्र यश्चिदाभासः व्यावहारिक
जीव इत्यर्थः तदुक्तं कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबक इति प्राणितीत्यभिमन्यमान इति प्राणिमीत्येवमाकारकाभिमानकर्त्तेत्यर्थः न

तत्रावच्छिन्नः पारमार्थिको जीवः तस्मिन्नवच्छेदकस्य कल्पितत्वेप्यवच्छेद्यस्य सत्यत्वात् स कल्पितत्वेन ब्रह्मणाभिन्नत्वात् तमावृत्य स्थि
तायां मायायां कल्पितेन्तःकरणे चिदाभासोन्तःकरणतादात्म्यापन्नः प्राणिमीत्यभिमन्यमानो व्यावहारिकः तस्य मायिकत्वेपि या
वद्व्यवहारमनुवृत्तेः स एतमप्यावृत्य स्थितया मायावस्थाभेदरूपया निद्रया कल्पितेः स्वप्नदेहादावहममभिमानी प्रातिभासिकः

स्वप्नाकारवृत्तिरूपेण परिणम्यमानेन्तःकरणे एवाहमभिमानवत्त्वं युक्तं न तु चित्प्रतिबिंबस्यात आह अन्तःकरणेति तस्य व्यावहारि
कत्वे युक्तिमाह तस्येति न च व्यावहारिकजीवे मानाभाव इति वाच्यं अहं कर्त्ता भोक्तेत्यादिरूपाहमनुभवस्य तत्र मानत्वात् तर्हि तस्य कर्तृत्वाद्यात्म
संसाराश्रयत्वस्यान्यत्रायोगाच्च न चान्तःकरणस्य तस्य चिदाभासस्य तस्य चैतन्यधर्मत्वेन प्रसिद्धकर्तृत्वाद्याश्रयत्वायोगात् चिदाभा
सस्य तु चेतनात्मप्रतिबिंबतया मिथ्यात्वेपि तस्यापि चेतनत्वव्यवहारयोग्यत्वेन तद्गुणत्वेन तद्धर्मत्वप्रसिद्धिविरोधाभावात् पारमार्थिक
जीवस्य च न संसाराश्रयत्वं संभवति तस्य कूटस्थत्वादिति भावः तमपीति व्यावहारिकजीवमपीत्यर्थः व्यावहारिकजीवो हि जाग्रदवस्थाया
मात्मानं ब्राह्मणो देवदत्तो यज्ञदत्तपुत्रो विष्णुभक्तोहमस्मीति मनुते स्वाप्नजीवस्तु स्वप्नावस्थायामात्मानं दरिद्रो विष्णुशर्मनामा नारायणपुत्रोऽहमहादे

वभर्त्रंमन्यते अतोजाग्रज्जीवस्यावरणंसिद्धं प्रातिभासिकजीवकल्पकमाह निद्रयेति ननुमायाःसर्वकल्पकत्वाभ्युपगमात्कथंनिद्रायाः
कल्पकत्वंअप्रसिद्धांतापत्तेरित्याशंक्यनिद्रायास्तदवस्थारूपत्वाभ्युपगमान्नोक्तदोषइत्याशयेनाह मायेति नचनिद्रायामायालक्ष
णाभावात्कथंतदवस्थाविशेषरूपत्वमितिवाच्यं आवरणविक्षेपशक्तिमत्वंहिमायालक्षणं तस्यलक्षणस्यजाग्रज्जीवावरिकायांस्वाप्न
जगदात्मविक्षेपकारिण्यांचनिद्रायामक्षतत्वादितिभावः प्रातिभासिकजीवकल्पनायाःप्रयोजनमाह स्वाप्नदेहेति व्यावहारि
कजीवस्यावृतत्वेनस्वप्नकालेअहमभिमानकर्तृत्वासंभवादितिभावः नस्यप्रातिभासिकत्वेहेतुमाह स्वप्नप्रपंचेनेति प्रबोधकालेब्राह्मणोहंनदे
वियइत्यादिरूपेणबोधेनस्वप्नद्रष्टुः तद्विषयादिरूपस्यबाधानुभवादितिभावः ईश्वरविषयेऽक्तवक्ष्यमाणप्रकारभेदज्ञानार्थमुपसंहरति एव
स्वप्नप्रपंचेनसहतद्द्रष्टुर्जीवस्यापिप्रबोधेनिवृत्तेरितिति एवमेतेप्रतिबिंबेश्वरवादिनांपक्षेभेदाददर्शिताः विवरणानुसारिणस्त्वाहुः
विभेदजनकेऽज्ञानेनाशमात्यंतिकंगतेआत्मनोब्रह्मणोभेदमसंतंकःकरिष्यतीतिस्मृत्याएकस्येवाज्ञानस्यजीवेश्वरविभा
गोपाधित्वप्रतिपादनाद्बिंबप्रतिबिंबभावेनजीवेश्वरयोर्विभागः नोभयोरपिप्रतिबिंबभावेनोपाधिद्वयमंतरेणोभयोःप्रतिबिंब
त्वायोगात् तत्रापिप्रतिबिंबोजीवः बिंबस्थानीयईश्वरः तथासत्येवलौकिकबिंबप्रतिबिंबदृष्टांतेनस्वातंत्र्यमीश्वरस्यतस्मात्
तंत्र्यंजीवस्यचयुज्यते
मिति बिंबचैतन्यमेवेश्वरोनप्रतिबिंबविशेषः इतिवक्ष्यमाणविशेषार्थकस्तुशब्दः विभेदजनकत्वंजीवेश्वरभेदा
श्रयत्वप्रयोजकत्वंविवक्षितं ननुयथाज्ञानेनभेदस्यानादित्वाभ्युपगमात् आत्यंतिकमिति स्वापप्रलयादावज्ञानकार्यनाशेनतत्कारणाज्ञा
नस्यापिनाशोस्तिपरिणामपरिणामिनोरभेदात् सचाज्ञाननाशोनात्यंतिकः पुनरुत्थानात् मुक्तौतुतत्त्वज्ञानेनस्वरूपेणापिनाशोस्तिस
चात्यंतिकः पुनरुत्थानाभावादितिमत्वाअज्ञाननाशस्यात्यंतिकविशेषणंदत्तं यद्वाजीवन्मुक्तिकालेअज्ञानस्यावरणांशेननाशेपिविक्षे
पांशनाशाभावान्नात्यंतिकःसनाशः विदेहमुक्तौत्वज्ञानस्यात्यंतिकोनाशइतितदभिप्रायेणैतद्विशेषणमितिभावः प्रतिबिंबत्वायोगादिति ५१
नचजीवेशयोराभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीतिश्रुत्याउभयोःप्रतिबिम्बत्वप्रतिपादकवाक्यविरोधइतिवाच्यं प्रतिबिम्बत्वमहिं

वन्वस्यापि कल्पितनयाश्रुतिगताभासपदेन प्रतिबिंबवह्निं वस्यापि ग्रहणोपपत्तेः नन्वलोके प्रतिबिंबत्वविशिष्टस्यैव मुख्याभासत्ववदर्शना
त् बिंबत्वविशिष्टस्यैव तथात्ववदाभावादाभासपदस्य श्रुत्या बिंबचेतनस्य प्रतिपादयितुं न शक्यो नीतिखल्वप्रतिबिंबवह्निं वस्यापि वि
शिष्टरूपेण कल्पितनयाकल्पितनयोपयोगेन बिंबपरमाभासपदं वक्तव्यं न चेन्न संभवति सकृदुच्चरितस्याभासपदस्य मुख्यया वृत्त्या
प्रतिबिंबपरत्वेऽप्यलक्षणया बिंबपरत्वमिति कल्पनस्य प्रतिविरुद्धत्वात् न चाजहल्लक्षणयात्राभासपदस्य बिंबप्रतिबिंबोभयपरत्वा
भ्युपगमे नायं विरोध इति वाच्यं उभयोरपि प्रतिबिंबरूपतामादायाभासपदस्य मुख्यार्थपरत्वसंभवे सति लक्षणाकल्पनाया एव निर्मू
लत्वादिति चेदुच्यते यथाश्रुतजीवेशयोरुभयोरपि प्रतिबिंबरूपत्वं न संभवति बिंबभूतचैतन्यस्य सर्वदेकत्वेनोपाधिभेदं विना प्रति
बिंबद्वयासंभवात् न च मायायाश्चाविद्यायाश्च स्वरूपमेव भवतीति वाच्यं शेषेण मायाविद्यारूपोपाधिद्वयप्रतिपादनात् प्रतिबिंबद्वयात्रुपप
त्तिरिति वाच्यं तेन स्वयं शब्दोपात्तायाः प्रकृतेर्मूलप्रकृतेर्मायात्वाविद्यात्वलक्षणरूपभेदप्रतिपादनेऽपि प्रतिबिंबद्वयापेक्षयापेक्षि
तोपाधिद्वयाप्रतिपादनान्मायाविद्ययोः स्वरूपतो भेदस्यासिद्धान्तविरुद्धत्वाच्च तस्माद्यथाश्रुतासंभवादेकस्यैवाज्ञानस्य जीवेशावि
भागाप्रयोजकत्वप्रतिपादकत्वस्य तत्त्वतोऽध्याच्च जीवेशावाभासेन करोतीति श्रुत्याभासपदमजहल्लक्षणया बिंबप्रतिबिंबोभयप
रमिति विवरणानुसारिणामाशय इति तत्रापीति बिंबप्रतिबिंबयोरुभयोर्मध्येऽपीत्यर्थः तत्रयुक्तिमाह तथा सत्येवेति बिंबचेतनस्ये
वेश्वरत्वाभ्युपगमे सतीत्यर्थः स्वातंत्र्यमिति एष सर्वेश्वर एष भूताधिपतिरित्यादिश्रुतिसिद्धमिति शेषः तस्मादेतत्त्राममिति एष ह्ये
व साधु कर्म कारयति यम्रान्तानमेत्तरो यमयति ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वेत्यादिश्रुतिस्मृतिसिद्धमिति शेषः लौकिक
दृष्टांतमेव कल्पनकृल्लोकाकारकरणेन दर्शयति प्रतिबिंबगता इति यथा लोके कश्चित्पुरुषः स्वप्रतिबिंबगताः ऋजुवक्रादिविक्रि
याः बिंबभूतस्वप्रयुक्ताः पश्यन् क्रीडतीति तथा ब्रह्मापि जीवस्थाविक्रियाः प्राणिकर्मानुसारेण स्वप्रयुक्ताः पश्यन् क्रीडतीति योज
नाकल्पनतत्कारीत्याईश्वरत्वानंत्र्यप्रतिपक्षपयोगिन्ने ईश्वरस्य स्वातंत्र्यप्रतिपादके सूत्रमपि संगच्छत इत्यर्थः सूत्रार्थस्तु ईश्वरस्याप्तकाम

सि॰ले॰
प्र॰टी॰
५२

विनप्रयोजनोद्देशाभावात् स्रष्टादिव्यापारेषु प्रवृत्तिर्न संभवतीति पूर्वपक्षव्यावृत्त्यर्थकस्तु शब्दः ईश्वरस्य सृष्ट्यादिप्रवृत्तिलक्षणक्रिया केव
लप्रयोजनोद्देशं विनैव लीला लोकवत् यथा लोके सार्वभौमादेः सर्वैश्वर्यसंभोगे सत्यत्र तमस्य प्रयोजनाभिसंधिं विनैव क्रीडाद्यस्य
तद्वत् किं चेश्वरस्य प्रयोजनोद्देशाभावेपि स्वभावादेव सृष्ट्यादिप्रवृत्तिरुपपद्यते दृश्यते हि सुखोद्रेकानुभवप्रयुक्तानां समानादिरूपाप्र
योजनोद्देशरहिता लीला प्राणिनां स्वाभाविकी न हि तत्र प्रयोजनमपि संभावयितुं शक्यते दुःखोद्रेके रोदनवत् सुखोद्रेके हास्यमानादेः
प्रयोजनरहितस्य स्वसंवेद्यानुभवसिद्धत्वात् श्रुतप्रवृत्तिहसितरुदितादिषु कारणमेव पृच्छति न प्रयोजनं तु उक्तं च माण्डूक्यश्रुतौ देवस्यैष स्व
भावोयमाप्तकामस्य का स्पृहेति एवं सृष्ट्यादिर्वक्तव्य इत्यर्थः किं च सत्यसंकल्पस्य शिवस्य मायया मयि प्रपञ्चसृष्टिरस्त्विति प्रवर्तते न च तत्र

प्रतिबिंबगताः परप्रपञ्चत्ववक्रादिविक्रियाः उमानन्दक्रीडेयं यथा ब्रह्म तथा जीवस्य विक्रिया इति कल्पनरूपा क्रीडा लोकव
त्तु लीलाकैवल्यमिति सूत्रमपि संगच्छते श्रुत्यानन्दमति विविनक्ति जीवस्यान्तःकरणरूपोपाधानपरिणामभेदो विशेषाभिव्य
क्तिस्थानं सर्वेन्तःप्रत्यक्त्वस्य स्वच्छप्रकाशस्य दर्पणाद्ववनुरक्तस्य तदुपाधिकत्वव्यवहारो भिन्नैतावता तन्नोपाध्युपधिमात्राः

योजनमप्रयोज्या प्यः स्वमसत्येऽप्रयोजनमप्रदर्शनादिति भावः न तु यद्यन्तानां जीवस्योपाधित्वं हि वर्थमंतःकरणस्य जीवोपाधित्वं
नेसत्वभाष्यादिषु तत्राह प्रत्यन्तानेति विशेषाभिव्यक्तिस्थानमिति अविद्याप्रतिबिंबचेतन्यरूपस्य सुषुप्ति साधारणस्य प्रमातृत्वकर्तृत्व
भोक्तृत्वादिविशेषरूपेण याभिव्यक्तिरुपलब्धिस्तस्याः स्थानमुपाधिरित्यर्थः एतदुक्तं भवति कर्तृत्वादिधर्माणां केवलाज्ञानपरिणा
मित्वाभावेन तदुपाधिमात्रात्तज्जीवस्य कर्तृत्वादिधर्मरूपविशेषलाभः किं तु कर्तृत्वादिविशेषवदंतःकरणतादात्म्याध्यासादेवत
ल्लाभ इति न तदुपाधिनिरूपणं व्यर्थमिति प्रत्त इति प्रत्तः करणस्य विशेषाभिव्यक्तिस्थानत्वाभ्युपगमादित्यर्थः व्यवहारोपाधिकार्यो
पाधिरयं जीव इति श्रुतौ सूत्रभाष्यादिषु चेति शेषः विभेदजनके ज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीति ५२

विष्णुपुराणवचने जीवस्याज्ञानोपाधिकत्वव्यवहारवदित्यभिप्रायेऽर्थः नन्वकार्योपाधिरयं जीव इति श्रुतिबलादज्ञानोपाधिपरित्याग उचि
तः कार्योपाधिकत्वविशेषणस्य कारणोपाधिकत्वव्यावर्तकत्वादित्याशंक्यास्य श्रुतिविरोधाज्ञानस्य कारणोपाधिव्यावर्तकत्वमुपेयत
इत्याशयेनाह नैतावतेति श्रुतौ कार्योपाधिकत्वविशेषणमात्रेणेत्यर्थः ननु श्रुतिविरोधे सत्येवास्यायानयनमुचितं ननु पुनरप्र
कारस्त्वेत्यस्य सत्त्वाद्ज्ञानपदं तत्कार्यतः करणपरं जीवोपाध्यंतःकरणस्य नानात्वेऽप्यज्ञानस्यैकवचनं जात्यभिप्रायं तथा चांतःक
रणावच्छिन्नश्चात्मा जीवः तदनवच्छिन्नश्चात्मा ईश्वरः इति जीवब्रह्मविभागप्रयोजकमंतःकरणमिति सत्यमर्थे भविष्यतीति इमामा
शंकां निवर्तयितुं कार्योपाधिमात्रस्य जीवत्वोपाधित्वं निराकरोति अंतःकरणोपाधिपरिच्छिन्नस्यैवेति नाज्ञानोपाधिकस्यैवकारा

र्थः अंतःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानत्वानुपपत्तेः न च योगप्रभावाद्योगिनोंऽतःकरणं
कायव्यूहाभिव्याप्तियोग्यं वैपुल्यं प्राप्नोति तदवच्छिन्नस्य कायव्यूहाधिष्ठानत्वं युज्यत इति वाच्यं प्रदीपवदावेशात्तथाहि दर्श

र्थः अनुपपत्तेरिति कायव्यूहाधिष्ठानं हि युगपदनेकशरीरनियंतृत्वं न च योगिनो योगप्रभावान्निर्मितेषु सर्वशरीरेषु युगपदवस्थितस्य
वक्तव्यं न चांतःकरणावच्छिन्नचैतन्यरूपस्य योगिनस्तत्संभवति तस्य परिच्छिन्नत्वादज्ञानस्य जीवोपाधित्वे तु तत्संभवति तस्य व्यापकत्वेन
तदुपाधिकस्य योगिजीवस्य युगपत्सर्वशरीरेषु सन्निधानोपपत्तेः तथा च श्रुत्यपेक्षया स्मृतेर्दुर्बलत्वेऽपि कायव्यूहाधिष्ठानानुपपत्तिस
हितस्य स्मृतेर्बलवत्त्वात् न तदनुरोधेन कार्योपाधिरयं जीव इति श्रुतौ कार्योपाधिपदं स्वरूपकथनमात्रपरं न कारणोपाधिव्यावर्तकविशे
षणपरमिति भावः वैपुल्यमिति व्यापकत्वमित्यर्थः अधिष्ठानत्वमिति प्रेरकत्वमित्यर्थः प्रदीपवदिति यथा एकस्य प्रदीपस्यानेकवर्ति
ष्वावेशः यथा योगिनो योगप्रभावादनेकेषु कदाचिदावेशः यद्यपि प्रदीपस्य वर्त्यादिषु दीपानां च भेदोऽस्ति योगिनस्तु सर्वदेहेष्वैक्यमिति दृ
ष्टांतदार्ष्टांतिकयोर्वैषम्यमस्ति तथापि दीपत्वजात्यभेदं वक्ते षादोषत्वं यो संगतिरवगंतव्या तथा हि दर्शयति श्रुतिः एकस्य योगिनोऽनेक

सि॰ले॰
प्र॰टी॰
५३

याभावं स्वप्ना भावं इति त्रिधा भवति पंचधा भवति समये तो दिका नचयोगिनो युगपदनेकशरीरेषु वस्थानमंतरेण ज्ञाति सिद्धानेकधाभाव
उपपद्यत इति सूत्रार्थः सूचेक पदवर्णनादिति तथा चैकस्यैवांतःकरणस्य कायव्यूहाभिव्यक्तियोगपद्ये वृत्त्याभ्युपगमे भाष्यादिविरोध इति
भावः अत्रेयद्यपि योगिनो निजस्सिद्धांतःकरणमेव योगप्रभावाद्धेतुल्यं प्राप्यस्तावच्छिन्नचैतन्यस्वरूपस्य योगिनः कायव्यूहानि ज्ञानभोगादि
कं चेदयतीति भाष्यादीनां तात्पर्यं वक्तुमुचितं न तु यथा श्रुतं नानांतःकरणसंसर्ग्यांगि तु कानेकांतःकरणस्वरूपगमे श्रुत्कार्यवा
दापातात् कल्पनागौरवाच्च हिरण्यगर्भादीनां योगप्रभावादेवाव्यापिसमस्तांतःकरणाभ्युपगमाच्च न हि हिरण्यगर्भादीनां पूर्वजन्म
नियतमानावस्थायां तदीयांतःकरणं व्यापितेप्रमाणमस्ति तथा सत्यस्मदाद्यंतःकरणानामपि व्यापित्वापत्तेः भाष्यादिष्वंतःकरण
सृष्टिवर्णनस्य मतांतराभिप्रायत्वोपपत्तेश्च एवं च योगशास्त्रे ऽपि योगिनामनेकशरीरयोगप्रक्रियेति भाष्ये ऽप्येवमतांतरोपदर्शनात् योग

यतीति शास्त्रोपांत्याधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमंतःकरणस्य चक्षुरादिवच्छिन्नस्य योगप्रभावात्सृष्टेरुपवर्णना
त् प्रतिबिंबेविवादे दमात्रसाध्यस्तत्त्वेन स्वरूपेण तस्य सत्त्वात् न प्रतिबिंबरूपजीवस्य मुक्तत्वन्वयासंभव इति न तदर्तिरेकेण मुक्त

शास्त्रेष्वेवं च पक्षप्रक्रियेति पूर्वकारान्वयोपपत्तेस्तथापि शास्त्रोपांत्याधिकरणयथाश्रुतभाष्याद्यभिप्रायेणेदं दूषणमिति मंतव्यं वस्तु
तस्तु मुक्तांतःकरणावच्छिन्नचैतन्यं जीवस्तदनवच्छिन्नमीश्वर इति पक्षे ब्रह्मांडांतर्गतचेतनस्य सर्वात्मना तदवच्छेदादनवच्छिन्नचैतन्यरूपेश्वरस्यां
ड्राद्बहिरेव सत्त्वस्यादिति वक्ष्यमाणदूषणे तात्पर्यं यदि चानवच्छिन्नचैतन्यमीश्वर इत्यनेन निरुपाधिकं चैतन्यमीश्वर इति विवक्षितं तदा तस्य स
र्वज्ञत्वेनांडाद्बहिरेव सत्तापत्तिदोषाभावे ऽपि कारणोपाधिरीश्वर इति श्रुतिविरोधदोषो दुर्वारस्तस्मात्कारणोपाधिकत्वमीश्वरत्वं जीवस्या
प्यवगंतव्यं स्वरूपस्तु संसारादिति स्थित यत्तु चित्रदीपे प्रतिबिंबचैतन्यरूपजीवस्य स्वरूपतो मिथ्यात्वात्तु मुक्त्यन्वयायोग इति तदन्वययोग्यं कू
टस्थनामकं जीवेश्वरविलक्षणं किंचिच्चेतनं संपरिकल्प्य विद्यानुविध्यं दर्शितं यदपि च हृदयपवित्रके प्रतिबिंबमिथ्यात्वमेवाश्रित्य मुक्त ५२

न्वयावच्छिन्नचैतन्यस्य पारमार्थिकजीवत्वं कल्पितं तदुभयमप्ययुक्तं बिंबप्रतिबिंबयोर्भेदमात्रस्य कल्पितत्वया स्वतन्त्वयोर्भेदे मानाभा
वादित्याशयेनाह प्रतिबिंबेति बिंबादीति स्वरूपस्य कल्पितत्वघटके देशमात्रशब्दार्थः तदतिरेकेणेति प्रतिबिंबजीवातिरेकेण जीवांतरं
वा कूटस्थशब्दितं चैतन्यांतरं वा न कल्पनीयमिति निःसंबंधः एवं व्यावहारिकजीवातिरेकेण प्रातिभासिकजीवोपि न कल्पनीयः प्रमाणा
भावात् न च व्यावहारिकजीवस्य स्वप्नकाले व्यापृतत्वेन तस्य न स्वप्नद्रष्टृत्वानुपपत्तिस्तत्कल्पने प्रमाणमिति वाच्यं जीवचैतन्यस्या
वरणाभावस्योक्तत्वादिति निरूपणावसरे व्यप्रमाणत्वेन जाग्रज्जीवस्य स्वप्नेपि व्यवहारकर्तृत्वोपपत्तेः योऽहं स्वप्ने श्रीकृष्णमद्राक्षं स एवेदा
नीं जाग्रस्मि न त्वं स्मरामीति जाग्रत्स्वप्नद्रष्ट्रोरभेदप्रत्यभिज्ञानात् संस्कारोद्बोधाभावादिकारणवशादेव कदाचित्स्वाप्नस्मरणाभावप्रतीत्युप

न्वयावच्छिन्नरूपजीवांतरं वा प्रतिबिंबजीवातिरिक्तं जीवेश्वरविलक्षणं कूटस्थशब्दितं चैतन्यांतरं वा कल्पनीयं अविनाशी
वारेयमात्मेति श्रवणाज्जीवस्य तदुपाधिनिवृत्तौ प्रतिबिंबभावापगमेपि स्वरूपं न विनश्यतीत्येतत्परं न तदतिरिक्तकूटस्थना
मचैतन्यांतरपरं जीवोपाधिनांतःकरणादिनावच्छिन्नं चैतन्यं बिंबभूत ईश्वर एव यो विज्ञाने तिष्ठन्नित्यादिश्रुतावीश्वरस्यैव

पत्तेश्च न च स्वप्नप्रपंचेन सह तद्द्रष्टुर्बाधदर्शनात्प्रातिभासिकजीवकल्पने प्रमाणमिति वाच्यं प्रबोधकाले नाहं क्षत्रिय इत्यादिरूपबा
धकप्रत्ययस्यात्मन्यारोपितक्षत्रियत्वादिमात्रबाधकत्वेन स्वप्नद्रष्टृबाधकत्वाभावात् अन्यथा स्वोदाहृतद्रष्ट्रैक्यप्रत्यभिज्ञानविरोधात्
तस्मात्प्रातिभासिकजीवकल्पनमपि प्रामाणिकं न भवतीति बोध्यं यदपि चिद्वात्रैविध्यवादिभिरुक्तं तानेवानुविनश्यति अविना
शी वारेऽयमात्मेति वाक्याभ्यां प्रकृते प्रज्ञानघनात्मनि विनाशित्वाविनाशित्वरूपविरुद्धधर्मद्वयप्रतिपादनात् तदुपपत्तये विनाशि
प्रतिबिंबव्यतिरेकेणाविनाशशब्दितकूटस्थचैतन्यं सिध्यतीति तदपि मंदं अविद्याप्रतिबिंबचैतन्यरूपे जीव एव प्रतिबिंबत्वरूपविशेषा
ंशनाशाभिप्रायेण विनाशवचनस्य विशेष्यचैतन्यांशाभिप्रायेण विनाशाभावप्रतिपादकवचनस्य चोपपत्तौ धर्मिभेदकल्पनस्य
गौरवपराहतत्वादित्याशयेनाह अविनाशीवेति नन्वविद्याप्रतिबिम्बो जीवस्तर्हि बिंब ईश्वरः बिंबप्रतिबिंबानुगतचैतन्यं शुद्धचैतन्यमि

सि॰ले॰
प्र॰टी॰
५४

तिविवरणपक्षे देहद्वयोपादानतयान्तःकरणावच्छिन्नस्य पारमार्थिकजीवनामकतया कूटस्थनामकतया च विद्यारण्यादिभिरंगी-
कृतस्य चैतन्यस्याज्ञानभावरूपेऽपि तेन तादृग्जीवे मुक्तचैतन्ये वा तदन्तर्भावः संभवति तयोरुपादानत्वाभावेन देहद्वयोपादानकूटस्थस्य सतयो-
रनर्भावायोगात् नापि बिंबभूते ईश्वरे तस्यान्तर्भावः संभवति ईश्वरस्य जीववदुपाध्यन्तःकरणादिसन्निहिततया देहादिविकारेष्ववस्थाने
प्रमाणाभावात् कूटस्थनामकचैतन्यस्य च कूटस्थवादिभिस्तथात्वांगीकारादित्यत आह जीवोपाधिनेति अविद्याप्रतिबिंबरूपजी-
वस्य विशेषोपाधित्वप्रयोजकोपाधिनेत्यर्थः मायावत्तद्वादिकमादिपदार्थः ईश्वरपदेति नाशुद्धब्रह्म नापि प्रतिबिंबरूपजीव इत्येवका-
रार्थः चेतनाचेतनात्मकनिखिलप्रपंचोपादानत्वप्रतिपादकश्रुतिस्मृतिसहस्रस्य बिंबभूतेश्वरस्य देहाद्युपादानतया देहादिविका-
रेष्वन्तरवस्थाने प्रमाणत्वात् कूटस्थस्य च ततो भेदे मानाभावादिति भावः न केवलमुपादानत्वप्रतिपादकशास्त्रमेव तत्र प्रमाणं किंतु चे-

जीवसन्निधानेनान्तर्यामिभावेन विकारान्तरावस्थानश्रवणादिति अमेतद्रूपावुपहितप्रतिबिंबो न युक्तः स्वतन्त्रो नीरूपेणा-
नप्रतिबिंबोदाहरणमप्ययुक्तम् ॥

तनाचेतनात्मकसकलजगन्नियन्तृत्वप्रतिपादकमन्तर्यामिब्राह्मणमपि बिंबभूतेश्वरस्य विका-
रेष्वन्तरवस्थाने प्रमाणमित्याह यो विज्ञाने तिष्ठन्नित्यादिश्रुत्येति विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमय-
तीत्यादिवाक्यमादिपदेन गृह्यते अत्र विज्ञानपदं जीवपरं बृहदारण्यके माध्यंदिनपाठे य आत्मनि तिष्ठन्निति पर्यायस्थाने काण्वपाठे यो वि-
ज्ञाने तिष्ठन्निति पर्यायाम्नानदर्शनेन काण्वपाठे विज्ञानपदस्यात्मपदसमानार्थकत्वावगमात् आत्मपदं चात्र जीवपरं तस्य तत्र कृतत्वादात्म-
पदस्य जीवेश्वरसाधारणत्वेऽपि नियम्यत्वलिंगेन प्रकृते जीवपरत्वावधारणसंभवादिति भावः जीवसन्निधानेनेति ईश्वरस्य जीवादिनियन्तृत्वं हि
यवद्धितराजादेः प्रजानियन्तृत्ववन्न भवति किंतु नियम्यजीवादिसन्निधानेनैव य आत्मनि तिष्ठन्निति सन्निधानप्रतीतेरित्यर्थः अन्तर्यामिब्रा-
ह्मणवाक्यग्रहणं स्मृतेरप्युपलक्षणं तथा च भगवद्गीतास्मृतिः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि माय-
येति भूतानि प्राणिनः यन्त्रं शरीरं तदारूढत्वं तत्राहंममाभिमानवत्त्वं भ्रामयन्निति कर्मानुसारेण प्रवर्तयन्निवर्तयन्नित्यर्थः ईश्वरस्य नियन्तृत्वं । ५४

मायोपाधिकमेव न वास्तवमित्याशयेन माययेत्युक्तं एवं चैतन्यस्य प्रतिबिंबत्वमुपगम्य तन्मतभेदेन जीवेश्वरविभागो दर्शितः इदानीं तदन

भ्युपगंतृणां मतेन जीवादिस्वरूपं दर्शयितुं चैतन्यस्य प्रतिबिंबं निराकरोति अन्ये त्विति रूपानुपहितेति लोके रूपवत एव च शब्दादेः प्रतिबिं

बो दृश्यते न रूपरहितस्य वाय्वादेरिति व्याप्तिदर्शनान्नीरूपचैतन्यस्य प्रतिबिंबासंभव इत्यर्थः इतश्च चैतन्यस्य न प्रतिबिंबसंभव इत्याह स्व

तंत्रोनीरूप इति अविद्यांतःकरणादाविति शेषः रूपवत एव द्रव्यस्य प्रतिबिंब इति नियमस्य वक्ष्यमाणरीत्या गगने व्यभिचारसत्वेपि रूप

वत्स्वेवोपाधौ प्रतिबिंब इति नियमस्य न क्वचिदपि व्यभिचार इति मत्वा स्वतंत्रा मिश्रुक्तं ननु नीरूपस्य गगनस्य कूपजलतडागादौ प्रतिबिंबानु

भवान्नीरूपद्रव्यस्य प्रतिबिंबाभाव इति नियमो नास्तीत्याशंक्याह गगनेति कूपजलादौ तावदालोकप्रतिबिम्बः संप्रतिपन्नस्तस्मिन्

गगनप्रतिबिंबत्वभ्रमो लोकानामिति कल्पनेन तद्वस्तुतः तत्र गगनप्रतिबिम्बोस्ति उक्तनियमविरोधात् भ्रमप्रयोजकं दोषमाह गग

गगनाभोगव्यापिनि सवितृकरमंडले सलिले प्रतिबिंबिते गगनप्रतिबिंबत्वस्य व्यवहारस्य भ्रममात्रमूलकत्वात्

नाभोगव्यापिनीति आभोगो विस्तारः गगनोपरिभागे व्याप्य वर्तमानस्य सवितृकिरणमंडलादेः जले प्रतिबिंबदर्शनात्तदनुगतगगन

स्य जले प्रतिबिंबभ्रम इत्यर्थः ननु यथा बहिर्नीलं नभः विशालं नभ इत्यादिरूपेण गगनमनुभूयते एवं कूपतडागादिजलेपि नीलं न

भो विशालं नभ इत्यादिरूपोनुभवः सर्वसंप्रतिपन्नः न च कूपजलादौ प्रतीयमानवैशाल्यादियुक्तं नभो वस्तुतोस्ति अतः प्रतिबिंबरूप

मेव न च दृश्यमानं नभो भवतीति वक्तव्यं तत्कथं गगनप्रतिबिंबापलापः क्रियते न च नीरूपस्य प्रतिबिंबासंभवादिति वाच्यं रूपसंख्या

परिमाणादेर्नीरूपस्यापि प्रतिबिंबदर्शनात् न च द्रव्यत्वमपि विशेषणं विवक्षितमिति वाच्यं सिद्धांते द्रव्यगुणादिपरिभाषाया अनभ्युपगमा

त्तदभ्युपगमेपि गगनप्रतिबिंबानुभवानुरोधेन रूपोपहितद्रव्यस्य प्रतिबिंबः तदुपहितस्य च वस्तुतः स्वगुणतद्रूपेण स्वस्मिन्नारोपितरूपेण वे

ति नियमकल्पनोपपत्तेश्च तथा च बहिरारोपितनैल्यादिविशिष्टगगनस्य जलादौ प्रतिबिंबाभ्युपगमेन किं विरोधकं न च जलादौ संप्रतिपन्ना

लोकप्रतिबिंबातिरिक्तगगनप्रतिबिंबाभ्युपगमे गौरवमेव बाधकमिति वाच्यं आलोकप्रतिबिंबे गगनप्रतिबिंबत्वस्याभ्युपगमेपि तद्भ्रमविष

सि॰ले॰
प्र॰टी॰
५५

यस्यालोकप्रतिबिंबाधिकरणस्य शुक्तिरूप्यादिवदनिर्वचनीयस्य गगनप्रतिबिंबत्वस्याभ्युपगंतव्यत्वेन गौरवस्य तुल्यत्वादनुभवानुसारि।
गौरवस्यादोषत्वाच्च तस्माद्रूपवत एव द्रव्यस्य प्रतिबिंब इति नियमस्य गगनप्रतिबिंबस्थले व्यभिचारो दुर्वार इति चेत्सत्यं तथापि चैतन्यस्य प्रति
बिंबो न संभवति नीरूपांतःकरणादेः प्रतिबिंबोपाधित्वासंभवादित्येवं तात्पर्यं ननु नीरूपेपि ध्वनौ नीरूपद्रव्यात्मकवर्णानां प्रतिबिंबो
स्तीति वक्तव्यं तथा सत्येव दर्पणप्रयामृतायाः दर्पणगतप्रतिबिंबद्वारेण बिंबमुखवद्ध्वनिगतानां तारत्वादीनां ध्वनिगतवर्णप्रतिबिंब
द्वारा वर्णेष्वारोपः संभवति नान्यथा एवं नीरूपांतःकरणादौ नीरूपात्मनः प्रतिबिंबसंभवस्तत्साधकदृष्टांतं विघटयति ध्वनाविति नच
घटाकाशद्रव्यवाय्वादिविशेषादिशब्दोत्पत्तिकाले पाषाणविशेषादिसन्निहिताकाशप्रदेशेषु प्रतिध्वनिः श्रूयते स एव शब्दप्रतिबिंब एव नमु।
(व्य)ध्वनिस्तु तत्रोत्पत्तौ कारणाभावात् तथा च यथा नीरूपाकाशप्रदेशेषु नीरूपध्वनेः प्रतिध्वनिरूपः प्रतिबिंबः तथा च प्रकृतेपि किं न स्यादि

ध्वनौ वर्णप्रतिबिंबत्ववादोप्ययुक्तः व्यंजकतया सन्निधानमात्रेण ध्वनिधर्माणामुदात्तादिस्वराणां वर्णेष्वारोपोपपत्तेर्ध्वनेर्व
र्णप्रतिबिंबोपाधित्वकल्पनायाः निःप्रमाणकत्वात् प्रतिध्वनिरपि न सर्वशब्दप्रतिबिंबः पंचीकरणप्रक्रियया पटहयोनिप्रभृ
तिशब्दानां दितिसलिलादिशब्दत्वेन प्रतिध्वनेरेवाकाशशब्दत्वेन तस्यान्यशब्दप्रतिबिंबत्वायोगात् वर्णरूपप्रतिशब्दोपि न पूर्वव

त्तिनेत्याह प्रतिध्वनिरपीति नच प्रतिध्वनेरुत्पादकाभावः शंकनीयः आकाशस्यैवोपादानस्य सत्वात्स्वशब्दस्य निमित्तकारणस्य सत्वा
च्च नच प्रतिध्वनेः प्रतिबिंबत्वेप्याकाशगुणत्वं किं न स्यादिति वाच्यं बिंबप्रतिबिंबयोर्भेदपक्षे प्रतिध्वनिरूपप्रतिबिंबस्य प्रातिभासिकत्वेन
व्यावहारिकगुणत्वानुपपत्तेस्तदभेदपक्षे बिंबस्य तत्पृथिव्यादिशब्दापेक्षया प्रतिध्वनिरूपप्रतिबिंबस्य भेदाभावेन तस्याकाशगुणत्वानुपप
त्तेरिति भावः ननु वर्णरूपप्रतिशब्दस्य वर्णप्रतिबिंबत्वमेव स्यापवाच्यं न तस्याप्ता वर्णरूपत्वं प्रतिवर्णाभिव्यक्तिस्थले वर्णव्यंजककंठताल्वादे
रभावात् तथा च यथा तत्र पर्वतगुहादिसन्निहितेषु नीरूपेष्वाकाशप्रदेशेषु नीरूपाणामेव वर्णानां प्रतिबिंबस्तथा प्रकृतेपि किं न स्यादित्यत आ
ह वर्णरूपप्रतिशब्दोपीति प्रतिध्वनिवदित्यपिशब्दार्थः कंठताल्वादिस्थलेपि न केवलादेर्वर्णव्यंजकत्वं किंतु कंठताल्वाद्यभिघातजन्यध्व ५५

नेसत्यत्वाच्च यथा मूलध्वनिर्वर्णाभिव्यंजकः एवं प्रतिध्वनिरपि जलस्थले ऽत्मनः प्रतिध्वनिरेव तत्र वर्णानां व्यंजकः संभवतीतिन प्रति
वर्णानां प्रतिबिंबरूपत्वमभ्युपगंतव्यमित्यर्थः चैतन्यप्रतिबिंबनिराकरणमुपसंहरति तस्मादिति चैतन्यप्रतिबिंबासंभवादित्यर्थः ।
अंतःकरणानवच्छिन्नचैतन्यस्येश्वरत्वे अंतःकरणादिषु सर्वविकारेषु परमेश्वरस्यांतर्यामिभावेनावस्थानप्रतिपादकश्रुतिविरो।
धशंकते नचैवमिति विरुध्येतेति तथा च श्रुतिविरोधपरिहाराय प्रतिबिंबपक्षएव स्वीकर्तव्य इति भावः प्रतिबिंबपक्षाश्रयणे
पि श्रुतिविरोधमाशंक्याह प्रतिबिंबपक्षेपीति वशाद्धस्तचिंतविशेषमेवदर्शयति जलगतेति छिद्रणीकृत्येति प्रतिबिंबरूपजी

र्णप्रतिबिंबः वर्णाभिव्यंजकध्वनिनिमित्तकप्रतिध्वनेर्मूलध्वनिवदेव वर्णाभिव्यंजकत्वेनोपपत्तेः तस्मात्तद्घटाकाशवदं
तःकरणावच्छिन्नचैतन्यं जीवः तदनवच्छिन्नमीश्वरः नचैवमंतर्वर्तिनश्चैतन्यस्य नत्वंदंतःकरणोपाधिभिः सर्वात्मनात्जी
वभावेनावच्छेदात्तदवच्छेदरहितचैतन्यरूपस्येश्वरस्यांतःस्थितिरेवनस्यादिति योविज्ञानेतिष्ठन्नित्यादावंतर्यामिभावेनवि
कारांतरवस्थानश्रवणविरुध्येत प्रतिबिंबपक्षेत जलगतस्वाभाविकाकाशस्येव प्रतिबिंबाकाशदर्शनादेकत्वछिद्रणीकृत्य
वृत्तिरूपपद्यतेइति वाच्यं यतः प्रतिबिंबपक्षेष्वपि यावदंतर्गतस्यैव चैतन्यस्य तत्रप्रतिबिंबो वाच्यः नतु जलचंद्रन्यायेन कृत्स्न
प्रतिबिंबः तदंतर्गतभागस्य तत्र प्रतिबिंबासंभवात् नहि मेघावच्छिन्नस्याकाशस्यालोकस्य वा जले प्रतिबिंबवत् जलांतर्गत
स्यापि तत्र प्रतिबिंबो दृश्यते नवाम्बुवारीनां वहिःस्थितिसमये च जलांतरनिमज्जनेपि प्रतिबिंबोस्ति वभावेनतदुपाध्यंतर्या।
मिभावेनचेत्यर्थः प्रतिबिंबपक्षेप्यंतर्यामिब्राह्मणविरोधो दुष्परिहार इत्याह यतइति यत्रईश्वरे अंतर्यामिब्राह्मणांजस्याभावस्त्वल्पोतोन
चवाच्यमिति संबंधः तत्रेति अंतःकरणादावित्यर्थः ननुयथाजलेकृत्स्नस्य चंद्रमंडलस्य प्रतिबिंबः तथा कृत्स्नस्यैव चैतन्यस्यांतःकर
णादौ प्रतिबिंबोस्तु नतूपाध्यंतर्गतचैतन्यभागस्यांतःस्थितिर्भवेत्तस्य तथा च बिम्बस्येश्वरस्यांतरेपि सत्वान्नान्तर्यामिब्राह्मणविरोध
तोल्पमिति नेत्याह नत्विति असंभवमेवदर्शयति नहीति आलोकस्यैवेति वहिःस्थितस्येतिशेषः जलांतर्गतस्यापीति घटाकाशादेरित्य

सि॰ले॰
म॰टी॰
५६

घंगः नत्रेति जलादावित्यर्थः उदाहरणं तस्मात् नवेति नतः किंतत्राह अंतरिति उपाध्यंतर्गतभागस्य तत्र प्रतिबिंबासंभवादित्यर्थः तदंतं
र्गतस्यैवेति चैतन्यस्येति शेषः इदमनुरोधितत्वात्कल्पनाया इति भावः विकारांतरेति अंडांतर्गतचैतन्यभागस्योपाध्यंतर्गतत्वान्न दाहि।
स्थितस्यैव चैतन्यस्य बिंबत्वावश्यमिति बिंबमते ईश्वरो ब्रह्माण्डाद्बहिरेवेत्यादित्यर्थः यदि च प्रतिबिंबपक्षे ईश्वरस्य सर्वांतर्यामित्वप्रतिपादक
श्रुत्याद्यनुसारेण लोकदृष्टिमनादृत्य कृत्स्नचैतन्यप्रतिबिंबमुपेत्यांतर्यामिब्राह्मणं जस्तमुपपद्यते तदा नवच्छिन्नचैतन्यमीश्व
र इति पक्षे प्यंतःकरणभावावच्छिन्नमीश्वर इति विवादितं अंतःकरणस्य कल्पितत्वेन चैतन्ये अंतःकरणाद्यवच्छेदेनाप्यंतःकरणाभाव
स्य वास्तवस्य सत्त्वेन तदवच्छिन्नचैतन्यरूपेश्वरस्य सर्वविकारांतरवस्थानसंभवात् तत्प्रतिपादकब्राह्मणं जस्य तत्संभवमिति समाधानबोध्य
अभावस्यापीश्वरोपाधित्वमुक्तं सिद्धीपे अंतःकरणसाहित्यराहित्याभ्यां विशिष्यते उपाधिर्जीवभावस्य ब्रह्मता याप्यनान्यथा यथा विधि

अतो जलप्रतिबिंबं प्रतिमेघाकाशादेरिवांतःकरणाद्युपाधिप्रतिबिंबप्रतितदन्तर्गतस्यैव बिंबत्वं स्यादिति बिंबमतस्य विका
रांतरवस्थानायोगादीश्वरेंतर्यामिब्राह्मणं जस्याभावस्तत्स्यः रूपाधिः स्यान्निषेधस्तथा नकिं सवर्णो लोकभेदेन स्वबलाविन

भिद्यते अंतश्चावृत्तिरूपेण साक्षाद्विधिमुखेन च वेदांतानां प्रवृत्तिः स्यान्नद्वियेत्याचार्यभाषितमिति श्लोकानामयमर्थः जीवत्वब्रह्मत्व
योरुपाधिरंतःकरणस्य साहित्यराहित्याभ्यां विशिष्यते भिद्यते तत्साहित्ये जीवत्वोपाधिः तद्राहित्ये ब्रह्मताया उपाधिरिति जीवेश्वरोपाधि
भेद इत्यर्थः नान्यथान्यप्रकारांतरेण जीवभावाद्युपाधिरित्यर्थः ननु भावस्यैवोपाधित्वनाभावस्येत्याशंक्य विनिगमनाविरहमाह यथेति
भाववदभावस्याप्यावर्तकोपाधित्वे विशेषो नास्तीत्यत्र दृष्टांतमाह सवर्णेति स्वबलात्वेनामयथेस्संचारव्यावर्तकत्वं ननु भावरूपांतः
करणे देहदृष्टत्वादिरूपेण जीवोपलब्धिसाधनत्वान्न स जीवोपाधित्वं युक्तमित्याशंक्य तदभावांतःकरणनिषेधस्यापि ब्रह्मोपलब्धिसाधनत्वा
न्न स्य ब्रह्मोपाधित्वं युक्तमित्यभिप्रेत्य तद्वदुपाधिनिषेधस्य ब्रह्मोपलब्धिसाधनत्वं भाष्यकारैरुक्तमित्याह अंतश्चावृत्तीति अंतस्तत्त्वेन ब्र ५६
ह्मोच्यते तन्न भवतीत्यतदंतःकरणादिरूपमुपाधिना तत्तत्सान्नोव्यावृत्तिर्निषेधः तद्रूपेण तद्बोधनद्वारेणेत्यर्थः साक्षाद्विधिमुखेन च वेदेः

साक्षीमनसः साक्षी सर्वस्य साक्षी प्रपञ्चनृपस्थाच न मत्वानइनिमकाशेनाच प्रकृतिबोधकतयाब्रह्मणोने ये प्रमाणमिति तथा चोक्तरीत्या
प्रतिबिंबावच्छेदपक्षयोः मयोरप्यंतर्यामित्वाद्ब्रह्मणं जस्याभावं जस्य योस्वलत्वेसतिसतरानी रूपइत्यादिना चेतन प्रतिबिंबासंभवस्य
प्रतिपादितत्वात् प्रतिबिंबपक्षे मत्वा अवच्छेदपक्षे पवादरणीयइति भावः एवमवच्छेदपक्षे दोषांतरमपि वक्ष्यमाणदोषतौल्यादिनैव निरस्तमि
त्याह एतेनेति स्वांतर्गतस्यैव निभागशक्तयुक्तिरजान्तसंधेया स्वसन्निहितस्यैव विशेषणस्यायमभिप्रायः यदि सर्वेष्वंतःकरणेष्वनव-
न्तर्गतस्यांडाद्बहिर्विद्यमानस्यैव चैतन्यभागस्यैकस्य प्रतिबिंबः संभवेत् न तर्हि बिंबचैतन्यप्रदेशभेदाभावात् अंतःकरणबिंबचैतन्य

एतेनावच्छिन्नस्य जीवत्वे कर्तृत्वभोक्तृत्वसमययोस्तत्र तत्रांतःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात्कृतहानाकृताभ्यागमप्रसं
गइति निरस्तं प्रतिबिंबपक्षेपि स्वांतर्गतस्य स्वसन्निहितस्य चैतन्यप्रदेशस्यांतःकरणे प्रतिबिंबस्य वक्तव्यतया तत्र तत्रांतः
करणस्य गमने बिंबभेदात् प्रतिबिंबस्यापि भेदावश्यंभावेन दोषतौल्यात् न चांतःकरणप्रतिबिंबो जीव इति पक्षे दोषतौल्ये
अविद्याप्रतिबिंबो जीवस्तस्य च तत्र तत्र गत्वरमंतःकरणं जलाशयव्यापिनो महामेघमंडलप्रतिबिंबस्य तदुपरि विसृत्वरस्फी
तालोकइव तत्र तत्र विशेषाभिव्यक्तिहेतुरिति पक्षेनायं दोषः अंतःकरणवदविद्याया गतभावेन प्रतिबिंबभेदानापत्तेरि

स्यप्रदेशभेदे प्रभेदेन प्रतिबिंबभेदापादनेन संभवेत् न च तथा संभवति अवहितस्य प्रतिबिंबायोगात् किंतु तत्र तत्रांतःकरणेसन्निहि
तस्यैव चैतन्यप्रदेशस्य बिंबत्वं वाच्यं तेन स्वरूपस्य च प्रतिबिंबभेदापादनेयुक्तमिति दोषतौल्यादिति कृतहानाकृताभ्यागमप्रसंगा
दोषतौल्यादित्यर्थः अविद्यायां चित्प्रतिबिंब ईश्वरः अंतःकरणे चित्प्रतिबिंबो जीव इति पक्षे अदर्शिते संक्षेपशारीरकपक्षे दोषतौ
ल्यापि विवरणादिपक्षे उक्तदोषाप्रसक्तेस्तस्योपादेयत्वं स्यादिति शंकते न चेति गत्वरं गमनशीलं तदुपरीति जलाशयोपरीत्यर्थः वि
सृत्वरेति यथा तत्र तत्र जलप्रदेशेषु विसृत्वरो गमनशीलो मेघच्छिद्रेभ्यो निस्सृतः स्फीतालोकः महामेघमंडलप्रतिबिंबस्य ज
लाशयव्यापकस्य विशेषेण स्फुरणहेतुस्तथा तत्र तत्रेरूपस्य च कर्तृत्वभोक्तृत्वादिविशेषाभिव्यक्तिहेतुरंतःकरणमिति यद्वाइम
र्थः कृतहानादिदोषाभावे हेतुमाह अंतःकरणवदिति यदि प्रतिबिंबवादिनामंतःकरणप्रतिबिंबो जीव इति पक्षस्यैव दोषतौल्येनप

सि॰ले॰
म॰टी॰
५८

रित्यस्याविद्याप्रतिबिंबो जीव इति पक्षः स्वीक्रियते तदावच्छेदवादिनापि अंतःकरणावच्छिन्नो जीव इति पक्षे कृतहानादिदोषयुक्तत्वेनकाउ
क्तदोषरहितमविद्यावच्छिन्नो जीव इति मतमुपादीयते इत्याह तथैवेति जीव इति उपलक्षणं चेतन अविद्यायाः कल्पितत्वेन वास्तवत
दभावावच्छिन्नश्चिदात्मा ईश्वर इत्यभ्युपगमसंभवाच्चेत्यपि द्रष्टव्यं एवमविद्याप्रतिबिंबो जीव इति पक्षे कृतहानादिदोषाभावमुपेक्ष्य
तत्साम्यमविद्यावच्छिन्नस्य जीवत्वपक्षे दर्शितं इदानीमंतःकरणावच्छेदपक्षे कृतहानादिदोषाभावं समर्थयितुमविद्याप्रतिबिंबो जीव
इति पक्षेपि कृतहानादिदोषमाशंक्य परिहरति तत्रापीति अविद्याप्रतिबिंबो जीव इति पक्षेपीत्यर्थः क्वचित्प्रदेश इति ब्राह्मणादिशरी
रगतांतःकरणावच्छिन्नप्रदेश इत्यर्थः प्रदेशांतरेति देवादिशरीरगतांतःकरणावच्छिन्नप्रदेश इत्यर्थः वस्तुत इति प्रदेशाभेदस्यापि इ
हपरत्र चाविद्याप्रतिबिंबरूपजीवैक्यमात्रेण कृतहानादिदोषः परिहर्तव्यः प्रतिबिंबवादिना गत्यंतराभावादित्यर्थः सोयं परिहारश्चका

निवार्यः तथैवावच्छेदपक्षेप्यविद्यावच्छिन्नो जीव इत्यभ्युपगमसंभवात् तत्राप्येकस्य जीवस्य क्वचित्प्रदेशे कर्तृत्वं प्रदेशांतरे भोक्तृ
त्वमित्येव कृतहानाकृताभ्यागमदोषापत्तावपि एव स्तनो जीवैक्यस्य शरणीकरणीयत्वेन तत्साम्याद् अंतःकरणोपाधिपक्षे
पि वस्तुतस्त्वंतःकरणस्य तदवच्छेदकोपाध्येक्यस्य च तत्राभ्युपगमेन दोषनिराकरणासंभवाच्च न चावच्छेदपक्षे यथा ह्ययं ज्योति
रात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा अतएव चोपमा सूर्यका

दौ अंतःकरणावच्छेदपक्षेपि समानमित्याह तत्साम्यादिति वस्तुत इति इह परत्र चांतःकरणावच्छेद्यचैतन्यप्रदेशाभेदेपि चैतन्यस्य वस्तुत
एकत्वात् न कृतहानादिदोष इत्यर्थः ननु वास्तवचैतन्यैक्यमात्रस्य जीवांतरसाधारणत्वात् अन्यकृतकर्मणामन्यस्य भोगप्रसंग इत्यत आह
तदवच्छेदकेति तत्पदं चैतन्यपरं तथा चैकांतःकरणावच्छिन्नचैतन्यमेको जीवः अंतःकरणांतरावच्छिन्नचैतन्यमन्यो जीव इति स्वीका
रान्नोक्तातिप्रसंग इति भावः अस्मिन्नवच्छेदपक्षे मायाशक्तरीत्या वास्तवांतःकरणाभावावच्छिन्नचैतन्यमीश्वरः कारणोपाधिरीश्वर इति ५८
पक्षमनुसरेयेनाविद्यावच्छिन्नं चैतन्यं वा ईश्वर इति बोध्यं अस्य पक्षस्य श्रुतिस्मृतिभ्यां विरोधमाशंकते न चावच्छेदपक्ष इति यथा ह्ययं ज्योति
र्विवस्वानुपात्रभेदेन भिन्ना अप्सु गच्छन् बहुजलपात्रेषु प्रतिबिंबितः सन्निति यावत् बहुधा भेदरूपः क्रियते औपाधिकनानात्वप्रतिपत्त्य

ते एवं देवः स्वप्रकाशः आत्मा स्वतः एकः सन् देहाद्युपाधिषु प्रतिबिंबितत्वप्रयुक्तो भेदः एवमात्मनोपि देहेषु प्रतिबिंबितत्वप्रयुक्तमेव नानात्वमि
ह विवक्षितमिति वक्तव्यं अन्यथा दृष्टांतदार्ष्टांतिकयोरतुल्यत्वापत्त्या तयोरसामंजस्यप्रसंगात् तथा चावक्रेदपदं श्रुति विवक्षितोऽर्थः एवमेक
एव तु भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् रूपं रूपं प्रतिरूपो बभूव जीवेशावाभासेन करोतीत्यादिश्रुतयो
पि चैतन्यस्य प्रतिबिंबावगमकत्वेन द्रष्टव्याः भूतानां ब्रह्मादिस्तंबपर्यंतानां आत्मा स्वरूपभूतः परः भूते भूते इति वीप्सयापि सर्वप्रतिबिंबोपा
धयो गृह्यंते तेषु प्रतिबिंबितया व्यवस्थितः सन् बहुधा दृश्यते स्वतस्तु एक एवेत्याह एकधेति दृश्यते रूपशब्द उपाधिपरः अत्रापि वीप्सा सर्वोपाधिसंग्रहा
र्था प्रतिरूपः प्रतिबिंबः पुरुषप्रतिबिंबे पुरुषप्रतिरूप इति प्रयोगदर्शनात् तृतीयाध्यायगतसूत्रमवतारयति अत एवेति यतश्चिदात्मनः
स्वाभाविकमेकत्वं नानात्वं चौपाधिकं श्रुतिभिर्विवक्षितमत एव तस्योपाधिकृतनानात्वे जलादिप्रतिबिंबितसूर्यादिदृष्टांतत्वेन श्रुतिरूपा

दिवदिति श्रुतिसूत्राभ्यां विरोधः अंबुवदग्रहणात्तु न तथात्वमित्युदाहृतसूत्रानंतरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिंबोदय
योग्यं ततो विप्रकृष्टदेशं रूपवज्जलं गृह्यते नैवं सर्वगतस्यात्मनः प्रतिबिंबोदययोग्यं किंचिदस्ति ततो विप्रकृष्टमिति प्रतिबिंबा
संभवशंकां वृद्धिह्रासादिभाक्त्वमंतर्भावादुभयसामंजस्यादेवमिति तदनंतरसूत्रेण यथा जलप्रतिबिंबितः सूर्यो जलवृद्धौ वर्द्धते

हीयत इति सूत्रार्थः रूपं रूपमिति श्रुतौ प्रतिरूपशब्दो न प्रतिबिंबवाचकः वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूवेत्यादौ व्यभिचा
रादतः सूर्यादिप्रतिबिंबदृष्टांतस्वारस्यादेव चैतन्य[illegible]बिंबो वक्त[illegible]स्तु प्रतिबिंबत्वं स्वयमेव सूत्रकृदाक्षिपति अंबुवदिति [illegible]दृष्टांतभागस्या
र्थमाह यथेति प्रतिबिंबोदययोग्यत्वस्य कृत्स्नोपाध्य[illegible]स्य तत्र प्रतिबिंबस्याभावेनाग्रहणात् इति विवक्षितस्य [illegible]र्थः दार्ष्टांतिक
भागं व्याचष्टे नैवमिति तथा च चिदात्मनः प्रतिबिंबितत्वादिकं तु स्वतं नास्ति कुतः अग्रहणात् अंतःकरणादेरा[illegible]प्रतिबिंबोदययोग्य
त्वेनाग्रहणात् न ह्यंतःकरणमात्मापेक्षया विप्रकृष्टदेशं वस्तु सर्वगतत्वादात्मनः नापि तदुद्भूतरूपवदनंगीकारात् चिदात्मनोपि सूर्यादिव
द्विंबत्वयोग्यत्वेनाग्रहणाच्च तस्य नीरूपद्रव्यत्वात् तस्मात्प्रतिबिंबितसूर्यादिवदात्मनो दृष्टांतदार्ष्टांतिकभावानुपपत्तिरिति तत्रार्थः दृ
ष्टांतदार्ष्टांतिकयोः प्रतिबिंबितत्वांशेन साम्याभावेपि तदर्थाविरोधोस्तीति विवक्षितांशेन साम्यस्य तत्रापि संभवात् [illegible]हि तयोः सर्वसाम्य

क्तापि दृष्टिसंभवति तथा सति दृष्टांतदार्ष्टांतिकभावोच्छेदप्रसंगादित्यभिप्रेत्य विवक्षितां शास्त्रार्थं स्पष्टयति वृद्धिह्रासेति न दर्पणांतरेण
न तत्स्यादमनुवदितिसूत्रपरं सूत्रं चाचष्टे यथेति श्राग्यासिकामिति भावात्तिसिद्धमित्यर्थः तथेति चिदात्मनोवुध्यान्यवच्छिन्नतयावुध्याक
पाधावंतर्भावात् राजादिशरीरेंतःकरणवृत्तौचिदाभासावर्द्धत इव सूर्याकादिशरीरेंतःकरणह्रासेह्रसत इव तच्चलने चलत इव तद्भेदेभि
न्न इव च भाति तथा च श्रुतिः ध्यायतीव लेलायतीवेति बुद्धौ ध्यायंत्यामात्मा ध्यायतीव तस्यां चलंत्यामात्मा चलतीवेत्यर्थ इत्यर्थः ध्याय
ति चलतीवेत्यर्थः एवमध्यासतिद्धमंतःकरणेन्द्रियोपाधिवृद्ध्यादिमत्वमात्मनोत्रविवक्षितं सामान्यमित्यर्थः तयोरिति चैतस्य प्रतिबिंबित्वाव
गमकश्रुतितन्मूलकसूत्रयोः दर्पणदाष्टांतयोरित्यर्थः अवच्छेदपक्षेन केवलं श्रुतिसूत्रविरोधाभाव एव किंतु श्रुतिसूत्रानुग्रहोप्य
स्तीत्याह घटसंवृतमिति घटसंवृतं घटावच्छिन्नमाकाशं प्रसिद्धमस्ति तच्च घटे नीयमाने पि न नीयते यथा श्रयं दृष्टांतः तद्वज्जीवो नभोप

इव जलह्रासे ह्रसतीव जलचलने चलतीवेति तस्याध्यासिकं तदनुरोधिवृद्धिह्रासादिभाक्त्वं तथात्मनोंतःकरणादिनावच्छे
देनोपाध्यंतर्भावादाध्यासिकं तदनुरोधिवृद्धिह्रासादिभाक्त्वमित्येवं दृष्टांतदार्ष्टांतिकयोः सामंजस्यादविरोध इत्यर्थः सू
त्रकृतैवावच्छेदपक्षे तयोस्तात्पर्यकथनात् घटसंवृतमाकाशं नीयमाने यथा घटे घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः

मः नभसा तुल्यः एतदुक्तं भवति जीवस्य नभोपमत्वाभिधानेन घटसंवृताकाशतुल्यत्वमभिप्रेतमवच्छिन्नचैतन्यरूपत्वमुक्तमिति एवं प्रवेशश्रु
तिरपि चिदात्मनो बुध्याद्यवच्छेदकृतमेव दृष्टत्वादि धर्मलाभं दर्शयति न प्रतिबिंबभावकृतं तथा हि स एष इह प्रविष्ट आनखाग्रेभ्य इत्यु
पक्रम्य प्राणन्नेव प्राणो नाम भवति वदन्वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मन इति बृहदारण्यकब्राह्मणे श्रूयते अयमर्थः स सर्ववे
दांतेषु प्रसिद्धः एषः नामरूपव्याकर्तृत्वेन सन्निहितः इह कार्यकारणसंघातेन खाग्रमवधीकृत्य प्रविष्टः ननु यथा देवदत्तस्य गृहे सर्पस्य वा
बिले प्रवेशः प्रसिद्धः न तथात्मनः कल्पयितुं शक्यते तस्य सर्वगतत्वात् नापि जलपात्रेषु सूर्यादेरिव प्रतिबिंबभावलक्षणः प्रवेशः
संभवति तस्य नैतरीयका दौ प्रवेशवाक्यविचारावसरे भाष्यकारैरेव निरस्तत्वादतः कीदृशः प्रवेशः प्रविष्टपदेन विवक्षित इति जिज्ञासायामाय ५८
था जले प्रतिबिंबभावेन प्रविष्टस्य सूर्यादेस्तद्धर्मवत्तयोपलभ्यमानत्वमस्ति एवमात्मनः संघाते अपि स्थानतया प्राकृसिद्धस्यैव प्राणवृत्त्या

शियधर्मवत्तयाऽनुपलभ्यमानत्वमेव प्रकृते प्रविश्यपदेन विवक्षितं न तु स्वरूपप्रवेशः इति मत्वा नाऽऽह इति : स्वयमेव प्रविष्टपदं व्याचष्टे प्राणन्नेवे-
त्यादिना प्राणनं प्राणचेष्टां प्राणो नामाधिकारी कुर्वन् प्राणस्य प्राणमित्यादिश्रुतौ द्वितीयप्राणपदवाच्यो भवति रूपं पश्यन् रूपगोचरचा-
क्षुषवृत्तिं मनःकरणेनादात्म्यापन्नां कुर्वन् चक्षुषः चक्षुरित्यादिश्रुतौ द्वितीयचक्षुःशब्दवाच्यो भवति शृण्वन् शब्दगोचरां श्रोत्रक-
रणिकां वृत्तिं मनःकरणेनादात्म्यापन्नामेव कुर्वन् श्रोत्रस्य श्रोत्रमित्यादिश्रुतौ द्वितीयश्रोत्रशब्दवाच्यो भवति मन्वानो मननं रूपं चक्षु-
रादिनिरपेक्षां वृत्तिं कुर्वन् मनसो मन इत्यादिश्रुतौ द्वितीयमनःशब्दवाच्यो भवति चक्षुरादिव्यापारे ग्रहणं कार्यकारणसंघातव्यापारमा-
त्रस्योपलक्षणं संघातधर्माणां सर्वेषामात्मन्युपलभ्यमानत्वात् नन्वेवमप्यवच्छेदपक्षस्य द्वितीयाध्यायगतेन न आभास एव चेति सू-
त्रेणानन्यत्वेन चाविरोधो दुर्वारस्तयोर्मध्ये तत्प्रतिबिंबस्य सम्यक्त्वात् सूत्रार्थस्त्वाभास एव जीवः परमात्मनः प्रतिबिंब एव तिद्धपाधि-
कः परमात्मैव जीवः नापि स्वायमतद्व परमात्मनः सकाशादत्यन्तभिन्नः तत्तमस्याद्यभेदश्रुतिविरोधात् प्रतिबिंबस्य वस्तुतो बिंबा-

भेदेनानानाव्यपदेशादिति श्रुतिसूत्राभ्यामवच्छेदपक्षस्यैव परिग्रहाच्च ॥ भिन्नत्वेन आभासत्वपक्षोऽप्युक्तश्रुत्यविरोधादिति चशब्दार्थः
तिनोदाहृतसूत्रगतश्रुत्योः प्रतिबिंबपक्षस्य भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदिति सूत्रोक्तसिद्धान्तवन्मतान्तरत्वोपपत्तेः न चैतथा
कल्पने किं विनिगमकमिति वाच्यं तृतीयाध्याये स्वयं सूत्रकृता तन्न्यायपूर्वकत्वमस्य चेतनप्रतिबिंबनिरासस्य नियामकत्वादाभास एवे-
ति जीवस्य प्रतिबिंबत्वे उपपन्ना देहस्यपन्नासाच्च भोक्त्रापत्तिसूत्रस्यायमर्थः सर्वं खल्विदं ब्रह्मेति श्रुत्या प्रपंचस्य ब्रह्माभेदः प्रतिपाद्यते ब्र-
ह्मब्रह्मास्मीति श्रुत्या ब्रह्मशब्दार्थभूतभोक्तृवर्गस्य च ब्रह्माभेदः प्रतिपाद्यते तथा च श्रुतिद्वयानुसारेण भोक्तृभोग्यप्रपंचयोरेकब्रह्माभे-
दस्वीकारे भोग्यप्रपंचस्य भोक्त्रापत्ते भोक्तृभेदापत्तेः एवं भोक्तुरपि भोग्याभेदापत्ते रेकब्रह्माभिन्नयोस्तयोः परस्परमभेदावश्यंभावात्
न चेष्टापत्तिः तथा सति विभागः प्रसज्येत भोक्तृभोग्ययोर्विभागबोधकप्रत्यक्षादिविरोधः प्रसज्येतेति चेदुच्यते श्रुतिसिद्धभोक्तृभोग्ययो-
रेकब्रह्माभिन्नत्वेन तयोः प्रत्यक्षादिसिद्धपरस्परविभक्तत्वे चेत्युभयं लोकवत्स्यादुपपद्यते यथा लोके एकसमुद्रविकाराणां फेनबुद्बुदतर-
ङ्गाणामेकसमुद्राभिन्नत्वं परिणामाणां परिणामिन्यभेदस्यानुभवसिद्धत्वात् तेषामेव फेनादीनां परस्परं भिन्नत्वं चास्ति भेदस्यानुभवसिद्धत्वा-

सि॰ ले॰
प्र॰ टी॰
५९

त् एतस्मैकब्रह्मपरिणाममयो भोग्यभोग्यपयोरेकब्रह्माभिन्नत्वं चोपपद्यत इति नोक्तेन श्रुतीनां परस्परविरोधप्रसक्तिरित्ययं च विरोधपरिहारेण
सिद्धान्तसम्मतः कूटस्थनित्यस्य ब्रह्मणः परिणामित्वानुपपत्तेः किं तु मतान्तराभिप्रायेणेति भाष्यादिग्रन्थे दोषः तथा च प्रकृतेऽपीति सं
क्षेपः अथ प्रकृति जीवईश्वरस्योपाधिः उक्तः नानाव्यपदेशात् य आत्मानमन्तरो यमयतीत्यादिश्रुतिषु नियम्यनियामकभावादीनां जीवेश्व
रयोर्नानात्वभेदव्यपदेशादिति सूत्रभागस्यान्तरार्थः अत्रांशत्वं जीवचैतन्यस्य घटाकाशवदन्तःकरणावच्छिन्नत्वरूपं विवक्षितं न तु मुख्य
मंशत्वं निरवयवस्य ब्रह्मणो मुख्यांशासंभवादिति तदधिकरणभाष्ये स्फुटमिति भावः अवच्छेदपक्षसमर्थनमुपसंहरति तस्मादिति प्रति
बिम्बासंभवात् अवच्छेदपक्षे विरोधाभावात् साधकसत्त्वाच्चेत्यर्थः अवच्छेदो चैतन्यस्य प्रतिबिम्बपक्षेऽपि सम्मत इत्युभयसम्प्रतिपन्नत्वात्तस्यैव जी
वत्वादिकल्पनं युक्तं लाघवादित्याशयेनाह अवच्छेदो वश्यंभावीति अवच्छेद इति अन्तःकरणावच्छिन्नो जीवः जीवशब्देनोपलक्षणं अवि

तस्मात्सर्वगतस्य चैतन्यस्यान्तःकरणादिनावच्छेदो वश्यंभावीत्यावश्यकत्वादवच्छेदो जीव इति पक्षो रोचयन्ते अपरे तु न प्रतिबिम्बो नाप्य
वच्छेदो जीवः किंतु कौन्तेयस्यैव राधेयत्ववदविकृतस्य ब्रह्मण एवाविद्यया जीवभावः व्याधकुलसंवर्धितराजकुमारदृष्टान्तेनास्ये

द्यावच्छिन्न ईश्वरः कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति श्रुतेः जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतौ चाभा
सपदमवच्छिन्नपरं प्रतिबिम्बासंभवस्योक्तत्वात् मायापदं च प्रथमोपात्तजीवोपाधिस्तत्ततः कारणपरं कार्योपाधिरयं जीव इति श्रुतेः एवं मा
यापदोपात्तान्तःकरणस्य मूलप्रकृत्यात्मकत्वप्रकृतिविकारभावप्रयुक्तं सर्वमनवच्छिन्नेश्वरत्वोक्तिः सिद्धोपवचनानुसारेणाभावादवच्छि
न्नस्येश्वरत्वोक्तिः स्वसंभवमात्रेण न तु तात्पर्यतः कारणोपाधिरीश्वर इति श्रुतिविरोधात् अनवच्छिन्नस्येश्वरत्वपक्षे तस्योपाध्यभावेन सर्वज्ञान
कर्तृत्वादेरसंभवाच्च अभावस्येश्वरोपाधित्वपक्षेऽपि समानोऽयं दोषः मायाविद्ययोर्व्याकृतशक्त्यन्तराकाशादिशब्दितभावस्योपाधेरेव तस्य सर्व ५९
ज्ञत्वादिप्रयोजकत्वायोगात् अनपवादवाक्ये तु भगवत्पादैः सर्वज्ञत्वादिप्रयोजकोपाधित्वमविद्याया दर्शितं मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिल

ब्रह्मणश्चिद्भावः अथ कईश्वरः कश्च जीव इति प्रश्ने प्रतिवचनं तेनेममतं तत्तरमुत्थापयति अपरेत्विति कस्तर्हि जीव इति पृच्छति किं त्विति द
ष्टान्तपूर्वकं च ब्रह्मैवेत्युत्तरमाह कौन्तेयस्येवेति कुन्तीकुमारस्येव तत्त्वतः प्रतिबिम्बादेरित्येवकारार्थः तथा पायप्रत्तं राधेय स्तस्य भावस्त
त्वेन त्वादित्यर्थः किं त्वविकृतस्येवेति संबंधः अवच्छेदप्रतिबिम्बभावरहितस्येवेत्यर्थः तत्र भाष्यवार्त्तिकसंमतिं हेतुत्वेन दर्शयति व्याधे
त्यादिना यथा राजकुले जातः कर्णो जन्मभ्रष्ट इति व्याधकुल एव संवर्द्धितस्तज्जातीये सहवासादिजनितभ्रान्तिलक्षणाविद्यया
स्वात्मानं राधेयं मन्यते न तु स्वतःसिद्धं कौन्तेयत्वमप्रयुक्तः श्रेयसः सकाशात्प्रच्युतः सर्वत्र नानाविधशा
पादमानादिलक्षणं व कुविधदुःखम् आप्तवान् स च कदाचिन्नाव नाविवक्षता करणः कौन्तेयोसि न राधेय इत्युपदेशं कुर्वता स्मारित

वस्त्वाविद्यया संसरति स्वविद्यया विमुच्यत इति बृहदारण्यकभाष्ये प्रतिपादनात् राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्त
ते यथैवमात्मनो ब्रह्मस्तत्त्वमस्यादिवाक्यतः इति वार्तिकोक्तेश्च एवं स्वाविद्यया जीवभावमापन्नस्यैव ब्रह्मणः सर्वप्रपञ्च
कल्पकत्वादीश्वरोपि सह सर्वज्ञत्वसर्वकारणत्वादिधर्मैः स्वप्नोपलब्धदेवतावज्जीवकल्पित इत्याचष्टे ॥

निजरूपः सन् तथा स्वरूपान्याथात्म्यराधेयत्वादेरविद्याकृतस्य निवृत्तौ सत्यां व्याधेयत्वराधेयत्वकृतं नानाविधदुःखं समक्कौन्तेयत्वस्य इति
प्रयुक्तं श्रेयः प्राप्तवान् तथा ब्रह्मापि अनादिसिद्धया स्वाविद्यया आवृतनिजरूपः सज्जीवभावं प्राप्य स्वतः सिद्धां निरतिशयानंदस्वरू
पानुभवात् प्रच्युतं भवति तत्र संसरति एवं संसरद्ब्रह्म कदाचित् स्वप्नदशायामिव स्वाविद्याकल्पितेन गुरुरूपेण शास्त्रेण चोत्यादि
तया स्वगोचरविद्यया जीवभावादिप्रयोजकाविद्यानिवृत्तौ कृच्यते निसर्गसिद्धनिरतिशयानंदमनुभवति स्वरूपेणैवेत्यनेनैवेति भा
ष्यार्थः अज्ञस्येति अज्ञानावृतनिजरूपस्येत्यर्थः तत्त्वमस्यादीति गुरूपदिष्टतत्त्वमस्यादिवाक्यजन्यज्ञानेनाज्ञाननिवृत्तौ जीवभा
व आत्मनो निवर्तत इत्यर्थः एवं जीवं निरूप्य ईश्वरं निरूपयति एवं चेति भाष्यवार्त्तिकपर्यालोचनया प्रतिबिंबभावादिरहितस्य
पूर्णब्रह्मण एव जीवत्वे सिद्धे सतीत्यर्थः ईश्वरोपि सर्वज्ञत्वादिधर्मैः सह जीवकल्पित इति संबंधः यथोक्तजीवस्यैवेश्वरकल्पकत्वे

सि॰ ले॰
प्र॰ टी॰
६०

हेतुमाह स्वाविद्ययेत्यादिना अन्यस्य कल्पकस्याभावादिति तात्पर्यकमवधारणं जीवस्येश्वरकल्पकत्वे दृष्टान्तमाह स्वप्नेति यथा स्व
प्ने स्वप्नद्रष्टा जीव एव परां देवतां सर्वज्ञत्वादिधर्मैः सहितां कल्पयति कल्पयित्वा च तामहर्निशमुपास्ते तदुपासनया चाभ्युदयनिःश्रे
यसलक्षणं फलं लभते एवं जागरणेपीति दृष्टान्तादेरभिप्रायः जीवेश्वरनिरूपणप्रसंगेन विचारान्तरमारभते अथेति अत्रपक्षो
क्तेति ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया विमुच्यते इत्यादिग्रन्थोक्तेत्यर्थः एक इति ब्रह्मण एकत्वात् तच्चावच्छेदप्रतिबिंबभावयोर
नंगीकाराच्चेत्यर्थः ननु जीवैक्ये तेनैकमेव शरीरं सजीवं स्यान्न सर्वशरीराणीत्याशंकामिष्टापत्त्या परिहरति तेन चेति ननु यथा
एकशरीरे हिताहितप्राप्तिपरिहारार्थं स्पंदनरूपा चेष्टा दृश्यते तथा सर्वशरीरे दृश्यते तथा च कथमेकमेव शरीरं सजीवं तत्रा
ह स्वप्नानीति यथा स्वप्नद्रष्टा यां स्वप्नद्रष्टुः शरीरमेकमेव सजीवं स्वप्नदृष्टान्यानि शरीराणि तु चेष्टादिविशेषवत्तया दृश्यमानान्यपि

अथायं जीव एक उतानेकः अत्र पक्षोक्तप्रत्यवलंबिनः केचिदाहुः एको जीवस्तेन चैकमेव शरीरं सजीवमन्यानि स्वप्नदृ
ष्टशरीराणीव निर्जीवानि तदज्ञानकल्पितं सर्वं जगत् तत्स्वप्नदर्शनवद्यावदविद्यं सर्वो व्यवहारः बद्धमुक्तव्यवस्थापि
नास्ति जीवस्यैकत्वात् शुकमुक्त्यादिकमपि स्वाप्नपुरुषान्तरमुक्त्यादिकमिव कल्पितं अत्र च संभावितसकलशंकापंक

सजीवानि न भवंति तथा जागरणेपीति द्रष्टव्यं ननु स्वाप्नस्य जगतः कल्पिका तावन्निद्रा अन्वयव्यतिरेकेण सिद्धा यथा वर्तते न तथा जा
ग्रत्प्रपंचस्य कल्पकमन्वयव्यतिरेकसिद्धं किंचिदस्तीति जगत्सत्यमेव स्यादित्यत आह तदज्ञानेति जीवाज्ञानेत्यर्थः अज्ञानस्य जगत्कल्प
कत्वे शास्त्रसिद्धमिति भावः ननु सर्वव्यवहारस्य स्वप्नव्यवहारवत्कल्पितत्वेन तद्वदेव सहसा व्यवहारलोपः प्रसज्येत तथा च विद्यानर्थका
मितिनेत्याह तत्स्वप्नेति जीवस्येत्यर्थः यावन्निद्रा तावत्स्वप्नव्यवहारानुवृत्तिवत् विद्यया यावदविद्यानिवृत्ति सर्वव्यवहारानुवृत्तिर्युज्यत इ
ति न विद्यावैफल्यमविद्यानिवृत्त्यर्थमपेक्षितत्वादिति भावः ननु जीवैकत्वमते एको जीवो बद्धः अन्यो जीवो मुक्त इति व्यवस्था शुका
दिमुक्तिप्रतिपादकशास्त्रविरोधः स्यादित्याशंकायामिष्टापत्तिमाह बद्धेति शुकेति यथा स्वप्नादुत्थितः स्वप्नभ्रान्तिसिद्धपुरुषान्तरमु ६०

किं परं प्रतिबोधयति तथा जीवभ्रान्तिशुक्त्यादिभ्रान्तिं तं प्रत्येव बोधयति स्ववर्णादिप्रदर्शनप्रयोगितयेति भावः नन्वजीवैकात्म्यमते विद्योप
देष्टुरप्यसत्त्वाभावाद्विद्योदयो न स्यात् जीवेश्वरविभागाभावेन जीवस्येश्वरोपासनादिव्यवहारश्च न स्यादित्याशंक्याह अत्र चेति यथा स्व
प्रदशायां स्वप्नदृष्टं कंचिद्गुरुमीश्वरं च कल्पयित्वा तावुपास्ते ताभ्यां च विद्यादिकं लभते तद्वदिति भावः एकजीववाद एव मतान्तरमा
ह अन्ये त्विति एकशरीरेति एकमेव शरीरं सजीवं यस्मिन्नेकजीववादे स तथोक्तः मनः प्रत्ययं मनसो विश्वासं प्रामाण्यं कृत्वा निश्चय
मित्यर्थः एकशरीरं सजीवं शरीरान्तराणि निर्जीवानि तत्र विनिगमकाभावात् न च जीवैक्ये विनिगमकमिति वाच्यं एकोपि जीवः ए
कस्मिन्शरीरे वर्तत इत्यत्र विनिगमकमकस्य वक्तुमशक्यत्वादिति भावः अधिकं त्विति जीवाभिन्नईश्वरे वेदान्तानां प्रथमाध्याये ति

द्वालंनस्य महर्षं तत्सलिलधारयैव कर्तव्यमिति अन्ये त्वस्मिन्नेकशरीरैकजीववादे मनः प्रत्ययमलभमाना अधिकं त्वभेदनिर्दे
शात् लोकवत्तु लीलाकैवल्यमित्यादिसूत्रैर्जीवाधिकईश्वर एव जगतः स्रष्टा न जीवस्तस्याप्तकामत्वेन प्रयोजनाभावेपि के
वलं लीलयैव जगतः सृष्टिरित्यादि प्रतिपादयद्भिर्विरोधं च मन्यमाना हिरण्यगर्भ एको ब्रह्मप्रतिबिंबो मुख्यो जीवः अन्ये तत्प्र
तिबिंबभूताश्चित्रलिखितमनुष्यदेहार्पितपटाभासकल्पा जीवाभासाः संसारादिभाज इति सविशेषानेकशरीरैकजीववाद

त्यपिताः समन्वयो न चरते तथा सतीश्वरगतजगत्स्रष्टृत्वादेर्जीवधर्मत्वप्रसंगात् तथा चानुभवविरोध इति सर्वपक्षनिरासार्थं सूत्रमाह
अधिकं जीवादुपाधितोभिन्नं ब्रह्म जगत्स्रष्टृत्वसर्वज्ञत्वादिगुणकमभ्युपगम्यते अतो न ब्रह्मधर्माणां जीवे प्रसक्तिरौपाधिकभेद
स्यापि धर्मव्यवस्थापकतया लोकसिद्धत्वात् कल्पितभेदांगीकारेणैवमाह भेदनिर्देशादिति य आत्मनीति य आत्मानमन्तरो यमय
तीत्यादौ नियम्यनियामकभावादिना भेदनिर्देशादिति सूत्रार्थः लोकवदिति सूत्रं सर्वमेव व्याख्यातं अत्रादिपदेन अनुपपत्तेस्तु न शा
रीर इत्यादिसूत्रं गृह्यते मनोमयत्वादिगुणको न शारीरः तस्मिन्सर्वकर्मत्वादीनामनुपपत्तेरेवेति सूत्रार्थः विरोधं चेति मनः प्रत्ययम
लभमानाः विरोधं च मन्यमाना इति चकारार्थः जीवातिरिक्तेश्वराभाववादेस्मिन् जगत्स्रष्टृत्वादि सर्वस्य व्यावहारिकभेदवतईश्वरस्य

स्तित्वजगत्स्रष्टृत्वसर्वात्मकत्वादिगुणप्रतिपादकैः सूत्रैर्विरोधमित्यर्थः ब्रह्मप्रतिबिंब इति अनेन बिंबभूतं ब्रह्म जीवादधिकमीश्वरू
पमस्मिन्मते नास्ति अतो नोदाहृतं सूत्रविरोध इति संचिंतं तद्विति ब्रह्मप्रतिबिम्बभूते हिरण्यगर्भस्य भौतिकजगत्स्रष्टृत्वं तथा कारणोपा
धिकं तथा च मुख्यजीवस्य प्रतिबिंबभूतता अन्ये जीवाभासाः न च तस्य सादिसामग्र्यभावादित्यर्थः कल्पाद्य इति कल्पाद्यसृष्टौ संसाराद्विभा
ज इति अनेन यथा हिरण्यगर्भशरीरं मुख्यजीवेन सजीवं तथा इतराण्यपि शरीराणि जीवाभासैः सजीवानीति पूर्वतो विशेषः स इति
नः अत्रादिपदग्राह्यं किं संग्रहार्थं जीवाभासानां मुक्तिस्तु स्वबिंबभूतहिरण्यगर्भप्राप्तिः क्रमेण च मुख्यब्रह्मप्राप्तिरिति मंतव्यं सविशेषा
णि सजीवान्यनेकशरीराणि यस्मिन्नेकजीववादे स तथा प्रातिस्विकं गीकुर्वतीत्यर्थः अत्रापरत्र संवदन्नेकजीववादमेवाह अपरे त्वि

मातिपंक्ते अपरे तु हिरण्यगर्भस्य प्रतिकल्पं भेदेन कस्य हिरण्यगर्भस्य मुख्यजीवत्वमित्यत्र नियामकं नास्तीति मन्यमाना एक
एव जीवो विशेषेण सर्वशरीरमधितिष्ठति न चैवं शरीरावयवभेद इव शरीरभेदेपि परस्परसुखाद्यनुसंधानप्रसंगः जन्मांत
रीयसुखाद्यनुसंधानादर्शनेन शरीरभेदस्य तदननुसंधानप्रयोजकत्वक्लृप्तेः योगिनस्तु कायव्यूहसुखाद्यनुसंधानेप्यव
हितार्थग्रहणवद्योगप्रभावनिबंधनमिति न तदुदाहरणमित्यविशेषानेकशरीरैकजीववादं रोचयन्ते इतरे त्वत्रापि बद्ध

ति एकरूप एवेति अविद्यायां ब्रह्मप्रतिबिंबरूपो जीवस्तावदेकः अविद्याया एकत्वात् स एव च सर्वशरीरं स्वभोगाद्यर्थमधितिष्ठति न त्ववि
द्यायां ब्रह्मप्रतिबिंबो हिरण्यगर्भशरीरमधितिष्ठति अन्यानि तु शरीराणि तत्प्रतिबिंबा जीवाभासा अधितिष्ठंति कुतः इतरजीवानां तत्प्र
तिबिंबत्वे मानाभावादिति एवकारार्थः अविशेषेणेति मुख्यामुख्यविभागं विनेत्यर्थः जीवभेदे हि सति कश्चिन्मुख्यो जीवः कश्चिदमु
ख्यो जीवाभास इति विभागः संभवेत् न त्वेतदस्ति तस्यैकत्वात् स्वपरमादिति भावः ननु देवदत्तस्य शिरःपाणिपादानधितिष्ठत एक
स्य यथा शिरसि मे वेदना पादे मे सुखमित्याद्यनुसंधानं दृश्यते एवमेकस्यैव जीवस्य सर्वशरीराधिष्ठातृत्वे मम देवदत्तशरीरे सुखं यज्ञ ८१
दत्तनामकशरीरे दुःखमित्यादिरूपेण सर्वस्य सर्वत्रानुसंधानप्रसंगः इति शंकते न चैवमिति शरीरभेदस्याननुसंधानप्रयोजकत्वा

भूयमात्रोत्क्रान्तिप्रसंगः न च तत्र मानाभावः शंकनीयः जीवस्यातीतशरीरेषु वर्त्तमानशरीरे चैकत्वेपि जन्मान्तरीयस्य त्वाद्यनुसंधाना
दर्शनेन तद्भेदस्य प्रयोजकतायाः संभवति पन्नत्वादिति परिहरति जन्मान्तरीयेति ननु योगिनो देहभेदे सत्यप्यनुसंधानदर्शनात् व्यभिचार
इत्यत आह योगिनस्त्विति अस्मदादिवैलक्षण्यपार्थस्तत्पदं नह्येषोयमिति कायेति न त्वस्मदादीनामिव वहिंतार्थसाक्षात्कारोस्तीति न तत्प्रयोजकार
ष्टविशेषाभावात् तथा च शरीरभेदमात्रं न तत्प्रयोजकं किंत्वदृष्टविशेषासहकृतशरीरभेदेन त्वनुसंधानप्रयोजक इति न योगिष्वनुसंधान
स्थले व्यभिचार इति भावः योगापदं योगजादृष्टपरं अविशेषेति अविशेषेणाधिष्ठितानेकशरीराणि यस्मिन्नेकजीववादे सततथासर्थः
अनेकजीववादमुत्थापयति इतरेत्विति अन्नापीति अव्यवहितमेतत्पीत्यर्थः यद्येकजीववादेस्य व्यवस्था न सिध्यति ततः कोदोषस्तत्राशंका
मुक्तिसत्वभाषाणां मतानां संदोषइत्याह तद्योयइति देवानां मध्ये यो यो देवस्तद्ब्रह्म प्रत्यबुध्यत साक्षात्कृतवान् स एव तद्ब्रह्माभवत्
नान्यो ब्रह्मबोधरहित इति विदुषो मुक्तत्वमविदुषो बद्धत्वं प्रतिपादयता मुक्तावबद्धमुक्तव्यवस्था दर्शिता आदिपदेन अकामेकामि

कामत्वस्याभाववत्त्वेनापि यो यो देवानां प्रत्यबुध्यत स एव तदभवदित्यादिश्रुतेः प्रतिषेधादिति चेन्न शारीरादित्यधिकर
णे वृहदारण्यकभाष्यसत्ववनांजसमित्यपरितुष्यन्तोतः करणादीनां जीवोपाधितामुपगम्यानेकजीववादमा

तिष्ठन्ति वेयमुक्तिव्यवस्थाप्रतिपादकत्वेन भाष्यकारादिभिरंगीकृतास्तस्माते ह्यति ग्रहणेषु कृत्वानन्निवर्त्तनेनकामपरमंभमेत्यादिस्त्री
नामुपलक्षणं प्रतिषेधादिति इदं सूर्वपदस्त्रचं वृहदारण्यके काण्वशाखायां न तस्य प्राणा उत्क्रामन्तीति वाक्येन परब्रह्मतत्त्वविदः प्रा
णोत्क्रान्तिप्रतिषेधान्न स्वर्गगत्युत्क्रान्ती नस्तः उत्क्रान्तिश्रवे कल्पनात् गतेरिति चेदित्युत्क्रान्तिशंकाभागार्थः पूर्वपदीनां दूषयति न शा
रीरादिति वृहदारण्यक एव माध्यन्दिनशाखायां समानप्रकरणे ब्रह्मविदं शारीरं प्रकृत्य न तस्मात्प्राणा उत्क्रामन्तीति वाक्ये पञ्चमी ते श्रु
त्वत्त्वहीनप्रकृतः शारीरो गृह्यते न शरीरं तस्य शारीरापेक्षया प्रधानत्वात् तथा च न तस्मादिति वाक्येन शारीराज्जीवात्प्राणानामुत्क्राम
णं निषिध्यते न शरीरादतः शारीरादुत्क्रमणं विदुषोप्यस्तीति तस्यापि गत्युत्क्रान्ती स्त एवान्न तस्य प्राणा इति काण्ववाक्यस्यापितस्य

विदुषः प्राणाः शारीरान्नोत्क्रामंति किं तु तेन सहैव ब्रह्मलोकं गच्छंतीत्यर्थो वोध्यः नांजस्यमिति आंजस्याभावः उपपन्नत्वाभाव इत्यर्थः अं
तःकरणादीनामिति न च नानाजीववादेपि ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यते इत्यर्थेन बृहदारण्यकभाष्ये प्रतिपादिते न विरो
धस्तुल्य इति वाच्यं तद्भाष्यप्रतिपादनस्य ब्रह्मैव स्वाविद्यया नानांतःकरणरूपेणावच्छिन्नतया नानाजीवभावं प्राप्य संसरति स्वविद्यया
क्रमेण मुच्यत इत्यभिप्रायकत्वोपपत्तेः अनिरस्तपोवलितशुकादिमुक्तिप्रतिपादकभाष्यस्य ब्रह्मैव स्वाविद्यया संसरतीति भाष्य
मात्रस्वारस्यमनुसृत्य नयानयनायोगात् न चोदाहृतश्रुतिस्मृतिभाष्याणां ब्रह्मात्मैकत्वपरत्वेन नानाजीववादे तात्पर्याभावात् ते
भ्यो जीवनानात्वं न सिध्यतीति वाच्यं एकजीववादेपि तात्पर्याभावस्य तुल्यत्वात् न च जीवत्वोपाधिभेदाभावात् अविद्याया एकत्वाज्जीवैक्य
सिद्धिरिति वाच्यं उदाहृतश्रुतिस्मृतिभाष्यानुरोधेनाविद्यानानात्वाभ्युपगमसंभवात् तदेकत्वश्रुत्यादीनां जात्यभिप्रायकत्वोपप

श्चिष्यवद्बद्धमुक्तव्यवस्थां प्रतिपद्यंते तेषु केचिदेवमाहुः यद्यपि शुद्धब्रह्माश्रयविषयमेकमेवाज्ञानं तन्नाश एव च मोक्षस्तथापि जी
वन्मुक्तावज्ञानलेशानुवृत्त्यभ्युपगमेनाज्ञानस्य सांशत्वात्तद्देवदत्तविदुषोऽज्ञानभागोऽस्य तत्वावेशेन निवर्त्तनेऽप्यपरेषु यथा

ते: अविद्याया एकत्वेपि कार्योपाधि[illegible] श्रुत्यनुसारेणांतःकरणानामेव जीवत्वोपाधित्वोपगमसंभवाद्वेति भावः नानाजीववादे
मतभेदेन बंधमुक्तिव्यवस्थामुपपादयितुमाह मते तेष्विति नानाजीववादिषु मध्य इत्यर्थः केचिदिति ननु नानाजीववादेपि जीवस्यांतः
करणोपाधिकत्वपक्षे मुक्तानामंतःकरण[illegible]शुकादितत्त्वज्ञानेनैव तस्य निवृत्तत्वादिदानीं संसारानुपलब्धिप्रसंग इत्याशयेनाशंकते यद्यपी
ति शुद्धब्रह्माश्रयेति जीवेश्वरयो[illegible]कल्पितयोरज्ञानाश्रयत्वं न संभवति तयोः कल्पितत्वात् तथा च शुद्धस्यैवावृतत्वरूपविषयत्वेन
तीश्वरस्यापि तस्य जीवान्तरवदौपाधिकभेदादेवानुपलब्धेरिति सोजीवास्वतीश्वरस्याज्ञानावृतत्वरूपविषयकल्पनमसमर्थत्वादिति भावः
एकमेवेति अजामेकां मायां तु प्रकृतिं विद्यात् विभेदजनकेऽज्ञाने इति श्रुतिस्मृतिष्वेकवचनश्रवणेन लाघवेन च तस्यैकत्वावगमादि
ति भावः तन्नाश एव चेति भूयश्चांते विश्वमायानिवृत्तिः आज्ञानेनावाप्स्यतीति कं गत इत्यादिश्रुतिस्मृतिभ्यः सर्वानर्थमूलाज्ञाननिवृत्तेर्मोक्षत्व ६२

त्वावगमादितिभावः एकस्यतत्त्वज्ञानेनकृत्स्नाज्ञाननाशोनांगीक्रियतेयेनव्यवस्थानस्यात्किंतुतस्यतत्त्वज्ञानेनतदंतःकरणोप
हिताभिमान्यज्ञानांशस्यैवनाशउपेयते नचतस्यसांशत्वेमानाभावइतिवाच्यं जीवन्मुक्तावावरणशक्तिमदज्ञानांशस्यनाशेऽपिवि
क्षेपशक्तिमदज्ञानांशस्यज्ञानादनिवृत्तस्ययावद्विदेहकैवल्यमनुवृत्त्युपगमेनतस्यसांशत्वावगमात् तथाचाज्ञानस्यानिर्वचनीयस्यानि
र्वचनीयानामेवभागानांरूपांशानामनंतानांसंभवात् ज्ञानादायबंधमुक्तिव्यवस्थासूपपादेतिपरिहरंति तथापीत्यादिना अज्ञानस्यनबंध
स्वज्ञानाशोमोक्षइतिमतमुक्तं इदानींचैतन्यस्याज्ञानसंबंधोबंधस्तदसंबंधोमोक्षः नतुतन्निवृत्तिः असंबंधमात्रेणैवबंधनिवृत्तिसिद्धेः ज्ञा
नादज्ञाननिवृत्तिप्रतिपादिकशास्त्रस्यापितदसंबंधएवतात्पर्योपपत्तेः अन्यथामूलाज्ञानस्यविरोधिज्ञानोदयेसतितूलपिंडस्यविरोध्य
ग्निसंसर्गइवविशेषासंभवेनबंधमुक्तिव्यवस्थायास्त्वसज्जीवन्मुक्तिप्रयासस्तुसचनिरालंबनत्वप्रसंगादितिमतमनानांमतमाह अन्ये

सर्वमंशांतवैरुद्ध्ववर्तनइति अन्येतुयथान्यायैकदेशिमतेभूतलेघटात्यंताभावस्यवृत्तौघटसंयोगाभावोनियामकइत्यनेकेषुप्रदे
शेषुतदनुसंसृज्यवर्तमानोघटात्यंताभावः क्वचित्प्रदेशेघटसंयोगोत्पत्तौतदभावनिवृत्तौनसंसृज्यते एवमज्ञानस्यचैतन्येवृ
त्तौमनोनियामकमिति तदुपाधिनाचैतन्यप्रदेशेषुसंसृज्यवर्तमानमज्ञानंक्वचिद्ब्रह्मदर्शनोत्पत्त्याभिघातेहृदयग्रंथिरितिक्का
त्वकरीत्यामनसोनिवृत्तौनसंसृज्यते अनयायथाएवमवतिष्ठते ज्ञानसंसर्गासंसर्गावेवचबंधमोक्षावित्याहुः। त्वितिप्रथमंप्रकृ

तोपयोगिदृष्टांतमाह यथेति भूतलेघटोनेत्यनुभवसिद्धोघटाभावस्त्रैकालिकत्वाभ्युपगमात् घटानयनानंतरंतदधिकरणेऽपिभूतले
वर्ततएव तथाचघटवत्यपिभूतलेघटोनास्तीतिप्रतीतिः प्रमास्यादितिदोषप्रसक्तौतत्परिहारायनैयायिकाः कल्पयंतिघटाधिक
रणेतदत्यंताभावस्यसंबंधाभावेनतत्रतत्प्रतीतेर्भ्रांतित्वोपपत्तिः नचघटसंयोगोत्पत्तेः पूर्वंभूतलेसंबंधएवनतस्यघटसंयोगकालेकथं
वृत्तिरूपसंबंधाभावइतिवाच्यं प्रतीत्यनुसारेणभूतलादौघटात्यंताभाववृत्तौघटसंयोगस्यप्रागभावध्वंसाभावयोरन्यतराभावोनिया
मकइतिकल्पनेनघटसंयोगाधिकरणभूतलेघटाभावस्यासंबंधोपपत्तेरितितदेतन्मतंदृष्टांतीकरोति न्यायैकदेशिमतइति तत्रहिनास्ति
ति घटसंयोगाभाववत्त्वमित्यर्थः तदुपाधिनेति मनएवोपाधिस्तेनेत्यर्थः क्वचिदिति चैतन्यप्रदेशेष्वित्यर्थः ब्रह्मदर्शनोत्पत्त्यामनसोनि

सि॰ले॰ कृ॰टी॰ ६२

वृत्त्याविति संबंधः ब्रह्मदर्शनं मनसो निवर्तकमित्युक्तमानमाह भिद्यते हृदयग्रंथिरित्यत्र हृदयमित्यंतःकरणपरं तच्चांतःकरणं चिदात्मनस्तथ त्वतया तत्तादात्म्यापन्नं सत् ग्रंथिः स च ब्रह्मदर्शने जाते ब्रह्मण्येव विलीयत इति फलितार्थः अन्यच्चेति चैतन्यप्रदेशांतरेष्वित्यर्थः नाज्ञानमिति शुद्धचैतन्यस्य वेदांततात्पर्यप्रतिपाद्यस्य नाज्ञानाश्रयत्वं तस्य वेदांतवेद्यं वस्तु न जानामीत्यज्ञानविषयत्वेनानुभवादिति भावः जीवाश्रय मिति न जानामीत्यज्ञानाश्रयत्वेन जीवस्यैवानुभवात् न चाज्ञानस्य सकार्यांतःकरणविशिष्टचैतन्यरूपजीवाश्रितत्वमनुपपन्नमिति वाच्यं अंतःकरणे यत्प्रतिबिंबभूतचैतन्यं तस्यैव जीवत्वाभ्युपगमेन विशिष्टस्य जीवत्वानुपगमात् न चांतःकरणस्य सादितया तत्प्रतिबिंबस्या पि सादित्वात् कथं तस्यानाद्यज्ञानाश्रयत्वमिति वाच्यं अंतःकरणस्य स्वापादौ लयदर्शनेन जाग्रदादौ जन्मश्रवणेन च सादित्वावगमेपि त स्य स्थूलस्य सूक्ष्मरूपेणानादित्वात् यथा पुंस्त्वादिवत्तस्य सतोपि अभिव्यक्तियोगादिति सूक्ष्मावस्थापितत्वाद्यथा पुंस्त्वस्त्रीत्वादेः शुक्रशोणित त्वनादिरूपस्य बाल्यादावनभिव्यक्तस्य यौवने प्रादुर्भावः तथा अस्यांतःकरणस्य स्वापादावनभिव्यक्तस्य तया सत एव स्थूलावस्थाभिव्

अपरे तु नाज्ञानं शुद्धचैतन्याश्रयं किंतु जीवाश्रयं ब्रह्मविषयं तच्चांतःकरणप्रतिबिंबरूपेषु सर्वेषु जीवेषु व्यक्तिषु जातिवत्प्रत्येक पर्यवसायितया वर्तमानमुत्पन्नविद्यं कंचिज्जीवं प्रति नष्टां व्यक्तिमिव जातिः स एव मोक्षः अन्यं यथापूर्वमाश्रयतीति व्यवस्थेत्याहुः

पाया अभिव्यक्तेर्युक्तत्वात् असतः शशशृंगादेरसत्त्वदर्शनादिति तदर्थः अविद्याया अनादिचैतन्यप्रतिबिंबाश्रितत्वस्वभावायाविद्याभेदा वादनिरूपणावसरे समर्थितत्वात् प्रत्येकेति द्वित्वबहुत्वादिवदज्ञानस्य सर्वजीवव्यक्तिषु व्यासज्यवृत्तित्वे सर्वेषां प्रत्येकमहमज्ञ इति प्र त्ययो न स्यात् व्यासज्यवृत्तिधर्मप्रत्ययस्य यावदाश्रयप्रत्यक्षसापेक्षत्वेन एकैकस्य जीवस्य सर्वजीवप्रत्यक्षाभावादित्यर्थः वस्तुतस्तु ज्ञान स्य व्यासज्यवृत्तित्वेपि तत्प्रत्यक्षस्य तस्य नित्यसाक्षिरूपतया यावदाश्रयप्रत्यक्षानपेक्षणात् उक्तनियमस्य जन्यप्रत्यक्षविषयत्वादिति मंतव्यं के चिदिति उत्पन्नया विद्यया मनसो निवृत्तौ तन्निरूपितप्रतिबिंबभावस्यापि निवृत्ततया तद्विशिष्टचैतन्यरूपव्यक्तिनाशादिति भावः तथा च श्रुतिः जहात्येनां भुक्तभोगामजोन्य इति एनामजां प्रकृतिमविद्यां जीवेन भुक्ता भोगा यस्याः सा भुक्तभोगा तामन्य इति श्रुत्या भोगप्रा प्तानां विषयाणामविद्यापरिणामत्वादिति भावः अजो जन्मरहितः अन्य उत्पन्नविद्यो जीव इत्यर्थः स एवेति स एवेत्यर्थः ६२

अन्यमिति अन्यत्वमितिभावः तथाच श्रुतिः अजो ह्येको जुषमाणोऽनुशेते इति एकः पुनरजो विवेकरहितः कार्यकारणसंघातरूपेण प-
रिणतामविद्यां जुषमाणः सेवमानः तत्राहं ममाभिमानवान् अनुशेते तामनुस्यूत शेते वर्त्तते न जहातीति यावत् अत्रात्मज्ञानेन विज्ञाताति
अन्यमात्रि सेवतिस्तीसुक्तापि अज्ञानसंबंधा सर्वथा बंधमोक्षाविमुक्तं भवति तदुक्तं व्यानरासंभवात् अज्ञानसंबंधासंबंधौ बंधमोक्षा-
विति मन्तव्यमापितसज्ञानेनाश्यत्वप्रतिपादकश्रुतिस्मृतिभाष्यादिस्वारस्यविरुद्धमत्वात्तदविरुद्धमतमाह इतरे त्विति अभ्युपगम्यैवे-
ति अविद्याभेदाभ्युपगमेन तत्तत्तदज्ञानान्वयव्यतिरेकाभ्यां बंधमोक्षयोरुपपादयितुमशक्यत्वात् न च तस्याप्येकत्वेऽप्यंशवत्कल्पनया तदंशनाशो मोक्षः
प्रागुपपादित इति वाच्यं विरोधिविद्योदये तदवस्थानायोगस्योपपादितत्वात् न च जीवन्मुक्तौ तदंशानुवृत्त्यभ्युपगमविरोध इति वाच्यं अवि-
द्यानाशेऽपि तत्संस्कारनाशस्य यावत्प्रारब्धक्षयमनुवर्तमानस्याविद्यालेशत्वेन विवक्षितत्वात् संस्कारातंवदन्मात्रात्वादितिभावः एवं नाना

इतरे तु प्रतिजीवमविद्याभेदमभ्युपगम्यैव तदनुवृत्तिनिवृत्तिभ्यां बद्धमुक्तव्यवस्थां समर्थयन्ते अस्मिन्पक्षे कस्याविद्यया प्रपंचः कृतो-
ऽस्त्विति चेत् विनिगमकाभावात्सर्वाविद्याकृतोनेकतन्त्वारब्धपटतुल्यः एकस्य मुक्तौ तदविद्यानाशे एकतन्तुनाशे पटस्येव तत्सा-
धारणप्रपंचस्य नाशः तदैव विद्यमानैरितरैः पटान्तरस्येवेतराविद्याभिः सकलेतरसाधारणप्रपंचान्तरस्योत्पादनमित्येके

जीववादे बंधमोक्षव्यवस्थां वक्तुं प्रकारान्तरमुपपाद्य तदुपादानोपयोगित्वयाप्यसत्कमविद्यानानात्वमभ्युपजीव्याक्षेपमवतारयति अस्मिन्पक्ष इति अ-
विद्यानानात्वपक्षे इत्यर्थः कस्येति किमेकस्य जीवस्याविद्यया प्रपंचारंभः उत सर्वेषामविद्याभिः नाद्यः विनिगमनाविरहात् न द्वितीयः प्र-
त्येकाविद्यानाशे सर्वप्रपंचनाशापत्त्या मुक्तेतरजीवानां प्रपंचानुपलब्धिप्रसंगादित्याक्षेपाभिप्रायः द्वितीयपक्षं परिशिष्य तत्रोक्तानुपपत्तिं
परिहरति विनिगमकाभावादित्यादिना सर्वाविद्याकृत इति सर्वेषां जीवानां सर्वाविद्यापरिणाम इत्यर्थः यद्वा सर्वाविद्याविषयीकृत इत्य-
र्थः विवर्तः प्रपंच इत्यर्थः प्रथमव्याख्याने दृष्टान्तमाह अनेकतन्त्वारब्धेति सकलेतरेति सकलाः समस्ता मुक्तजीवापेक्षया येऽन्ये इतरे तेषां साधा ^

सि॰ले॰
सं॰टी॰
८५

धारणप्रपंचांतरस्योत्पत्त्यर्थः प्रपंचस्य सर्वाविद्याकार्यत्वेपि तद्भेदात्प्रपंचस्यापि प्रतिपुरुषं भेद एवेति मतं सदृष्टान्तमाह तन्नादिति ननु यथैकदा बहूनां शुक्तौ रजतभ्रमो भवति तत्र प्रतिपुरुषमज्ञानभेदेन तत्कृतरजतभेदोऽस्तु तथैनैव वक्तव्यः सर्वजनसंभवति तत्रापि तावत्पुरुषाणामज्ञानैरेकस्यैव रजतस्योत्पत्तिसंभवादिति चेन्न तत्रैदैवयोगादेकस्य पुरुषस्य प्रथमं शुक्तित्वविशेषदर्शने सति तेनेदं रजतमिति वा पुरुषान्तरस्य तदैव स्वोपादानस्य रजतस्य नाशोपि तदितरेषां रजतभ्रमानुवृत्त्या रजतभेदस्यावश्यकत्वात् दृष्टान्तत्वासिद्धेरिति भावः न्यायमतेति सिद्धान्ते लेकत्ववत् द्वित्वादिकमपि यावद्द्रव्यभावेव ननु तत्तन्नरपेक्षाबुद्धिजन्यमुत्पन्नतद्वित्वादेस्तद्गुणमस्तादीनां च कल्पने गौरवादपेक्षाबुद्धेरेव द्वित्वजनकत्वाभ्युपगमात् न संदातत्वमदापतिरिति स्वीकारादिति भावः ननु तर्हि यथा तत्तत् रजते तत्पुरुषस्यैव प्रत्यक्षेनाम सततथा तत्तदविद्याकल्पितः प्रपंचोपि तत्पुरुषस्यैव प्रत्यक्षः स्यान्नान्यस्य तथा च यः प्रपंचस्त्वया नुभूयते स एव मया प्यनुभूयत इति प्रत्यभिज्ञानमसंदतेन स्यादिति शंकां दृष्टान्तेन परिहरति शुक्तिरजत इति उपल

तत्तद्दृष्टान्तकृतप्रातिभासिकरजतवन्न्यायमते तत्तदपेक्षाबुद्धिजन्यद्वित्ववच्च तत्तदविद्याकृतो वियदादिप्रपंचः प्रतिपुरुषं भिन्नः शुक्तिरजते त्वया यद्दृष्टं रजतं तदेव मयापीति वदेकाभ्रममात्रमित्यन्ये जीवाश्रितादविद्यातो निवृत्तभिन्नामायैवेश्वराश्रिता प्रपंचकारणं जी

त्वणमेतत् यो घोराम कृ सौत्वयाद्दृष्टौ तावेव मयापि दृष्टाविति प्रत्यभिज्ञानं न्यायमते द्वित्वभेदेपि दृश्यते तद्वदिति वोध्यं वियदादिप्रपंचो न जीवाविद्यापरिणामः किंतु जीवाश्रिता विद्यासंज्ञाद्भिन्ना माया सर्वजीवान् प्रति साधारण वियदादिप्रपंचपरिणाम्युपादानमुपेयेते अतो वियदादिप्रपंचस्यैकत्वात् तदेकत्वप्रतीतिर्न भ्रममात्रमिति मतं दर्शयति जीवाश्रितेति मायायाश्चाविद्याभ्यो भिन्नत्वे ईश्वराश्रितत्वे च प्रमाणादिकं प्रागेव दर्शितमिति नात्र तदुच्यते अविद्यानां प्रपंचोपादानत्वाभावे वैयर्थ्यमाशंक्याह जीवानामिति उक्तशंकानिवृत्त्यर्थं स्वशाहुः यत्किंचित् कार्यं प्रत्युपादानत्वाभावो मात्रशब्दार्थः न च नाहं प्रकाशः सर्वस्य योगमायासमावृत इति भगवद्वचने अहं परात्मा सर्वस्य प्राणिजातस्य प्रकाशः पूर्णानंदादिरूपेण स्फुरद्रूपो न भवामि मम सर्वज्ञत्व सर्वेश्वरत्वसर्वात्मकत्वादियमज्ञातं व्यदयंता मायया आवृतत्वादिमर्थके ईश्वरा- ८५
श्रितमायाया एव ब्रह्मावरकत्वप्रतिपादनात् तद्विरोध इति वाच्यं ब्रह्म तत्वतो न जानामीत्यावरकत्वस्य जीवाश्रितत्वानुभवानुसारेण जीवाश्रिता

विद्यायाः एव तदावरकत्वेन क्लृप्तेः सति भगवद्वचनगतमायापदस्य जीवचैतन्ये संसारजनकाविद्यालक्षकत्वोपपत्तेरिति भावः। अविद्यायाश्चावर-
णाद्युपप्रातिभासिकाविद्येपेपि परिणाम्युपादानत्वस्वीकारान्नैवैयर्थ्यशंकावकाश इत्याशयेनाह प्रातिभासिकेति नन्वजीवाश्रिताविद्यानां
जीवचैतन्याध्यस्तप्रातिभासिकस्वप्नप्रपंचोपादानत्वेनात्रोपयोगसंभवेपि शुक्तिरजताद्युपादानत्वं न संभवति शुक्त्याद्यवच्छिन्नचैतन्ये रजता
धिष्ठाने तासामभावादिति चेन्न सत्य आदिपदगृहीतस्वप्नप्रपंचविवक्षितत्वान्नायं दोषः यद्वा वाचस्पतिमत इव शुक्तिरजतादेरपि जीवाविद्याविषयीकृतशुक्त्यवच्छिन्नचैतन्यविवर्तत्वमभिप्रेत्य जीवाविद्यानां प्रातिभासिकरजताद्युपयोगकथनोपपत्तेर्न दोषः पूर्वमुक्तेऽभिन्ननिमित्तो
पादानत्वरूपे ब्रह्मलक्षणे उपादानत्वं विवर्ताधिष्ठानत्वरूपमिति निरूपितं न तत्संगतं नैवेश्वरनिरूपणप्रसंगे तदनु जीवैकत्वनानात्वं च य।
मोदाभपंचैकत्वनानात्वनिरूपणप्रसक्तं तदेतत्सर्वं निरूपितमिति निरूपयिष्यमाणार्थप्रसंगोपयोगितयोपसंहरति अवसितमिति स

वानामविद्यास्त्वावरणमात्रे प्रातिभासिकशुक्तिरजतादिविक्षेपेपि चोपयुज्यंत इत्यपरे अवसितमुपादानत्वं तत्प्रसक्तानुप्रसक्तं च अथ की
दृशं कर्तृत्वं केचिदाहुः तदैक्षत सोऽकामयत तदात्मानं स्वयमकुरुतेति श्रवणान्मायामतत्र कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वमि
ति अन्ये तु चिकीर्षाकृत्योः कर्तृत्वनिर्वाहाय चिकीर्षाकृत्योस्तत्रापेक्षायामनवस्थाप्रसंगात्कार्यानुकूलज्ञानवत्त्वमेव ब्रह्मणः कर्तृत्वं न च

मामसिनस्पृशः उपादानत्वमिति निरूपणमित्यर्थः लक्षणांतर्गतं कर्तृत्वं निरूपयितुमाक्षिपति अथेति उदासीनस्य ब्रह्मणः कर्तृत्वधर्मासं।
भवादित्यर्थः सत्यं तत्संभवेप्यौपाधिकं तत्संभवतीति परिहरति केचिदाहुरित्यादिना यद्यपि जगदुपादानस्य ब्रह्मणो न तत्कर्तृत्वं भवति घटो
पादानस्य मृदादेस्तत्कर्तृत्वादर्शनादित्याक्षिपति अथेति तथापीश्वरसंयोगादुपादानस्यैवेश्वरकर्तृत्वदर्शनाद्ब्रह्मण एव कर्तृत्वमुपपाद
कत्वाभावाच्च तत्संभवतीति परिहरति केचिदाहुरित्यादिना अथवा ब्रह्मणः कर्तृत्वं कीदृशमिति लक्षणे विवक्षितं किं ज्ञानचिकीर्षा
कृतिमत्त्वरूपं किं वा कार्यानुकूलज्ञानवत्त्वरूपं कार्यानुकूलस्य सर्वालोचनात्मकज्ञानवत्त्वरूपं वा नाद्यः ब्रह्मणस्तादृशकर्तृत्वे मानाभावा
त् न द्वितीयतृतीयौ कार्यानुकूलज्ञानस्य कर्तृत्वेन कर्तृत्वनिर्वाहाय ज्ञानांतरापेक्षायामनवस्थाप्रसंगात् तस्मात्कार्ये च नित्यज्ञानस्वरू
पस्य ब्रह्मणस्तादृशज्ञानवत्त्वरूपकर्तृत्वायोगादिति भावः तत्र प्रथमपक्षं प्रमाणं दर्शयन् केचिदाहुरिति श्रुतिश्रुतच्छन्दाः ब्रह्मपराः स्वयमि

त्यस्यात्मानधिष्ठितमित्यर्थः आत्मानं जगदात्मना कुरुत इतिवदित्यर्थः एताभिः श्रुतिभिः स्रष्टृत्वं कृत्वा ज्ञानेच्छाकृतयः प्रतिपाद्यन्त इतिभावः नच
ज्ञानादीनामपि कार्यत्वात्तत्कर्तृत्वाय ज्ञानाद्यन्तरापेक्षायामनवस्था स्यादिति वाच्यं ज्ञानादित्रयातिरिक्तकार्येऽज्ञरूपकर्तृत्वस्य विवक्षितत्वात्
नवस्थाप्रसंगः ज्ञानादित्रयं प्रति स्वरूपदेव कर्तृत्वं भविष्यतीत्यभिप्रायः प्रथमपक्षं दूषयन् द्वितीयपक्षं संगमयति अन्येत्विति अनवस्थाप्रसंगादिति
कर्तृत्वलक्षणाननुगमनपरिहाराय कार्यमात्रं प्रति ज्ञानादित्रितयवत्त्वरूपे कर्तृत्वे वक्तव्ये सति अनवस्थाप्रसंगो भवत्येवेतिभावः ज्ञानवत्त्वमेवे
ति इच्छाकृत्योरेवकारेण व्यवच्छेदः क्रियते तयोः कर्तृत्वलक्षणप्रवेशे च गौरवादिति भावः नचैवमुदाहृतश्रुत्योरिच्छाकृतिप्रतिपादनं व्यर्थं स्या
दिति वाच्यं ताभ्यां श्रुतिभ्यां तयोः सृष्टिहेतुत्वलाभेपि कर्तृत्वनिर्वाहकतया तयोः प्रतिपादनमित्यत्र मानाभावादिति भावः अकार्यत्वादिति नि
त्यज्ञानस्वरूपस्य ब्रह्मणस्तादृशाज्ज्ञानवत्त्वमौपाधिकभेदमासाद्य द्रष्टव्यं नचैवमपि सृष्टिकारणज्ञानस्य तद्धेतुत्वे तिच्छास्या कादाचित्कत्वप्रतिपा
दनविरोध इति वाच्यं ब्रह्मस्वरूपतया नित्यस्यापि ज्ञानस्य प्राणिपदृष्टतया कादाचित्कत्वपरिपाकलक्षणोपाधेः कादाचित्कः सहायस्तद्विशिष्टतया
कादाचित्कत्वमभिप्रेत्य तच्छ्रुत्युपपत्तेरितिभावः कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वमित्यत्र गमकमाह एवं चेति इच्छाकृत्योः कर्तृत्वलक्षणानन्त

ज्ञानेच्छाप्रसंगः तस्य ब्रह्मस्वरूपत्वेनाकार्यत्वात् एवं च विवरणे जीवस्य सुखादिकर्तृत्वोक्तिर्वीक्षणमात्रसाध्यत्वाद्धियदादिवीक्षितं हि

प्रवेशो विवादितेसतीत्यर्थः जीवस्येति तस्य सुखदुःखाद्यनुकूलज्ञानं साक्षिरूपं यथा विद्यते तथा तदनुकूलेच्छादिकेनास्त्यनुभवादनभ्युपग
माच्च नचेदमनुपपन्नं सुखेच्छया तत्साधनानुष्ठानद्वारा सुखोत्पत्तेरनुभवसिद्धत्वादिति वाच्यं सुखोपकरणानां तत्करणगोचरचिकीर्षाकृत्यो
रभावस्यात्र विवक्षितत्वात् तथा च कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वमित्यंगीकारे सत्येव विवरणोक्तिः संगच्छते नान्यथेत्यर्थः निःश्वसितम्
स्य वेदाः वीक्षितमस्यैव पंचभूतानि स्मितमेतस्य चराचरमस्य सुप्तिर्महाप्रलय इति वाचस्पति श्लोके महाभूतानां ब्रह्मवीक्षितत्वमुक्तं तथा भौति
कस्य चराचरप्रपंचस्य ब्रह्मस्मितत्वमुक्तं तदुभयतात्पर्यकथनपरे कल्पतरुग्रन्थे ब्रह्मवीक्षणमात्रसाध्यत्वं महाभूतेषु तद्वीक्षितत्वनिर्देशस्यालं वी॰
बनं दर्शितं तच्च ब्रह्मणो महाभूतस्रष्टृत्वमनुकूलज्ञानवत्तदनुकूलचिकीर्षाकृत्योरनुपगमेन संगच्छते वीक्षणातिरिक्तचिकीर्षादिव्यावर्तकमात्रपद ८५
विरोधात् लोके हि मंदहासरूपं स्मितं ज्ञानाधिकप्रयत्नसाध्यं प्रसिद्धं तथा च ब्रह्मणो भौतिकसृष्टिं प्रति यथा वीक्षणमपेक्षितं तथा हिरण्यगर्भोत्प

तिलत्वेणव्यापारो पाधिकोपेक्षितः चराचरस्यैौपस्य ब्रह्मणस्तु हिरण्यगर्भस्यापि कर्तृत्वाभावात् श्रुतिस्मृतिसिद्धत्वात् तथा च परब्रह्म
णो भौतिकस्यस्य तु कूलयत्नीवणं तद्धिकव्यापारापेक्षितत्वं चराचरस्य ब्रह्मस्मितत्व निर्देशालंबनेदर्शितं तदपि महाभूतस्य व्यावहा
रीवणाधिकप्रयत्नापेक्षायां नसंभवतीति हिरण्यगर्भद्वारेणास्य वाक्यस्य हिरण्यगर्भो मतिमपेक्ष्येत्यर्थः ननु हिरण्यगर्भः साक्षात्कर्त्तीव
स च प्रयोजककर्त्तेति यथाश्रुतार्थोशास्त्रः द्वितीयाध्यायानिमाधिकरणे परमेश्वरस्य भौतिकस्यस्यावपि साक्षात्कर्तृतायाः साधितत्वा
दिति भावः वाचस्पतिश्लोकश्च ब्रह्मस्तुतिपरः ब्रह्मस्तुतिप्रशस्तं तथाहि यस्य ब्रह्मणः श्रुतयः निःश्वासवत्प्रयत्नं विनैव वेदाः सर्वे कार्य
भूताः यस्य च वीक्षणादेव महाभूतानि भवंति यस्य च हिरण्यगर्भेण सह चराचरात्मकं विश्वमदृहासमात्रं यस्य च महाभूतलयोपि स्तुति
प्रायः तस्मात्सैकोविस्मयइतिभावः द्वितीयपदेपि दोषं वदन् तृतीयपदं समर्थयते अपरेत्विति स्वष्टव्यालोचनेनेति मयैदर्शनाभिमा

हिरण्यगर्भद्वाराबीक्षणाधिकप्रयत्नसाध्यत्वात् भौतिकंस्मितमिति कल्पनन्नकिंश्च संगच्छत इति वदंति अपरेतु कार्यानुकूलस्वष्ट
व्यालोचनरूपज्ञानवत्वं कर्तृत्वं न कार्यानुकूलज्ञानवत्वमात्रं प्रवृत्तिजनकत्वाभ्रमादिष्वप्यासानुकूलाधिष्ठानज्ञानवत्वेन
जीवस्य कर्तृत्वप्रसंगात् न चेष्टापत्तिः अथरथ्यानूरथयोगान्पथः सृजते स हि कर्त्तेत्यादिश्रुतौ श्रुतिवज्जीवस्य समप्रपंचकर्तृत्वोक्तेरि
तिवाच्यं भाष्यकारैर्लांगलं गवादीन् वहतीतिवत् कर्तृत्वोपचारमात्रं रथ्यादिप्रतिभाननिमित्तत्वेनेति व्याख्यातत्वादित्याहुः

कारकमित्यर्थः अध्यासेति अध्यासस्याध्यस्यमानरजतादेरनुकूलं यदधिष्ठानज्ञानं न तद्वत्तेनेत्यर्थः न चेष्टापत्तिरिति न चेत्स्य स्वयं वाच्य
मित्यनेन संबंधः अथेत्यस्य स्वनक्कालश्रुत्यर्थः जीवस्य रथ्यादिसृष्टृत्वे हेतुमाह स हि कर्त्तेति हि यस्मात्स्वप्ने रथ्यादिहेतुकर्मकर्ता जीवस्त
स्मादित्यर्थः भाष्यकारैरिति लांगलं गवादीन् वहतीति प्रयोगे लांगलस्य गवादिस्थितिकर्तृत्वरूपं न वाह्यकत्वोऽस्तु तन्मुख्यमस्ति किंतु
लांगले सति कृषिकारागवादिस्थितिहेतुफलादिलाभोस्तीति कृत्वाउपचारादुच्यते गवादीन् वहतीति न तत्त्वा स्वरथ्यादिपदार्थो
पलब्धिहेतुधर्मादिकर्तृत्वेन रथ्यादिप्रतिभाननिमित्तत्वरूपेण हेतुनातस्य कर्तृत्वमुपचर्यते स हि कर्त्तेति श्रुताविति भाष्यकारैः कार्तत्व

सि॰ ले॰
प्र॰ टी॰
९९

स्पष्टोपचारिककर्तृत्वरूपतयोक्तत्वादित्यर्थः एतेन विवरणोक्तत्वादिकर्तृत्वोक्तिरप्युपचारमात्रपरा व्याख्याता मयेदं सृष्टं बहुः स्यादित्स्रष्टृत्वमित्या
लोचनरूपज्ञानाभावेपि सृष्ट्यादिदर्शनेन मुख्यकर्तृत्वासंभवात् वीक्षणमात्रसाध्यत्वादिति कल्पतरौ सृष्ट्यालोचनरूपवीक्षणविवक्षितमि
तिन तद्विरोध इति द्रष्टव्यं जन्मादिसूत्रेण निखिलजगत्कर्तृत्वेस्तितदुपादानत्वे ब्रह्मणो लक्षणत्वेन शंतिपादिते सति तस्य सर्वज्ञत्वमर्थात्सि
ध्यति निखिलजगत्सृष्टिस्थितिसंहारकर्तृत्वस्य सर्वज्ञत्वं विनासंभवादित्याह अनेनैवेति. सर्वज्ञत्वसिद्धौ हेतुत्वं तस्मात् शास्त्रयोनित्वादिति अ
स्य सूत्रस्यार्थमाह वेदकर्तृत्वेनापि ननु यथा वेदकर्तृत्वं भाष्यादिषूक्तप्रकारेण सर्वज्ञत्वं साधयति तथा जन्मादिसूत्रोपात्तं सर्वकर्तृत्वमपि
तत्साधयति तथा च पूर्वसूत्रेणैवार्थसिद्धः सूत्रसाफल्यं तदप्युक्तौ को हेतुरिति उच्यते पूर्वसूत्रं लक्षणपरं न तु सर्वज्ञत्वसाधनपरं इदं तु तत्साधनपर

अनेनैव निखिलप्रपंचरचनाकर्तृभावेनार्थसिद्धं सर्वज्ञत्वं ब्रह्मणः शास्त्रयोनित्वादित्यधिकरणे वेदकर्तृत्वेनापि समर्थितं अथ कथं
ब्रह्मणः सर्वज्ञत्वं संगच्छते जीववदंतःकरणाभावेन ज्ञातृत्वस्यैवायोगात् अत्र सर्ववस्तुविषयसकलप्राणिधीवासनोपरक्ताज्ञानो
पाधिक ईश्वरः अतस्तस्य सर्वविषयवासनासाक्षितया सर्वज्ञत्वमिति भारतीतीर्थादिपक्षः प्रागेव दर्शितः प्रकटार्थकारास्त्वाहुः यथा

मिति तात्पर्यसत्त्वासत्त्वाभ्यां तथा व्यवहारः तत्र अत्र ब्रह्मसर्वज्ञं शास्त्रकर्तृत्वादिति सूत्रयोजना ननु ब्रह्मणः सर्वज्ञत्वं यः सर्वज्ञः स सर्वविद्धुणिसर्ववि
द्यत्वादिषूक्तांकं च तत्पवश्यतिपाद्यते कात्र साधनापेक्षेति चेत्सत्यं श्रुत्युक्तसर्वज्ञत्वेप्रतिपत्तिदार्ढ्याय तर्कोपपत्तिसमर्पणात् एवं श्रुत्युपपत्ति
सिद्धं सर्वज्ञत्वं निरूपयितुमाक्षेपमवतारयति अथेति जीवस्य हि स्वोपाध्यंतःकरणवृत्तिज्ञानाश्रयत्वरूपज्ञातृत्वं प्रमाणसिद्धं ब्रह्मणस्त्वंतः
करणाभावात् न संभवति ज्ञातृत्वं न च ब्रह्मणोप्यंतःकरणमस्तीति वाच्यं कार्योपाधिरयं जीव इति श्रुत्या तस्य जीवोपाधित्वेन नियमितत्वात् ज्ञा
तृत्वं च सर्वज्ञत्वव्यापकं ज्ञातृत्वविशेषरूपत्वात् सर्वज्ञत्वस्य तथा च ब्रह्मणः ज्ञातृत्वस्य व्यापकस्य निवृत्त्या व्याप्यसर्वज्ञत्वनिवृत्तिरित्यर्थः ज्ञातृत्वाभा ९९
वे सर्वज्ञत्वं दूरापास्तमित्येवकारार्थः अंतःकरणं नाम जीवोपाधित्वेपि तद्वासनानामीश्वरोपाधित्वात्संभवति कथंचित्तस्य सर्वज्ञत्वमिति परिहरति
अत्र सर्ववस्त्विति अत्रेत्यस्मिन्नाक्षेपे इत्यर्थः सर्वविषयवासनासाक्षितयेति स्वोपाधिभूतवासनाविषयसर्ववस्त्ववभासकतयेत्यर्थः अस्मिन्नमा

यानेप्राग्रुक्तमस्मरसंभमनसिनिधायसमायानां तरमाह प्रकटार्थकारास्त्विति यथांतःकरणं ज्ञातृत्वोपाधिस्तथा मायापिज्ञातृत्वोपाधिर्भ।
वत्येव तथा च ब्रह्मणो मायोपाधिके सर्वज्ञत्वापकस्य ज्ञातृत्वनिवृत्त्यभावात् न सर्वज्ञत्वनिवृत्तिरित्यर्थः स्वोपाधिमायेति मायिनमिति
प्रकृतेर्मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षण इति वाक्यवृत्तिवचनाच्च मायाया ईश्वरोपाधित्वं सिद्धमिति भावः सर्वज्ञत्वसर्वनियंतृत्व
सर्वात्मकत्वानि लक्षणानि असाधारणधर्माः यस्य सः सर्वज्ञत्वादिलक्षण इत्यर्थः अवकलनादिति विषयीकरणादित्यर्थः ननु शु
द्धिकारास्त्विति प्रकटार्थकाराणां मते अतीतानागतप्रपंचरूपविषयेपीश्वरीयं मायावृत्तिप्रतिबिंबरूपं ज्ञानमपरोक्षं ननु शुद्धिकारा

जीवस्य स्वोपाध्यंतःकरणपरिणामाश्रितत्प्रतिबिंबग्राहिण इति न चोगातज्ञातृत्वं एवं ब्रह्मणः स्वोपाधिमायापरिणामाश्रित
प्रतिबिंबग्राहिणः सतो जीवन्नप्रतिबिंबितैः स्फुरणैः कालत्रयवर्तिनोपि प्रपंचस्यापरोक्ष्येणावकलनात्सर्वज्ञत्वमिति ननु शुद्धिका
रास्तु कथं नित्यात् ब्रह्मणो विद्यमाननिखिलप्रपंचसाक्षात्कारसंभवात् तज्जनितसंस्कारवत्तया च स्मरणोपपत्तेरतीतसकलवस्तुव
भासत्सिद्धिः सृष्टेः प्राक्तनमायायाः सृज्यमाननिखिलपदार्थस्फुरणरूपेण जीवादृष्टानुरोधेन विवर्तमानत्वात्तस्यादितया तदुपा
धिकस्य ब्रह्मणोपि तत्साधकत्वसिद्धेरनागतवस्तुविषयविज्ञानोपपत्तिरिति सर्वज्ञत्वं समर्थयंते कौमुदीकृतस्तु वदंति स्वरूपज्ञा

णां मते अतीतादिविषये जीवानामिवेश्वरज्ञानमपि परोक्षमेवेति विशेषार्थकस्तुशब्दः विद्यमानेति लोके प्रमत्तज्ञानस्य वर्तमानवस्तु
मात्रविषयकत्वस्वाभाव्यदर्शनेन तस्य सूक्ष्मसंभावानिलंघ्यनेकारणाभावात्सर्वज्ञत्वप्रतिपादकशास्त्रस्य ईश्वरीयज्ञानगतपरोक्ष
त्वापरोक्षत्वयोरुदासीनत्वादिति भावः तज्जनितेति विद्यमानवस्तुसाक्षात्कारजनितेत्यर्थः अनागतवस्तुज्ञानमुपपादयति सृष्टेः
प्रागिति स्फुरणपदं वृत्तिपरं विवर्तमानत्वपरिणममानत्व तदुपाधिकस्येति मायोपाधिकस्येत्यर्थः कथं तदुपाधिकत्वमत आह
तत्स्यादितयेति तस्यां मायायां प्रतिबिंबतयेत्यर्थः सृष्टेः पूर्वकाले मायायास्तथापरिणामे कारणमाह जीवादृष्टेति तत्साधक
त्वसिद्धेरिति मायावृत्तिकर्तृत्वसिद्धेरित्यर्थः अनागतेति अनागतवस्तुविषयकस्य ज्ञानस्य वृत्तिप्रतिबिंबरूपस्य ब्रह्मण्युपपत्तिरित्य
र्थः जीववद्ब्रह्मणोपि चैतन्यप्रतिबिंबोपेतैर्वृत्तिज्ञानैः सर्वज्ञत्वं निरूपितं मतद्वयेन इदानीं स्वरूपज्ञानेनैव तन्निरूपयति कौमुदीकृ

सि॰ ले॰
म॰ टी॰
८७

तस्मिन्निति नन्वतीतानागतप्रपंचयोः प्रलयकाले सृष्टिः पूर्वकाले च सत्वे मानाभावात् तदा ब्रह्मणः सर्वज्ञत्वं न सिध्यति असतोस्तयोश्चै
तन्यसंसृष्टत्वासंभवादित्तिनेत्याह अतीतानागतयोरपीति अतीतप्रपंचस्य प्रलयकाले संस्कारात्मना सत्वस्यैव तदाधिकरणे स्तत्रभा
ष्यकारादिभिः साधितत्वात् तथानागतस्यापि सृष्टिपूर्वकाले संस्कारात्मनैव सत्वस्यावंभणाधिकरणादिषु च साधितत्वादतीता
दिवस्तुसंसृष्टब्रह्मचैतन्यस्य तदापि सर्वज्ञत्वसिद्धिरिति भावः चित्रस्यानुन्मीलितत्वं अनभिव्यक्तत्वं तत्र हेतोर्विस्पष्टत्वमविद्यैव चित्र
भित्तिरिति रूपकमत्र द्रष्टव्यं अत्रेदं चिंत्यं स्थूलप्रपंचस्थितिकाले संस्कारात्मकसूक्ष्मप्रपञ्चो नास्ति प्रलयकालादौ च स्थूलप्रपंचो नास्
स्तितथाच ब्रह्मचैतन्यस्य सदा सर्वप्रपंचसंसृष्टत्वाभावात्तदा तस्यासंकुचितसर्वज्ञत्वं न संभवति स्वरूपज्ञानेनैवेत्यत्रेदमस्यावधारणस्य
व्यवच्छेद्यमाह न तु वृत्तिज्ञानेनेति अज्ञानगतस्यावधारणस्य स्वप्रकाशात्मातिरिक्तानवभास्यमादिस्यादिज्ञानादिसमर्थः अत्रेदं चिन्त्यं

तेनैव ब्रह्मणः स्वसंसृष्टसर्वावभासकत्वात्सर्वज्ञत्वं अतीतानागतयोरप्यविद्यायां चित्रभित्तौ विस्पष्टानुन्मीलितचित्रवत्संस्का
रात्मना सत्वेन तंत्रसर्गस्याप्युपपत्तेः न तु वृत्तिज्ञानेनस्य सर्वज्ञत्वं न मे च भातमनुभाति सर्वमिति सावधारणश्रुतिविरोधात् स्व
रूपः प्रागोक्तमेवाद्वितीयमित्यवधारणानुरोधेन महाभूतानामिव वृत्तिज्ञानानामपि प्रलयस्य वक्तव्यतया ब्रह्मणस्तदा सर्वज्ञ

ब्रह्मचैतन्यस्य जगदवभासनार्थं मायावृत्त्यपेक्षायां यदित्यनेनावधारणं विरुध्यते तदा जीवचैतन्यस्य घटाद्यवभासनार्थमंतःकरण
वृत्त्यपेक्षायामपि तद्विरुध्यते एव यदि चांतःकरणवृत्तीनां जडत्वात्तदपेक्षायामपि सर्वं जडवस्तु चैतन्यमात्रावभास्यमिति सावधारण
श्रुत्यर्थस्य न बाधस्तदा मायावृत्त्यपेक्षायामपि तुल्यः समाधानमिति प्रलयकाले सर्वज्ञत्वाभावे को दोषस्तत्राह प्राथमिकेति नन्वस
र्वज्ञत्वाभावे सति सर्गादौ तदैक्षतेति श्रुत्युक्तं भूतसृष्ट्यनुकूलमीक्षणं प्रतिकर्तृत्वाभावेनेक्षणपूर्वकं भूतादिसर्गप्रसंगस्यापि ब्रह्मणः
कर्तृत्वाभावप्रसंगादित्यर्थः अत्रापीदं चिंत्यं एवमपि सृष्टिपूर्वकाले ब्रह्मचैतन्यव्यतिरिक्तस्य मायातत्संबंधादेः सत्वात् अद्वितीयत्वा ८७
वधारणं सम्यङ्न संभवति यदि च मायादेरनादित्वप्रतिपादकश्रुत्यादिबलाद्याहृतकार्यात्मकद्वितीयाभावावधारणपरत्वं वचनमि
ष्यते तदा सर्वविषयकज्ञानकर्तृत्वरूपसर्वज्ञत्वप्रतिपादकश्रुत्यादिबलात्सर्वज्ञत्वघटकमायावृत्तिसंततिव्यतिरिक्तकार्याभावा

वृधारणपरमहितीयत्ववचनमित्यपि कल्पनं तुल्यं मायावृत्तिभिः सर्वज्ञत्वसमर्थनमेव भाष्यसंमतं तथा चेदं तत्त्वपि करणभाष्यम।
पि चाविद्यादिमतः संसारिणः शारीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् ज्ञानप्रतिबंधकारणरहितस्येश्वरस्येति स्वरूपे : सर्वकालेच ब्रह्मणः स्वरू
व्यालोचनरूपमीक्षणं न संभवति वृत्तिज्ञानरूपेक्षणस्य शरीरादिकारकसाध्यत्वात् यालोकसिद्धत्वेन ब्रह्मणस्तदा शरीराद्यभावादि
ति सांख्यशंकानिरासार्थमिदं भाष्यं जीवस्येव वृत्तिज्ञानोत्पत्तिशरीरादिसापेक्षा ईश्वरस्य तु मायावृत्तिरूपज्ञानोत्पत्तिः शरीराद्यनपेक्षा
तथा च सृष्टि सर्वप्रलयकालेपि तस्य मायावृत्तिरूपमीक्षणं सदा सर्वज्ञत्वं च संभवतीति समाधानभाष्याभिप्रायः इदं भाष्यमित्य
मेवव्याख्यातृभिर्नीतं भाष्ये ज्ञानप्रतिबंधकारणमविद्यादीति मंतव्यं तत्तस्य मायावृत्तिभिः सर्वज्ञत्वसमर्थनपक्षदूषणमसंगत

त्वाभावापत्तावप्राप्यमिकं मायाविवर्तरूपेक्षणेन सर्वके मताम् तादोचस्तृष्टत्वाभावप्रसंगाच्च एवं सति ब्रह्मणः सर्वविषय
ज्ञानात्मकत्वमेव स्यान्न तु सर्वज्ञातृत्वरूपं सर्वज्ञत्वमिति चेत्सत्यं सर्वविषयज्ञानात्मकमेव ब्रह्म न तु सर्वज्ञानकर्तृत्वरूप
ज्ञातृत्वमस्ति अत एव वाक्यान्वयादित्यधिकरणे विज्ञातृत्वं जीवलिंगमित्युक्तं भाष्यकारैः यः सर्वज्ञ इत्यादिश्रुतिरपि ज्ञा

मिति मंतव्यं शंकते एवं सतीति स्वरूपज्ञानेनैव सर्वज्ञत्वसमर्थने सतीत्यर्थः नन्विति स्वरूपज्ञानस्य नित्यत्वादिति भावः ननु सर्वज्ञा
न कर्तृत्वरूपमिति ब्रह्मण इति शेषः अत्र यद्यपि ज्ञातृत्वसामान्यरूपं सर्वज्ञानकर्तृत्वं तु विशेषरूपमिति न तयोरभेदः संभवति त
थापि ब्रह्मणो ज्ञातृत्वं नास्तीत्यत्रैव तात्पर्यं न तु तयोरभेदो क्वापीत्यविरोधः अत एवेति ब्रह्मणो ज्ञातृत्वाभावादेवेत्यर्थः इत्युक्तमिति
बृहदारण्यके मैत्रेयीब्राह्मणे पठ्यते आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यात्मा वारे द्रष्टव्य इत्यादि अत्र किं जीवो द्रष्टव्यत्वेनोपदिश्यते उ
त परमात्माभिन्नः परमात्मा नित्यप्रपंचस्वभावः इति संशयस्तत्र पूर्वपक्षः सर्वत्र वाक्यभोक्तृजीवस्य शकृत्तत्वाद्युपसंहारेपि विज्ञातारमरे के
न विजानीयादिति विज्ञातृत्वस्य जीवधर्मस्य कीर्तनात् जीव एवात्र द्रष्टव्य उपदिश्यत इति सिद्धांतस्तु परमात्माभिन्नः परमात्मैव द्रष्ट
व्यतयोपदिश्यते कुतः वाक्यान्वयात् तथाहि अत्र आत्मविदनेन सर्वं विदितं भवतीति प्रतिपाद्यते तच्च सर्वाधिष्ठानब्रह्मपरिग्रहे घट

सि॰ ले॰
प्र॰ टी॰
९८

तेन जीवरूपपरिग्रहे तथा इदं सर्वमात्मेत्यादिवाक्यान्यपि सर्वात्मके ब्रह्मण्येव तात्पर्येण प्रतिपादकतयाऽन्वितानि लक्ष्यन्ते आत्मनस्तु कामाय सर्वं प्रियं भवतीति सर्ववाक्ये जीवपरामर्शस्तु लोकसिद्धभोक्तारमनूद्य तस्य शुद्धब्रह्मरूपेण द्रष्टव्यत्वोपदेशार्थः विज्ञातारमिति चवाक्यं तु जीवस्य विज्ञातृत्वरूपधर्मपरं न भवति तस्य वाक्यस्य मुक्तजीवपरत्वात् मुक्तजीवे च निरुपाधिके तस्यासंभवात् किंतु भूतपूर्वगत्या विज्ञातृत्वानुवादमात्रं स्यात् तत्रेण न कस्यचिदर्थस्य साधकत्वात् मैत्रेयीब्राह्मणं प्रत्यगभिन्ने निर्विशेषब्रह्मण्येव समन्वितमिति सिद्धमिति श्रुतज्ञातृत्वं ब्रह्मणः साधारणं चेज्जीवलिंगतया भाष्यकारैर्नोपन्यस्येत उपन्यस्तं च तस्माज्ज्ञातृत्वं ब्रह्मणो नास्तीति गम्यत इति भावः ई-श्वरस्य सर्वविषयकज्ञानकर्तृत्वानभ्युपगमे श्रुतिविरोधमाशंक्याह यः सर्वज्ञ इति नित्यचैतन्यमात्रस्य सर्वज्ञत्वलक्षणतया ज्ञाथातत्वा-यत्वायोगात् विशिष्टचैतन्यस्य प्रकृतस्यैतद्वाच्य तथा च विशिष्टस्य कार्यत्वसंभवात् प्रत्यक्षश्रुत्यर्थकर्तृत्वस्य नाविरोधः ब्रह्मणः सर्वज्ञ-

त्वरूपत्वाभिप्रायेणैव योजनीयेति यद्यपि ब्रह्मस्वरूपचैतन्येनैव स्वसंसृष्टसर्वावभासकं तथापि तस्य स्वरूपेण कार्यत्वमिच्छाव-च्छिन्नरूपेण तु ब्रह्मकार्यत्वात् यः सर्वज्ञ इति ज्ञानजननकर्तृत्वश्रुतेरपि न कश्चिद्विरोध इत्याचार्यवाचस्पतिमिश्राः नन्वीश्वरव-ज्जीवोऽपि वृत्तिमनपेक्ष्य स्वरूपचैतन्येनैव किमिति विषयान्नावभासयति अत्रोक्तविवरणे ब्रह्मचैतन्यं सर्वोपादानतया सर्वतादा-

त्म्यकर्तृत्वप्रतिपादकश्रुतिविरोधे न ज्ञातृत्वस्य जीवलिंगत्वोक्तेरभ्युच्चयमात्रोपपत्तेः तदधिकरणसिद्धान्ताभिमतनिर्विशेषब्रह्मण्याद् तत्त्वमात्रेण विज्ञातृत्वस्य सर्वपदलिंगत्वोपन्यासोपपत्तेश्च भाष्यकारैरेवमुक्तस्य सर्वविषयकज्ञानकर्तृत्वस्येदृशस्य तदधिकरणे प्रतिपा-दितत्वाच्च भाष्यस्य श्रुतेः स्वार्थपरत्वसंभवे तन्मायायोगाच्च तस्य स्वरसादाह यद्यपीत्यादिना चैतन्येनैवेति न मायावृत्तिभिरित्येवकारार्थः तर्हि मन्यतामर्थं तावत् नेत्याह तथापीति तस्य स्वरूपचैतन्यस्येत्यर्थः इच्छावच्छिन्नेति न चानादिमायादिरूपइच्छावच्छिन्नचैतन्यस्य कथं जन्मप्रकारेणापि कार्यत्वसिद्धिरिति वाच्यं मायादेरपि तज्ज्ञानकार्यतादात्म्यापत्त्या कार्यत्वसिद्धौ मायाद्यवच्छिन्नचैतन्यस्यापि कार्यत्व-स्य सुसंपादितत्वादिति भावः आक्षिपति नन्विति नावभासयतीति न चात्रेत्यापत्तिर्वक्तुं शक्यते तथा सत्यविद्याप्रतिबिंबचैतन्यरूपजीव ९८

स्वव्यापकतया स्वसंसृष्टसकलजगदवभासकत्वापत्त्या सर्वज्ञत्वप्रसंगात् स्वरूपचैतन्यस्य कारकानपेक्षतया चक्षुरादिवैयर्थ्यप्रसंगाच्चेति भावः।
अत्रोक्तमिति अस्मिन्नादोषे समाधानमुक्तमित्यर्थः नजीवचैतन्यमिति यथा जगद्ब्रह्मसंसृष्टं तथा जीवसंसृष्टं न भवति अतो न तस्य सर्वज्ञत्व
प्रसक्तिरित्यर्थः ननु यथा जीवस्य घटादिविषयैः संबंधाभावः तथान्तःकरणादिनापि संबंधाभावस्तु तदुपादानत्वाभावादेव तथान्तः
करणादेर्वृत्तिं विनैव जीवचैतन्यरूपसाक्षिभास्यत्वं न स्यादित्याशंक्य उपादानत्वाभावेपि जीवचैतन्यस्यान्तःकरणादिना तादात्म्यसंबन्धे
दृष्टान्तमाह यथा सर्वगतमिति संसृज्यत इति अतो नान्तःकरणादेः साक्षिभास्यत्वविरोध इति भावः चक्षुरादिवैयर्थ्यप्रसंगं परिहरति त
था चेत्यादिना तथा चेत्यस्य जीवस्य स्वतो विषयसंबंधाभावे सतीत्यर्थः अन्तःकरणपरिणामस्य सहसा विषयव्याप्तौ दृष्टान्तः चक्षूरश्मिव

त्यापन्नं स्वसंसृष्टं सर्वमवभासयति न जीवचैतन्यं तस्याविद्योपाधिकतया सर्वगतत्वेप्युपादानत्वेनासंगित्वात् यथा सर्वगतं गो
त्वसामान्यं स्वभावाद्व्यक्त्यादिव्यक्तिसंगित्वाभावेपि सास्नावद्व्यक्तौ संसृज्यते एवं विषयासंगेपि जीवः स्वभावादन्तःकरणे संसृज्यते
तथा च यदान्तःकरणपरिणामो वृत्तिरूपो नयनद्वारेण निर्गत्य विषयपर्यन्तं चक्षूरश्मिवत्स्फुरति दीर्घप्रभाकारेण परिणम्य विषयं व्या
प्नोति तदा तदुपारूढं स्वं तं विषयं गोचरयति केवलाग्निनाप्रदाह्यस्यापि तृणादेरयःपिंडसमारूढाग्निदाह्यत्ववत् केवलजीवचैतन्याप्र
काश्यस्यापि घटादेरन्तःकरणवृत्त्युपारूढतत्प्रकाश्यत्वमुक्तं यद्वान्तःकरणोपाधिकत्वेन जीवः परिच्छिन्नः अतः संसर्गाभावान्न घटा
दिकमवभासयति वृत्तिद्वारा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ तं विषयं प्रकाशयति अथवा जीवः सर्वगतोप्यविद्या

दित्विति तमिति परिणाममित्यर्थः गोचरयतीति जीवचैतन्यमिति शेषः विषयदेशे सतोपि जीवचैतन्यस्य स्वतो विषयावभासकत्वं नास्ति तस्य
वृत्त्युपारूढस्य तदस्तीत्यत्र दृष्टान्तमाह केवलाग्नीति तत्प्रकाश्यत्वमित्यत्र तत्पदं जीवचैतन्यपरं ननु जीवचैतन्यस्य विषयदेशे सतोपि वि
षयैः संसर्गाभावात् न तत्प्रकाशकत्वं स्यात्तयोः संसर्गलाभे च तत्प्रकाशकत्वं किमिति परिह्रियते जीवचैतन्यस्य सर्वगतत्वे न सत्यपि विषय
संसर्गे विवक्षितब्रह्मचैतन्यवदनावृतत्वादेव न विषयप्रकाशकत्वमिति प्रतिपादनेनापि जीवस्य सर्वज्ञत्वप्रसंगादेः परिहारसंभवादिति चे
न्न ब्रह्म न जानामीत्यनुभवबलात् ब्रह्मावृतत्वेपि मां न जानामीत्यनुभवाभावेन जीवचैतन्यस्यावृतत्वासंभवादिति भावः जीवचैतन्यस्यान्तःक

सि॰ ले॰ प्र॰ टी॰ ६५ करणोपाधिकतया परिच्छिन्नत्वपक्षे सर्वज्ञत्वापत्तिशंकैव नास्ति तस्य विषयैः सह सतः संबंधाभावेन वृत्तिं विना तत्प्रकाशात्मकत्वासंभवादि
ति परिहारांतरमाह यद्वेति श्रुतइति परिच्छिन्नत्वादित्यर्थः तत्संसृष्टेति वृत्तिद्वारा वृत्तिमदंतःकरणसंसृष्टं यद्विषयावच्छिन्नं ब्रह्मचैतन्यं
तस्मात् अंतःकरणोपाधिकजीवचैतन्येन सहाभेदाभिव्यक्तौ सत्यां तज्जीवस्तं विषयं प्रकाशयतीत्यर्थः अविद्योपाधिको जीव इति प्रथमपक्षे
वाश्रित्य जीवस्योपाधानमात्राभावेपि घटादिविषयैः सह संसर्गमभ्युपेत्य परिहारांतरमाह अथवेति सर्वगतोपीति उपलक्षणं चैतत् विषयसं
सृष्टोपीत्यपि द्रष्टव्यं इतरथा विषयसंसर्गाभावादेव जीवस्य विषयप्रकाशकत्वाभावोपपत्तौ तस्यावृतत्वकल्पनावैयर्थ्यप्रसंगादिति बोध्यम्
न च मां न जानामीत्यनुभवाभावात् कथं तस्यावृतत्वसिद्धेरिति वाच्यं अंतःकरणोपहितजीवचैतन्यस्यैव मामित्यनुभवविषयतया व्यापकजीव
चैतन्येंतःकरणावच्छेदेन तदभावेपि विषयदेशे तस्यावृतत्वकल्पने बाधकाभावात् सर्वगतत्वेन रूपेण मां न जानामीत्यनुभवसत्त्वाच्चेति भावः

वृतत्वात्स्वयमप्रकाशमानतया विषयानवभासयन् विषयविशेषे वृत्त्युपरागादावावरणतिरोधानेन तत्रैवाभिव्यक्तस्तमेव विषयं प्र
काशयति एवं च चिदुपरागार्थत्वेन विषयचैतन्याभेदाभिव्यक्त्यर्थत्वेनावरणाभिभवार्थत्वेन वा वृत्तिनिर्गमनमपेक्षितं तत्संसृष्टविषयमा
त्रावभासकत्वाज्जीवस्य किंचिज्ज्ञत्वमप्युपपद्यतइति अत्र प्रथमपक्षे सर्वगतस्य जीवस्य वृत्त्यधीनः को विषयोपरागः वृत्त्यापि हि पूर्वसिद्ध

स्वयमपीति विषयास्तावज्जडत्वात्स्वतो न प्रकाशंते जीवस्तु स्वप्रकाशोनया प्रकाशमानोप्यावृतत्वादप्रकाशमान इति वक्तुमपि शक्यः यद्वा अपि
शब्दोवधारणार्थः तथा चावृतत्वात्स्वयमेवाप्रकाशमानतयेत्यर्थः वृत्त्युपरागाद्यावीति विषयविशेषे वृत्त्युपरागे सति विषयदेशस्थजीवचैतन्य
स्यापि वृत्त्युपरागो भवति तेन च जीवचैतन्यगतस्यावरणस्य तिरोधानं भवति तथा च जीवचैतन्ये यो वृत्त्युपरागः स आदिपदार्थः तत्रैवेति विषय
विशेष एवेत्यर्थः तमेवेति नान्यं विषयमतो न सर्वज्ञत्वप्रसंग इति भावः इममेव भावं प्रकटयति एवं चेति जीवचैतन्यस्य वृत्तिं विना विषयानवभा
सकत्वे सिद्धे सतीत्यर्थः तत्संसृष्टेति वृत्तिसंसृष्टेत्यर्थः किंचिज्ज्ञत्वमपीति अनुभवसिद्धं किंचिज्ज्ञत्वं अनुभवसिद्धसार्वज्ञत्वादिति भावः तत्सिद्धं ६५
चक्षुरादीनां तु विधानं चेत्यपिशब्दार्थः आक्षिपति अत्रेति उक्तपक्षेषु मध्य इत्यर्थः क इति स्वरूपलक्षणो वा तादात्म्यलक्षणो वा संयोगलक्षणो
वेति किंशब्दार्थः तत्र न तावदाद्यो वृत्त्यधीनः जीवचैतन्यस्य सर्वगतत्वेन विषयदेशसन्निहितजीवचैतन्यविषययोः स्वरूपात्मकसंबंधस्य

वृत्तिं विनापि सिद्धत्वादित्याशयेन सर्वगतस्येत्युक्तं द्वितीयतृतीययोः क्रमेण दूषयति वृत्त्यापीति लोके ययोः पदार्थयोस्तादात्म्यमनु
भूयते तेन तयोरादितन्त्रारम्भात्तु भूयते तेन तन्मध्ये प्रागतत्क मित्याशयेनाह पूर्वसिद्धयोरिति संयोगस्यान्यतरकर्मजत्वमुभयकर्मजत्वं
वा वक्तव्यं तदुभयप्रकृतेन न संभवतीत्याह निष्क्रिययोरिति न च सवर्णाद्यो द्वितीयकर्माभावेपि तेजःपार्थिवभागयोः संयोगा
दृष्ट इति वाच्यं तथा विषयजीवचैतन्ययोरादितन्त्रारभ्य संयोगाभ्युपगमे तस्य वृत्त्यधीनत्वप्रतिपादकविरोधादिति भावः वृत्त्या
प्याधानेन न संभवतीति संबंधः जीवचैतन्यस्यानुपादानतया निरवयवतया च विषयजीवचैतन्ययोस्तादात्म्यसंयोगोत्पत्तौ न
त्तिएव वृत्त्यापि तयोराधानं न संभवतीत्यपि शब्दार्थः आधानमुत्पादनमिति बोध्यं विषयदेशसन्निहितस्य जीवचैतन्यस्य वृत्त्युप
योनिष्क्रिययोर्विषयचैतन्ययोस्तादात्म्यस्य संयोगस्य वा न भवत्वाधानं अत्र केचिदाहुः विषयविषयिभावसंबंध एवेति
अमेन विषयविषयिभावमात्रनियामिका वृत्तिरेव निर्गताया अप्येन्द्रियेकव्रूते स्तन्नियामकत्वेनातिप्रसंगावह मितित
न्निर्गमाभ्युपगमवैयर्थ्यापत्तेः सनाभिः संहिताः किंतु विषयसन्निहितजीवचैतन्यतादात्म्यापन्नाया वृत्तेर्विषये संयोगो
न तस्यापि तद्द्वारकः परंपरासंबंधो लभ्यते इत्ति तत्पव चिदुपरागो भिसंहितः तस्माद्धः ने: सर्वविषयविषयिभावलक्षणः संबं
धो नाश्रुत तदुत्पन्ननंतरं सजायते तस्यानिरुक्तस्यानिर्वचनीयस्यैव संभवात् इत्याशयेनाह अत्र केचिदाहुरिति न तस्य स्वरूपसं
बंधस्य वा तादात्म्यस्य वा संयोगस्य वा वृत्त्यधीनत्वमुपेयते येनोक्तदोषः स्यादित्येवकारार्थः परोक्षस्थलेप्रत्यक्षादित्वस्यपहि
तजीवचैतन्यस्यापि समेयादिविषयैः सह विषयविषयिभावलक्षणसंबंधस्य वृत्तिनिर्गमनं विनापि स्थितानेस्वीकारात् वृत्तिनि
र्गमनस्य प्रत्यक्षतांविवरणकारणमयं संबंधो नाभिप्रेत इत्याह विषयविषयिभावमात्रमिति परोक्षस्थलसाधारणविषया
विषयिभाव इत्यर्थः तन्नियामकत्वमिति विषयविषयिभावसंबंधस्तच्छब्दार्थः वृत्तिनिर्गमनाभावेपि यदि विषयचैतन्यजीवस्य
सएव तस्य प्रकाशयोनास्य इति नियमसिद्धेर्विषयान्तरप्रकाशकत्वापत्तिरूपोतिप्रसंगो नास्तीत्यर्थः संयोगादेरपि निरस्तत्वात्
कः संबंधस्तदभिमत इति पृच्छति किंत्विति अभिमतसंबन्धमाह विषयसन्निहितेति विषयव्यापितयोपन्नावृत्तिप्रतिविषयस

सि॰ ले॰
मु॰ टी॰
७०

त्विति तज्जीवचैतन्यस्यापि व्यवधानतया हेतेस्तत्तादात्म्यं वाऽयं तस्यापीति विषयसन्निहितजीवचैतन्यस्यापि विषयावभासकत्वेनाभि
मतस्याविषयेण सह वृत्तिविषयसंयोगद्वारकः परंपरासंबंधः विषयसंयुक्तवृत्तितादात्म्यलक्षणो लभ्यत इत्यर्थः उक्तसंबन्धस्य वृ
त्तिनिर्गमनं विनाऽसंभवान्न निर्गमनविवरणवैयर्थ्यमिति भावः स्वत्वादेरान्तरपदार्थस्यापरोक्षत्वेन तत्प्रकाशकजीवचैत
न्येन सह तस्य साक्षात्संबंधः प्रयोजकत्वेन क्लृप्तः एवं वा सुखदुःखादीनामपरोक्षत्वेऽपि साक्षात्संबंधप्रयुक्तम् अन्यथा विषयाप
रोक्ष्ये क्वचित्साक्षात्संबंधः क्वचित्परंपरासम्बन्धः प्रयोजक इति द्वैरूप्यापत्तेः संभवति साक्षात्संबंधे परंपरासंबंधकल्पना
योगाच्च तस्याप्याचार्याभिमतः संबंध इत्याह अपरोक्षत्विति तस्मादिति परंपरासंबंधस्यानभिमतत्वादित्यर्थः वृत्तेरि
ति वृत्तेर्विषयेण संयोगे सति वृत्त्युपादानजीवचैतन्यस्यापि विषयेण सह संयोगजसंयोगः संभवति एतदुक्तं भवति जीवचै

अपरोक्षसाक्षादपरोक्षचैतन्यसंसर्गिणः सुखादेरपरोक्षदर्शनादपरोक्षविषये साक्षात्संसर्ग एव वक्तव्यः तस्माद्वृत्तेर्विष
यसंयोगे वृत्तिरूपावच्छेदकलाभात् तदवच्छेदेन तदुपादानस्य जीवस्यापि संयोगजसंयोगः संभवति कारणाकारण
संयोगात्कार्याकार्यसंयोगवत् कार्याकार्यसंयोगात्कारणाकारणसंयोगस्यापि युक्तितौल्येनाभ्युपगन्तुं युक्तत्वादि
त्याहुः एकदेशिनस्त्वतः करणोपहितस्य विषयावभासकस्य चैतन्यस्य विषयतादात्म्यापत्त्या ब्रह्मचैतन्याभेदाभिव्य

तन्यस्य वृत्तिकार्यत्वं अकार्यो विषयः वृत्तिर्जीवचैतन्यमुपादानकारणं तस्या वृत्तेर्विषयोऽनुपादानकारणं तथा च वृत्तिवि
षययोर्जीवचैतन्यं प्रति कार्याकार्ययोः संयोगाज्जीवचैतन्यविषययोर्वृत्तिं प्रति कारणाकारणयोः संयोगोऽस्ति संयोगजसंयो
गोऽविवादित इति ननु कार्यं प्रति कारणभूतहस्तस्य तं प्रत्येवाकारणभूततरुणा संयोगात् हस्तकार्यकायस्य हस्ताकार्य
तरुणा सह संयोगोऽपेयते हस्ततरुसंयोगदशायां शरीरे हस्तावच्छेदेन तरुः कायसंयुक्त इत्यनुभवादित्याशंक्य प्रकृतेऽपि चेत
दोविषये वृत्तिसंयोगदशायां घटे वृत्त्यवच्छेदेन घटः स्फुरतीति जीवचैतन्यसंसृष्टत्वानुभवादित्याशयेनाह कारणाकारणेति ७०
युक्तितौल्येनेति उभयत्र कल्पनानुभवरूपायुक्तेस्तुल्यत्वेनेत्यर्थः ननु विषयदेशसन्निहितस्यापि जीवचैतन्यस्य वृत्त्युपादान

त्वं विवरणाचार्याणामभिमतं न भवति जीवस्यान्तःकरणोपादानत्वाभावेपि सास्नादिमद्व्यक्तौ गोत्वसामान्यस्येव स्वभावादेव।
जीवस्यान्तःकरणादौ संबन्धः इत्यस्यार्थस्य एव विषयासंगेपि जीवः स्वभावादन्तःकरणेन संसृज्यत इत्यत्र प्राक् विवरणमतत्वे
नप्रतिपादितत्वात् ततश्च जीवचैतन्यस्य वृत्तिं प्रत्युपादानकारणत्वाभावेस्मत्कसंबन्धो न सिध्यतीति संयोगजसंयोगोपि ना
चार्यसंमत इत्यस्वरसादाह एकदेशिनस्त्विति घटादिविषयाभासकजीवचैतन्यस्य घटादिना विषयेण सह तादात्म्यसंबन्धसंपा
दनमेव वृत्त्युपरागत्वेनाभिमतमित्यर्थः ननु स्वस्यापि पूर्वसिद्धयोर्विषयचैतन्ययोस्तादात्म्यस्य न संभवत्साधनमिति शङ्क्युक्त
त्वात्कथं तत्संपादनमत आह विषयतादात्म्यापन्नेति बिंबभूतब्रह्मचैतन्यस्य घटादिविषयोपादानतया ब्रह्मविषययोस्तादा
त्कि द्वारा विषयतादात्म्यसंपादनमेव चिदुपरागोऽभिसंहितः सर्वगतत्वात् सर्वविषयसन्निहितस्यापि जीवस्य तेन रूपेण विषया
भासकत्वेन स्वसाधारणतया अकृष्टविशेषापरोक्षत्वव्यवस्थित्ययोगेन तस्यान्तःकरणोपहितस्वरूपेणैव विषयाभासकत्वात्
एवं चाविषयापरोक्षे आध्यात्मिकसंबन्धो नियामक इति सिद्धान्तेपि संगच्छते न चैवं द्वितीयपक्षसांकर्यं जीवस्य सर्वगतत्वेन प्र
थमः पक्षः परिच्छिन्नत्वे द्वितीय इत्येवं तयोर्भेदादित्याहुः अथ द्वितीयपक्षे कोयमभेदाभिव्यक्तिः केचिदाहुः कुल्याद्वारा तडाग
केदारसलिलयोरिव विषयान्तःकरणावच्छिन्नचैतन्ययोर्वृत्तिद्वारा एकीभावोऽभेदाभिव्यक्तिः एवं च यद्यपि विषयावच्छिन्न
तस्य प्रमातो वासिद्धं तथा च विषयतादात्म्यापन्नब्रह्मचैतन्येन सह विषयावभासकजीवचैतन्यस्य वृत्तिकृताभेदाभिव्यक्तौ सत्यां जीव
चैतन्यस्य विषयतादात्म्यं वृत्त्यधीनतया लभ्यते अभेदाभिव्यक्तिप्रकारश्च वक्ष्यते अतो न तादात्म्यसंपादनानुपपत्तिरिति भावः वि
षयावभासकजीवचैतन्यस्यान्तःकरणोपहितस्येति यद्विशेषणं दत्तं तत्प्रयोजनमाह सर्वगततयेति तेनेति सर्वगतत्वेनेत्यर्थः न
स्येति जीवस्येत्यर्थः साधारणतयेति सर्वपुरुषसाधारणतयेत्यर्थः पुरुषपदं प्रमातृपरं अविद्याप्रतिबिंबो जीव इति पक्षे जीवभेदा
भावात् अयोगेन तस्येति जीवस्येत्यर्थः तथा च सर्वगतमपि जीवचैतन्यं यत्पुरुषस्यान्तःकरणोपहितं सद्यमर्थमवभासयति
सोर्थस्तस्यैवापरोक्षो नान्यस्येति व्यवस्थितिसिद्धये अन्तःकरणोपहितत्वविशेषणं वाच्यमित्यर्थः एकदेशिमते लाभमाह एवं च

सि॰ ले॰
प्र॰ टी॰
७१

ति विषयावभासकजीवचैतन्यस्य वृत्त्या विषयतादात्म्यसंपादनोपगमे सतीत्यर्थः। आद्यास्तिकेति आद्यास्मिन्नतादात्म्यसंबंधपक्षेत्यर्थः
न चैवमिति संबंधार्था वृत्तिरिति प्रथमपक्षेऽपि वृत्त्याभेदाभिव्यक्त्युपगमे इत्यर्थः। सांकर्यं परिहरति जीवस्येति जीवस्य सर्वगतत्वमते
संबंधार्था वृत्तिरिति प्रथमपक्षः जीवस्यान्तःकरणोपाधिकतया परिच्छिन्नत्वमते अभेदाभिव्यक्त्यर्था वृत्तिरिति द्वितीयपक्ष इत्यर्थः। अ-
यंभावः प्रथमद्वितीयपक्षयोरुभयोर्वृत्तिकृताभेदाभिव्यक्तिसाम्येऽपि प्रथमपक्षे वृत्तिरभेदाभिव्यक्तिद्वारा विषयावभासकजीवचैत-
न्यस्य विषयेण सह तादात्म्यसंबंधसंपादनार्था द्वितीयपक्षे तु वृत्तिर्विषयावभासकजीवचैतन्यस्य विषयावच्छिन्नचैतन्येनाभेदाभि-
व्यक्त्यर्थैवेति न पक्षद्वयोः सांकर्यमिति। यद्वा प्रथमपक्षे जीवस्य व्यापकतया विषयदेशे सदा सन्निहितस्यैव विषयावभासकजीवचैतन्यस्य
विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभिव्यक्त्यर्था द्वितीयपक्षे तु जीवस्य परिच्छिन्नतया वृत्तिस्तस्य विषयसन्निधिं संपाद्य विषयाधिष्ठान-
ब्रह्मचैतन्याभेदाभिव्यक्तिमपि संपादयतीति तयोः पक्षयोरसांकर्यमयं परिहारो मूले सर्वगतत्वपरिच्छिन्नत्वपदाभ्यां सूचितः। पूर्वपरि-
हारस्तु प्रथमपक्षद्वितीयपक्षपदाभ्यां सूचितः। संबंधार्था वृत्तिरिति प्रथमपक्षे संबंधस्योद्देश्यत्वावगमादभेदाभिव्यक्त्यर्था वृत्तिरिति
द्वितीयपक्षे त्वभेदव्यक्तेरेवोद्देश्यत्वावगमादिति। अत्र मते विवक्षितविवेकेन वृत्तेरभेदाभिव्यक्तेरेव प्रयोजनं प्रथमद्वितीयपक्षयोः पर्य-
वस्यतीति तयोः सांकर्यं दुर्वारमिति तदभिप्रेत्याद्यावेवैकदेशिन इत्युक्तमिति मन्तव्यं। वस्तुतस्तु संबंधार्था वृत्तिरिति वदतामाचार्याणाम-
यमभिप्रायः विषयावभासकत्वेनाभिमतस्य चैतन्यस्य विषयेण घटादिना सह व्यंग्यव्यंजकतालक्षणः संबंधस्तत्तत्त्वस्य स्वरूपवृत्त्यधीनोऽत्र
विवक्षितः। तथाहि अन्तःकरणं स्वच्छद्रव्यत्वात् तत्र एव चैतन्याभिव्यंजनसमर्थं घटादिकं तु न तथा न भवति अस्वच्छद्रव्यत्वात्। घटादिवि-
षयव्याप्त्या तु वृत्त्या तत्राविद्यमानमस्वच्छमभिभूय चैतन्याभिव्यंजनयोग्यता आपाद्यत इति तदुक्तं विवरणाचार्यैरेव अन्तःकरणं हि स्वस्मि-
न्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति दृष्टं चाच्छस्यापि स्वच्छद्रव्यसंसर्गात् प्रतिबिंबग्राहित्वयोग्यत्वं य-
था कुड्यादेर्जलसंयोगकाले प्रतिबिंबग्राहित्वं घटादेः स्वसन्निहितजीवचैतन्यव्यंजकत्वं च तत्प्रतिबिंबग्राहित्वं चैतन्यस्यापि व्यापत्वं त- ७१
त्र प्रतिबिंबत्वमेव एवंविधव्यंग्यव्यंजकतालक्षणसंबंधार्थमेव वृत्तेर्निर्गमनमुक्तं विवरणे तथा च वृत्त्या बहिर्निर्गततया विषयचैतन्ययोर्य-

थोक्तसंबंधे संपादिते सति घटादौ प्रतिबिंबितं तत्त्वं जीवचैतन्यं तमवभासयतीति द्वितीयपक्षो हि जीवस्य परिच्छिन्नत्वमत इत्युक्तं ?
अस्मिन्मते अंतःकरणोपाधिकस्य जीवस्य विषयावच्छिन्नबिंबभूतब्रह्मचैतन्यस्य च वृत्त्याभेदाभिव्यक्तिर्न संभवति अखंडाकारवृ
त्तेरिव घटादिगोचरवृत्तेरुपाधिनिवर्तकत्वाभावेन भेदकोपाध्योरंतःकरणविषययोः सत्त्वे जीवब्रह्माभिव्यक्तेरयोगादित्यर्थः व्या
वर्तकोपाध्योः सत्त्वेपि तयोरेकदेशस्थत्वसंपत्तौ तत्कृतादभेदाभिव्यक्तिः संभवति लोके तथा दर्शनादिति परिहरति केचिदाहुरि
ति केदारः सस्यनिष्पत्तिस्थानं तथा च तडागस्थसलिलस्य कुल्याद्वारा केदारस्थसलिलस्य चाभेदाभिव्यक्तिर्यथा लोके प्रसिद्धा त
थांतःकरणावच्छिन्नचैतन्यरूपजीवस्य विषयावच्छिन्नब्रह्मचैतन्यस्य च वृत्तिद्वाराभेदाभिव्यक्तिर्भवति वृत्तेर्विषयदेशस्थत्वे सति
वृत्तिवृत्तिमतोरभेदेन जीवोपाध्यंतःकरणस्यापि विषयदेशस्थत्वसिद्धेरित्यर्थः एवं चेति अभेदाभिव्यक्तौ संभावितायामित्यर्थः

ब्रह्मचैतन्यमेव विषयप्रकाशकं तथापि तस्य वृत्तिद्वारैकीभावेन जीवत्वं संपन्नमिति जीवस्य विषयप्रकाशोपपत्तिरिति अ
न्ये त्वाहुः बिंबस्थानीयस्य विषयावच्छिन्नब्रह्मणः प्रतिबिंबभूतेन जीवेनैकीभावो नाभेदाभिव्यक्तिः व्यावर्तकोपाध्योर्द

ननु जीवचैतन्यस्य विषयावभासकत्वं न संभवति तस्य विषयं प्रत्युपादानत्वाभावेन तादात्म्यसंबंधाभावात् न च ब्रह्मचैतन्यमेव
विषयावभासकमस्तु तस्योपादानतया साक्षादेव तादात्म्यसंबंधलाभादिति वाच्यं तथा सत्यालोकेन घटः प्रकाशित इतिवन्म
या घटोऽवगत इति जीवचैतन्यस्येव घटप्रकाशकत्वावगमविरोधादिति मत्वा पुनः शंकते अभेदाभिव्यक्तिप्रयोजनं वक्तुं यद्य
पीति विषयप्रकाशकमिति इति वक्तव्ये तादात्म्यसंबंधलाभादिति शेषः तज्जीवचैतन्यमित्येवकारार्थः तथा च मयायमव
गतो घट इत्यनुभवविरोध इति भावः परिहरति तथापीति तस्येति तादात्म्यसंबंधेन विषयावभासकब्रह्मचैतन्यस्य वृत्तिद्वारां
तःकरणोपहितत्वप्राप्तौ जीवेनैकीभावाज्जीवत्वं संपन्नमिति ब्रह्मचैतन्यस्य विषयावभासकत्वं तज्जीवस्यैवेति तस्मान्नानुभ
वविरोध इत्यर्थः दर्पण इवेति यथा दर्पणे प्रतिबिंबस्थायां बिंबप्रतिबिंबयोरभेदाभिव्यक्तिर्नास्तीति तयोस्तदाभेदानुभवा

न्न तथा सत्यपि विषयादिरूपभेदकोपाधौ सत्यपि तस्मान्न संभवतीत्यर्थः नन्वत्तत्वसाक्षात्कारेणाशेषोपाधिनिवृत्तौ यादृशभेदाभिव्यक्ति
स्तादृशी न तत्र विवक्षिता किंतु क्षीरनीरयोरेकपात्रस्थयोरिव वृत्तिद्वारान्तःकरणविषययोरेकदेशस्थत्वसंभवेन तन्मात्रप्रयुक्तानवच्छि
न्नचैतन्ययोरौपचारिकाभेदाभिव्यक्तिर्विवक्षिता अस्यां चाभेदाभिव्यक्तौ नत्वावर्तकोपाधिसत्त्वप्रयुक्तो विरोधोऽस्तीति दर्पणे मुखप्र
तिबिंबदृष्टान्तायामपि मम मुखमेव दर्पणे भातीति बिंबप्रतिबिंबयोरभेदाभिव्यक्तिदर्शनात् अस्मिन्मतेपीत्थमेव निर्वाहः कर्तव्यः
नस्वान्तःकरणतद्वृत्तिप्रतिबिंबयोरभेदाभिव्यक्तिर्मुख्या संभवति वृत्तिवृत्तिमतोः कार्यकारणभावापन्नयोरैक्यायोगेन तत्प्रतिबिंबा
योगात् ऐक्ये वा एवं चेत्यादिना प्रमात्रादीनामस्मिन्मते सांकर्याभावोपपादनविरोधादित्यस्वरसादाह वृत्तिकृताभेदाभिव्यक्तेरिति
तदा तद्विषयेति विषयावच्छिन्नब्रह्मणो जीवत्वप्राप्तौ तस्येश्वरत्वनिवृत्तिरवश्यं वाच्या चैतन्यैकावच्छेदेन जीवत्वेश्वरत्वयोरसंभवा

र्णाद्ध्रुवजाग्रति तयोरैकीभावायोगात् वृत्तिकृताभेदाभिव्यक्त्या विषयावच्छिन्नस्य ब्रह्मणो जीवत्वप्राप्तौ ब्रह्मणस्तदा तद्वि
षयसंसर्गाभावेन तद्द्रष्टृत्वासंभवे सति तस्य सर्वज्ञत्वाभावापत्तेश्च किंतु विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टायां वृत्तेः
अग्रभागे विषयप्रकाशकं प्रतिबिंबं समर्पयतीति तस्य प्रतिबिंबस्य जीवेनैकीभावः एवं चान्तःकरणतद्वृत्तिविषयावच्छिन्न

त् न चाचत्तथा जीवत्वदशायां ब्रह्मणस्तद्विषयसंसर्गाभावेन तद्द्रष्टृत्वं न संभवतीत्यर्थः तस्येत्यनंतरं तदेत्यनुषंगः ननु विषयाधि
ष्ठानचैतन्यस्य वृत्तिसंसर्गदशायामन्तःकरणोपहितत्वप्रयुक्तमीश्वरत्वमप्यविरुद्धं तथा च बिंबभूतेश्वरस्य तदापि सर्वज्ञत्वमक्ष
तं अन्यथान्तःकरणाधिष्ठानचैतन्यस्य तदुपाधिकत्वप्रयुक्तजीवत्वे सदास्थिते सति बिंबभूतब्रह्मणः सदान्तःकरणादिसंसर्गाभाव
न तद्द्रष्टृत्वासंभवे सति सदा सर्वज्ञत्वाभावप्रयुक्तदोषस्तृतीयमतेपि तुल्य इत्यस्वरसमनसि निधाय कीदृशी तर्हि त्वदभिमताभेदाभिव्य
क्तिरिति पृच्छति किंत्विति तामाह विषयावच्छिन्नमिति अग्रभाग इति वृत्तिर्हि हृदयस्थान्तःकरणमारभ्य विषयपर्यन्तमविच्छिन्नाको ७२
तदभ्रमएणादिवद्दीर्घीभावमापन्नाति वाति तस्या वृत्तेर्विषयसंसृष्टो भागोऽग्रभाग उच्यते तत्रापि ब्रह्मणः प्रतिबिंबस्तस्याविष

यत्प्रकाशकस्य जीवेनैकीभाव इत्यभेदाभिव्यक्तिर्बिंबादिना वृत्तिवृत्तिमतोस्तादात्म्यरूपाभेदसत्त्वेन तत्प्रतिबिंबयोरभेदाभिव्यक्तिसं
भवादित्यर्थः एवं चेति वृत्तिप्रतिबिम्बस्यान्तःकरणप्रतिबिंबादुत्पत्तो भिन्नस्यैव सतस्तदभेदनाभिव्यक्तस्य विषयावभासकत्वेन।
स्वीकृते सतीत्यर्थः असंकरोपीति वृत्तिवृत्तिमतोस्तादात्म्यात्तत्प्रतिबिंबयोरभेदाभिव्यक्तिवदसंकरोप्युपपद्यते इत्यपिशब्दार्थः स्व
च्छदर्पणोपाधिनैवान्तःकरणेनोपाधिनाऽवच्छिन्नं तत्प्रतिबिंबचैतन्यं प्रमाता वृत्तिप्रतिबिंबचैतन्यं तयैवावच्छिन्नं प्रमाणं विषया
वच्छिन्नं ब्रह्मचैतन्यं प्रमेयमिति तेषामसांकर्यमुपपद्यते यावत्तकोपाधिसद्भावादित्यर्थः अस्मिन्मते असांकर्यमुपपद्यत इत्युक्त्वा
पूर्वमते विषयावच्छिन्नब्रह्मचैतन्यस्य जीवत्वप्राप्तिस्वीकारात्प्रमातृप्रमेयचैतन्ययोरसांकर्यं नोपपद्यत इति सूचितं वस्तुतस्तु पूर्व
मतेपि नसांकर्यं जीवब्रह्मभेदकोपाधिसद्भावसत्त्वात् तत्प्रयुक्ततयासर्वज्ञत्वादिव्यवस्थायाश्च साकृद्दर्शिनत्वादिति मंतव्यं शंकते नचेति

चैतन्यानां प्रमातृप्रमाणप्रमेयभावेनासंकरोप्युपपद्यते ननु वृत्त्युपहितचैतन्यस्य विषयप्रमात्वे तस्य विषयाधिष्ठानचैतन्ये
व विषयेणाध्यासिकसंबंधाभावाद्विषयापरोक्षे आध्यासिकसंबंधस्तंत्रं न स्यादिति वाच्यं विषयाधिष्ठानचैतन्यस्यैव विषये
णावच्छिन्नस्य वृत्तौ प्रतिबिंबनया तदभेदेन तत्संबंधसत्त्वादिति अपरे त्वाहुः बिंबभूतविषयाधिष्ठानचैतन्यमेव साक्षादा
ध्यासिकसंबंधलाभाद्विषयप्रकाशकमिति तस्यैव बिंबत्वविशिष्टरूपेणाभेदसद्भावेपि तदुपलक्षितचैतन्यात्मनैकीभावो

विषयेणाध्यासिकसंबंधाभावादिति संबंधः प्रमातृरूपस्य विषयोपादानत्वाभावेन तयोस्तादात्म्यासंभवात् तथा च विषयापरोक्षे आ
ध्यासिकतादात्म्यसंबंधो नियामक इति सिद्धान्तविरोध इति शंकाभिप्रायः बिंबप्रतिबिंबयोरभेदाभ्युपगमात् बिंबचैतन्यस्य विषये
ण सह यत्तादात्म्यसंबंधः स एव प्रमातृरूपप्रतिबिंबस्यापीति नायं सिद्धान्त इति परिहरति विषयाधिष्ठानेति तदभेदेनेति प्रतिबिंबचैत
न्यस्य बिंबाभेदेनेत्यर्थः बिंबप्रतिबिंबयोरभेदेसत्यपि कल्पितभेदसत्त्वात् बिंबसंबंधस्य प्रतिबिंबसंबंधत्वं नास्तीत्यस्वरसं सादात्पदेन
सूचयन्नभेदाभिव्यक्तिप्रकारान्तरेणाह अपरे त्वाहुरिति भेदसद्भावेपीति प्रतिबिंबत्वविशिष्टचैतन्यस्वरूपजीवेन सह [illegible] तदिति
बिम्बत्वप्रतिबिंबत्वाभ्यामुपलक्षितं शुद्धचैतन्यं तादात्म्येनेत्यर्थः नचैवं सतीति उपलक्षितचैतन्यात्मनाभेदाभिव्यक्त्यंगीकारे इ

सि॰ले॰
म॰टी॰
७३

वोक्तदोषदुष्टं नास्तीत्यर्थः अत्रेदं चिंत्यं उपलक्षितचैतन्यात्मनाएकीभावोनवास्तवाभेदः तस्यकृत्स्नानपेक्षितत्वात् नापिव्यावहारिका
भेदः विंवप्रतिविंवभेदस्यव्यावहारिकत्वेन तत्समसत्ताकाभेदासंभवात् नापिप्रातिभासिकोभेदः उपाध्यैरेकदेशस्थत्वमात्रेणविंवप्र
तिविंवचैतन्ययोः प्रातिभासिकाभेदसंभवेन तदर्थं चैतन्यमात्रोपलक्षणवैयर्थ्यादिति तृतीयपक्षमाक्षिपति अथेति निवर्ततेति अ
ज्ञानस्यैकत्वादितिभावः वस्तुनिवर्तते अतोनाज्ञाननाशः आवरणाभिभवः नचान्यःप्रकारःसंभवति अनुपलंभादितिभावः अज्ञा
नैक्यमेवावलंब्यपरिहरति अत्रकेचिदाहुरिति चैतन्यमात्रेति मात्रपदसाक्षिव्यतिरिक्तकृत्स्नचैतन्यपरं साक्षिणआवरणाभिभवस्यव
क्ष्यमाणत्वादिति एकदेशेननाशोवेति तथाचतन्मूलप्रपंचस्यननिवृत्त्यापत्तिरितिभावः प्रकारांतरानुपलंभोसिद्ध इत्याशयेनाह
मंदवदित्यादिना निरुक्तमावरणाभिभवं दूषयन् तत्प्रकारांतरेणनिर्वक्ति अन्येत्वित्यादिना पुनस्तत्रेति विषयावच्छिन्नचैतन्येआवरणो
भेदाभिव्यक्तिः नचैवंसतिजीवब्रह्मसांकर्यं नवाचब्रह्मणःसर्वज्ञत्वविरोधः किंवात्मनात्मस्वयथापूर्वमवस्थानादिति अथतत्ती
यपक्षेकोनामावरणाभिभवः अज्ञाननाशश्चेत् घटज्ञानेनैवाज्ञानमूलःप्रपंचोनिवर्ततेतिचेत् अत्रकेचिदाहुः चैतन्यमात्रा
वरकस्याज्ञानस्यविषयावच्छिन्नप्रदेशेखद्योतादिप्रकाशेनेवमहांधकारस्येवज्ञानेनैकदेशेननाशोवाकटवत्संवेष्टनंवाभीतभ
टवदपसरणंवाभिभवइति अन्येत्वज्ञानस्यैकदेशेननाशेउपादानाभावात्तत्रत्यकार्यदलनायोगेनसकृदर्पणातेसमंयानंतरेष्यावरणा
समयोगेनेत्यर्थः तत्तदिति तत्तद्विषयाकारवृत्तिसंसृष्टावस्थयाविषयावच्छिन्नचैतन्यंतदनावरकत्वमित्यर्थः ननुयथाघटेव्याप्यवर्तमा
नःपटस्तमावृणोत्येव एवंविषयावच्छिन्नब्रह्मचैतन्यंव्याप्यवर्तमानमज्ञानमपिचैतन्यमावृणोत्येवेतितदनावरकत्वकल्पनमयुक्तमि
तिशंकते नचेति अज्ञानेपटवैलक्षण्यस्यानुभवसिद्धत्वान्नैतच्चोद्यमवतरतीत्याह अहमिति तस्येति अज्ञानस्येत्यर्थः जीवचैतन्याश्रि
तमप्यज्ञानंनतदावृणोति तस्यावृतत्वेसर्वव्यवहारलोपप्रसंगादितिदहराधिकरणभाष्येसाधितत्वात् साक्षिचैतन्यस्यानावृतत्वायाव
त्समापकत्वाच्चेतिभावः प्रपंचोपादानमूलाज्ञानापेक्षयाअन्यदेवविषयावच्छिन्नचैतन्यावरकमज्ञानमितिवदादिज्ञानेनतन्निवृत्ताव ७३
पिनप्रपंचनिवृत्तिप्रसंगः तेनप्रपंचमूलाज्ञानानिवृत्तेवितिमतंदर्शयति अपरेत्विति अज्ञानभेदेमानमाह घटमिति विरोधित्वेनेति

नजानामीत्यज्ञानानुभवाभिलापकशब्देनञोविरोध्यर्थकत्वादभिलप्यानुभवोपिज्ञानविरोधिविषयकएव नचनजानामीत्य
ज्ञानानुभवोज्ञानप्रागभावविषयकएवनतुप्रागभावरूपाज्ञानविषयकइतिवाच्यं प्रागभावस्यैवासंप्रतिपत्तेरितिभावः तथा
त्वायोगादिति घटावच्छिन्नचैतन्यविषयकत्वनज्ञाननिवर्त्यत्वयोरयोगादित्यर्थः किंत्वज्ञानांतरमितिसंचयः अवस्थाभेदरूप
मिति अस्यविशेषणस्यप्रयोजनंवदन्नेते नचैवमेकैनेत्याद्धिंयस्यस्पष्टार्थः नन्ववस्थाज्ञानानिकिमनादीनि किंवाआदिमंति।
भावप्रसंगात्त्रिविक्षियस्यापसरणसंवेदनयोरसंभवाच्चनतयोरुक्तरूपोभिभवः संभवति अतश्चैतन्यमात्रावरकस्याप्यज्ञान
स्यतत्तदाकारवृत्तिसंसृष्टावस्थाविषयावच्छिन्नचैतन्यानावरकत्वस्वाभाव्यमेवाभिभवः नचविषयावच्छिन्नपरवृत्तिविष
यचैतन्यमात्रिस्त्यास्थितस्याज्ञानस्यकथंतदनावरकत्वंयुज्यतइतिवाच्यं अहमज्ञइतिप्रतीत्याहमनुभवेप्रकाशमानेचैत
न्यमात्रयतएवतस्यतदनावरकत्वप्रतिपत्तेरित्याहुः अपरेत्वेवंनजानामीतिघटाज्ञानविरोधिनेहघटज्ञानेसतिघटाज्ञा
नंनिवृत्तमिति तन्निवर्त्यत्वेनचानुभूयमानेनमूलाज्ञानेशुद्धचैतन्यविषयस्यनज्ञाननिवर्त्यस्यचतस्यनथात्वायोगात्
किंतुघटावच्छिन्नचैतन्यविषयंमूलाज्ञानावस्थाभेदरूपमज्ञानांतरमितितज्ज्ञापएवाभिभवः नचैवमेकेनज्ञानेनतदज्ञा
नेनष्टेतत्समानविषयाणांज्ञानांतराणामावरणाभिभावकत्वानापत्तिः यावंतिज्ञानानितावंत्यज्ञानानीत्यभ्युपगमादित्य
र्थः इमानिचावस्थारूपाण्यज्ञानानिमूलाज्ञानवदज्ञानत्वादनादीनीतिकेचित् आवरणीकोजगज्जीवावाहृत्यस्वाभो
नाद्यः मानाभावात् नद्वितीयः अज्ञानमनादीतिसिद्धांतविरोधादितिचेदत्रकेचिदाचार्यपदंसायणंनीत्याहुः इमानिचेति अवस्था
ज्ञानानिअनादीनि अज्ञानत्वान्मूलाज्ञानवत् नचदृष्टांतासिद्धिः देवताधिकरणेमूलाज्ञानानादित्वस्यप्रकृतिस्थायाभ्योसाधि
तत्वादितिभावः नचाज्ञानगतानादित्वेमूलाज्ञानत्वंप्रयोजकंनत्वज्ञानत्वमात्रमितिवाच्यं लाघवेनतन्मात्रस्यैवप्रयोजक

सि॰ले॰ म॰टी॰ ७४

त्वादितिभावः अवस्थाज्ञानानामादिमत्त्वे विच्छित्तिं नोपपद्यमन्ये साधयन्तीत्याह व्यावहारिकाविद्यादिना नचास्ति ... विरोधः अज्ञानानादि
त्वाभ्युपगमस्य मूलाज्ञानविषयत्वादितिभावः विमतान्यवस्थाज्ञानानि आदिमन्ति अवस्थाज्ञानत्वात् निद्रावत् सुषुप्तिवच्चेत्यनु
मानमभिप्रेत्य दृष्टान्तद्वये साधनसाध्ययोर्वैकल्यप्रथमं परिहरति व्यावहारिकाविति ऐतावस्थापदं मूलाज्ञाने व्यभिचारवारणा
र्थं आवृत्येति जाग्रत्कालीनो जागरूको चोयाद्दृष्टो प्रसिद्धो न तादृशावेव स्वप्नकाले उपलभ्येते अतस्तयोर्यथावदुपलभ्यासावरणव
रूपमितिभावः विदधतीति सृजतीत्यर्थः अज्ञानावस्थाभेदरूपेति अज्ञानस्य हि आवरणविक्षेपशक्तिमत्त्वलक्षणं तस्य स्वप्नका
रणीभूतनिद्रायास्तत्वादज्ञानत्वेनावस्थितं निद्राया वर्धमानरीत्यासादित्वेन साक्षान्मूलाज्ञानत्वायोगात् तदवस्थाविशेषरूपत्वं
सिद्धमिति प्रथमदृष्टान्ते न साधनवैकल्यमितिभावः तथा सुषुप्तिकाले मूलाज्ञानवदनुभूयमानात् सुषुप्त्यवस्थापि अज्ञानावस्था

जागरूको विक्षिपतीति निद्रान्तावदावरणविक्षेपशक्तियोगादज्ञानावस्थाभेदरूपा तथा सुषुप्त्यवस्थापि अन्तःकरणादौ विलीने
सुखमहमस्वाप्सं न किंचिदवेदिषमिति परामर्शदर्शनात् मूलाज्ञानवत् सुषुप्तिकालेनुभूयमानाज्ञानावस्थाभेदरूपैव त
यो जाग्रद्भोगप्रदकर्मोपरमेण स्वेचोद्भवात् सादित्वमिति तदवदस्य दृष्टान्तमवस्थारूपसादीत्यन्ये नत्वनादित्वपक्षेचरे

भेदरूपैवेतिसंबंधः ननु सुषुप्तिकाले मूलाज्ञानस्य सुषुप्त्येरनुभवो सिद्धस्तदा अहमहं स्वपामीत्यदर्शनादित्येन्याह सुखमहमिति
परामर्शः स्मरणं तु यथाचोत्थितस्य दृश्यमानपरामर्शोन्यथानुपपत्त्या तदा सुषुप्तिमूलाज्ञानयोरनुभवः साक्षिरूपः कल्प्यते अ
हमहमित्येवं हि आत्मान्तःकरणसंसर्गः प्रयोजकः तत्काले तस्य लीनत्वात् नाहमुल्लेखस्तदाशयेनाह अन्तःकरणादौ विलीनेपीति च
त्वारादिकमादिपदार्थः सुषुप्तिस्वरूपसाधनार्थः परामर्शकल्प्यसुषुप्त्यनुभवोपन्यासः सुषुप्तिकाले मूलाज्ञानाभावे सुषुप्तेस्त
दवस्थारूपत्वेन सिद्धेन् अतस्तदनुभवोपन्यासस्तदा मूलाज्ञानसत्त्वसाधनार्थः सुषुप्तेस्तदवस्थारूपत्वं परिशेषाद्ववगन्तव्य ७४

संशयादिजनकत्वाकतयातदावरणस्येष्टज्ञानभावानंतरेऽपि सत्त्वेऽपि विषयावभासस्तु २४२

सुषुप्तिकाले मूलाज्ञानातिरिक्तानामंतःकरणादीनां विलीनत्वेन तत्स्यात्तदवस्थानुपपत्त्यासंभवादिति सूचनार्थं चांतःकरणादिविला
पायन्यासः तथा च सुषुप्तिदृष्टांतेऽपि न साध्यवैकल्यमिति भावः दृष्टांतद्वयेऽपि साध्यवैकल्यं परिहरति तयोश्चेति निद्रासुषुप्त्यो
रित्यर्थः अन्यदपीति घटादिविषयावच्छिन्नचैतन्यावरकाज्ञानमपीत्यर्थः अवस्थाज्ञानानां सादित्वपक्षे प्रथमसुप्तत्वेन घटज्ञा
नेन तदुत्पत्तेः पूर्वं घटावरकत्वेन स्थिताज्ञानस्य नाशे सति पश्चादुत्पन्नमवस्थाज्ञानं पुनस्तमावृणोतीति अवस्थाज्ञानेऽपि तेषा
मनादित्वपक्षे तत्सानुसिद्धेरिति शंकते नन्विति प्राथमिकघटज्ञानेन तदज्ञानानां सर्वेषां नाशोऽस्ति न वा द्वितीयकल्पं दूषयति घ
टइति प्राथमिकज्ञानेन एकमेवाज्ञानं नश्यति नेतराणि अन्यत्र विनिगमकाभावात् सर्वाज्ञाननाशो वक्तव्यस्तथा च द्वितीयकल्पा
नुपपत्तिरित्यर्थः द्वितीयकल्पे एव विनिगमकाभावं दोषांतरमाह तदवच्छिन्नेति एकावरणनाशेऽप्यावरणांतराणां सत्त्वाद्विषयप्र
थमसुप्तत्वेनैवाज्ञानेन सर्वतदज्ञाननाशो भवेत् विनिगमनाविरहात्तदवच्छिन्नचैतन्यावरकसर्वाज्ञाननाशो विषयप्रका
शायोगात् पुनः पाश्चात्त्यज्ञानानामावरणानभिभावकत्वेन तदवस्थमेवेति चेत् अत्र केचिदाहुः यथाज्ञानप्रागभावानाम
नेकेषां सत्त्वेऽप्येकज्ञानोदये एक एव प्रागभावो निवर्तते अन्येषां यथा पूर्वं संत्येव तेषां सत्त्वेऽपि विषयप्रकाशप्रसंगो येष्वते तैरेवमज्ञापि
ध्यापकज्ञानोदये एकमेवाज्ञानं निवर्तते अज्ञानांतरेषु सत्त्वेऽपि विषयावभासइति अन्ये त्वाहुः तत्सापरोक्षविरुद्धैकज्ञानोदये च
काशानुपपत्तिरित्यर्थः एवं प्रथमकल्पं परिशेषयित्वा तं दूषयति अतइति प्रथमज्ञानेन सर्वाज्ञाननाशादित्यर्थः तदवस्थमेवेति
पाश्चात्त्यज्ञानानामावरणाभिभावकत्वसिद्ध्येति यावंति ज्ञानानि तावंति तन्निवर्त्याज्ञानानीत्युपगम्यते तदभ्युपगमेऽपि प्रथमज्ञाने
नैव सर्वाज्ञाननाशे सदोषस्तदवस्थ एवेत्यर्थः यथान्यायमते यावंति घटज्ञानानि तावंतो घटज्ञानप्रागभावाः संति तत्र प्रथमेन ज्ञा
नेनैक एव ज्ञानप्रागभावो निवर्तते अन्ये यथापूर्वं संत्येव तेषां सत्त्वेऽपि विषयप्रकाशप्रसंगो येष्वते तैरेवमज्ञापि योजनीयमिति परिहरति
अत्र केचिदाहुरिति ननु दृष्टांतो विषमः ज्ञानप्रागभावस्यानावरकत्वात् भावरूपाज्ञानस्य च विषयावरकत्वात् आवरणसत्त्वे च न
विषयप्रकाशोपपत्तिरिति नेत्याह संशयादीति विपर्ययस्यादिपदार्थः मिथ्यात्वेऽभावरूपाज्ञानस्यावरकत्वे सत्त्वानवभासनियमेव

स्वनिसंशयादिजननसमर्थत्वेनत्वपरमतेज्ञानप्रागभावरूपाज्ञानस्यापिसमानत्वेनतोनरूपस्थानेवैषम्यमितिभावः एकमेवेति फलबल
त्वादितिभावः नमननादित्यपदेषु स्यादित्यग्रन्थेनकृतादेपेमकारानरेणसमाधानमाह अन्येत्विन्यस्यवंदतीत्यनेनसंबन्धः स्वपरिहा
रेऽन्येषामसमिन्नेनमसत्वरसंस्वयंदर्शयति आवृतस्येति आवृतस्यापिपर्वतीयदहनादेः सिद्धांतेपरोक्षज्ञानांगीकारादपरोक्षज्ञानमित्युक्तं
यावदिति स्यादेवतदोसंशयादिविरोधिदर्शनप्रागभावमात्रेनसंशयादिजननसमर्थस्याण्वरयामीतिनिश्चयदशायामपितत्स्मानवि
षयकनिश्चयोत्तरस्याभावात्वेनतदापुरुषत्वस्फूर्तिमतः पुनरपिसंशयप्रसंगात् किंतुसंशयादिसमानविषयकनिश्चयाभावोयाव
त्तोऽभावास्तावत्तां समुदायः संशयादिजननसमर्थतयापरमतेविषयावरणत्वेनवाच्यः एकनिश्चयकालेचयावद्विशेषदर्शनाभाव
प्रागभावांतरसत्वेपियावद्विशेषदर्शनाभावकूटरूपमावरणंविशेषदर्शनात्तत्रास्तीतिमतन्मतमावदंति यदायदज्ञानमावृणो
तितदातेनज्ञानेनतस्यैवनाशः सर्वंचसर्वदानावृणोतिवैयर्थ्यात् किंत्वावरकाज्ञानेवृत्त्यानाशितेतुच्छस्यपरमेऽज्ञानान्तरमावृणो
ति नचैवंसतिब्रह्मावगमोत्पत्तिकालेनावरकत्वेनाऽस्थितानामज्ञानानांततोऽप्यनिवृत्तिप्रसंगः तेषामसाक्षात्तद्विरोधित्वाभावेपित
न्निवर्त्यमूलाज्ञानपरतंत्रतयाज्ञानसंबंधादिवत्तन्निवृत्त्यैवनिवृत्त्युपपत्तेः एतदर्थमेवतेषांतदवस्थाभेदरूपतयानत्पारतंत्र्यमिष्य
कूटरूपस्यपरमतेआवरणत्वेनसंमतस्यविशेषादर्शनस्याभावात् नपुनः संशयादिप्रसंगः नवाप्रथमघटादिज्ञानकालेपरमतेवि
षयप्रकाशानुपपत्तिः आवरणत्वाभिमतप्रागभावकूटाभावात् तस्मादावृतस्यापिविषयस्यप्रथमज्ञानसमयेप्रकाशःसंभवतीत्य
र्थनायंदृष्टांतःसंभवतीत्यर्थः नचैवमिति सर्वदासर्वेषामवस्थाज्ञानानामावरकत्वाभावेसतीत्यर्थः ततोपीति ब्रह्मावगमादपीत्य
र्थः निवृत्त्यभावप्रसंगेहेतुरनावरकत्वेनस्थितिः यद्यपिब्रह्मावगमोत्पत्तिकालेमूलाज्ञानवदवस्थाज्ञानान्यपिब्रह्मचैतन्यंविषयप्रदे
शोपावृण्वंतिप्रयुक्तदाब्रह्मावगमेनतत्सामान्यविषयमूलाज्ञानस्येवचैतन्यावरकत्वेनास्थितानामवस्थाज्ञानानामपिनिवृत्तिः स्या
त्समानविषयकत्वाविशेषात् तेषांतदनावरकत्वेनस्थितौतुनिवृत्तिर्नसंभवति तत्समानविषयकत्वाभावादित्यर्थः ततश्चविदेहके ७५
वल्येपितेषामनुवृत्तिप्रसंगादितिभावः एवंसत्यप्यनिवृत्तिप्रसंगइतिनचेतिसंबंधः तत्रहेतुमाह तेषामिति अत्रद्वितीयपक्षेतीयतद्

ह्यौ ब्रह्मावगमपर्यौ चानर्थनिवृत्त्योर्मूलाज्ञानपरः यथाज्ञाननिवृत्तौ चैतन्मात्राज्ञानयोः संबन्धो निवर्तते तस्य संबन्धज्ञानपरत्वेनत्वात् न
न्वादित्यर्थः ननु व्यस्याज्ञानानां मूलाज्ञानपरत्वे तत्त्वमप्रसिद्धमित्याशंक्याह एतदर्थमेवेति यथा संसारस्याज्ञाननिवृत्त्या निवृत्ति
सिद्धये तन्मूलकतया संसारस्य तत्त्वारतंत्र्यं कल्प्यते न तत्स्वकृतेऽपीत्यर्थः यद्वा क्रममवस्थाभेदरूपमिति विशेषणस्य प्रयोजनं व
दन्नतः इति तद्दर्शितमिति मन्तव्यं ननु नानादित्यपदादिना कृतात्तेपएव समाधानं प्रकारान्तरेण दर्शयति अपरे त्विति कल्पयंति
इति संबन्धः तेषामाशयं दर्शयंति अज्ञानस्येति ननु सर्वमज्ञानं स्वस्थितिकाले सर्वदा विषयमावृणोतीति नियमो नास्ति एकज्ञान
काले एकस्याज्ञानस्य नाशः इतरेषां तदा सत्त्वेऽप्यावरणशक्तिमत्त्वं यत्स्वपतिरस्कारस्य वद्यमानत्वेनैकज्ञानकाले नेषामावरकत्वा
नइति अपरे त्वज्ञानस्य सविषयस्वभावत्वादुत्सर्गतः सर्वं सर्वदावृणोत्येव न च विषयासत्त्वे आवरणीयाभावेनावरकत्वं न युज्यत
इति वाच्यं तदापि स्वरूपेण तत्सत्त्वादिति मन्यमानाः कल्पयंति यथा बहुजनसमाकुले महेशे कस्यचिच्छिद्रस्थितपतन्नशानि
वितरानप्यपसारयति यथा वा सन्निपातज्वरमौषधमेकं दोषं निवर्तयद्दोषान्तरं दूरीकरोति एवमेकमज्ञानं नाशयज्ज्ञानम
ज्ञानान्तराण्यपि तिरस्करोति तिरस्कारश्च यावज्ज्ञानस्थितिनिदावरणशक्तिमत्त्वं य इति ननैवं सति धारावाहिकस्थले द्वि
तीयादिवृत्तीनामावरणानभिभावकत्वेन वैफल्यं स्यात् प्रथमज्ञानेन च निवर्तनतिरस्काराभ्यामावरणमात्रस्याभिभवादिति
भावादित्यत आह उत्सर्गेति ननु सर्वं सर्वदावृणोतीत्युक्ते घटादिविषयोऽसत्त्वे सर्वकाले घटाद्यवच्छिन्नचैतन्यावरकत्वमज्ञाना
नां प्रतीयते तदनुपपन्नं तदानीमवच्छेदकविषयाभावेन तदवच्छिन्नचैतन्यस्यावस्याज्ञानेनावरणीयस्याभावादिति शंकामपनुदति
न चेत्यादिना तदापीति कार्यमात्रस्यासत्त्वे पूर्वकाले नाशोत्तरकाले चानभिव्यक्तरूपेणावस्थानस्य श्रुतिस्मृतिन्यायैः तत्र तत्र
पूर्वाचार्यैः साधितत्वादिभावः एवमिति ज्ञानैकत्वे यावत्ज्ञानस्थितिरिति सर्वं सर्वदावृणोतीत्युत्सर्गस्य ज्ञानस्थितिरपवादे हेतावि
तिभावः ज्ञानमात्रमज्ञाननिवर्तकमिति नियममाक्षिपति नन्वेवं सतीति एकेन ज्ञानेनैकाज्ञानस्य नाशः इतरेषां तिरस्कार इत्यपरा

मेसतीत्यर्थः वैफल्यं स्यादिति प्रज्ञाननाशादिप्रयोजनवत्वं तस्मादित्यर्थः तत्प्रयोजनस्य प्रथमज्ञानेनैव सिद्धत्वादित्याह प्रथमे
ति प्रथमज्ञानसिद्धस्यावरणतिरस्कारस्य द्वितीयादिज्ञानसाध्यत्वसाध्यलक्षणविशेषानुरोधेन संभवति प्रत्नो न द्वितीयादि
ज्ञाने वैफल्यं प्रज्ञाननाशरूपप्रयोजनाभावेपि तन्निरस्करणलक्षणफलस्य सत्वादिति परिहरति प्रत्याहुरिति प्रथमं धारावाह
नस्थले सिद्धमर्थं स्पष्टयन्नेव दर्शयति वृतितिरस्कृतमिति ब्रूतोयमिति प्रथमज्ञानं वेकमज्ञानेनाशयदि तद्ज्ञाने सर्वं तिरस्करो
ति तत्र तिरस्कृतमज्ञानं द्वितीयज्ञानोपरमसमये पुनस्तन्मावृणोति यदि पुनस्तादवस्थ्यं प्रथमज्ञानस्य च द्वितीयज्ञाननाशलक्षणं प्रत्य

प्रत्याहुः वृतितिरस्कृतमप्यज्ञानं तदुपरमे पुनरावृणोति प्रदीपतिरस्कृतं तम इव दीपोपरमे वृत्त्युपरमसमये वृत्त्यंतरोदये
वृतितिरस्कृतमज्ञानं तथैवावतिष्ठते प्रदीपोपरमसमये प्रदीपांतरोदये तम इव तथा च यस्मिन्क्षणे प्रथमवृत्तेः यस्य सत्वं यद्व्य
तिरेके चासत्वं तज्जन्यत्वमिति प्रागभावपरिपालनसाधारणलक्षणानुरोधेनावरणस्य द्वितीयादिवृत्तिकार्यत्वस्यापि ला
भात्तन्न वैफल्यमिति न्यायचंद्रिकाकृतस्त्वाहुः केनचिज्ज्ञानेन कस्यचिदज्ञानस्य नाश एव न त्वावरकाणामज्ञानानां ति
रस्कारः तथा च धारावाहिकद्वितीयादिवृत्तीनामप्येकैकाज्ञाननाशकत्वेन साफल्यं न चैवं ज्ञानोदयेप्यावरणसंभवाद्विष

यांतरमुदेति तदा तिरस्कृतमज्ञानं तथैवावतिष्ठत इत्यर्थः यस्मिन्सत्यग्रिमक्षणे यस्य सत्वं यस्मिन्नसति यस्यासत्वं तत्तज्जन्यमिति सा
ध्यलक्षणं इदं च साधनादेः साधारणं तथा हि यस्मिन्दंडादौ सत्युत्तरक्षणे घटादिकार्यसत्वं दंडाद्यभावे सति च घटादिकार्यासत्वं तन्नो
घटादिकं दंडादिजन्यं तथा प्रायश्चित्ते सत्युत्तरक्षणे दुःखप्रागभावसत्वं प्रायश्चित्ताभावे सति दुःखस्योदयात् दुःखप्रागभावस्यास
त्वमिति तिरीत्या प्रायश्चित्तादेरपि दुःखप्रागभावस्य प्रायश्चित्तपरिपाल्यतया प्रायश्चित्तसाध्यत्वमुपपद्यते एवं प्रकृतेपि साध्यत्वं दर्शयति त
थाचेति द्वितीयवृत्त्युदयेसति प्रथमज्ञानसिद्धस्यावरणतिरस्कारस्योत्तरक्षणे सत्वं प्रथमज्ञाननाशक्षणे द्वितीयवृत्त्युदयव्यतिरेके ७९
चोक्ततिरस्कारस्यासत्वमिति प्रथमज्ञानकालएव सिद्धस्यापि तस्य द्वितीयवृत्तिजन्यतया तत्फलत्वमेवं तृतीयादिवृत्तीनामपि प्राव

रणातिरस्कारफलकत्वं योजनीयमित्यर्थः अनावरणस्येति आवरणतिरस्कारस्येत्यर्थः ज्ञानमात्रमज्ञाननिवर्तकं न भवति धाराव्याहि
कद्वितीयादिज्ञानेव्यभिचारादित्यत्रप्रकारान्तरेण परिहारं कुरुते न्यायचन्द्रिकाकृतस्त्विति नत्विति न चाज्ञानान्तराणां तिरस्काराभावप्र
कज्ञानकालेपि तैरतिरस्कृतैर्विषयस्यावृतत्वाद्विषयानुभवाभावप्रसंग इति वाच्यं प्रथमज्ञानोदयसमये एकमेवाज्ञानं विषयावरक
मितरेषां तदा विषयावरकत्वमेव नोपेयते अतो न तत्तिरस्करणापेक्षेति भावः ननु किं तत्राह तथा चेति आशयमविदुषः शंकामनूद्य नि
राकरोति न चैवमित्यादिना एवं सति प्रथमज्ञानेनावरकाज्ञानान्तराणामतिरस्करणे सतीत्यर्थः तत्तत्कालेति अवस्थाज्ञानानां सर्वे
षां सत्त्वात् ज्ञानस्यैव सर्वदा विषयचैतन्यावरकत्वं नास्ति वैयर्थ्यात् किंतु किंचिदज्ञानं कंचित्कालं विषयचैतन्यमावृणोति किंचित्काला
न्तरे तदावृणोति अनेन प्रकारेण कालविशेषोपलक्षितविषयचैतन्यावरकत्वं ज्ञानानामपि स्वस्वोदयकाले स्वस्वविषयावरकत्वेन प्र
यानवभासप्रसंगः अवस्थारूपाण्यज्ञानानि तत्तत्कालोपलक्षितस्वरूपावरकाणि ज्ञानानि च यावत्तत्कालोपलक्षितविष
यावरकाज्ञाननाशकानि तथा च किंचिद्विज्ञानोदये तत्कालीनविषयावरकाज्ञानस्य नाशाद्विद्यमानानामज्ञानान्तराणामप्य
कालीनविषयावरकत्वाच्च न तत्कालीनविषयानवभासे काचिदनुपपत्तिः कारीरीफले वृष्ट्या वा समनन्तरसमये वा ज्ञानविषये च
सत्त्वाज्ञाननिवर्तकत्वमित्यर्थः एवमाशयमस्फुटयन्नेदानीं विषयानवभासप्रसंगं परिहरति तथा चेति एकज्ञानकालेऽज्ञानान्तराणाम
नावरकत्वे सिद्धे सतीत्यर्थः तत्कालीनेति किंचिद्विज्ञानोदयकालीनविषयस्यावरकत्वेन प्रसक्ताज्ञानस्येत्यर्थः ननु तदिति किंचिद्विज्ञानका
लीनेत्यर्थः ननु तैस्तैः कालविशेषैर्विशिष्टस्यैव विषयस्य तत्तदज्ञानावरणीयत्वमित्येवं कालविशेषाणां विशेषणतया आवरणी
यकोटावनुप्रवेशो विज्ञायते तेषां किमित्युपलक्षणत्वं स्वीक्रियते इत्याशंक्य तथा सति धारास्थले आवरकत्वेन प्रसक्ताज्ञाननिवर्तक
द्वितीयादिवृत्तीनामपि तत्तत्कालविशेषविशिष्टविषयकत्वं वाच्यं समानविषयकत्वं विना तन्निवर्तकत्वानुपपत्तेस्तच्च न संभवति
तत्तद्भेदानामप्रत्यक्षत्वात् अतस्तेषामुपलक्षणत्वमाश्रितमिति समाधानमभिप्रेत्य समविशेषस्योपलक्षणत्वे दृष्टान्तमाह कारी
रीफले दृष्टाविति कारीनामकेष्टिफलमन्तावृष्टिर्विशिष्टसमासमनन्तरक्षण एव वक्तव्या न तु कालान्तरेण तदानीं शुष्यन्तः सस्यसंजीव

नैकाल्यं तत्रीयदृष्टेरुपयोगात् तथा चासन्नसमयस्य दृष्टिविशेषणतया फलकोटिप्रवेशो नोपपद्यते इष्टिं विनापि समयविशेष
सम्भवात् किं तु समयान्तरव्यावर्तकतयोपलक्षणत्वमेवाश्रितमित्यर्थः धारावहनस्थले द्वितीयादिवृत्तीनामावरणाभिभावकत्वेन
स्मृत्यादिस्थानेऽपि एवं परिहारं रीत्या दर्शयति केचित्त्विति प्रथमं वस्तुगतिमाह प्रथमज्ञानेनेति उक्तव्यवस्थायां प्रमाणत्वेनानुभवं दर्शय
ति अत एवेति उक्तविभागाभ्युपगमादेवेत्यर्थः ननूक्तविभागेन सिध्यति क्वचित्सकृद्दृष्टेऽपि वस्तुनि पूर्ववत्स्वरूपावरणानुभवादि
त्याशंक्याह विस्मरणशालिन इति तत्र तथास्त्विति पुनः स्वरूपावरणानुभवस्थले द्वितीयादिज्ञाननिवर्त्यमप्यज्ञानं स्वरूपावरक
मस्त्वित्यर्थः तथा चोक्तविभाग औत्सर्गिक इति भावः प्रमेति विस्मरणाभावस्थल इत्यर्थः नन्वज्ञानानां विशिष्टविषयकत्वे तेषा
मनिवृत्तिप्रसंगः सकृद्दृष्टवस्तुनि द्वितीयादिज्ञानानामपि प्रथमज्ञानवत्स्वरूपमात्रविषयकत्वेन तत्समानविषयकत्वरहितानां
तादृशैतत्कालस्योपलक्षणतया विषयकोटावनन्तर्भावेशेन सूक्ष्मतत्तत्कालभेदाविषयैर्धारावाहिकद्वितीयादिज्ञानैरज्ञानानां
निवृत्तावपि न काचिदनुपपत्तिरिति केचित्तु प्रथमज्ञाननिवर्त्यमेवाज्ञानं स्वरूपावरकं द्वितीयादिज्ञाननिवर्त्यानि तु देशका
लविशेषणान्तरविशिष्टविषयाणि अत एव सत्ता निश्चयरूपेऽज्ञाननिवर्तके सकृज्जाते चेत्र न जानामीति स्वरूपावरणं नानु
भूयते किं त्विदानीं सकृज्जातेति न जानामीत्यादिरूपेण विशिष्टावरणमेव विस्मरणशालिनः क्वचित्सकृद्दृष्टेऽपि न जानामीति
त्रिवर्तकत्वानुपपत्तेरिति नेत्याह ज्ञानानि चेति सकृद्दृष्टे विषये ज्ञानान्यपि चैत्र इदानीमज्ञास्त इमाकाराणि सन्ति विशिष्टविषयाण्ये
वेति स्वीकारान्नोक्तदोष इति भावः नन्वज्ञानानां विशिष्टविषयकत्वं धारास्थले द्वितीयादिवृत्तिव्यभिचारपरिहारार्थं हि कल्प्यते
तथा च तत्र ज्ञानानां किं घटिकाद्विघटिकाद्यात्मकस्थूलकालविशिष्टघटादिविषयकत्वं विवक्षितं किं वा क्षणात्मकसूक्ष्मका
लविशिष्टघटादिविषयकत्वं विवक्षितमिति विकल्प्य मनसि निधायोभयथापि धारास्थले द्वितीयादिवृत्तिव्यभिचारस्तादवस्थ्य ११
मिति शंकते न चैवं सतीति द्वितीयादिज्ञानानां तन्निवर्त्याज्ञानानां चोत्सर्गतो विशिष्टविषयकत्वे सतीत्यर्थः प्रथमज्ञानेनैवेति स्थू
लकालविशिष्टविषयकेनेति शेषः एवोपरेति धारास्थले हि ज्ञानानि क्षणस्थितिकानि तत्र पूर्वापरज्ञानकालभ्यो व्यावृत्ता

येऽस्तु सूक्ष्मकालाः क्षणलवकास्तैर्विशिष्टस्य विषयस्यावरकं यदज्ञानं तस्येत्यर्थः तदविषयैरिति सूक्ष्मकालविशिष्टाविषयकैरित्यर्थः
यत्रैकस्मिन्नेव घटे मुहूर्तादौ दीर्घकाले नैरन्तर्येण स्फुरणमस्ति तत्र घटे मुहूर्तादिगोचरवृत्तिरेकैव भेदमानाभावात् सिद्धान्ते वृत्तेः क्षणस्थि
तिकत्वानभ्युपगमात् तथा च न तत्र व्यभिचारशंकेत्याह धारावाहिकस्थलइति, ननु तत्र वृत्तेरेकत्वे धारावाहिकत्वप्रसिद्धिविरोधः एक
स्मात्तदसंभवात् ध्यानसमाध्योरप्येकाकारवृत्त्यावृत्तिरूपत्वाद्यतीतयोः शमयसंज्ञातिरूपत्वप्रतिपादकभाष्यादिविरोधश्च प्रसंगाच्चेत्या
शंक्य धारावाह्यनेकवृत्तिरूपत्वमंगीकृत्य व्यभिचारं परिहरति तदभ्युपगमेपीति संभवेनेति धारावाहिकतिशेषः उपपत्तेरिति द्वितीया
दिवृत्तीनामज्ञानानिवर्तकत्वदोषो नास्तीति शेषः धारावाहिकवृत्तीनां न्यायमतइव दक्षणस्थितिकत्वमप्येत्यापि व्यभिचारं परिहरति प्र
त्ववृत्त्यावरणं हत्यपते चेन्नत्र तथास्तु प्रथमवृत्तौ सूक्ष्मविशिष्टविषयाण्येवाज्ञानानि ज्ञानानि न चैवं सति धारावाहिकद्वितीयादि
ज्ञानानामज्ञाननिवर्तकत्वं न स्यात् स्थूलकालविशिष्टाज्ञानस्य प्रथमज्ञानेनैव निवृत्तेः पूर्वापरज्ञानव्यावृत्तसूक्ष्मकालविशि
ष्टाज्ञानस्य तदविषयैर्द्वितीयादिज्ञानैर्निवृत्त्ययोगादिति वाच्यं धारावाहिकस्थले प्रथमोत्पन्नाया एव वृत्तेस्तावत्कालावस्थायित्व
संभवेन वृत्तिभेदानभ्युपगमात् तदभ्युपगमेपि स्थूलकालावस्थायित्वेपि च वृत्तिरूपत्वसंभवेन परस्परव्यावृत्तस्थूलकालादि
विशेषणभेदविषयत्वोपपत्तेः प्रतिक्षणं घटने कवृत्तिसंतानरूपत्वाभ्युपगमेपि द्वितीयादिवृत्तीनामधिगतार्थमात्रविषय
तया प्रामाण्याभावेनावरणानिवर्तकत्वेप्युक्तानेष्टम् नहि विषयाबाधमात्रं प्रामाण्यं प्रागधिगतानधिगतयोः पर्वतत्तद्वृत्तिप्रा
तिक्षणोत्पद्यमिति प्रतिक्षणमुत्पत्तेः अनेकाभ्युपगमे नयस्तत्त्वं तानेत्यर्थः अभ्युपगमेपीति धारावाहिकतिशेषः उक्तानेष्टेति ज्ञानमज्ञान
निवर्तकमिति नियमभंगरूपा या हानिस्तदभावादित्यर्थः हान्यभावे हेतुमाह प्रामाण्याभावेनेति तत्र हेतुमाह अधिगतार्थमात्रेति अ
नधिगतार्थविषयकत्वाभावो मात्रपदार्थः तथा च द्वितीयादिवृत्तीनां नास्ति स्मृतिवदधिगतार्थमात्रविषयकत्वादित्यर्थः ननु नधि
गताबाधितार्थानुभवत्वं न भवति अबाधितानुभवपदव्यावृत्तयोर्भ्रमस्मृत्योरिवानधिगतपदव्यावृत्त्यभावात् तथा चाबाधितार्थानु

सि॰ ले॰
प्र॰ टी॰
७८

भवत्वमात्रं प्रमात्वं तच्च द्वितीयादिवृत्तिष्वप्यनुमितित्वनियमभंगरूपा हानिः स्यादेवेति नेत्याह नहीति प्रामाण्यमित्यनंतरं तथ्यास्तीत्यर्थः नैयायिकः शंकते न चेष्टापत्तिरिति इष्टापत्तिरिति न चेति संबंधः व्यवहारादर्शनादिति तथा प्रामाण्यप्रमाण्यव्यवस्थायाः व्यवहारानुसारित्वादनुमितेः पर्यवसायी प्रमाणत्वाभावेनालक्ष्यत्वे सिद्धे पर्यवसायानुमितौ प्रमात्वलक्षणत्वातिव्याप्तिपरिहाराय अनधिगतत्वविशिष्टविशेषणेन तल्लक्षणे देयमेव तत्र द्वितीयादिवृत्तीनां न प्रामाण्यमिति भावः अज्ञातत्वस्य प्रमालक्षणे प्रवेशोस्तीत्यत्र हेत्वंतरमाह विवरणइति विवरणे अज्ञातस्य प्रमावेद्यत्वोक्तेश्चेति संबंधः अत्रानुमानपदमनुमितिपरं प्रामाण्यपदमपि प्रमितिपरं प्रमालक्षणस्य प्रकृतत्वादिति बोध्यं नन्वज्ञानस्यानुमितिशाब्दार्थापत्तिरूपवृत्तिविषयत्वे कथं तस्य प्रमाणमवेद्यत्वमत आह साक्षिसिद्धस्येति अज्ञातोहमित्यनुभवरूपेण साक्षिणा ज्ञानस्वरूपस्याज्ञा

वकयोरनुमितिविषययोर्वा धर्म्यविशेषेणोभयत्राप्यनुमितेः प्रामाण्यप्रसंगात् न चेष्टापत्तिः वह्न्यनुमितिः प्रमाणमितिवत्पर्वतेप्यनुमितिः प्रमाणमिति व्यवहारादर्शनात् विवरणे साक्षिसिद्धस्याज्ञानस्याभावव्यावृत्तिप्रस्थापनार्थानुमानादिविषयत्वेपि प्रमाणावेद्यत्वोक्तिश्च तस्माद्द्वितीयादिवृत्तीनां प्रामाण्याभावादुपासनादिवृत्तीनामिवाज्ञाननिवर्तकत्वादज्ञातानुमित्यादेरज्ञानरूपे विषये अज्ञातत्वघटितप्रमात्वं नास्तीति मत्वा प्रमाणावेद्यत्वं तस्योक्तं न च साक्षिणः प्रमाणत्वात्कथं साक्षिमात्रतः प्रमाणावेद्यत्वमुक्तमिति वाच्यं साक्षितिरिक्तप्रमाणावेद्यत्वस्यैव विवक्षितत्वात् साक्षिणो नित्यत्वेन प्रमाकरणाजन्यतया परैरभिमतेश्चाज्ञानस्य साक्षिणः प्रमाप्रमाबहिर्भूतत्वेन प्रमाणत्वाभावात् तद्वेद्यत्ववचनमिति भावः ननु साक्षिप्रत्यक्षत्वसिद्धं चेदज्ञानं किमर्थं तर्हि तत्रानुमानाद्युपन्यस्यते तत्राह अभावव्यावृत्तीति अज्ञानस्य परैरभिमताज्ज्ञानाभावरूपात् व्यावृत्तिस्तत्स्थापनमर्थः प्रयोजनं येषामनुमानादीनां तानीतयेत्यर्थः एतदुक्तं भवति अहमज्ञ इत्यनुभवसिद्धमज्ञानं भावरूपमिति ७८
सिद्धांतिनः तज्ज्ञानमागभावरूपमिति वैशेषिकादयः तत्रश्चानुमानादिभिरज्ञानस्याभावप्रतियोगिकभेदः साध्यत इति न तेषां वेद्यत्वं

नचनस्यभावरूपत्वसाधनेवाकिंलभ्यतइति वाच्यं मायांतुप्रकृतिंविंद्यादित्यादिश्रुतिसिद्धस्यप्रपंचपरिणामस्योपादानत्वस्यसिद्धेस्तस्या
थनफलत्वात् तस्मादितिग्रंथेनतत्वबोधितप्रमाणलक्षणाभावादित्यर्थः उपासनादिवृत्तीनामिवेति उपासनारूपावृत्तिर्नज्ञानेहेतुमत
त्कारणजन्यत्वात् मनसोज्ञानकारणत्वस्यनिरस्तत्वात् निरसिष्यमाणत्वाच्च किंतुगमनादिवत्क्रियारूपापुरुषकृतिसाध्यत्वात् तस्मा
त्रोपास्यस्वरूपाज्ञाननिवर्तकाएवमिच्छाद्वेषादिवृत्तयोपिनस्वविषयाज्ञाननिवर्तकाः ज्ञानरूपत्वाभावात् द्वितीयादिवृत्तीनांतुस्फटिकव
ज्ज्ञानरूपत्वेपिनाज्ञाननिवर्तकत्वमुपपद्यते प्रमात्वाभावादित्यर्थः ननुकथंनहानिस्तासांप्रमात्वाभावेपिज्ञानत्वाभ्युपगमेनज्ञानमात्रमज्ञा
ननिवर्तकमितिनियमस्यव्यभिचाररूपहानेरावश्यकत्वादित्याशंक्याह प्रमाणवृत्तीनामेवेति नन्वधिगतार्थमात्रगोचरवृत्तीनामपी।
त्येवकारार्थः तथाचज्ञानमात्रमज्ञाननिवर्तकमितिनियमोनांगीक्रियतेनोक्तदोषःस्यादितिभावः अभ्युपगमादित्यनंतरंइत्याह
त्वेपिनहानिः प्रमाणवृत्तीनामेवतन्निवर्तकत्वाभ्युपगमात् ननुनायमपिनियमः परोक्षवृत्तेर्निश्चयेनाज्ञानानिवर्तकत्वादितिचेत् अत्र
केचिदाहुः द्विविधविषयावरकमज्ञानमेकं विषयाश्रितं रज्ज्वादिविक्षेपोपादानभूतं कार्यकल्प्यंपुरुषाश्रितमपरंतु विषयमहंन
जानामीत्यनुभवसिद्धं पुरुषाश्रितस्यविषयसंभिन्नविक्षेपोपादानत्वासंभवेनविषयाश्रितस्यविषयमहंनजानामीतिसाक्षिरूप
प्रकाशासंसर्गायोगेनद्विविधस्याप्यावश्यकत्वात् एवंचनिर्गमनस्थलेवृत्तेर्निर्गमनाभावात् दूरस्थवृक्षेप्रामत्ववाक्यात्परिमाणवि
रितिशेषः केचित्तिस्सुपक्रमात् प्रमामात्रमज्ञाननिवर्तकमितिनियमस्यापिव्यभिचारंशंकतेनत्विति परोक्षज्ञानस्यापितन्निवर्तकत्वस
त्वान्नव्यभिचारइतिवक्तुमज्ञानस्यद्वैविध्यमाह द्विविधमित्यादिना रज्ज्वादीति रज्ज्वादेर्योविक्षेपः सर्पादिरूपोविवर्तः तदुपादानभूतामि
त्यर्थः कार्यकल्प्यमिति विक्षेपाख्यकार्यानुपपत्तिकल्प्यंनत्वनुभवसिद्धमित्यर्थः ननुरज्ज्वादिगताज्ञानस्यरज्जुंनजानामीत्यनुभव
सिद्धत्वात्कथंतस्यकार्यैककल्प्यत्वमित्याशंक्यानुभवस्यविषयगताज्ञानेनाविषयइत्याह अन्यदिति अत्रविषयावरणमज्ञानंद्वि
विधं एकंविषयाश्रितमपरंतुपुरुषाश्रितमितिसंबंधः तथाचविषयाश्रितंसप्रमाणं प्रदर्श्यपुरुषाश्रितंसप्रमाणंदर्शयति इतिवा
अन्यदित्यस्यावतरणंबोध्यं नन्वेकेनैवाज्ञानेनसर्पादिविक्षेपस्यनजानामीत्यस्यानुभवस्यचसिद्धेः किमज्ञानद्वैविध्येनात आह पु

सि॰ले॰
कृ॰टी॰
७५

रूपाश्रितस्येति विषयेऽज्ञानादिरधिष्ठानं तत्संभिन्नो विषयस्तादात्म्यापन्नो यो विक्षेपस्तदुपादानत्वासंभवेनेत्यर्थः न जानामीत्याकार
कोऽयं साक्षिरूपः प्रकाशस्तत्संसर्गयोगेनेत्यर्थः इदानीं व्यभिचारं परिहरति एवं चेति अज्ञानद्वैविध्ये सतीत्यर्थः एवं च पक्षे तत्स्थले
विषयगताज्ञानानिवृत्तावपि शुद्धरूपगताज्ञाननिवृत्तिरस्त्येवेति संबंधः तथा च न व्यभिचार इति भावः परोक्षज्ञानस्य विषयगताज्ञान
निवर्तकत्वाभावे हेतुमाह वृत्तेरित्यादिना निर्गमनाभावादिति विषयचैतन्यसंसृष्टायाः प्रवृत्तेर्विषयचैतन्यगताज्ञाननिवर्तक
त्वस्य दृष्टमार्गेण तथा निर्गमनाभावे वृत्तिविषयसंसर्गो न सिध्यतीति भावः तद्विपरीतेनेति दूरे दृश्यमानो वृक्षः सन्निहितवृक्षवन्महानि
माप्तवाक्यजन्यपरोक्षज्ञानविषयभूतात् दूरस्थवृक्षगतात्तस्मात्परिमाणविशेषाद्विपरीतो यः परिमाणरूपविक्षेपविशेषः तस्य द

शेषाद्यवगमेऽपि तद्विपरीतपरीतपरिमाणविक्षेपदर्शनाच्च विषयगताज्ञानानिवृत्तावपि शुद्धरूपगताज्ञाननिवृत्तिरस्त्येव शास्त्रा
र्थं न जानामीत्यनुभूतात्ताज्ञानस्य तदुपदेशानंतरं निवृत्त्यनुभवात् अत एवानुमेयाद्दोषस्तु सिद्धवृत्तिरिति विवरणे तद्विषयाज्ञान
निवृत्तिरर्थ इत्युक्तं तत्त्वदीपने इति अन्ये तु नयनपटलवत् शुद्धरूपाश्रितमेवाज्ञानं विषयावरणं न तदतिरेकेण विषयगताज्ञाने
प्रमाणमस्ति न च शुद्धरूपाश्रितस्य विषयगतविक्षेपपरिणामित्वं न संभवति तत्संभवे वा दूरस्थवृक्षपरिमाणे परोक्षज्ञानादज्ञान

र्शनादित्यर्थः यदि परोक्षज्ञानं विषयगताज्ञाननिवर्तकं स्यात् तदाप्तवाक्यजन्यावगमेन परिमाणविशेषाज्ञाननिवर्त्यस्य विपरी
तपरिमाणरूपकविक्षेपोत्पत्तिर्न स्यात् तदुपादानाभावादिति भावः परोक्षज्ञानेन शुद्धरूपगताज्ञाननिवृत्तौ हेतुमाह शास्त्रार्थमिति न
जानामीत्यनेन प्रकारेणानुभूतशास्त्रार्थाज्ञानमनुभूतं तत्स्य शास्त्रोपदेशानंतरं शास्त्रार्थाज्ञानमिदानीं निवृत्तमिति निवृत्तिरनुभूयते त
त्र शास्त्रार्थो द्विविधः धर्मरूपो ब्रह्मरूपश्च धर्मरूपशास्त्रार्थोपदेशजन्यज्ञानं परोक्षमेव न तु कदाचिदप्यपरोक्षं तस्य साक्षात्कारायो
ग्यत्वात् तथा च तत्र विषयगताज्ञाननिवृत्तिप्रसक्तिरेव नास्तीति शुद्धरूपगताज्ञानमेव निवर्तत इति वक्तव्यं इतरथा तन्निवृत्त्यनुभवविरोधात् ब्र
ह्मरूपे च शास्त्रार्थोपदेशजन्यज्ञानं परोक्षं तावन्मात्रात् विषयावरकमूलाज्ञानं विषयगतं न निवर्तते मननादिविधिवैयर्थ्यप्रसंगात् अ ७५
तः शुद्धरूपगताज्ञानमेव निवर्तत इति वक्तव्यमन्यथा तत्रापि तन्निवृत्त्यनुभवविरोधादेवेति भावः परोक्षज्ञानस्याज्ञाननिवर्तकत्वे विवरणा

दिसंमृतमाह अत एवेति उक्तानुभवस्याभावादेवेत्यर्थः नहि विषये सत्वेन सदसत्त्वमेयादिपरं सत्पुप्तिपदमज्ञानपरं आवृतिपदं निवृत्तिपरमिति व्या
ख्याने तत्र दोषपने तथा चानुमेयादौ विषयगताज्ञाननिवृत्तमात्रस्य वृत्त्यमाणत्वया तत्र पुरुषगताज्ञाननिवृत्तिरनुमित्यादिपरोक्षज्ञा
नेन जायत इत्ययमर्थस्तत्रावि विवक्षित इति प्रतीयत इत्यर्थः अज्ञाने द्वैविध्याभावेऽपि प्रमाणात्ममज्ञाननिवर्तकमिति नियमस्य व्यभिचार
इति मतं दर्शयति अन्ये त्विति पुरुषगताज्ञानापेक्षया अन्यद्विषयगतमज्ञानं किं विषयावरणार्थमुपेयते किंवा शुक्तिरजतादिविक्षेपो
त्पत्त्यर्थं नाद्य इत्याह नयनपटलवदिति नयनगतकाचादिवदित्यर्थः न द्वितीय इत्याह नतावदिति रेकेणेति विषयगताज्ञानाभावे
पि वक्ष्यमाणविषयाविक्षेपोपपत्तिसंभवादिति भावः प्रमाणाभावोऽस्त्विति शंकते न चेति न संभवतीति पुरुषगताज्ञानस्य शु
क्त्याद्यवच्छिन्नचैतन्ये सत्त्वाभावादिति भावः पुरुषगतस्यैवाज्ञानस्य विषयगतविक्षेपोपादानत्वे दोषमाह तत्संभवेति पुरुषगता

निवृत्तौ विपरीतपरिणामविक्षेपो न संभवतीति वाच्यं वाचस्पतिमते सर्वस्य प्रपंचस्य जीवाश्रिताज्ञानविषयीकृतब्रह्मविव
र्तत्वेन तच्छुक्तिरजतादेः पुरुषाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वोपपत्तेः परोक्षवृत्त्यैकावस्थानिवृत्तावप्यवस्थांतरे

ज्ञानस्य विषयगतविक्षेपपरिणामित्वं न युक्तमित्यर्थः न संभवतीति विषयगताज्ञानस्यानभ्युपगमात्पुरुषगताज्ञानस्य चात्मोपदेशाज
मपरोक्षज्ञानेन निवृत्तत्वाच्चेति भावः आद्यं दोषं परिहरति वाचस्पतिमत इति शुक्तिरजतादिविक्षेपस्याज्ञानपरिणामत्वपक्षे अज्ञान
स्य विषयचैतन्यगतत्वं वक्तव्यं तस्याज्ञानपरिणामत्वानंगीकारपक्षे तु तस्य विषयचैतन्यगतत्वं नापेक्षितमिति भावः दार्ष्टांतिके
ब्रह्मपदं शुक्त्याद्यवच्छिन्नचैतन्यस्वरूपब्रह्मपरं अवच्छिन्नचैतन्यस्यैव शुक्तिरजताद्यधिष्ठानत्वोपगमादिति भावः विपरीतपरिणामरू
पो विक्षेपो न संभवतीति द्वितीयं दोषं परिहरति परोक्षवृत्त्येति परोक्षज्ञानादज्ञाननिवृत्तिर्विध्याद्यभ्युपयते तथापि हृतस्य लेशस्यापि
परोक्षज्ञाने विपरीतपरिणामोऽनतिरभ्युपयते तथा चानुभवद्वयानुरोधेन पुरुषाश्रितस्यैवाज्ञानस्य विषयावरकस्यैकदेशापरोक्ष
ज्ञानेन निवर्तनयकं देशांतरमनुवर्तत इति कल्प्यते न तु ज्ञानद्वैविध्यमुपगम्यते गौरवादिति भावः अवस्थांतरेणेत्यनंतरं पुरुषा

सि॰ले॰
प्र॰टी॰
८०

श्रितान्नाज्ञानस्यैवेति शेषः वृत्तौ नष्टायां परोक्षज्ञानस्याज्ञाननिवर्तकत्वमनेपेक्षितं तदुपरहितमेव परोक्षज्ञानमज्ञाननिवर्तकं मकृते च प्रमा
तुरो येन दूरत्वादिदोषमतिबन्धत्वात् प्रासवाक्यजन्यमपि ज्ञानं पुरुषगताज्ञाननिवर्तकं न भवति अतो न विपरीतपरिमाणोऽस्यानुप
पत्तिशंकावकाशः न च तथा सत्याप्तोपदेशानन्तरं दूरस्थवृक्षगतपरिमाणविशेषं न जानामीत्यनुभवापत्तिरिति वाच्यं सत्ता निश्चय
रूपपरोक्षज्ञानस्य सत्त्वेऽप्यज्ञाने तदनुभवप्रतिबन्धकत्वोपपत्तेः न च प्रमामात्रमज्ञाननिवर्तकमिति नियमस्य प्रतिबन्धपरोक्षप्रमायाम
भिचार इति वाच्यं अप्रतिबन्धस्य प्रमाविशेषणत्वोपपत्तेरिति बोध्यं एवमप्रतिबन्धप्रमामात्रमज्ञाननिवर्तकमिति नियममङ्गीकृत्य तदप
भिचाराय परोक्षज्ञानस्याज्ञाननिवर्तकत्वमुपपादितं इदानीं तथा नियमो नास्ति किं त्वप्रतिबन्धापरोक्षज्ञानमेवाज्ञाननिवर्तकमतो न प
रोक्षज्ञाने व्यभिचारशंकेति मतमवतारयति अपरे त्विति लोके घटादेर्मृदादिपरिणामस्य प्रसिद्धत्वात् तद्वत् शुक्तिरजतादेरपि परिणा
णा विपरीतपरिमाणविक्षेपोपपत्तेरित्याहुः अपरे तु शुक्तिरजतादिपरिणामोपपत्त्यां जस्याविषयावच्छेदेन पञ्चविषयगतमेवाज्ञा
नेतराचरणं न च तथा सत्यज्ञानस्यान्तःकरणोपहितसाक्षिसंसर्गेण ततः प्रकाशानुपपत्तिः परोक्षवृत्तिनिवर्त्यत्वासंभवश्चेति
मत्वं सिद्ध्यति तत्परिणामिवान्वयव्यतिरेकाभ्यां परिशेषसहकृताभ्यामज्ञानमेव सिद्ध्यति शुक्त्यादेः प्रातिभासिकरजतादिपरिणामित्वा
संभवाद्ज्ञानस्य विषयचैतन्यगतस्य यथा रजतादिविक्षेपपरिणामित्वमाजस्येनोपपद्यते न तु प्रमातृपुरुषाश्रितस्योपपद्यते अतस्तदुपप
मा जस्यानुरोधेन विषयगतमेवावस्थारूपमज्ञानमास्थेयं न तु पुरुषगतमप्यवस्थारूपमज्ञानान्तरं वैयर्थ्यात् मानाभावाच्चेति भावः
यद्यपि पुरुषाश्रितस्याप्यज्ञानस्य पुरुषमपरिच्छिन्नेऽपि वदीर्घप्रभामात्रेण वृत्तिद्वारा वहिर्निर्गत्य विषयचैतन्यमाश्रितस्य रजतादिपरिणा
मित्वमुपपद्यते तथापि साउपपत्तिर्निर्जासिमूलाज्ञानवदवस्थाज्ञानस्यानिष्क्रियत्वेन प्रभामात्रयानवतारादित्यभिप्रेत्य परिणामोपपत्त्या
जस्यादित्युक्तं तथा सतीति विषयावरकाज्ञानस्य विषयगतत्वे सतीत्यर्थः तत इति पंचमी सार्वविभक्तिकी इत्यर्थः असंभवश्चेति परोक्षवृत्ते
र्विषयदेशे निर्गमनाभावादिति भावः आद्यं दोषं परिहरति अवस्थारूपाज्ञानस्येति शुक्तिं न जानामीत्याद्यनुभवस्यावस्थाज्ञानविषयत्वे ८०

विषयतानेविषयः किंतुमूलाज्ञानं तस्यैवसादिसंसृष्टत्वादित्यर्थः नतुमूलाज्ञानस्यब्रह्मविषयकत्वात्कथंतस्यशुक्तिविषयकत्वानुभवः
संभवति अवस्थाज्ञानस्यवाकथंशुक्तिविषयकत्वानुभवःसंभवति तस्यापिशुक्त्यवच्छिन्नचैतन्यमात्रविषयकत्वात्शुक्तेरवस्थाज्ञान
विषयचैतन्यतादात्म्येनशुक्तिविषयकत्वानुभवोनविरुध्यत इतिचेत्तुल्यमुत्तरमित्यभिप्रेत्याह शुक्त्यादेरपीतिप्रथमिन्नतयेति जडमा
त्रस्यमूलाज्ञानविषयचैतन्येऽध्यस्ततयाशुक्त्यादेरपितत्तादात्म्यरूपेणतदभिन्नत्वमस्तीतिभावः शुक्तिंनजानामीत्याद्यनुभवस्यमू
लाज्ञानविषयकत्वेविवरणादिसंमतमाह विवरणादिष्विति नतुमूलाज्ञानसाधनप्रकरणेऽहमज्ञइत्याकारोयोऽनुभवःप्रदर्शि
तइतिवाच्यं अवस्थारूपाज्ञानस्यसादिसंसर्गेऽपितत्संसृष्टमूलाज्ञानस्यैवशुक्तिमहंनजानामीतिप्रकाशोपपत्तेः शुक्त्यादेरपि
मूलाज्ञानविषयचैतन्याभिन्नतयातद्विषयत्वानुभवाविरोधात् विवरणादिषुमूलाज्ञानसाधनप्रसंगेएवइदमहंनजानामी
तिप्रमातृप्रमाणेनयद्दर्शनात्ज्ञाहमज्ञइतिसामान्यतोऽज्ञानानुभवएवमूलाज्ञानविषयः शुक्तिमहंनजानामीत्यादिविषयवि
शेषालिंगिताज्ञानानुभवस्त्ववस्थाज्ञानविषयइतिविशेषाभ्युपगमेऽपिअवस्थावस्थावतोरभेदेनमूलाज्ञानस्यसादि
संसर्गोऽन्नासादिविषयचैतन्ययोर्वास्तवैक्याद्वाविषयगतस्याप्यवस्थाज्ञानस्यसादिविषयत्वोपपत्तेः यद्वाज्ञानस्या
ज्ञानानिवर्तकत्वेऽपितत्सत्त्वेऽत्रिवृत्त्यनुभवस्यसत्तानिश्चयरूपपरोक्षवृत्तिप्रतिबंधकप्रयुक्तानुभवनिबंधनत्वोपपत्तेः
तेः सएवमूलाज्ञानसाधकः इदमहंनजानामीत्यनुभवस्त्ववस्थाज्ञानविषयकएव नचप्रकरणविरोधः शंकनीयः शुक्तिरजता
दिलक्षणपरिणामोपपत्तयेऽवस्थाज्ञानस्यापिसाधनीयत्वेनमूलाज्ञानसाधनप्रकरणेऽपिप्रसंगात्तत्साधनोपपत्तेः यथेदंनजा
नामीत्यनुभवस्तत्तद्विषयावच्छिन्नचैतन्याज्ञानगोचरः एवमहमज्ञस्त्वंनजानामीत्यनुभवोमूलाज्ञानगोचरइतिदृष्टांतविषयामू
लाज्ञानसाधनप्रस्तावेऽपिविषयविशेषालिंगिताज्ञानानुभवप्रदर्शनोपपत्तेश्च नस्मादिदंनजानामिशुक्तिंनजानामीत्याद्यनुभ
वानांमूलाज्ञानविषयकत्वेप्रमाणाभावादवस्थाज्ञानविषयकत्वेऽस्यैवतत्साधनार्थकतयावक्तव्यत्वात्तत्स्वविषयगतत्वेसिद्धेसादि
संसर्गाभावात्तत्तदनुभवःसंभवतीत्याशयवतोऽशंकामनुवदति अहमज्ञइतीति विषयगताज्ञानस्यसादिनासहसाक्षात्संबंधा

वेपि परंपरासंबंधसंभवान्न तदनुभवानुपपत्तिरिति परिहरति अवस्थावस्थावतोरिति अभेदेनेति तादात्म्यमभेदः तथा च साक्षिसंसृष्टकला
ज्ञानावस्थात्वाद्विषयगताज्ञानस्य मूलाज्ञानद्वारा साक्षिसंसर्ग इत्यर्थः साक्षीति साक्षिचैतन्यस्यावस्थाज्ञानाश्रयविषयचैतन्यस्य
च वस्तुत एकत्वाद्वस्तुतः साक्ष्यभिन्नचैतन्याश्रितत्वसाक्षिणा सह विषयगताज्ञानस्य संसर्ग इत्यर्थः यदुक्तं परोक्षवृत्तिनिवर्त्यत्वं विषय
गताज्ञानस्य न संभवति परोक्षवृत्तेर्निर्गमनाभावात् तथा च प्रमामात्रमज्ञाननिवर्तकमिति नियमेन संभवति परोक्षवृत्तौ व्यभिचारा
दिति तत्रापरोक्षज्ञानस्याज्ञाननिवर्तकत्वाभ्युपगमेन तथा नियमानभ्युपगमान्न तथा नियमे तदभ्युपगमे परोक्षवृत्तौ व्यभिचारदोषो
भवेत् ननु तर्हि शास्त्रजन्यज्ञानानामीश्वरानुभूताज्ञानस्य तदुपदेशानन्तरं तन्निवृत्तमनुभवविरोध इति नेत्याह परोक्षज्ञानस्येति ननु इति प्र
रोक्षज्ञानादित्यर्थः भ्रान्तिनिवृत्त्युपपत्तेरिति न चात्र बाधकाभावात्कथं भ्रान्तित्वकल्पनमिति वाच्यं विषयगताज्ञानोपहितया उक्तयोगनाने
अपरोक्षज्ञानस्यैवाज्ञाननिवर्तकत्वनियमाभ्युपगमादित्याह ननु नायमपि नियमः अविद्याहंकारसुखदुःखादितद्धर्मप्रत्यक्ष
स्याज्ञाननिवर्तकत्वानभ्युपगमादिति चेन्न अविद्यादिप्रत्यक्षस्य साक्षिरूपत्वेन वृत्तिरूपापरोक्षज्ञानस्यावरणनिवर्तकत्व
नियमानपायात् अथ कोयं साक्षी जीवाद्व्यतिरेकेण व्यवह्रियते अत्रोक्तं कूटस्थदीपे देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वाव
च्छेदकस्य देहद्वयस्य साक्षात्द्रष्टृत्वान्निर्विकारत्वाच्च साक्षीत्युच्यते लोकेपि सौदासीन्यबोधाभ्यामेव साक्षित्वप्रसिद्धेः यद्यपि जीव
तादवस्थ्याज्ञानान्तरकल्पनागौरवस्य बाधकस्य सत्त्वादिति भावः कथं तर्हि प्रमाणवृत्तीनां तन्निवर्तकत्वाभ्युपगमस्तत्राह अपरोक्षज्ञान
स्यैवेति ननु परोक्षज्ञानसाधारणप्रमाणज्ञानमात्रस्याज्ञाने परोक्षज्ञाने व्यभिचार इत्येवकाराभिप्रायः तद्धर्मेति तद्धर्मोऽहंकारपरः
अनभ्युपगमादिति अविद्याहंकारादीनां स्वसत्ताकाले भाननियमेन तेषामावरणानंगीकारादित्यर्थः नियमस्य संकोचं च वदन् परिहर
ति नेति सुखादिधर्मिणोऽहंकारस्य साक्षिप्रमत्वविषयत्वोक्त्या अहमर्थे जीवापेक्षया भिन्नस्तत्साक्षी निर्दिष्टः सुखादिधर्मिणोऽहंका
रस्यैव लोके जीवत्वप्रसिद्धेः तथा च योयं जीवभिन्नः साक्षी व्यवह्रियते स नास्ति मानाभावादित्याक्षिपति अथेति यः साक्षी जीवाति ८१
रेकेण व्यवह्रियते अयं क इति संबंधः किंशब्द आक्षेपार्थः मानाभावासिद्धस्याशयेनाह अत्रोक्तमिति साक्षाद्दर्शनादिति अपरोक्ष

तथा द्रष्टृत्वादित्यर्थः निर्विकारत्वाच्चेत्यर्थः ननु द्रष्टृत्वं दृशिक्रियाकर्तृत्वं निर्विकारत्वं च कर्तृत्वादिविकाररहितत्वं तयोश्च तयोः परस्प
रविरोधः इति चेन्न द्रष्टृत्वस्य रूपप्रवक्तृ कूटस्थतत्कर्तृत्वस्य साक्षाद्द्रष्टरि संज्ञायामिति सूत्रानुसारेण साक्षीशब्दान्तनीतस्य सविनतिप्रका
शात्मके प्रकाशनइति प्रकाशकर्तृत्ववदप्यावश्यकत्वात् साक्षात् पादृष्टर्यर्थेइति प्रत्ययो भवति साक्षिपदस्य संज्ञात्वमिति सूत्रा
र्थः ननु साक्षिपदात् साक्षिलक्षणं वोकृतमात्रं प्रतीयेत न तु निर्विकारत्वेनरूपमौदासीन्यमपि तत्कथं साक्षिलक्षणेन निर्विकारित्व
मपि प्रतिपाद्यते तत्राह लोकेपीति अपि शब्दव्याख्यानमवधारणं तच्चौदासीन्यबोधकत्वयोः प्रत्येकलक्षणत्वशंकाव्यवच्छेदार्थं
हि शब्दव्याख्यानं प्रसिद्धपदं लोके हि द्वयोर्विवदमानयोः सतोस्तत्र भयामन्यस्तयोर्विवादस्यापरोक्षतयाबोद्धाऽउदासीनश्च यो भवति
ततः साक्षीत्युच्यते अत उदासीनत्वविशेषणमाविश्य केऽऽ उदासीन्यमात्रमुक्तं विवादस्थले स्तंभादेरप्यस्तीति तद्वारणाय बोद्धृत्ववि

स्य हृत्तयः संति देहद्वयभासिकाः तथापि सर्वतः प्रसृतेन स्वावच्छिन्नेन कूटस्थचैतन्येनैव तस्य तदाभासमेव देहद्वयं जीवरूप
चैतन्यप्रतिबिंबगर्भांतःकरणादिक्रियाविक्रियाऽजडत्वे वृत्तिज्ञाने भीस्येन अंतरालकाले तु सहकृत्सभावे कूटस्थचैतन्येन
शोषणमितिमतं च स्थूलसूक्ष्मात्मकदेहद्वयावच्छिन्नं स्वावच्छेदकदेहद्वयावभासकं चैतन्यं साक्षीति पक्षेन तत्संभवति तथाभूतचै
तन्येसमानाभावात् न च तदभावे देहद्वयावभासासिद्धिरिति वाच्यं प्रकाशात्मकांतःकरणवृत्तिभिरेव तत्सिद्धेरिति मत्वाशंकते यद्य
पीति जीवपदमहंकारात्मकांतःकरणपरं नित्यचैतन्यस्यागोगिकाभूपदेजडाहंकारानतिरिक्तजीवाभावात् वृत्तीनामंतःकरणपरि
णामतायाः काम संकल्पइत्यादिश्रुतिसिद्धत्वाच्चेतिबोध्यं वृत्तीनां दीपादिवत् प्रकाशात्मकत्वेपि तासां जडत्वाद्देहद्वयाभासक
त्वेनसंभवति स्वप्रकाशनित्यचैतन्याभ्युपगमेनत्वतनि विंबयुक्तानां तासां देहद्वयानुभवरूपत्वसंभवति अतस्ताद्दृशचैतन्यमेवोपे
यमित्यभिप्रायेणाह तथापीति किंच वृत्तीनामंतरालदशायां देहद्वयस्यास्फुरणे देहद्वयगोचरवृत्तीनां सद्भावकाले त्वहंकृतो
स्थूलोहमित्यादिरूपेण स्फुरमानेमित्यनुभवविरुद्धं तत्रास्फुरमानोपपत्तये वृत्तिज्ञानातिरिक्तं नित्यसाक्षिचैतन्यमुपेयमित्याशयेना

सि॰ ले॰ पं॰ टी॰ ८२

ह सर्वतः प्रसृतेनेति आभासेनेत्यर्थः देहद्वयं कूटस्थचैतन्येनेव चन्दाभ्यस्यमानमेव वृत्तिज्ञानैः स्फुटमवभासत इति संबंधः जीवचैतन्य
रूपो यः प्रतिबिंबस्तद्भानं तद्युक्तादित्यर्थः अनेनांतःकरणप्रतिबिंबो जीवः बिंबचैतन्यरूपः कूटस्थः साक्षीति जीवसाक्षिणोर्भे
दो दर्शितः यथाग्निनाऽयःपिंडादुत्पन्ना विस्फुलिंगाः साग्नय एवोत्पद्यंते एवं चैतन्यप्रतिबिंबोपेतादंतःकरणादुत्पद्यमाना वृ
त्तयोपि तत्प्रतिबिंबगर्भा एवोत्पद्यंते अतस्तासां देहद्वयानुभवरूपत्वं संभवतीति सूचयितुमंतःकरणस्य प्रतिबिंबगर्भत्वमुक्तं जाग्र
दवस्थायां देहद्वयस्य साक्षिचैतन्यमात्रादस्फुटतयाभानादवसरे दर्शयितुं विछिद्य विछिद्योक्तं तमेवावस्तं स्पष्टमाह अंतरालका
लेष्विति हिशब्दस्य व्याख्यानमेवकारः देहद्वयं वृत्त्यभावे स्फुटावभासत इति संबंधः वृत्त्यभाव इत्यस्य वृत्तीनां ध्वंसे इत्यर्थः उपलक्ष
णं चैतत् वृत्तीनामुत्पत्तिभिर्वृत्तिभेदैश्च सहेत्यर्थः अयं भावः नित्यचैतन्यानभ्युपगमे वृत्त्युत्पत्तिविनाशमध्यदेशः प्रोक्तनयाभानेन

वभास्यते अतएवाहंकारादीनां सर्वदाप्रकाशसंसर्गात्संशयाद्यगोचरत्वं अन्यज्ञानधाराकालीनाहंकारस्यैतावंतं कालमसि
द्महमप्रतिपत्तेऽविवासमित्यनुसंधानं च नच कूटस्थप्रकाशेनैव कथं जीवस्य व्यवहारस्स्यादित्यादिकमिति शंक्यं अन्योन्याध्यासे

स्यात् सोयमिति विनाशयोः स्वग्राहकत्वासंभवात् वृत्तिगोचरापरोक्षवृत्तीनां निरस्यमानत्वप्रसाधनयोर्हेत्वंतरग्राह्यत्वासंभवाच्च तस्मा
द्वृत्तिनाशादिसाक्षितयापि नित्यचैतन्यमुपेयमिति अत्रैवोपपत्त्यंतरं दर्शयति अत एवेति नित्यचैतन्यरूपसाक्षिसद्भावादेवेत्यर्थः
अहंकारप्राणशरीरादीनां योगपद्येन तद्धर्माणां सुखदुःखादीनां च सदाहंकारादिसत्ताकाले संशयादिनिवृत्तिलक्षणफलभाक्त्वं ताव
दनुभवसिद्धं नहि कदाचिदप्यहमासं न वा अहं वर्ते न वा अहं प्राणिमि न वा अहं ब्रह्मणो न वा इत्यादिप्रकारेणाहंकारादिसत्तासंश
यः कस्यचिदप्यस्ति तच्च तेषां सदाप्रकाशसंसर्गं विना न संभवति घटादीनां प्रकाशसंसर्गदशायामेव संशयाद्यगोचरत्वदर्शनात्
सदाप्रकाशसंसर्गित्वमहंकारादीनां जन्यज्ञानपक्षे न संभवति तेषामुत्पत्तिविनाशवत्त्वात् क्रमिकत्वात् मायेणवा सविषयगोच ८२
रत्वाच्च तस्मादहंकारादीनां संशयाद्यगोचरत्वनिर्वाहाय तेषां सदा साक्षिचैतन्यरूपप्रकाशसंसर्गो वाच्य इति भावः साक्षिसद्भावेऽप

पर्य्यंतरमाह अन्यत्वेनेति अहंकारग्रहणं धारांतर्गतवृत्तीनामुपलक्षणं नित्यानुभवरूपसाक्ष्यनंगीकारे द्विवश्रीकृस्मृतिगो-
चरवृत्तिसंततिकालीनाहमर्थस्य तत्कालवृत्तीनां च तत्काले जन्यानुभवासंभवे न संस्कारासंभवाउत्तरत्रानुसंधानेन स्मातृत्व
हि धाराकालेहंकारगोचरोऽगोचरो वा प्रत्येकं वृत्तिगोचरो वा जन्यानुभवः संभवति धाराविच्छेदप्रसंगात् वृत्तिसंततेर्विच्छावटित
सामग्रीकत्वेन तद्विच्छेदासंभवाच्च तस्मादन्यत्वेन धाराकालीनाहमर्थादिसाक्षितया नित्यानुभवो वाच्य इति भावः अनुसंधा
नं चेति संगृहीत इतिशेषः ननु साक्षिचैतन्येनानुभूताहमर्थतद्वृत्तीनां कथमहं पश्यन्नेवासमिति स्मरणं जीवस्य संभवति अ-
हमर्थभूतप्रमातृविवजीवापेक्षया विभक्तस्य कूटस्थचैतन्यात्मकसाक्षिणो भिन्नत्वादन्यानुभूतेर्थेऽन्यस्मरणयोगादितिशं-
कते न च कूटस्थेति स्वेन स्वतादात्म्यापन्नेन वाऽनुभूतार्थे स्वस्य स्मरणं भवतीत्यंगीकाराज्ञातिप्रसंगः नहि देवदत्तयज्ञदत्तजीवयोः
परस्परं तादात्म्यमस्ति येन देवदत्तानुभूतेर्थे यज्ञदत्तस्य स्मरणप्रसंग इति दोषो भवेदित्याशयेन परिहरति अन्योन्याध्यासेनेति ता

न च जीवैकत्वापत्त्या कूटस्थस्य जीवांतरंगत्वात् न च जीवचैतन्यमेव साक्षी भवतु किं कूटस्थेनेति वाच्यं लौकिकवैदिकव्य
वहारकर्तृत्वस्योदासीनद्रष्टृत्वासंभवेन साक्षी चेता केवलो निर्गुणश्चेति श्रुत्युक्तसाक्षित्वायोगात् तयोरन्यः पिप्पलं स्वाद्व

दात्म्याध्यासेनेत्यर्थः जीवस्य कूटस्थे कल्पितत्वस्य प्रागेव निरूपितत्वादिति भावः न चैवमपि सर्वदेहेषु साक्षिण एकत्वाद्देवदत्तसा
क्षिणानुभूते देवदत्ताहंकारादिषु यज्ञदत्तादेरप्यनुसंधानप्रसंगः यज्ञदत्तादेरपि देवदत्तसाक्षिण्येवाध्यस्ततया तदेकत्वापत्तेः
सत्त्वादिति वाच्यं देहद्वयरूपावच्छेदकभेदेन तत्तज्जीवतादात्म्यापन्नसाक्षिणो भेदाभ्युपगमात् अवच्छेदकभेदेन साक्षिभेदस्तत्रापि चेत्
मेव साक्ष्यवच्छेदकस्येति विशेषणं पूर्वमेव दत्तमिति बोध्यं ननु स्वजीवकूटस्थनामकं चैतन्यद्वयं तथापि जीव एव साक्षी किं न स्या-
दित्याशंक्याह न चेति किं कूटस्थेनेति किं कूटस्थस्य साक्षित्वेनेत्यर्थः ननु कूटस्थस्यैवाक्षेपः तस्य साक्षित्वात् उदासीनस्यैव
लोके साक्षित्वस्य प्रसिद्धत्वात् तदनुरोधेन श्रुत्यनुरोधेन च कूटस्थस्यैव साक्षित्वं न जीवस्येति परिहरति लौकिकेति साक्षिणाल

सि॰ले॰ म॰टी॰ ८२

त्वगुणमाह स्फूर्तिः चेताकेवलइति चेतावोद्धा केवलः अकर्ता उदासीनइतियावत् ज्ञानादिगुणकआत्मेतिवैशेषिकादिमतं स्फूर्तिः
स्वयमेवानिराकरोति निर्गुणश्चेति मध्यमपरिमाणः सक्रियआत्मेतिदिगंबरमतनिरासार्थमाकारः निष्क्रियश्चेत्यर्थः साक्षिणोजीवाद्भि
न्नत्वेस्फूर्तिमाह तयोरन्यइति जीवकूटस्थयोर्मध्ये कूटस्थादन्योजीवः पिप्पलंकर्मफलंस्वादुयथाभवतितथातिभुंक्तेशरीरस्थाम्ब
स्यवृक्षत्वेननिरूपितत्वात्कर्मफलस्यापिपिप्पलत्वेनाप्तं निरूपणमितिद्रष्टव्यं साक्षितिविशेषणेनगुणफलाभिप्रायेजीवादन्यः कूटस्थः
अनश्नन् अशानंकर्मफलभोगमकुर्वन् अभिचाकशीतिप्राभिमुख्येनापरोक्षतयाचाकशीति कुर्यादिप्रकाशतयाप्रकाशतइतिजाव
तअशानमश्नित्यनेनभोक्तृत्वनिषिद्धेसतिकर्तृत्वमपिनिषिद्धंभवति तथाचानश्नन्नभिचाकशीतीतिपदाभ्यामुदासीनत्वेसतिवोद्ध
त्वमनश्नन्नन्योऽभिचाकशीतिकर्मफलभोक्तृजीवादुदासीनप्रकाशरूपसाक्षिणः पृथगनश्नन्नन्योत्वेति नाटकदीपेपिन
तशालास्थदीपदृष्टांतेनसाक्षीजीवाद्विविच्यदर्शितः तथाहि नृत्तशालास्थितोदीपः प्रभुंसभ्यांश्चनर्तकीम् दीपये
दविशेषेणतदभावेपिदीप्यते तथाविदाभासविशिष्टाहंकाररूपंजीवंविषयभोगसाकल्येवैफल्याभिमानप्रयुक्तहर्ष
त्वरूपंसाक्षित्वंप्रदर्शितमित्यर्थः कूटस्थदीपेनिरूपितः साक्षीअस्मत्रापिदृष्टांतविशेषपूर्वकंस्तुतिसाधारणोनिरूपितइत्या
ह नाटकदीपेपीति दृष्टांतप्रतिपादकंतत्रसश्लोकंपठति नृत्तशालास्थितइति प्रभुंनृत्याभिमानिनंसभ्यांस्तत्परिसरवर्ति
नः अविशेषेणेति दीपोहिवृद्धिप्राप्यप्रभुंप्रकाशयति मध्यमावस्थाप्राप्यसभ्यान् ततोनिकृष्टावस्थांप्राप्यनर्तकीमितिप्र
काशतारतम्यानुसारेणवृद्ध्यादिविकारंप्राप्यनदीपयेत् किंत्वेकरूपेणैवस्थितः सन्प्रकाशयेदित्यर्थः इदंचविशेषणंदार्ष्टां
तिकेनिर्विकारस्यकूटस्थस्यसाक्षित्वज्ञापनार्थमितिमंतव्यं तदभावेपीति प्रभुसभ्याद्यभावेपीत्यर्थः अहंकारः प्रभुः सभ्या
विषयानर्तकीमतिः तालादिधारीण्यक्षाणिदीपः साक्ष्यवभासकइति दार्ष्टांतिकसंग्राहकमनंतरमितियावताह तथेतिजीवस्य ८२
न्याभिमानिप्रभुत्वतत्वंतत्कल्पनाप्रयोजकंसाम्यमाह विषयेति नृत्तसाकल्येवैकल्यप्रयुक्तहर्षादिमत्वंप्रभोरभिमानप

देन सूचितं यथा प्रभुपरिसरवर्तिनः तथा रूपादयो विषयाः जीवपरिसरवर्तिनः तथा च विषयाणां सभ्यसाम्यात् सभ्यत्वक
ल्पनं युक्तमित्याशयेनाह तत्परिसरवर्तित्वेपीति तत्पदं जीवपरं ननु जीवपरिसरवर्तिनामपि विषयाणां जीववत् प्रभुतुल्यत्वमेव
कुतो न कल्प्यत इत्याशंक्य तत्र योजकाभावादित्याशयेनाह तद्व्याप्तिरित्यादीति प्रभुतुल्यत्वकल्पकहर्षविषादादेरभावादित्यर्थः
यद्वा विषयाणां सभ्यपुरुषसाम्यमाह तद्व्याहृत्यादीति बुद्धेर्नर्तकीसाम्यमाह नानाविधेति यथा तालादिधारिणः पुरुषाः नर्त
कीमनुवर्तन्ते एवमिन्द्रियाण्यपि धियमनुवर्तन्त इत्यनेनेन्द्रियाणां तालादिधारिपुरुषसाम्यं श्लोकोपात्तं धियं चेत्यत्र चशब्दा
द्यर्थः जीवादीनामवभासकः साक्षी दीपवत्तुल्य इति चरमपद्यार्थः तं सर्वमस्त्वाति दीपयन्नित्यादिना प्रकाशयन्नित्यर्थः दीपयन्नि
त्यतः प्राकृतार्थदशावितिशेषः नाटकदीपे निरूपितः साक्षी कूटस्थदीपोक्तकूटस्थ एव नान्य इत्याशयेनाह चिदाभासविशि
विषादवत्त्वात् त्याभिमानिप्रभुतुल्यं तत्परिसरवर्तित्वेपि तद्व्याहृत्यात्सभ्यपुरुषतुल्यान् विषयान् नानाविधविकारवर्तित्वा
न्नर्तकीतुल्यां धियं च दीपवत्सुषुप्त्याद्यवस्थाहंकाराद्यभावेपि दीप्यमानं चिदाभासविशिष्टाहंकाररूपजीवभ्रमाधिष्ठान
कूटस्थचैतन्यात्मा साक्षीति एवं जीवादिविवेचितोयं साक्षी न ब्रह्मकोटिरपि किं त्वस्य जीवेश्वरविभागे चैतन्यमित्युक्तं कूट
स्थेति कूटस्थदीपे हि जीवभ्रमाधिष्ठानभूतं कूटस्थचैतन्यं जीवादेरवभासकमित्युक्तं नाटकदीपे च चिदाभासविशिष्टाहंकारं जीवं
कल्पयित्वा तदवभासकं चैतन्यं साक्षीत्युक्तं तत्र तत्रोक्तः कूटस्थ एवात्र साक्षीत्यवगम्यते अन्तःकरणप्रतिबिम्बरूपजीवाधिष्ठान
त्वेन तदवभासकत्वादिनिर्देशसाम्यात् तथा च नाटकदीपेपि नृत्यशालास्थदीपदृष्टान्तेन साक्षी जीवाद्विविच्य दर्शित इति पूर्वग्रन्थ
कूटस्थदीपे यः साक्षी जीवाद्भेदेन दर्शितः स एव नाटकदीपेपि ततो भेदेन दर्शित इति विवक्षितार्थः सिद्ध इति भावः साक्षी यथा जी
वकोटिर्न भवति जीवस्योदासीनाभावात् तथा चेश्वरकोटिरपि न भवति जगत्सृष्टिनियमादिव्यापारकर्तृत्वेनस्योदासीनत्वाभा
वादीश्वरस्य परोक्षतया जीवं प्रति दुःखादिसाक्षितया नित्यापरोक्षसाक्षिरूपत्वाभावाच्चेत्याशयेनाह एवं जीवादिति ब्रह्मपदमी

सि. ले. प्र. टी. ८४

स्वरूपं तत्त्व ह्यासीनचैतन्यपरं कस्तर्हि साक्षीति पृच्छति किं विति उत्तरं ग्रन्थस्यैति उक्तमिति इति शैवपुराणे भुकुरहस्यः शविचेचितः १
जीवेशत्वादिरहितः केवलः स्वप्रभः शिव इति श्लोकेनेति शेषः जगद्रूपत्वमादिपदार्थः केवलस्तूदासीनः शिवः शुद्धः परमात्मे
त्यर्थः ईश्वरत्वादिधर्मरहितश्चिदात्मैवात्रापि साक्षीत्वेनोक्त इति संवादार्थमाह तत्त्वप्रदीपिकायामपीति सर्वेषां जीवानामन्तः
करणगतचित्प्रतिबिम्बात्मकानां हृदयस्थत्वमधिष्ठानतया अन्तरं स्वरूपभूतं विष्णुं जीवेश्वरत्वजगद्रूपत्वरहितं ब्रह्मजीवाभेदेन
तत्तज्जीवाधिष्ठानत्वाद्देवतत्तज्जीवतादात्म्यापन्नाशतिशरीरं यामभेदेसन्तं साक्षीति प्रतिपद्यते इति शास्त्रः अकारवाच्योसत्त्वात् साक्षित्व
माह तथा च साक्षित्वं प्रतिपद्यते परमेश्वरस्यैव कश्चिद्रूपभेदः साक्षीनामकृतः देवत्वादिस्कृतेर्न तत्त्वोप्येश्वविलक्षणः साक्षिदेवता
स्यदीपे तत्त्वप्रदीपिकायामपि मायापाशवलितेन सगुणे परमेश्वरे केवलो निर्गुण इति विशेषणानुपपत्तेः सर्वभूतस्थं तं विष्णु
रूपं ब्रह्मजीवाभेदेन प्रतिपद्यत इति विदितं कौस्तुभान्ते को देवः स च भूते भूगूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्व
भूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति देवत्वादिस्मृतेः परमेश्वरस्यैव रूपभेदः कश्चिज्जीवप्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदा
दिस्कृतिविरोधादिवकारार्थः देवत्वादीत्यादिपदेन सर्वभूतान्तरात्मत्वादिधर्माग्रहणे ते एतदुक्तं भवति देवत्वादयो धर्माः स्मृतिस्थत्वा
दिषु परमेश्वरधर्मत्वेन प्रसिद्धा श्रुतिनान्यस्य साक्षित्वं देवत्वादिस्कृतिविरोधात् यद्यपि देवत्वं हिरण्यगर्भेन्द्रादिजीवसाधारणं तथापी
तरधर्माणामीश्वरासाधारणत्वाद्देवत्वमपीश्वरगतमेव ग्राह्यमिति भावः परमेश्वरस्यापि शिवविलक्षणत्वमनात्मासंभेदं निराचष्टे एकइति
विंभूतस्य परमेश्वरस्य मूर्तिभेदेन शिवविलक्षणत्वानत्वीश्वरभेदोस्तीत्यर्थः तथा च श्रुत्यन्तरं शाश्वतं शिवमच्युतमिति अच्युत
पदस्य विष्णोरूढत्वात् द्वावयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते इत्यादिस्मृतेर्नयोप्यत्र शातशोद्रष्टव्याः स्मृतो सर्वभूतेष्विति अनन्तरव
चनं इति शेषः तथा च स्मृतिः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ति
ष्ठतीति तर्हि किमिति सर्वेषां नोपलभ्यते तत्राह ॥ ॥

रत्नत इति तथा च स्मृतिः नाहं प्रकाशः सर्वस्य योगमायासमावृत इति श्रीकृ सोऽज्ञाहं पाह्वार्थः प्रकाशः प्रकाशमान इत्यर्थः परमात्म
नो भूतेषु अवस्थानाभ्युपगमे पि करणभेदात्तस्यापि भिन्नत्वशंकास्यान्नावारयति व्यापीति व्यापित्वेपि नभोवद्वस्तुतो जीवभिन्नत्वं
वारयति सर्वभूतान्तरात्मेति सर्वभूतानां ब्रह्मादिस्तंबपर्यंतसंघातानामन्तरवस्थित आत्मा सर्वजीवस्वरूप इति यावत्परमेश्वरस्य क
र्तृजीवाभिन्नत्वे तस्यापि तत्कर्तृत्वे स्यादिति नेत्याह कर्माध्यक्ष इति जीवकर्तृकर्मणां साक्षी न स्वयं तत्कर्तेत्यर्थः जीवपरमात्मनोः
रौपाधिकभेदेन धर्मव्यवस्थासंभवतीति भावः सर्वभूतेष्वित्यादिना परमात्मापेक्षया भेदेन भूतानां निर्देशात्तस्य सहितीयत्वमाशंक्या
ह सर्वभूताधिवास इति अधि उपरि वसंत्यस्मिन्भूतानीत्यधिवासोधिष्ठानं सर्वेषां भूतानामधिवासः न चाधिष्ठानातिरेकेणारोपितानां
पृथक्सत्त्वमस्तीति नाद्वितीयत्वविरोध इति भावः न केवलं जीवगतकर्मणामेव साक्षी किंतु जीवानामपीत्याशयेनाह साक्षीति श्रु

स च कारणत्वादिधर्मानास्पदत्वादपरोक्षो जीवगतमज्ञानाद्यवभासयन् जीवस्यांतरंगः स पुरुषाद्यैव कार्यकारणोपरमे जी
वगताज्ञानमात्रव्यंजकः साक्षिशब्दितः तद्यथा प्रियया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सं

परिष्वक्त इति श्रुतिः प्रागेव व्याख्याता अनुमंतानैरंतर्येणवीक्षकः स्वयमिति जीवव्यापारवत्त्वपि स्वयं तद्रहितः रूपविशेषसाक्षिलक्षण
मन्त्रास्माद्धिपदं तत्र वर्तयति साक्षी नामेति नाम इदं श्रुतिप्रसिद्धिद्योतकं ननु साक्षी जीवस्यापरोक्षः तस्याज्ञानांतःकरणाद्युभव
रूपत्वांगीकारान्न ईश्वरस्तु नित्यापरोक्षः कारणत्वसर्वज्ञत्वसर्वनियंतृत्वादेर्जीवं प्रत्ययोग्यत्वेन तद्विशिष्टचिद्वै चैतन्यरूपेश्वरस्यायो
ग्यत्वादिति चेन्न तस्य रूपविशेषत्वांगीकारेण परोक्षत्वापत्तेरित्याशयेनाह स चेति न चेश्वरस्यैतादृशरूपभेदमानाभावः शंक
नीयः एको देव इति मंत्रस्य अनश्नन्नन्योऽभिचाकशीतीति मंत्रभागस्य च उदासीने परमेश्वरे रूपभेदमानत्वात्कारणत्वादिधर्मास्पदे
चेश्वरे सृष्टिवाक्यानां सर्वेषामेव मानत्वादिति भावः स च जीवस्यापरोक्षो अंतरंगश्चेति संबन्धः उभयत्र हेतुमाह जीवगतमज्ञाना

सि॰ ले॰ द्यवभासयत्विति युक्तं करणानन्दमित्सत्वेतुः स्वादिसंग्रहार्थमादिपदं साक्षित्वेन तस्यमज्ञानाद्यवभासकत्वेन दाराद्यहमत्तः अहं सुखी दुःखी व्यवहारः
प्र॰ टी॰ त्यादिव्यवहारनिर्वाहकं भवति अतः साक्षी जीवस्यान्तरंगः लोके राजादिनिर्वाहकपुरुषे राज्ञोन्तरंगत्वस्य प्रसिद्धत्वादिति भावः न
८५ नु सुषुप्त्यादौ साक्ष्यस्यान्तःकरणतद्धर्मादेरुपरतत्वात्तदा चिदात्मनः साक्षित्वं न स्यात् तथा च तेभ्यो विलक्षणः साक्षी चिन्मात्रोह
स्तदा शिवस्त्यादौ सुषुप्त्यादावपि तस्य साक्षित्वव्यवहारविरोध इत्यत आह सुषुप्त्यादौ चेति तेभ्योऽइति भोक्त्रादिभ्य इत्यर्थः तदापि स
त्वाज्ञानस्य साक्ष्यस्य सत्त्वान्न विरोध इति भावः परमेश्वरस्यैव रूपविशेषात्मके साक्षिणि सुषुप्त्युत्क्रान्तिविषयवाक्यद्वयमपि प्रमाण
मित्याशयेनाह प्राज्ञशब्दितइति सुषुप्तिविषयकवाक्ये उत्क्रान्तिविषयकवाक्ये च प्राज्ञशब्देन यथोक्तसाक्षिण एव प्रतिपादितत्वा
दितिभावः ननु सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यधिकरणे सुषुप्त्यादिविषयकश्रुतिगतप्राज्ञशब्दस्य सर्वेश्वरत्वभूताधिपतित्वादिविशिष्टपर

परिष्वक्तो न बाह्यं किंचन वेद नान्तरं प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीति श्रुतिवाक्याभ्यां सुषुप्त्युत्क्रान्त्यवस्थयोर्जीवभेदेन प्रतिपा
दितः परमेश्वर इति सुषुप्त्युत्क्रान्त्यधिकरणनिर्णयोपि साक्षिपर इत्युपवर्णितं तत्सुषुप्त्यावपि यथेदं रजतमिति भ्रमस्थलेव

मात्मप्रतिपादकतायाउक्तत्वात्कथं प्राज्ञशब्दस्योदासीनेश्वरपरत्वमत आह तद्यथेति दृष्टान्तवाक्ये वा संरथ्यादिहृतमान्तरंगदृहकृत्सं
पुरुषो जीवः प्राज्ञः परमात्मा तेन संपरिष्वक्तः सुषुप्त्युपाधिलयादेकीभावं प्राप्तः बाह्यं जाग्रत्प्रपंचं च मान्तरं स्वप्नप्रपंचं किंचन कि
विदपि उत्क्रान्तिवाक्यमुदाहरति प्राज्ञेनात्मनान्वारूढ इति अन्वारूढोऽधिष्ठितः उत्सर्जन् वेदनावशाच्छब्दं कुर्वन् याति शरीराद्ब
हिर्निर्गच्छति उत्क्रामतीत्यर्थः सर्वस्य वशीति समभिप्रतिपादित इत्यनेनान्तः प्राज्ञ इति शेषः तथा च वाक्याभ्यां जीवभेदेन प्रतिपादि
तः प्राज्ञः परमेश्वर इति निर्णयोपि साक्षिपर इत्युपवर्णितं कौमुद्यामिति संबन्धः बृहदारण्यकषष्ठाध्याये जीवान्तुवादमात्ररूपः ८५
न तदतिरिक्तेश्वरपर इति पूर्वपक्षे आमे सिद्धान्तः न च यापि पत्येत्यादिवाक्ययोः सुषुप्त्यवस्थायामुत्क्रान्त्यवस्थायां च पुरुषशब्दित

जीवापेक्षयाभेदेन परमेश्वरस्य तन्नीर्थान्तःसान्तराहेतव्यपदेशात्तत्र च स्वाध्यायो जीवानुवादमात्ररूपः किं तन्नदतिरिक्तेश्वरप्रतिपा
दनपरः न तत्प्रतिपादने च लोकसिद्धजीवानुवादेन तस्येश्वराभेदप्रतिपादनार्थत्वात् तथा च वाक्यशेषोऽप्युपपद्यते स वा एष महानज आ
त्मा योऽयं विज्ञानमयः प्राणेष्विति योऽयं विज्ञानमयो जीवः स एव महानात्मा पूर्णः परमात्मेत्यर्थः इति तदधिकरणनिर्णयः नन्वस्य निर्णीय
स्योदासीनेश्वररूपसाक्षिपरत्वमयुक्तम् एवं च स एव एष महानज आत्मेत्येतदनन्तरं एष सर्वेश्वर एष भूताधिपतिरित्यादिना तस्य स
र्वेश्वरत्वादिगुणजातप्रतिपादनादिति चेन्न ज्ञेयब्रह्मप्रकरणगतसर्वेश्वरत्वादिवचनस्य स्तुतिमात्रपरत्वादिति भावः कोसदी
कारमनन्तस्य सर्वात्मत्वार्थमनन्तरमुपन्यस्यति न त्वं शुक्त्यावपीति इदं रजतमिति भ्रमस्थले रजताभेदेन प्रतिभासमानोऽपीदमंशः
रजतांतर्भूतो न भवति रजतवृत्तस्य बाधाभावात् नापि शुक्त्यावेवांतर्भवति तस्य शुक्तिवद्ज्ञाततत्वप्रसंगात् अतोऽयमिदमंश

स्तुतः शुक्तिकोटिसंप्रगतोऽपीदमंशः प्रतिभासतो रजतकोटिः तथा ब्रह्मकोटिरेव साक्षी प्रतिभासतो जीवकोटिरिति
जीवस्य सत्त्वादिव्यवहारे तस्योपयोग इत्युक्तायमेव पक्षः समर्थितः केचित्तु विद्योपाधिको जीव एव साक्षाद्द्रष्टृत्वात्सा
क्षी लोकेऽपि सकर्तृत्वे सति द्रष्टृत्वं साक्षित्वं प्रसिद्धं तच्चासंगोदासीनप्रकाशरूपे जीव एव साक्षात्त्वं भवति जीवस्यातः

स्य वस्तुतः शुक्तिरूपत्वं प्रतिभासतो रजताभिन्नत्वमेवं साक्षिणोऽपि वस्तुगत्या ईश्वररूपाभेदत्वे कल्पितत्वज्जीवाधिष्ठानरूपस्य सा
क्षिणः सत्त्वाद्यनुभवितुः अहं सत्त्वमनुभवामीत्यादिप्रतिभासनस्तज्जीवाभिन्नत्वे अतो जीवस्य सत्त्वादिव्यवहारे तस्य सत्त्वाद्य
नुभवितृजीवैकत्वमापन्नस्योपयोग इत्यर्थः अयमेवेति साक्षिणो वस्तुतोऽपि जीवांतर्भावेन स्वब्रह्मकोटित्वोक्तिविरोधात् तस्ये
श्वररूपाभेदत्वं ननु शुक्तिकाराभिमतमिति निगम्यते इति भावः जीवस्य साक्षिणो भेदपक्षानुपन्यस्य तयोरभेदपक्षानुपन्यस्यति ।
केचिदित्यादिना जीव एव साक्षीति संबंधः नन्वीश्वरस्वरूपभेदः साक्षीत्यत्र मानाभावादित्येवकाराभिप्रायः जीवस्य साक्षित्वा
भ्युपगमे हेतुमाह साक्षाद्द्रष्टृत्वादिति तस्योदासीनत्वं सूचयति अविद्योपाधिक इति एतदेव प्रपंचयितुमिदमेव साक्षिलक्ष

सि॰ले॰ एणेनात्यदितिपूर्वोक्तं स्मारयति लोकेवेपीहीति पूर्वसंग्रहे एणोक्तं जीवस्यैवसाक्षित्वं प्रपंचयति नत्वेति साक्षादिति अविद्याप्रतिबिंबरूप
कृ॰टी॰ जीवस्य स्वतः संभवतीत्यर्थः अनेनक्तस्य जीवस्यैवसाक्षित्वसंभवेन तदतिरिक्तस्य साक्षीकल्पनीयः गौरवादिति सूचितं ननुलोकि
८८ कवैदिकव्यवहारकर्तृत्वौदासीन्यमसिद्धमित्युक्तमाशंक्याद्वितादात्म्येत्युक्तमेव कर्तृत्वादिकं स्वतस्तूदासीनत्वमित्युपगमात्तस्य
साक्षित्वसंभवतीत्याह जीवस्यांतःकरणेति नन्वीश्वरस्य साक्षित्वानुपगमे मंत्रविरोधइत्यतआह एकोदेवइति मंत्रस्थितिसाक्षीत्ता
वज्जीवस्यापरोक्षत्वस्योक्तं ईश्वरस्यतूदासीनस्याप्यपरोक्षत्वं नसंभवति विंबभूतेश्वरस्य जीवादौपाधिकभेदसत्वेन जीवंप्रतिजीवांत
रंचैतन्यस्येवापरोक्षत्वायोगात् ततोजीवभावापन्नब्रह्माभिप्रायोमंत्रमतसाक्षिप्रतिपादकभागइतिभावः ईश्वररूपभेदस्यापरोक्ष
त्वानुपपत्तिरूपहेतुर्मंत्रस्थितित्वशब्देनोक्तइतिध्येयं नतुगुहाधिकरणेयथागुहांप्रविष्टइतिमंत्रोजीवेश्वरोभयपरः तथाद्वासु
करणतादात्म्यापत्याकर्तृत्वाद्यारोपभाक्त्वेपिस्वयमुदासीनत्वात् एकोदेवइतिमंत्रस्तत्रस्थपदेणोजीवभावापन्नाभिप्रायेणसाक्षि
त्वप्रतिपादकः द्वासुपर्णेतिमंत्रोगुहाधिकरणन्यायेनजीवेश्वरोभयपरः गुहाधिकरणभाष्योदाहृतपैंगीरहस्यब्राह्मण
व्याख्यातेनप्रकारेणजीवांतःकरणोभयपरोवेतिनकश्चिद्विरोधइत्याह अमेवसस्तंजीवएवसाक्षीनचसर्वगतेनापि
वेःर पर्णेतिमंत्रोपिजीवेश्वरोभयपरइत्युक्तं भाष्येतथाचद्वासुपर्णेतिमंत्रेनयोरन्यःपिप्पलंस्वाद्वत्तीतिवाक्यंजीवविषयमनश्नन्नन्यो
भिचाकशीतिवाक्यंपरमेश्वरविषयमितिपर्यवस्यति ततश्चजीवस्यसाक्षित्वपदेईश्वरस्यसाक्षित्वप्रतिपादकेनानश्नन्नन्यइति
मंत्रभागेनविरोधइत्याशंक्याह द्वासुपर्णेतिमंत्रइति यदामंत्रोजीवपरोभयपरःस्तदापिनविरोधःकश्चित् एकोदेवइतिमंत्र
वत् द्वासुपर्णेतिमंत्रस्यापिजीवभावापन्नपरमात्मपरत्वाद्युपगमादित्यर्थः ननुगुहाधिकरणभाष्येपैंगीरहस्यब्राह्मणस्थदा
हृते तत्रेदंब्राह्मणेनयोरन्यःपिप्पलंस्वाद्वत्तीतिसत्वमनश्नन्नन्योभिचाकशीतिअनश्नन्नन्योभिपश्यतिज्ञःतावेतौसत्वक्षेत्रज्ञा ८८
वितिश्रुतेनब्राह्मणेनादनवाक्यमंतःकरणविषयंअनश्नन्वाक्यंक्षेत्रज्ञविषयमितिव्याख्यातं नचब्राह्मणेनैवसत्वक्षेत्रज्ञप
देनमंत्रव्याख्यानेपमानेकथंभाष्यकारैरस्यमंत्रस्यजीवेश्वरपरत्वमुक्तमितिवाच्यं तदुक्तेःकृत्वाचिंतामात्रत्वेनविरोधाभावात्

तथाचांतःकरणप्रतिबिंबरूपो जीवो यद्यपि पैंगिब्राह्मणाभिमतः देवदत्तः स्वांतःकरणस्यैवानुसंधातेतिवाक्योक्तं साक्षित्वं तस्यात्राविद्याप्रति
बिंबस्य तथा चाविद्याप्रतिबिंबरूपस्य ब्रह्मत्वभावस्य साक्षित्वपक्षः पैंगिब्राह्मणनिर्णीतार्थकथारूपेणेति मंदभागाविरुद्धः श्रुतत्वे
तेनास्यांकायां हयग्रीवकरणभाष्यादावुक्तेति नकश्चिद्विरोध इति पैंगिब्राह्मणाभिप्रेतः देवदत्तो नांतःकरणगतचैतन्यप्रतिबिंबरू
पो जीवः तस्य कर्तृभोक्तृस्वभावत्वेनानन्यत्वेनेतिवाक्योक्तसाक्षित्वासंभवात् किंतु संगोदासीनप्रकाशरूपाविद्याप्रतिबिंबरूपो
जीव एव ब्राह्मणाभिप्रेतः देवदत्तः तस्यानन्यत्वाक्योक्तसाक्षित्वसंभवस्योपपादितत्वात् अतो विद्याप्रतिबिंबरूपजीवस्य साक्षित्व
पक्षेतत्पैंगिरहस्यब्राह्मणत्वरोधिमंत्रविरोध इत्यर्थः अविद्याचैतन्यप्रतिबिंबरूपजीवस्यैव साक्षित्वमपेक्षात्र किंचिद्विशेषं व
क्तुमंतःकरणमवतारयति अन्येत्विति नत्वविद्यायाविद्धिंबम् ईश्वरः साक्षी तस्यापरोक्षत्वानुपपत्तेरित्येवकाराभिप्रायः रूपेणे
योपहितेन रूपेण कूटस्थांतरांतःकरणादीनामपि कूटस्थांतरं प्रति स्वांतःकरणभासकसाक्षिसंसर्गाविशेषेणाप्रसक्तत्वा
पत्तेः नचांतःकरणभेदेन प्रमातृभेदात्तदनापत्तिः साक्षिभास्यांतःकरणादौ सर्वत्र स्वस्वभेदे सति प्रमातृभेदस्याप्रयो
जकत्वात् तस्मादंतःकरणोपधानेन जीवः साक्षी तथा च प्रतिकूटस्थसाक्षिभेदात्कूटस्थांतरांतःकरणादेः कूटस्थांतरसाक्ष्य
ति साक्ष्यस्य चर्वणः सर्वशरीरसाधारणाविद्योपाधिकस्य साधारणरूपेण साक्षित्वाभावे हेतुमाह कूटस्थांतरेति यज्ञदत्तांतःकरण
तद्धर्मानामित्यर्थः कूटस्थांतरं प्रतीति देवदत्तं प्रतीत्यर्थः स्वेति स्वस्य देवदत्तस्यांतःकरणभासको यः साक्षी तेन साक्षिणा सह दे
वदत्तांतःकरणस्येव यज्ञदत्तांतःकरणादीनामपि संसर्गाविशेषाद्देवदत्तस्य यथा स्वांतःकरणप्रत्यक्षत्वं तथा यज्ञदत्तांतःकरण
धर्मयोरपि देवदत्तस्य प्रत्यक्षता स्यादित्यर्थः अत्र कूटस्थांतरं प्रति कूटस्थांतरीयांतःकरणादीनामपि प्रत्यक्षत्वापत्तेरित्यस्य अयं नचेहा
तेः स्वांतःकरणेन साक्षिणि विभागः सर्वशरीरेषु साक्षिण एकत्वेऽपि प्रतिशरीरं प्रमातृभेदात्तदोक्तदोषस्याशंकते नचेति देवदत्तस्य
ति तदंतःकरणादेः प्रत्यक्षत्वे हि देवदत्तसाक्षिसंसर्गः प्रयोजकः तथा च यज्ञदत्तांतःकरणादीनामपि देवदत्तप्रत्यक्षत्वप्रयो
जकस्य देवदत्तसाक्षिसंसर्गस्याविशेषेणांतप्रत्यक्षत्वापादनात्मको दोषः प्रत्यक्षत्वप्रयोजकसाक्षिसंसर्गभेदेनैव परिहर्तव्यो ना

सि॰ले॰
म॰टी॰
८७

प्रयोजकप्रमातृभेदेनेति दूषयति साक्षिभास्यइति साक्ष्यभेदइतिसाक्षिणएकत्वेसतीत्यर्थः अप्रयोजकत्वादिति देवदत्तं प्रतिनदीयां
तःकरणादिकमेवप्रत्यक्षेनान्यदीयांतःकरणादिकमितिव्यवस्थायामितिशेषः तस्मादिति अविद्योपाधिकजीवस्यसाधारण
रूपेणसाक्षित्वासंभवादित्यर्थः तथा चेति साक्षिभेदप्रयोजकोपाधिभेदविवक्षायांसत्यामित्यर्थः तदयोगपत्त्वाद्धेति शुरुयोत
रंप्रत्ययोपपत्तिकल्पनाद्वाप्रत्यक्षत्वाभावउपपद्यतइत्यर्थः ननुविद्याप्रतिबिंबरूपजीवस्याविद्योपाधिकत्वेनैकरूपेणसाक्षित्वे
सतितस्यसुषुप्तिसाधारणंसंभवतिप्रतिशरीरंसाक्षिभेदसिद्ध्यर्थंतस्यांतःकरणोपहितत्वेनरूपेणसाक्षित्वेतुसुषुप्तिसाधार
णंतस्यनसंभवति सुषुप्तावंतःकरणलयश्रवणादित्याशंक्याह सुषुप्तावपीति शंकते नचांतःकरणोपहितस्येति अवि
द्याप्रतिबिंबस्यजीवस्येतिशेषः नतस्येति अंतःकरणोपहितजीवस्यसाक्षित्वेनसंभवति तस्यप्रमातृत्वादन्यथाप्रमातुरेव
संसर्गाभावात्तद्योगपत्त्या साभकाशाउपपद्यते सुषुप्तावपिसूक्ष्मरूपेणांतःकरणसद्भावात्तदुपहितःसाक्षीतदाप्यस्त्येव
नचांतःकरणोपहितस्यप्रमातृत्वेनतस्यसाक्षित्वंसुषुप्तौप्रमात्रभावेपिसाक्षित्वेनतयोर्भेदस्यावश्यंवक्तव्यत्वादितिवाच्यं
साक्षित्वापत्त्यासाक्षिप्रमात्रोर्भेदोनस्यादितिभावः इत्यापत्तिमाशंक्याह सुषुप्ताविति अभावेपीति अथास्मिन्प्राणएकधाभ
वतीतिश्रुतौसुषुप्तिकालेप्राणशब्दितेपरमात्मनिएकीभाववचनात्तस्यप्रमातृलयस्यश्रवणादितिभावः साक्षित्वेनेति
सुषुप्तिकालेसाक्षिणःसत्त्वमवश्यंवाच्यंतत्कालेतत्सत्त्वस्यत्रिषुधामस्वित्यादिवचनसिद्धत्वात् धामसु अवस्थास्वित्यर्थः त
त्कालेसाक्षिणानुभूतानामज्ञानसुखसुषुप्तीनांसुखितस्यनकिंचिदवेदिषंसुखमहमस्वाप्समितिस्मरणदर्शनाच्च नचाहमस्वाप्स
मितिस्वापादिवदहमर्थस्यप्रमातुरपिसुषुप्तिकालीनत्वेनस्मरणदर्शनात् तस्यापितदासत्त्ववाच्यमेवेतिवाच्यं सुषुप्तौप्रमा
तृलयप्रतिपादकवचनविरोधेनाहमस्वाप्समित्यादिस्मरणस्याहमर्थांशेअनुभवरूपत्वकल्पनात्प्रमातुस्तदासत्त्वमा ८७
वश्यकं तथाचसुषुप्तिकालेसदसतोःसाक्षिप्रमात्रोरभेदायोगात् प्रमातुःसकाशात्साक्षीभिन्नएववाच्यइत्यर्थः प्रमातृसा

द्विलयोरभेदप्रसंगे प्रमातुरुदासीनत्वाभावेन साक्षित्वासंभव इत्यपेक्षयैवं ग्रन्थार्थः प्रकारद्वितीयोर्थं न च वाच्यमित्यत्र हेतुमाह अं
तःकरणविशिष्ट इति अन्तःकरणस्याविद्योपाधिके जीवे विशेषणत्वेन प्रमातृत्वप्रयोजकत्वमुपाधित्वेन साक्षित्वप्रयोजकत्वेन
था च विशिष्टोपहितयोः प्रमातृसाक्षिणोर्भेदः विशिष्टस्य प्रमातुः कर्तृभोक्तृस्वभावत्वेप्युपहितस्योदासीनत्वात्साक्षित्वं च संभ
वतीत्यर्थः ननु विशेषणत्वस्योपाधित्वस्य च भेदे सति एकस्यैवान्तःकरणस्य विशेषणत्वादिरूपेण भेदकल्पयित्वात् विशिष्टस्य
प्रमातृत्वं तदुपहितस्य साक्षित्वमिति व्यवस्था सिध्यति तयोर्भेद एव कथमित्यत आह विशेषणोपाध्योरिति कार्यान्वयित्वे सति व्या
वर्तकत्वं विशेषणत्वं यथा नीलोत्पलमानयेत्यादौ नीलत्वस्योत्पलस्य रक्तोत्पलादिव्यावर्तकत्वादुत्पलपदार्थानयनरूपकार्यान्वयित्वा
च्च लक्षणे कार्ये पदविधेयपरे तथा च यत्काकवत्तद्देवदत्तगृहमित्यादौ विधेयस्य देवदत्तगृहत्वस्य कार्यस्योपलक्षणे काकेनास
न्वयः गृहान्तरव्यावर्तकत्वं चास्तीति तत्रातिव्याप्तिवारणाय सत्यन्तं कार्यान्वयिनि विशेषणे उत्पलादावतिव्याप्तिवारणाय विशेष्यदलं

विशेषणोपाध्योर्भेदस्य सिद्धान्तसंमतत्वेनान्तःकरणविशिष्टः प्रमाता तदुपहितः साक्षीति भेदोपपत्तेरित्याहुः ननूक्तरूपस्य

कार्यानन्वयित्वे सति व्यावर्तकत्वे सति कार्यान्वयकाले विद्यमानत्वमुपाधित्वं यथा लोहितस्फटिकमानयेत्यादौ स्फटिकसन्निहि
तस्य जपाकुसुमस्योपाधित्वं तस्यानयनलक्षणकार्यान्वयाभावात् स्फटिकान्तरव्यावर्तकत्वादानयनान्वयकाले विद्यमानत्वाच्च
तत्र प्रथमसत्यन्तं विशेषणे नैल्यादावतिव्याप्तिवारणाय न च विशेषणत्वेनाभिमतस्य नैल्यादिकमप्यत्र लेसंभवतीति वाच्यं
जपाकुसुमादावुपाधित्वव्यवहारवन्नैल्यादौ तथाव्यवहाराभावात् जपाकुसुमादौ स्फटिकादिविशेषणत्वस्य व्यवहाराभावा
च्च तथा च विशेषणोपाध्योर्भेदावश्यंभावे सति विशेषणाभिमतनैल्यादेरलक्ष्यत्वान्नात्रातिव्याप्तिवारणायुक्तमेव काकवद्गृहं य
विशेत्यत्र प्रवेशरूपकार्यान्वयकाले यदि देवयोगादुपलक्षणभूतकाकस्यान्यत्र गमने काकान्तरस्य तद्गृहे आगमनं तदा तत्रा
गतकाकस्य पूर्वस्थितकाकव्यावर्तकत्वं नास्ति तथा च तत्रागतकाके प्रवेशानन्वयिनि विद्यमानेऽप्युपाधित्वरहिते अतिव्याप्ति

सि॰ ले॰
प्र॰ टी॰
८८

वारणाय द्वितीयसत्यंतं उक्तस्थलपद्वोपलक्षणीभूतकाकेतिव्याप्तिवारणाय विशेष्यदलं न च घटोपलक्षणीभूतकाकस्यैव कार्यका
लेपि दैवाद्विद्यमानत्वेन तत्रोपलक्षणकाकेऽतिव्याप्तिस्तदवस्थेति वाच्यं कार्यकाले नियमेन विद्यमानत्वस्य विवक्षितत्वा
त् नन्वेवमपि लोहितस्फटिकमानयेत्यत्र कुविन्दकाकश्रवणकाले समपुष्पजपाकुसुमस्य स्फटिकानयनकाले दैवाद्विद्यमानत्वसं
भवात् जपाकुसुमस्यापि कार्यकाले विद्यमानत्वनियमो नास्तीति चेत् तर्हि दलद्वयं श्रोत्रत्वोपाधिकर्णशष्कुल्यामंतःकरणे दो
षविवक्षितमस्तु जपाकुसुमस्यान्यस्य वा नियततत्समस्वनिष्ठधर्मसंजनकत्वरूपप्रसिद्धमेवोपाधित्वमस्तु न चानेन रूपेण स्वनिष्ठत्वा
दिलक्षणोपाधित्वस्य प्रसिद्धोपाधौ करणावलये विवक्षितविवक्षितदर्पणादौ सोपहितत्वं च मुखे स्वधर्मानासंजकत्वे व्याप्तित्वेनत
त्संग्रहकलक्षणान्तरकरणासामर्थ्यप्रकृतयाऽतस्याद्दोषत्वादनुगतलक्षणासंभवे हितस्य दोषत्वप्रसिद्ध तथा च प्रकृतेंऽतःकरणस्यो
भयविधोपाधित्वसंभवात् कार्यानन्वयित्वे सतीत्यादिलक्षणानुरोधेनांतःकरणोपहितो जीवः साक्षीत्युपगमे साक्षित्वं जीवचैतन्यमा
साक्षिणश्चैतन्यमात्रावरकेणाज्ञानेनावरणमवर्जनीयमिति कथमावृतेनाविद्याहंकारादिभानमिति चेत् राहुवदविद्यास्वावृ
तप्रकाशप्रकाश्येति केचित् वस्तुतो विद्यातःकरणतद्धर्मावभासकसाक्षिचैतन्यं चित्तायैवाज्ञानेन चैतन्यमात्रावृणोऽन्तुभवानुसारेण
त्रिविधपर्यवस्यति जीवचैतन्यमात्रेतदुदासीनमेवेति नोपहितस्य साक्षितानुपपत्तिर्न वाप्रमातृसाक्षिणोः सांकर्यमिति संक्षेपः अविद्या
हंकारादीनां सर्वोक्तसाक्षिभास्यत्वमादिपत्तिनन्विति चैतन्यमात्रेति कृतस्त्वचैतन्यावरकेणास्यार्थः कथमिति न च साक्षिगोचरापरोक्ष
वृत्त्यानदावरणनिवृत्तेर्निवृत्तावरणेन साक्षिणा विद्यादिभानं संभवतीति वाच्यं तेषां केवलसाक्षिभास्यत्वासिद्धांतविरोधप्रसंगात्सनसः
करणत्वस्य निरस्तिप्रमाणतया साक्षिचैतन्यगोचरापरोक्षवृत्त्यसंभवाद्वाहंकारादीनां स्वसत्ताकाले नत्सत्ताप्रकारकसंशयाद्यभा
वेन सदातेषां संशयादिनिवृत्तिप्रयोजकतयापि सदा प्रकाशसंसर्गेवृत्त्यवेसति कादाचित्कहत्याते प्रासराभावासंभवाच्च सदा साक्षिगो
चरवृत्तिसंततमस्युपगमेष्टुपगदन्तिध्यानस्युपगमेवासावदारि मतीत्युक्ताप्रसंगाच्चतस्मात्साक्षिमात्रभास्यत्वमविद्याहंकारादीनावृत्ते
र्मतत्वानसंभवतिनिनस्यावृतत्वात् न च साक्षिचैतन्यंविक्षतायामेदेव चैतन्यमावृतमिति वाच्यं प्रज्ञानचैतन्यमात्रावरकत्वाद्यत्पक्षासाक्षि

राहुणा सर्वात्मनावृतस्य चंद्रमंडलादेः स्वावरकराहुमात्रप्रकाशकत्वेपि तदतिरिक्तप्रकाशकत्वादर्शनादज्ञानावृतस्य साक्षि
णः कथंचिदविद्यामात्रावभासकत्वस्याज्ञाहंकारादिभासकत्वमित्यस्वरसादाह वस्तुत इति अनुभवानुसारेणेति अहंकारा
दिस्फुरणस्याकादाचित्कज्ञानासंभवेपि सदाप्रकाशसंसर्गफलस्य संशयनिवृत्त्यादेः सत्वानुसारेणेत्यर्थः अनुभवफल
मेवोपदर्शयति अत एवेति अज्ञानस्य साक्षिचैतन्याविषयत्वे वावरकत्वस्वभावकल्पनादेवेत्यर्थः अगोचरत्वमिति नन्वविद्या
याभावरूपत्वादौ अहंकारस्यानात्मत्वादौ सत्वेपि दुःखवृत्तीनामनात्मधर्मत्वादावज्ञानविपरीतज्ञानसंशयानां सत्वेन तेषां
सदा संशयाद्यगोचरत्वमसिद्धमिति चेन्न अविद्यागतविशेषधर्मत्वे भावरूपत्वादिविद्यादिसत्वकाले कदाचिदप्यविद्यादि
सत्वप्रकारकाज्ञानाद्यभावस्य विवक्षितत्वे तथा ततत्तद्विशेषगोचराज्ञानविपरीतज्ञानादेरभ्युपगमेपि न दोष इति भावः

कल्पनात्र कश्चिद्दोषः अत एव सर्वदा तेषामनावृतप्रकाशसंसर्गवदज्ञानविपरीतज्ञानसंशयागोचरत्वं साक्षिचैतन्य
स्यानावृतत्वेन तत्स्वरूपभूतस्यानंदस्यापि प्रकाशापत्तेरिति चेन्न इष्टापत्तेः आनंदरूपप्रकाशप्रयुक्तस्यात्मनि निरु
पाधिकप्रेम्णो दर्शनात् भासत एव परमप्रेमास्पदत्वलक्षणस्त्वेवाभिवरणाच्च स्यादेतत् इदानीमप्यानंदप्रकाशेषु
नः शोकेते साक्षिचैतन्यस्येति न तिष्ठापत्तेरिति वक्तुं शक्यते संसारदशायां स्वरूपानंदप्रकाशप्रयुक्तकार्यादर्शनादित्यत आह आनं
दरूपेति लौकिकस्य तस्यानुभूयमाने आनंदे प्रीतिरनुभवसिद्धा तथा च प्रीतेः प्रकाशमानानंदविषयकत्वसिद्धेश्चात्मा
स्य स्वस्यात्मनि दुःखदशायामपि प्रीतिदर्शनादात्मगोचरप्रीतेरपि प्रकाशमानात्मानंदविषयकत्वसिद्धावानि पुत्रादिगोचर
प्रीतिस्तावदौपाधिकी उपाधिश्च पुत्रादेरात्मशेषत्वोभिव्यक्तिसाधनत्वरूपौपाधिकव्यतिरेकदशायां ते प्रीतेरदर्शनादात्मनि तु प्रीति
र्निरुपाधिकी पुत्रादिद्वेषिवदात्मनि प्रीतेरन्यार्थत्वाभावात् तथा च श्रुतिः आत्मनस्तु कामाय सर्वं प्रियं भवति तथा च देतत्प्रेयः

सि॰ ले॰
प्र॰ टी॰
८५

पुत्रात्प्रेयो वित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरमात्मेति श्रुतेर् अंतरतरमित्यनेन सर्वांतरत्वमुच्यते तथा च पुत्रसर्वांतरमात्मचैतन्ये तदेतत्प्रेयोऽद्वैतमिति
विषयत्वेन संभावितात्पुत्रादेः सर्वस्मादतिशयेन प्रियमिति द्वितीयश्रुत्यर्थः तथा चात्मानंदो यदि न प्रकाशेत तदात्मनि स्वतः सुखानुभव
सिद्धा निरुपाधिकप्रीतिर्न स्यात् प्रीतेः प्रकाशमानानंदविषयकत्वनियमादृते स्वात्मानंदप्रकाशायदनेन छायारूपस्याभिप्रायानुयुक्त
मेव उक्तार्थे दृढं संमतिमप्याह भासत एवेति परमप्रेमविषयत्वं परमप्रेमास्पदत्वं तल्लक्षणं यस्य सुखस्य तत्त्वया सुखं भासत एव प
रमप्रेमास्पदत्वादन्यथा तन्न स्यादिति एवकाराभिप्रायः तच्च सुखं सादिचैतन्याभिन्नं शिवं स्वरूपानंदप्रकाशे संमतिरेव स्थित्वैव सं
सारदशायामस्य रूपानंदस्फुरणाभ्युपगमे वाधकमाशंकते स्यादेतदित्यादिना तस्मात्स्वात्मानंदस्यानावृतत्वकल्पनमयुक्तमि
मतेन सिद्धांती विशेषेण शंकते नन्विति अविद्यायामानंदप्रतिविंवः स्वात्मानंदः तस्य बिम्बभूतात्मानंदाद्भेदः कल्पितः न

त्किं संसारयोर्विशेषप्रसंगः ननु कल्पितभेदस्य स्वात्मानंदस्य प्रकाशे अनवच्छिन्नस्य ब्रह्मानंदस्याप्यावृतस्य संसारदशा
यामप्रकाशेन विशेषोस्तीति चेत् न आनंदे अनवच्छेदांशस्यापुरुषार्थत्वात् आनंदापरोक्षमात्रस्य चेदानीमपि सत्वात्

ययाच संसारदशायामनावृतस्वात्माभिन्नप्रतिविंवानंदप्रकाशोपि बिम्बभूतब्रह्मानंदो न प्रकाशते तथा प्रकाशमानोपि स्वात्मा
नंदः प्रतिशरीरं भिन्नः प्रकाशते न त्वनवच्छिन्नः इति विशेषोस्तीत्यर्थः बिम्बभूतब्रह्मानंदाप्रकाशोक्तेः आवृतस्येति अत्र य
द्यपि मूलाज्ञानं शुद्धचिन्मात्राश्रयं तद्विषयकं च न तु विम्बभूतेश्वरविषयकं तस्मान्नावृतत्वेपि जीवापेक्षया कल्पितभेदत्वा
त्तस्य जीवं प्रत्यप्रकाशमानत्वं संभवति तथा सक्तौ विम्बभूतब्रह्मानंदस्फुरणमप्यसिद्धं मूलाज्ञाननिवृत्तौ तत्स्वयुक्तमिति विंव
भावस्यैव विंवभावस्यापि निवृत्त्यवश्यंभावात् तथापि पूर्ववदिह सुखपिधानमात्रे सिद्धांतिनस्तात्पर्यमिति वोध्यं किमनवच्छिन्ना
नंदस्फुरणमोदे विशेषः आनंदस्फुरणमात्रं वा उभयथापि विशेषो वक्तुं न शक्यत इत्यत आह पूर्ववादीनेति अविच्छेदो हि भे ८५
दः स चात्मनि कल्पितस्तथा चावच्छेदाभावो यथानंदादतिरिक्तस्तदाशेषमाह अनवच्छेदांशस्येति यथानंद एव कल्पिता

भावस्याधिष्ठानात्मकत्वान्नदानस्य द्वितीयप्रकारएवांतरभावइति मत्वानंतरप्रकारं दूषयति आनंदापरोक्षमात्रस्य चेति न
घ्याचेन मुक्तिसंसारयोर्विशेषइतिभावः सिद्धांती प्रकारांतरेण विशेषमाशंकते नन्ववच्छिन्नइति औत्शरीरमवच्छिन्ने
नप्रकाशमानः साक्ष्यानंदः सातिशयः उत्कर्षापकर्षरूपातिशयवानित्यर्थः साक्ष्यानंदस्यातिशयवत्वे हेतुमाह सुषुप्ति
साधारणादिति स्पष्टता उत्कर्षः अतिस्पष्टता अपकर्षः सुषुप्तिकाले प्रकाशमानोपि साक्ष्यानंदः स्पष्ट एव इतरथा न
सुखमहमस्वाप्समिति परामर्शनीयत्वाभावप्रसंगात् लोके क्रियआनंदः स्पष्टमनुभूतः स एव उन: परामर्शयोग्योनानुभू
तानंदमात्रमिति प्रसिद्धं नचाचैतन्ततः साक्ष्यानंदास्तु सुषुप्तावतिस्पष्टतारहितात् स्रक्चंदनादिविषयप्रयुक्तानंदे उत्कर्षवि
शेषानुभवादित्यर्थः अनवच्छिन्नइति कल्पितावच्छेदाभावात्मा ब्रह्मानंदो मुक्तिकाले प्रकाशमानो निरतिशयस्सामान्यरा
नन्ववच्छिन्नः साक्ष्यानंदः सातिशयः सुषुप्तिसाधारणादनतिस्पष्टतत्तद्वैषयिकानंदे सुतिशयानुभवात् अनवच्छि
न्नो ब्रह्मानंदस्तु निरतिशयः आनंदवल्ल्यां मानुषानंदमारभ्य उत्तरोत्तरं शतगुणोत्कर्षोपवर्णनस्य ब्रह्मानंदे समापनादि
ति चेन्न सिद्धांते साक्ष्यानंदविषयानंदब्रह्मानंदानां वस्तुतएकत्वेनोत्कर्षापकर्षासंभवात् मानुषानंदादीनामुत्त
रोत्तरशतगुणत्वे तात्पर्यार्थः मुक्तौ ब्रह्मानंदएकरूपेण पूर्णतया च प्रकाशते इदानीं [illegible] ब्रह्मानंदप्रकाशो नास्ति किंतूत्कर्षापक
र्षोपेतानंदप्रकाश एवास्ति अतः स्वरूपानंदस्फुरणेपि तत्तदुत्कृष्टानंदाभिलाषोस्त्येव [illegible] निर्वृतिर्ना
स्तीति संसारमोक्षयोर्विशेषइतिभावः अविद्याप्रतिबिंबरूपसाक्ष्यानंदस्य लोके विषयानंदत्वेन गृहीतस्य सातिशयत्वे।
ब्रह्मानंदस्यैकरूपत्वेच श्रुतिप्रमाणयति आनंदवल्ल्यामिति मानुषानंदः सार्वभौमानंदः स च शतगुणितः सन् मनुष्य
गंधर्वानंदो भवति सोपि शतगुणितः सन् देवगंधर्वानंदो भवति एवमेव पित्रानंदादिषूत्तरोत्तरं ब्रह्मण आनंद इत्युक्तं हि
रण्यगर्भानंदान्तेषूत्कर्षापकर्षयोरुपवर्णनेप्रयोजनीयं समापनादिति सयश्चायं पुरुषे यश्चासावादित्ये स एक इति वा
क्येनेति शेषः पुरुषो मनुष्यः आद्यश्चकारास्तिर्यगादिसंग्रहार्थः आदित्यपदं मंडलाभिमानिदेवतापरं द्वितीयश्चका

सि॰ ले॰
प्र॰ टी॰
५०

रत्नादिनरसुकलदेवतासंग्रहार्थः तथा चैवं मनुष्यतिर्यक्सर्वत्रविद्यमानोऽज्ञानं द्रव्यकः एकरूपएव तन्नसाद्यानंदवत्तातिशयश्रुति
श्रुत्यर्थः तस्य न तद्विषयानंदज्ञानं तदानंदातिभेद उत्करीत्या मुक्तिसंसारयोर्विशेषो वक्तव्यः स्यात् इति स एव तन्नवास्ति इति सर्ववादी
दूषयति नेति असंभवादिति उत्कर्षापकर्षयोर्जातिविशेषरूपयोरेकस्यावक्तव्यत्वासंभवादित्यर्थः ननु आनंदस्यैकत्वेऽपि वस्तुगत्या
एकत्वेऽपि कल्पितभेदवत्त्वात्तस्यामुत्कर्षादिः संभवतीत्यभिसंधिमान् सिद्धांती शंकते मानुषानंदादीनामिति श्रुत्यनुभवानुसारिस्फू
र्तिसिद्धानंदोत्कर्षादेः प्रपंचप्रकरणमयुक्तं सर्ववादिन इत्यर्थः अभिसंधिमविद्वानिव सर्ववादी दूषयति कोवेति कृतानर्थेत्यु
पपत्तिरिति सिद्धांती शंकते किंत्विति नामाह अभेदेनवादइति आनंदैकत्वमतइत्यर्थः अशक्यमिति औपाधिकभेदेनापि तदु
पपादनमशक्यमनुरूपदृष्टांताभावादिति सर्ववादिनोऽभिसंधिः एकस्यामप्यानंदव्यक्तावौपाधिकभेदेन स्फुरणतत्संभवसिद्धा

न्तरोत्तरमुत्कर्षस्फूर्तिर्वदतीतिचेत् को वा ब्रूते स्फूर्तिर्नेवदतीति किंत्वभेदेनवादे तदुपपादनमशक्यमिति उच्यते ननु
कस्यैव सौरालोकस्य करतलस्फटिकदर्पणाद्यभिव्यंजकविशेषोपाधानेनाभिव्यक्तितारतम्यस्य दर्शनादेकत्वेऽप्या
नंदस्याभिव्यंजकस्य वृत्तिभेदोपधानेनाभिव्यक्तितारतम्यरूपमुत्कर्षापकर्षवत्त्वयुक्तमिति चेत् न दृष्टांतासंभ
२४ तिपत्तेः सर्वतः प्रसृतस्य सौरालोकस्य गगने विना करतलादिसंबंधमप्रकाशमानस्य तिमिरनिलेऽस्मत्सरस्य जलसं
बंधेनोत्कर्षादेरुपपादनं कर्तुं शक्यमिति स्वाभिसंधिमुद्घाटयन् सिद्धांती शंकते नन्वेकस्यैवेति आलोकस्येति आलोकस्य करत
लादिसंबंधरहितस्य या सा अभिव्यक्तिस्तदपेक्षया करतलसंबंधदशायां अभिव्यक्तिस्तदपेक्षया स्फटिके अधिका अभिव्यक्तिस्तदपेक्षया
अधिका दर्पणादावभिव्यक्तिरनुभवसिद्धा तत्स्वरूपतेऽपि स्वरूपानंदव्यंजकवृत्तितारतम्येन तत्तत्स्वरूपवृद्धितसाद्यानंदे उत्कर्षादि
कमुपपद्यतइत्यर्थः यद्यालोक एकव्यक्तिरेकरूपश्च स्यात्तो भवेत्तदा तथाविधस्वरूपानंदस्य दृष्टांततामेवत्रत्वालोकस्यैकव्यक्तित्व
मस्ति तस्य नानाकिरणसमूहरूपत्वात् नाप्येकरूपत्वं तस्यास्ति तत्रतत्र सौरकिरणानामल्पत्वबाहुल्यरूपनानारूपत्वावगमादि ५०
ति सर्ववादी स्वाभिसंधिमुद्घाटयन् दूषयति नेति असंप्रतिपत्तेरिति असमासमतत्वादित्यर्थः असमत्वस्यैवोपपादनमेतदित्यर्थः यानिश्च

तिरस्कृतत्वादिति सूर्यकिरणानां गात्रेऽप्रतिबंधेऽसतीत्यर्थः अतएव यत्र मध्यभागे करतलादिकृतप्रतिबंधवशात् सूर्यकिरणानप्रसरंति
नत्र तमोरूपच्छाया दृश्यते आलोकस्याप्रतिहतस्याबहलीभावे दृष्टांतमाह निम्नतल इति यथा निम्नतले प्रसरतः स्वच्छजल
स्य करतलसंबंधेन गतिप्रतिहतो जलस्य बहलीभावस्तथेत्यर्थः अधिके इति करतलादिसंबंधरहितगगने य आलोकस्तस्य
हि प्रकाशस्तदपेक्षया अधिके इत्यर्थः तदीयदीप्तिसंवलनादिति दर्पणादेर्या दीप्तिः प्रभा तया मिश्रणादित्यर्थः ततोपीति
करतलगतप्रकाशादपीत्यर्थः तत्रेति एकरूपस्यालोकस्योपाधिगतनानात्वकृताभिव्यक्तितारतम्यासंप्रतिपत्तेर्न तस्य
दृष्टांतत्वं संभवतीत्यर्थः उक्तदृष्टांतांगीकारे सिद्धांतिनो बाधकमप्याह दृष्टांतसंप्रतिपत्तौ चेति मुक्ताविति तथा च सिद्धांते
मुक्तिमध्ये हि शयनस्थानत्वेन एकस्यापि महत्त्वाभिव्यक्तिर्न स्यादिति भावः मुक्तिसंसारयोरविशेषप्रसंगाच्चोद्येसमाधानं प्रकारविशेषोऽपि वक्तव्य

वकरतलसंबंधेन गतिप्रतिहतो बहलीभावादधिकप्रकाशः भास्वरदर्पणादिसंबंधेन गतिप्रतिहतो बहलीभावात्तदी
यदीप्तिसंवलनाच्च ततोप्यधिकप्रकाश इति तत्राभिव्यंजकोपाधिकाभिव्यक्तितारतम्यानभ्युपगमात् दृष्टांतसंप्रतिप
त्तौ च गमनप्रसक्तसौरालोकवदनवच्छिन्नानंदस्यापि सहसा करतलाद्यवच्छिन्नसौरालोकवत्तत्सदेवदृश्यवच्छिन्नानंद
माणाहेतुना निरस्तत्त्वस्यात् पूर्ववादी एतेनेति आत्मनि देहादावात्मत्वज्ञानेन वस्तुत आत्मसंबंधस्य देहादावात्मीयत्वं च मिथ्या
ज्ञानेन तज्जाग्रदादिकाले स्वरूपानंदस्य प्रकाशमानस्यापि विक्षेपकमस्य सत्तापादकमिथ्याज्ञानजन्यसंस्कारसमूह एवोऽप्रकाश
मानस्याप्यानंदस्य विक्षेपकः पुरुषार्थत्वविघटकः पुनर्भोगप्रदकर्मविशेषबोधकमिथ्याज्ञानसंस्कारवशादेवाहमवैजनः
सौषुप्तमानंदानुभवं परित्यजति न तु स्वसौषुप्तमानंदप्रकाशस्याफलस्य सुखत्वाभिलाषितत्वामाद पुरुषार्थत्वमिति भावः दृ
ष्टांते प्रभायाः सावयवत्वात्तीव्रवायुना केषांचिदवयवानां नाशात् पांडुप्रभारूपगतभास्वरत्वस्य तेन प्रतिबंधरूपा वा विक्षेपाच्च
काशमानायामपि दीपप्रभायामसत्प्रकाशनोपपद्यते अवयवगुणादिविशेषरहितस्य ब्रह्मानंदस्य तु न तथाविशेषवदुपपद्य
त इत्याह निर्विशेषेति प्रकाशमान इति सतिसप्तमी तत्रेमधिकरणसप्तमी मुक्त्यन्वयिन इति मुक्तिदशायां प्रकाशमानस्येत्य
र्थः श्रुतिवाक्यस्येति ॥ ॥

सि॰ले॰
म॰टी॰
५१

दर्शनं तद्वावयवरूपस्य जातिविशेषरूपस्यवेत्यर्थः तस्मादिति मुक्तिसंसारयोरविमोक्षसंसर्गादित्यर्थः स्यादेतदित्यादिनामामं
पूर्वपक्षं निराकरोति प्रज्ञाकुरित्यादिना एकस्य एकरूपस्य स्वरूपानन्दस्याभिव्यक्तितारतम्यात्तद्रूपे हृत्साम्ये तदनन्तस्वरूपानन्देस्क्रम
न्नुभवसिद्धंतारतम्यशाह्वोक्तमुत्कर्षापकर्षवत्त्वमुपपादयति यथेति शुक्लत्वस्येति धवलरूपाणां मध्ये सर्वान्तमस्येत्यर्थः एकस्ये
ति सूत्रेनैव तस्मात्तु उत्कर्षापकर्षौ तत्र स्वतो न स्तः इति सूचितं तत्र नत्र प्रतिविंबस्येतानि पदानि समानाधिकरणानि यावल्लाप
कर्षइति ईषन्मलिनदर्पणप्रतिविंबे उपकर्षोध्यस्यते मध्यमाविषमलिनदर्पणप्रतिविंबेच तदपेक्षयाधिकोपकर्षोध्यस्यते शुद्ध
तमलिनदर्पणप्रतिविंबेचात्यन्तापकर्षोध्यस्यते तत्र स्वतादृशदर्पणे शुभ्रप्रतिविंबिते धवलरूपे तारतम्येनाभिव्यज्यते वस्तुतः एकरू
स्याप्यधिकाभिव्यक्तिरिति मुक्तितः संसारस्याभ्यर्हितत्वापत्तेश्च एतेन संसारदशायां प्रकाशमानो यानंदोऽसिख्याज्ञानत
त्संस्कारविक्षिप्तमनयातीव्रवायुविक्षिप्तप्रभावत्रस्य प्रकाशते मुक्तौ तदभावात् यथावद्वभासत इत्यपि निरस्तं निर्वि
शेषस्वरूपानंदप्रकाशमाने तत्र विक्षेपदोषाद्प्रकाशमानस्य मुक्तावपि नोतिशयस्यासंभवात् तस्मात्सादानंदस्या
नावृतत्वकल्पनमयुक्तं प्रज्ञाकुरद्वैतविद्याचार्याः यथा शुक्लत्वस्यैकस्यैव धवलरूपस्य मालिन्यतारतम्ययुक्तेष्वनेकेषु द
र्पणेषु प्रतिविंबेष्वेषु पाधिमालिन्यतारतम्यान्तत्र तत्र प्रतिविंबेषु यावत्तापकर्षस्तारतम्येनाध्यस्यते एवं वस्तुतो निरति
शयस्यैकस्यैव स्वरूपानंदस्यान्तःकरणप्रतिविंबिततयासाद्यानंदभावे प्राकृतनसुकृतसंपत्त्यधीनविषयविशेषसंपर्क
मपि स्वरूपेण प्रकाशमानमपीत्यर्थः अंतःकरणेति सुखभावापन्नान्तःकरणं सूक्ष्मरूपेणेति वदतीति सादानंदस्य सुखमिसा
धारण्यवोध्ये मतांतरे तु त्वविद्यायां प्रतिविंबिततया सादानंदभावोद्भवः ग्रानंदभावेऽपि मामेसतीति विशेषः संपत्तिः परिपा
कः फलजननोन्मुखत्वमिति यावत् प्राकृतनसुकृतसंपत्त्यधीनो यो विषयविशेषसंपर्कः तत्प्रयुक्तो योसत्त्वस्योत्कर्षापकर्षो तद ५१
द्रूपं यत्तु द्वितारतम्येन फलता सुखस्वरूपात्वेन अंतःकरणवृत्तिप्रतिविंबिततया विषयानंदभावे च प्रामेसतीत्यर्थः वृत्तीनां स्वरू
पस्वंबंजकतया सुखस्वरूपत्वमुक्तं एतदुक्तं भवति पूर्वजन्मसुकृतसंपादितपुण्यकर्मपरिपाकवशादंतःकरणस्य सुखोद्रेकादि

रूपविषयविशेषगोचरवृत्तिकारविषयविशेषैः सह संबंधे सति निरतिशयसत्वगुणस्योत्कृष्टविषयसंबंधादुत्कर्षो भवति नि
कृष्टविषयसंबंधान्निकर्षो भवति ततश्चांतःकरणगतसत्वांशपरिणामरूपावृत्तयः स्वरूपानंदगोचरा जायंते जाय
मानाश्च तारतम्येनोत्कर्षापकर्षोपेता एव जायंते तास्वानंदस्फूर्तिविशेषो विषयानंद उच्यते इति ननु स्वरूपानंदगोचरसत्ववृ
त्तिगतापकर्षवशात्तत्प्रतिबिंबरूपे विषयानंदेऽपकर्षाध्यासो वक्तव्यः मलिनद्रव्यकृतदर्पणोपाधिनिष्ठापकर्षवशात्तत्
प्रतिबिंबेऽपकर्षाध्यासदर्शनात् तथा च स्वरूपानंदगोचरसत्ववृत्तिषु सत्वगुणपरिणामभूतास्वपकर्षप्रयोजकं मलिन
द्रव्यं किंचिद्वक्तव्यं तच्च सात्विकदर्पणसंयुक्तस्यैव मलिनद्रव्यस्य दर्पणापकर्षाध्यापकत्वदर्शनादित्यत आह तमोगुणरू
पेति अंतःकरणस्य सत्वरजस्तमोगुणात्मकत्वादत्र वृत्तिष्वपि तमोगुणरूपोपाधिरनुवर्तते तत्कृतो यो मालिन्यतारतम्य
प्रयुक्तसत्वोत्कर्षापकर्षरूपस्फूर्तितारतम्यप्रयुक्तस्वरूपानंदः करणवृत्तिप्रतिबिंबितया विषयानंदभावे वर्तमानो गु
णरूपोपाधिमालिन्यतारतम्यदोषादपकर्षतारतम्येनाध्यस्तत्वनिःसंसारदशायां प्रकाशमानेऽप्यानंदेऽध्यस्ताप
कर्षतारतम्येन सातिशयित्वाद्दृष्टिः विद्योदये निखिलापकर्षाध्यासनिवृत्तेनारोपितसातिशयत्वापायात्कृतकृस
दोषः अपकर्षतारतम्यात्मको वृत्तिगतदोष इति यावत् तस्माद्दोषादपकर्षः सत्ववृत्तिप्रतिबिंबरूपे विषयानंदेऽध्यस्त इ
त्यर्थः सर्वे विषयसंपर्काः स्वस्वरूपवृत्तिकारणत्वेन निर्दिष्टाः तत्र विषयविशेषेति विशेषपदे विषयगतोत्कर्षतारतम्यपरे
तत्तारतम्ये च स्वस्वरूपवृत्तिगतोत्कर्षतारतम्यप्रयोजकत्वेन निर्दिष्टं इह तु स्वस्वरूपवृत्तिष्वेवापकर्षप्रयोजकतया अपक
र्षतारतम्यप्रयोजकतया च तारतम्योपेतं तमोगुणात्मकमलिनद्रव्यं निर्दिष्टमिति विभागो बोध्यः ततः किमत्राह इति सं
सारदशायामिति प्रकाशमानेऽप्यानंदेऽध्यस्तस्यापकर्षतारतम्येन सातिशयत्वात् विषयानंदस्येत्यर्थः तथा च निकृष्ट
मानंदमनुभवतः उत्कृष्टानंदस्वाभिमतस्य तत्संपादनाय प्रयतमानस्य तत्साधनत्वभ्रांत्या कदाचिद्दुःखसाधनेष्वपि
प्रवर्तमानस्य देवमनुष्यतिर्यगादियोनिप्राप्तिलक्षणो भवस्यानर्थ इति नास्ति निर्वृतिरित्यर्थः निवृत्तेरीशितेति मूलाज्ञानति

वृत्तौ न त्वकार्यमुपाधिनिवृत्त्या तत्कृतापकर्षापोह्यात्तन्निवृत्तेरित्यर्थः कृतकृत्येति कृतं कर्तव्यज्ञानं कृतं येन सः कृतकृत्यः तस्य भा
वस्तत्ता पुरुषस्याहि विद्योदयात्सर्वदुःखनिवृत्तये संवावास येच बहुकर्तव्यज्ञानमासीद्विद्योदये तद्दुःखमात्रस्य विवृत्तत्वाद्दस्य
त्कृपथबलत्रप स्वनिर्मलदर्पण इव निरतिशयस्वरूपानंदाविर्भावाच्च न निवृत्तये तस्य मेवान किञ्चित्कर्तव्यमस्तीति कृत
कृत्यते ति भावः न दा ह भगवान् श्रीकृष्णः एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारतेति एतन्निरतिशयानंदरूपब्रह्माप
रोक्षं तथा बुद्ध्वा बुद्धिमान्भवति पंडितो भवति कृतकृत्यश्च भवति हे भारत सर्वज्ञं यतस्तत्वज्ञानं विना पांडित्यादिकं न लभ्यते त
स्मात्तदेव संपादयस्व सर्वं संपत्स्यत इति भावः विशेषोपपत्तेरिति मुक्तिसंसारयोरिति शेषः ननु ब्रह्मानंदस्याज्ञानदोषावृतत्वे तस्य
तथा च मुक्तिसंसारयोर्विशेषः स्वव इतिनेत्याह निरुपाधिकेति एवमुक्तः प्रेमस्वरूपानंदावरणस्य तेन संभवति प्रकाशमानस्य
स्वप्रवृत्तेरनुभवसिद्धत्वादिति भावः साक्षिचैतन्यस्यानावृतत्वे तदभिन्नस्यानंदस्याप्यनावृतत्वापत्त्या मुक्तिसंसारयोरविशेषप्रसं
विशेषोपपत्तेर्निरुपाधिकप्रेमगोचरतया प्रकाशमानः सोऽपि सानंदो नावृत एवेति प्रश्ने नप्रकाशमानो प्यानंदो नास्ति न प्रकाशत इ
त्यादिति पूर्वपक्षे प्राप्ते स्वरूपस्यानंदस्यानावृतत्वेपि तयोर्विशेषः संभवतीति सिद्धांतो दर्शितः इदानीं तस्यावृतत्वमुपेत्यैव विशेषं मुक्तिसं
सारयोर्वदन्सिद्धांतं दर्शयति प्रमेत्विति वेदांतमतिपाद्यस्वरूपानंदो मे नास्ति न प्रकाशत इति व्यवहारदर्शनात्तदेव प्रमेत्नमावरणेना
वृतस्त्येव संसारदशायां मुक्तौ तु तदावरणनाशात्स्वरूपानंदस्फुरणमस्तीति न तयोरविशेषप्रसंग इत्यर्थः प्रमेप्रकाशमानो प्या
नंदत्रावृत एवेति संबंधः ननु नावृतस्तस्यानावृतत्वे उक्तव्यवहारविषयप्रसंगादिसे वकाराभिप्रायः ननु एवमात्मनि सदा निरुपाधिक
प्रेमानुस्यादनावृतस्वरूपानंदस्फुरणस्याभावात् इति कृतानंदस्फुरणस्य च कादाचित्कत्वादिति चेन्न फलबलेनावृतस्यापि स्व
रूपानंदप्रकाशस्य निरुपाधिकप्रेमहेतुत्वकल्पनात् सत एव परमप्रेमास्पदत्वलक्षणं सुखमिति विवरणस्याप्येवंत्वान्य
थोपपत्तेश्च प्रमेत्नैवाभिप्रायेण प्रकाशमानोपीत्युक्तं मन्यथा प्रकाशमानत्वविशेषणस्यावृतत्वकल्पने उपयोगाभावेन वैयर्थ्य ५२
प्रसंगादिति बोध्यं साक्षिचैतन्याभिन्नस्य सानंदस्यानावृतत्वे साक्षिचैतन्यमप्यनावृतं स्यादेकत्वाच्चावृतत्वानावृतत्वयोर्युगपद्विरोधादित्य
तत्राह ॥

एकस्मिन्नपीति यथा वस्तुत एकस्मिन्नेव चैतन्ये जीवेश्वरत्वाख्यो रूपभेदो कल्प्यते नाहमीश्वरः किं तु संसारीति व्यवहारब
लात् तथाहं सर्वज्ञानमानन्दो न भवामीत्यादिरूपेणाहंकाराद्यवभासकत्वेनास्यानन्दांशे दृश्यव्यवहारदर्शनात् तदनुरोधेनावि
द्यानन्दत्वाख्यो रूपभेदोऽनादिसिद्धः कल्प्यते यथा चैकस्मिन्नपि चैतन्ये जीवत्वावच्छेदेनाज्ञत्वादिकमीश्वरत्वावच्छेदेन तदभा
वश्च कल्प्यते तथैवानन्दत्वावच्छेदेनावृतत्वं चित्त्वाद्यवच्छेदेनाहंकाराद्यवभासकचैतन्ये तदभावश्च कल्प्यते फलबलादिति
न विरोधः जीवत्वादेरिव चित्त्वादिरूपभेदस्याप्यविद्याकल्पितत्वाभ्युपगमनान्नोक्तविरोधश्चेत्यर्थः नन्वेकस्मिन्नात्मनि रूपभे
देनावृतत्वतदभावयोर्विरोधाभावेऽप्यानन्दः प्रकाशमानो व्याहृत इति विरुद्धप्रकाशस्यावरणविरोधित्वादिति नेत्याह स्वरूपप्र
काशस्येति आरोपितरूपप्रकाशस्यावरणविरोधित्वकल्पनान्नस्वरूपप्रकाशस्तद्विरोधी न स्यावरणसाधकत्वादित्यर्थः

एकस्मिन्नपि सादिरूपविद्याकल्पितरूपभेदसंभवेन चैतन्यस्वरूपेणानावरणस्यानन्दरूपेणावरणस्य चाविरोधात् स्व
रूपप्रकाशस्यावरणानिवर्तकतया प्रकाशमानेऽप्यावरणस्याविरोधात्त्वदुक्तमर्थं न जानामीति प्रकाशमान एवाव
रणदर्शनात् न च तत्रानावृतसामान्याकारावच्छेदेन विशेषावरणमेवानुभूयत इति वाच्यं अस्यावरणस्यान्यावच्छेदेन
नन्वेवं प्रकाशमानोऽप्यानन्दः आवृत इति ग्रंथे प्रकाशमानत्वविशेषणं स्वरूपप्रकाशस्यावरणविरोधित्वज्ञापनार्थमिति तत्प्र
योजनं न संभवात् तद्विशेषणमात्मनि निरुपाधिकप्रेमसंभवज्ञापनप्रयोजनकमिति यदुक्तं तन्न संभवतीति चेन्न हि विनिरा
मकाभावेन तद्विशेषणस्योभयप्रयोजनकत्वमस्तु स्वरूपप्रकाशस्यावरणविरोधित्वस्यैवानन्दावरणपक्षे प्राप्तत्वाद्रूपप्रा
त्मनि निरुपाधिकप्रेमसंभवस्याप्यवश्यं ज्ञापनीयत्वात् स्वरूपप्रकाशस्यावरणविरोधित्वे हेतुत्वेन स्मारकत्वमुक्तमिति एवका
रानन्तरमात्मानोत्कार्थ इति शेषः श्रीकृष्ण एव वेदान्तवेद्यः परमात्मा विज्ञेयो यमहं तामभिधास्यामो पदेशानन्तरं मदस्य वा
क्यार्थबोधो न भवति स च मदस्त्वदुक्तमर्थं न जानामीत्यज्ञानमनुभवति इति प्रसिद्धं लोके तत्र वाक्यस्यास्तिकश्चिदर्थ

सि॰ ले॰ प्र॰ टी॰ ५२

इति जानामि आत्मवाक्यत्वाद्विशेषं तु न जानामीति एवकारदर्शनाद्वगतो यस्त्वत्वाकार्यत्वलक्षणः सामान्याकारः स एव विशेषाव
काज्ञानस्य विषयतया प्रकाशते तथा च त्वदुक्तमर्थं न जानामीत्यनुभवे ज्ञानविशेषणतया प्रकाशमानसामान्याकारस्यावरण
विषयत्वाभावादावरणविषयस्य विशेषस्य प्रकाशमानत्वाभावात् प्रकाशमानस्यावृतत्वेनायमनुभवः प्रमाणमिति शंकते न च
तत्रेति अन्यावरकाज्ञानस्यान्यावच्छेदेन प्रकाशमभ्युपगमे चैत्रं न जानामीत्यनुभूयमानाज्ञानस्य विष्णुमित्रविषयकत्वप्रसङ्गः इति
दूषयति अन्यावरणस्येति नन्वत्वदाकार्यत्वलक्षणआकारस्यावृतत्वामानरूपः आप्तोपदिष्टेऽश्रीकृष्ण इव त्वदुपदिष्टे श्रीकृष्णस्य
तिपत्तुमायेव अपितु अकार्यत्वस्य सत्वात् वेदान्तवेद्यत्वादिलक्षणाकारस्य विशेषरूपः तस्य श्रीकृष्णस्य स्वरूपमात्रवृत्तित्वात्तथा
भानेतिप्रसंगात् न च सामान्यविशेषभावो नियामक इति नातिप्रसंग इति वाच्यं व्याप्यव्यापकभावातिरिक्तसामान्यविशेष
भावाभावेन वह्निं न जानामीति धूमावरकाज्ञानानुभवप्रसङ्गात् तस्माद्यदवच्छिन्नमज्ञाने प्रकाशते तदेवावृतमिति प्रका
शमाने प्यज्ञाने न युज्यते अज्ञाने च पथ्यासाद्दृश्यं विहाय चैत्रं मम आवृणोतीति एवमानंदमपि तत्तत्स्वरूपवृत्तिकवलीकृते
च विशेषावरकाज्ञानं सामान्याकारावच्छेदेन प्रकाशत इत्युपगमेनातिप्रसंगः चैत्रत्वविष्णुमित्रत्वयोः सामान्यविशेषभावा
भावादिति शंकते न च सामान्येति किं सामान्यविशेषभावः श्रीकृष्णत्वविष्णुत्वयोरिव व्याप्यव्यापकभावः तदतिरि
क्तो वा नाद्वितीयः तस्मान्निरूपणादित्याशयेनाद्यं व्याप्येति आद्ये दोषमाह वह्निमिति तस्माद्ज्ञानानुभवेऽज्ञानविशेषणतया
यदस्तत्प्रकाशनेन तदेवावरणविषय इति वक्तव्यं न च त्वदुक्तं न जानामीति ज्ञानस्य त्वदुक्तार्थप्रकारकत्वेन ज्ञानविशेष्यकत्वेन
त्वदुक्तार्थो विशेषणरूप एवेत्युपगमेन ज्ञानस्य विशेषणज्ञानरूपकारणस्याभावात्तद्विशिष्टज्ञानानुभवो न स्यादिति वाच्यं अ
ज्ञानानुभवस्यानित्यसाक्षिरूपत्वोपगमेन तत्र विशेषणज्ञानानपेक्षणात् न च प्रकाशमानत्वमावृतत्वं च विरुद्धं प्रकाशस्यावर ५२
णविरोधित्वादिति वाच्यं अस्य विरोधस्य प्रागेव परिहृतत्वादित्याशयेनोपसंहरति तस्मादिति अन्यावरकाज्ञानस्यान्यावच्छिन्न

तथाभानासंभवादित्यर्थः यद्वत्किंचिदिति येन वस्तुना विशेषितमित्यर्थः ननु आनंदस्यावृतत्वे विषयसंपर्कदशायां विशेष्यानंदशंका-
योन स्यादित्यत आह प्रज्ञानं चेति ननु तेनावरणाभिभावकत्वोपगमात् ज्ञानस्य सर्वत्र वृत्तिविषयीकृतानंदानावरकत्वमिति क-
थ्यते अत आह स एष इति स वृत्तिविषयत्वप्रयुक्तानावरकत्वस्वभाव एव वृत्तिकृतावरणाभिभव इत्यर्थः ननु सर्वत्र वृत्तेरेकरू-
पत्वात् तत्कृतावरणाभिभवोऽप्येकरूप एवास्यात् तथा च विषयसंवेदनदशायामानंदोऽप्येकरूपतयैव प्रकाशेतेत्यत आह सा पक्व-
शुद्धरूपेणेति नेत्याह स चेति यथा प्रत्यूषसमये प्रालोकमानरत्नस्येन वा स्वतमस्तारतम्ययुक्ताभिभवो भवति तत्र तत्तमसावृता-
नां पदार्थानां तारतम्ययुक्तं प्रकाशनं भवति एवं विषयविशेषरूपकारणविशेषप्रयुक्तो यो वृत्तिषु विशेषः उत्कर्षतारतम्यरू-
पः तदुपयात्तरतमभावप्रयुक्त एवावरणाभिभवो भवति ततश्चानंदोपि तरतमभावप्रयुक्त एव प्रकाशत इत्यर्थः एवमप्यानंदस्यैक-

विकाये वावृणोति स एष वैषयिकानंदस्यावरणाभिभवः स चावरणाभिभवः प्रत्यूषसमये वाह्यावरणाभिभवात् कारण-
विशेषप्रयुक्तवृत्तिविशेषवशात्तारतमभावेन भवति अतः स्वरूपानंदविषयानंदयोर्विषयानंदानां च परस्परं भेदसिद्धि

त्वाभ्युपगमात् तत्र भेदस्य कथं सिध्यतीति तत्राह अतस्तिति वस्तुत एकस्मिन्नप्यानंदस्योपाधिप्रयुक्तभेदाभ्युपगमादित्यर्थः तथा च वि-
षयात्मावरणानिवृत्तौ सत्यां प्रकाशमानानंदः स्वरूपानंदः तदनिवृत्तिदशायां वृत्तिसंवेद्यतया प्रकाशमानानंदो विषयानंद इति स्व-
रूपानंदविषयानंदयोर्भेदो ज्ञानव्यक्तस्तथावृत्तिभेदेनानंदभेदाभ्युपगमाद्विषयानंदानां परस्परं भेदप्रसिद्धिश्चावकल्पत इ-
त्यर्थः अहंकारादीनां केवलसाक्षिभास्यत्वं परमप्रकृतं सिद्धमित्यभिप्रायेनाह सर्वव्यापीति स्वरूपानंदस्यानावृतत्वप्रयुक्तत्वस्याहं-
कृतत्वपदे चेत्यर्थः तेनेति साक्षिचैतन्येनेत्यर्थः ननु सिद्धांते संस्कारस्यानुभवनाशरूपत्वोपगमेन संस्कारार्थं साक्षिचैतन्यस्या-
हंकारादिगोचरवृत्त्यपेक्षास्त्वेवेति शंकते नन्वेवमिति अहंकारादिसाक्षिणो वृत्त्यनपेक्षत्वे सतीत्यर्थः अनुसंधानं स्मृतिः त-
दभावे नेति संस्कारो न स्यादनेनेत्यर्थः तदा यानासंभवे हेतुमाह ज्ञानस्यावस्थारूपस्येत्यादिना ननु यदि साक्षिचैतन्यस्यैति
दशायां तत्सूक्ष्मावस्थारूपसंस्कारोत्पत्तियोगस्तर्हि तन्नाशदशायां तद्भवति स्वतो नेत्याह नित्येनेति तथा चाहंकाराद्यव-

सि॰ ले॰
ग्रं॰ टी॰
५४

छिन्नसाक्षिचैतन्यस्यानावृतत्वेन तदभिभवार्थं वृत्त्यनपेक्षणेऽपि संस्कारार्थं तदपेक्षासत्त्वात् केवलसाक्षिभास्यत्वमहंकारादी
नामिति सिद्धान्तव्याकोप इति भावः अहंकारादिगोचरवृत्तिं विनैव संस्कारोपपत्तेर्न सिद्धान्तविरोध इति समाधत्ते अन्ये केचिदाहु
रिति स्वपदद्वयमहंकारपरं स्वसंसृष्टेन स्वादिना भास्यत इत्यनेन ग्रन्थेनाहंकारस्य यथाहंकारावच्छिन्नसाक्षिभास्यत्वं तथा
घटपटादिविषयगोचरवृत्त्यवच्छिन्नसाक्षिभास्यत्वमस्तीति दर्शितं भवति ततः किं तत्राह तस्येति घटादिगोचरवृत्त्यवच्छिन्नसा
क्षिचैतन्यस्यानित्यत्वात् तेन यथा घटादौ विषये संस्काराधानं संभवति तथा तेनैव वृत्त्यवच्छिन्नसाक्षिचैतन्येनाहंकारादावपि
संस्काराधानं संभवतीति नाहंकारगोचरवृत्त्यपेक्षेति भावः ननु अहंकारव्यतिरिक्ते घटादिषु सर्वत्र स्वाकारवृत्त्यवच्छिन्नचैतन्ये
रिति वदन्ति सर्वथापि साक्षिचैतन्यस्यानावृतत्वादावरणाभिभवार्थं वृत्तिमनपेक्ष्यैव तेनाहंकारादिप्रकाशनमिति वृ
त्तमेव ननु एवं कथमहंकारादीनामनुसंधानं ज्ञानसूक्ष्मावस्थारूपस्य संस्कारस्य ज्ञानेन तत्प्रयोगेन नित्येन साक्षिणा त
दाधानासंभवात् अन्ये केचिदाहुः स्वसंसृष्टेन साक्षिणा सदा भास्यमानोऽहंकारस्तत्र घटादिविषयवृत्त्याकारपरिण
तस्वावच्छिन्नेनापि साक्षिणा भास्यत इति तस्यानित्यत्वात् संभवति संस्काराधानं घटादौ विषय इव न हि स्वाकारवृत्त्यव
च्छिन्नसाक्षिणैव स्वगोचरसंस्काराधानमिति नियमोऽस्ति तथा सति वृत्तिगोचरसंस्कारासंभवेन वृत्तेः स्मरणस्मरणप्रसं
गात् अनवस्थापत्त्या वृत्तिगोचरवृत्त्यन्तरस्यानुव्यवसायनिरासेन निरस्तत्वात् किं तु घटवृत्त्यवच्छिन्नचैतन्येऽपि स्वप्रकाशनेन
नैव घटादिगोचरसंस्काराधानदर्शनात् स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमिति नियमोऽवसीयते तथा चाहंकारमात्र एव क
थमन्यगोचरवृत्त्या तदाधानमित्याशंक्याह नहीति तथा नियमे मानाभावात् अप्रयोजकत्वाच्चेति भावः नियमाभ्युपगमे बा
धमाह तथा सतीति ननु ज्ञानरूपवृत्तेः संस्कारादिलाभाय वृत्तिगोचरवृत्त्यन्तरमभ्युपेयं नेत्याह अनवस्थापत्तेरिति घटादिगोच ५४
रवृत्तिस्मरणसिद्ध्यर्थं तद्गोचरवृत्त्यन्तरोपगमे द्वितीयवृत्तिस्मरणाय तृतीयापि तद्गोचरा वृत्तिर्वक्तव्या स्यादेवं तत्तद्वृत्तिगोच
रवृत्त्यभ्युपगमापत्त्यानवस्था प्रसज्येत न च द्वितीयतृतीयादिवृत्तीनामप्येकास्मा चिरस्तासामेव नाशाभ्युपगमे सम्भवान्ना

नवस्थाप्रसक्तिरिति वाच्यं अस्मज्ज्ञायाहृत्तेरवच्छिन्नज्ञानत्वमन्यादस्यथासम्भवमेव घटाद्याकारोहृत्तौ कदाचिन्मयेदंज्ञायतेनेन वा
घटादिवृत्तिनाशानंतरं मयेदंज्ञातं नवेति वा संशयप्रसंगात् न स्मा ह्युत्तेरवच्छिन्नज्ञानत्वं वृत्तेर्हृत्यावच्छिन्नपदेशापये दे वानवस्था
मनेनैनैव स्वाध्येन निर्वंधने शुत्तव्यवसायो निरस्तः ननु स्वगोचरहृत्तैव स्वगोचरसंस्काराधाननियमो नास्ति हृत्ति ध्वंसमवादित्य
र्थः नन्वन्यगोचरवृत्त्या न्यगोचरसंस्काराधानोपगमे घटगोचरवृत्त्या पटादावपि तदाधानप्रसंगः इति शंकते किंचिति शक्तिप्र
संगपरिहाराय प्रयोजकमाह यद्वृत्त्येति यद्वस्तुगोचरवृत्त्यवच्छिन्नचैतन्येयावंतः पदार्थाः प्रकाश्यंते तेन तद्वस्तुगोचरवृत्त्या ताव
त्सु पदार्थेषु संस्काराधानमिति नियमेन घटगोचरवृत्त्यवच्छिन्नचैतन्ये च पटादेरप्रकाशनान्नातिप्रसंगः ननु स्वगोचरवृत्त्यैव स्व
गोचरसंस्काराधानमिति नियमः स्वेवकारार्थः न तु घटादिवृत्त्यवच्छिन्नचैतन्ये घटादिप्रकाशनेन निर्विवादं न तु चैतन्ये अहंकार
स्यापि प्रकाशनेन घटादिविषयवृत्त्याकारपरिणतस्यावच्छिन्नेनापि साक्षिणा भासनमिति पूर्वग्रंथे दर्शितं तथा च घटादिवृत्त्या
वृत्त्यागोचराधानामित्येव नियमः एवं च ज्ञानसुखादयोप्यंतःकरणवृत्तयस्तथायःपिंडाग्नुचरंतो विस्फुलिंगाइ
वस्त्ववच्छिन्नेन वह्निनेव स्वस्वावच्छिन्नेनानित्येन साक्षिणाभास्यंत इति युक्तं तेष्वपि संस्काराधानं यस्तु यदैकाकार
अहंकारेपि संस्काराधानमस्तु तथापि घटादिज्ञानरूपाया वृत्तेः स्वावच्छिन्नचैतन्ये प्रकाशनस्यासिद्धत्वान्न स्मा स्वगोचरसंस्का
रजनकत्वं न स्यात् तथा सुखदुःखेच्छाद्वेषादीनामहंकारधर्माणां घटादिवृत्त्यवच्छिन्नचैतन्ये प्रकाशनप्रसक्त्यभावान्न यातेषु
संस्काराधानेन स्यात् न च सुखादिरूपवृत्तिषु घटादिवृत्त्यासंस्काराधानेपि सुखदुःखादिगोचरांतःकरणवृत्तिभिरेव ता
सु तदाधानमस्तु ज्ञानरूपासु घटादिवृत्तिषु तदाधानार्थं वृत्त्यंतरोपगमे इवानवस्थाप्रसक्त्यभावादिति वाच्यं सुखदुःखा
दिगोचरवृत्तस्वरूपसमुपगमे मानाभावात् किंच ज्ञानरूपा किं वा इच्छादिवृत्तिवत्किं या रूपा नाद्यः तद्रूपादुक्तकरणाभावान्नांत्यः करण
तो व्यवस्थितत्वमाणत्वात् नद्वितीयः तस्यामपि वृत्तेः संस्काराधानायतद्गोचरवृत्त्यंतरोपगमे सेवानवस्थाभास्मानितिन्मा

सि॰ ले॰
प्र॰ ही॰
४५

ज्ञानस्वरूपस्य घटादिवृत्तिषु ज्ञानमिष्टं तस्य घटादिरूपवृत्तिषु च कथं संस्काराधानमित्याशंक्याह एवं चेति उक्तनियमे सती
त्यर्थः अन्तःकरणे घटादिवृत्तयस्तेषु तज्ज्ञानरूपास्तदवच्छिन्ना वा ताः सर्वाश्च अपि स्वस्वावच्छिन्नानि यच्चैतन्यभास्या एवं तथा च चै
तन्यस्यानित्यत्वेऽपि तदाभासस्य तथात्वं च केवलं तथा चोत्पद्यमानानामहंकारधर्माणामनित्यतया तत्तद्धर्मविशिष्टस्य गृहीतृ
दवभासकस्य चैतन्यस्य नाशरूपस्तद्धर्मगोचरसंस्कारः संभवतीति न ज्ञानस्य घटादिषु संस्कारानुपपत्तिरिति भावः दृष्टान्ते
स्वपदे विस्फुलिंगपदं घटस्यैकस्याकारस्तु वाकारो यस्याः सा घटैकाकारा सा चासौ धीश्चेति सा स्थिता चित् चिदाभासः घटा
कारवृत्तिप्रतिबिंबरूपं घटज्ञानमिति यावत् घटमेव न च घटस्य ज्ञानतामपीत्येवकारार्थः ज्ञाततानाम ज्ञानविषयत्वं विषय

धीस्था चिद्घटमेवावभासयेत् घटस्य ज्ञाततां ब्रह्मचैतन्येनावभास्यत इति कूटस्थदीपोक्तो विषयविशेषणस्य ज्ञान
स्य विषयावच्छिन्नब्रह्मचैतन्यावभास्यत्वपक्षः यश्च तत्त्वप्रदीपिकोक्तो ज्ञानेच्छादीनामनवच्छिन्नशुद्धचैतन्यरूपनित्य
साक्षिभास्यत्वपक्षस्तयोरपि चैतन्यस्य स नासंबंधेन विषयनिष्ठं ज्ञानमित्यर्थः तच्च ज्ञातं विषयस्य विशेषणं ज्ञातो घ
ट इत्यनुभवादिति भावः नन्वनयोः पक्षयोर्ज्ञानेच्छादिभासकचैतन्यस्य नित्यत्वात् कथं ज्ञानेच्छादिषु संस्कारः न च सर्वोक्तरी
त्या ज्ञानेच्छादिवृत्तीनां स्वस्वावच्छिन्नसाक्षिचैतन्यप्रकाशत्वमादायानयोरपि पक्षयोः संस्काराधानमिति वाच्यं घटादिगोच
रवृत्तिप्रतिबिंबरूपज्ञानस्य ज्ञाततानाशे हि तस्य तद्रूपानवच्छिन्नविषयाधिष्ठानब्रह्मचैतन्यभास्यत्वोक्तिविरोधात् तथा हि
तीयपक्षे ज्ञानेच्छादिवृत्तीनामनवच्छिन्नसाक्षिभास्यत्वोक्तिविरोधश्च संगच्छतः कथं तयोः पक्षयोस्तदाधानमत आह त
योरपीति विषयावच्छिन्नब्रह्मचैतन्यस्य ज्ञाततावभासकत्वमतेन ब्रह्मचैतन्यं ज्ञाततायाश्चापरोक्षज्ञानरूपमेवोपेयते ज्ञा ४५
तो घट इति ज्ञाततायाश्चापरोक्षत्वानुभवात्

अनवच्छिन्नसुखचैतन्यमपीच्छाज्ञानादीनामपरोक्षज्ञानरूपमेवोपेयं वेच्छादिवृत्तीनामप्यपरोक्षत्वानुभवात् तथा चापरोक्ष
ज्ञानरूपं द्विविधं चैतन्यं स्वस्वविषयस्य तैर्ज्ञानेच्छादिभिः संसर्गाध्यासंभवो अपरोक्षज्ञानस्य स्वसत्तापन्नविषयानुभ-
वरूपत्वनियमात् तत्र स्वस्वविषयभूतज्ञानेच्छादिनामप्यसमयेज्ञानादिविशिष्टरूपेण द्विविधचैतन्यस्यापि नाश्यत्वलक्षणसं-
स्कारोपपत्तिरित्यर्थः न योरपीति समष्टौ चैतन्यस्येति द्विविधस्येति शेषः तन्मते ज्ञानेच्छादिरूपवृत्तिपरं यदि च स्वगोचरवृत्ति-
वत्स्वसंस्काराधानमवश्यं वाच्यं तदापि नानुपपत्तिः अविद्यावृत्तिभिरहंकारतद्धर्मगोचराभिरहंकारादिषु संस्काराधानसंभ-
वात् न च वृत्तिगोचरवृत्त्युपगमे प्रसक्तानवस्थाप्रसक्तिरिति वाच्यं अविद्यावृत्तीनामनुभवायोग्यत्वेन तासु ज्ञानाद्युसंस्कारा-
यवाज्ज्ञानेच्छाद्यनुभवकाले विद्यावृत्त्यंतरानुपगमात् न चाविद्यावृत्तीनामज्ञानसंस्कारजनकत्वकल्पने गौरवमिति वाच्यं
संसृष्टापरोक्षरूपत्वावृत्तिसंसर्गाध्यासंभवाच्च इति तत्संसृष्टानि स्वस्वरूपसद्भावान्न तेषु संस्काराधाने काचिदनुपपत्तिरि-
ति अमेतस्य सुषुप्तावविद्याद्यनुसंधानसिद्धये कल्पितामविद्यावृत्तिमहंकाराद्यगोचरत्वाद्यमर्थ्यसंस्कारमुपपादयति
न चास्मिन्पक्षे प्रतावंतं कालमिदमहं स्वप्नमद्राक्षमिति स्वप्नज्ञानधारावाकालीनाहमर्थानुसंधानानुपपत्तिः अवच्छेदकभेदे
सुषुप्तौ नाशात् तज्ज्ञानकालस्य सुखस्याद्रित्यादिस्माशयेनमततोतरमाह अन्येत्विति उत्थितस्याविद्याद्यनुसंधानसिद्धये सुषुप्तौ कल्पि-
तामविद्यादिगोचरामविद्यावृत्तिमिवाहमाकारामविद्यावृत्तिमंगीकुर्वन्तीति वाक्ययोजनीयं यथाश्रुतेनुसुषुप्तौ यदविद्या-
द्यनुसंधानेन सिद्धयतिभ्रान्तिः स्यात्तात्रैयानान्यास्तु सुषुप्तौ कल्पितायाएवाविद्यावृत्तेरहमाकारत्वमंगीकुर्वन्तीति भ्रान्तिः
स्यादितिवाच्यं अविद्यादीत्यादिपदं सुखवत्सुषुप्तौ सप्रहार्थं सुखमहमस्वाप्सं न किंचिदवेदिषमिति सुषुप्तिकालीना-
नां सुखं सुषुप्त्यविद्यादीनामुत्थानानंतरमनुसंधानदर्शनात्तत्कालीनाविद्याद्यनुभवस्य निस्यसाक्षिरूपतया तस्या
विद्यावृत्तिरूपावच्छेदकाकल्पने संस्कारासंभवेनोक्तानुसंधानाभावप्रसंगात् न च ज्ञानाहंकारादिगोचराविद्यावृत्त्युप

सि॰ले॰
प्र॰टी॰
५६

गमेनेतेषां केवलसाक्षीवेद्यत्वसिद्धांतव्याकोप इति चेन्न अविद्यावृत्तीनां अहमज्ञानकारणजन्यत्वाभावेन ज्ञानात्मकवृत्तित्वाभावा
त् ज्ञानात्मकवृत्त्यनुपहितसाक्षिण एव केवलसाक्षिशब्दार्थत्वांगीकारादिति भावः अहमर्थग्रहणं तद्धर्माणामप्युपलक्षणं
तेन त्वन्मते यथा बाधकाभावेन च तद्धर्मेष्वप्यविद्यावृत्तिभिः संस्कारस्योपपादितत्वादिति ध्येयं नन्वस्मिन्पक्षेऽहमज्ञानधाराकाली
नाहमर्थादिष्वहमर्थादिगोचराविद्यावृत्त्यसंभवेन संस्काराधानेन स्यात् धाराकालेऽविद्यावृत्त्यंगीकारे युगपद्वृत्तिद्वयप्रसंगा
दित्याशंकामनूद्य दूषणं तेन परिहरति नन्वस्मिन्नत्यादि इति अविद्यावृत्तिभिः संस्काराधानपक्ष इत्यर्थः अवच्छेदकभेदेनेति शिर
सि मे वेदना पादे मे सुखमिति अनुभवदर्शनादिति भावः वृत्तिद्वयेति अन्यज्ञानधाराकालेप्यहमर्थगोचरान्तःकरणवृत्तिरहम
र्थगोचराविद्यावृत्तिश्च युगपत्प्रसज्यमाना अवच्छेदकभेदेन न विरुध्यत इत्यर्थः संतानेति नन्वज्ञानधाराकालेप्येकैवाविद्यावृत्ति
न तु सुखदुःखयौगपद्यवद्वृत्तिद्वययौगपद्यस्याप्यविरोधेनान्यज्ञानधाराकालेप्यहमाकाराविद्यावृत्तिसंतानसंभवादि
ति अपरे त्वहमाकारा वृत्तिरन्तःकरणवृत्तिरेव किंतूपासनादिवृत्तिवज्ज्ञाने ऽहमज्ञानकारणजन्यत्वात् न हि तत्र चक्षु
रादिप्रमाणबलदर्शनं संभवति न वा लिंगादिकं लिंगादिमातिसंधानस्यास्याप्यहंकारानुसंधानदर्शनात् नापि मनः कर
णमिति वक्तुं शक्यते तस्यान्तरज्ञानात्वे मानाभावात् लाघवाच्चेति चेत् सत्यं तथाप्यन्तःकरणवृत्तिसंततिरूपत्वाद्धारायास्तत्का
लीनाविद्यावृत्तेरपि संततिरूपत्वसंभवतीति संभावनामात्रेण तथोक्तमत एवाह संतानसंभवादिति अहमर्थांशे अन्तःकरणवृ
त्तेरेव संस्काराधानं संभवतीति न तद्दोषोऽप्यविद्यावृत्तिः कल्पनीया अन्तःकरणवृत्तिसंभवे तत्कल्पनायोगात् न चान्यज्ञानधारा
कालेऽहमर्थगोचरान्तःकरणवृत्तिर्न संभवति सुखदुःखयौगपद्यवज्ज्ञानद्वययौगपद्यायोगादिति वाच्यं संस्काराधायकवृत्ते
ज्ञानरूपत्वानुपगमादिति मतमाह अपरे त्विति तर्हि सो वृत्तिरवृत्तादिवृत्तिवज्ज्ञानरूपापि स्यात् तथा च ज्ञानात्मकवृत्त्यनुपहित ५६
साक्षिवेद्यत्वमप्यहमर्थस्य केवलसाक्षिभास्यत्वसिद्धान्तहानिरित्याशयेन शंकते किंत्विति परिहरति उपासनादिति रक्षा

दित्येवंप्रकारार्थमादिपदं अनुसंधानमत्रभवः क्वचिदपीति स्मृतिज्ञानं अनुपादानभूतस्यांतःकरणस्याहमाकारवृत्तेः संस्कारास्यादन
त्र क्वचिदपि स्मृतौ नस्य करणत्वात् स्मृतेरित्यर्थः ननु नेति योऽहं स एवेमं सान्तरङ्गावेतश्रीकृष्णमनुभूतवान् सोऽहमिदानीं न स्मरामीति प्रत्य
भिज्ञा अहमर्थविषयोज्ञानेन न स्यात् ज्ञानकरणजन्यत्वादित्यर्थः इत्याशयमाशंक्य परिहरति नेति नहि प्रत्यभिज्ञानं नज्ञाणोपि ज्ञानं न स्यादे
कस्याः प्रत्यभिज्ञायां ज्ञानत्वतदभाववत्त्वयोर्विरोधेनायोगादित्याशयेनाह नस्यादिति प्रत्यभिज्ञायाश्चत्यर्थः अंशभेदेनेति विषयैकदे
शो द्वौ अंशौ स च भागो वर्णितः अहमंशाऽऽदित्यंशश्चेति च परोक्षत्वेति पर्वतो वह्निमानित्यनुमितेः सिद्धान्ते वह्न्यंशे परोक्षत्वेऽपि स
न्निकृष्टपर्वतांशे तत्परोक्षत्वमप्येयते मतद्वयसंमतदृष्टान्तमाह प्रमात्वेति पूर्वोपदर्शितप्रत्यभिज्ञायामहमर्थांशेपि ज्ञानत्वम
पेयमन्यथा हि प्रत्यभिज्ञाप्रामाण्येनान्तःकरणोपहितचैतन्यरूपस्य जीवस्य स्थायित्वसाधनेसूत्रभाष्यप्रभाष्ययोर्हिपरमार्थविरो

धेन तस्योपादानभूतस्य क्वचिदपि करणत्वाहङ्कारेण नहि मदर्थे प्रत्यभिज्ञापि ज्ञानं न स्यादिति चेन्न तस्याहमंशे ज्ञान
त्वाभावेपि तत्तांशे स्मृतिकरणत्वेन स्मृतिसंस्कारजन्यतया ज्ञानत्वात् अंशभेदेन ज्ञाने परोक्षत्वापरोक्षत्ववत् प्रमात्वा
प्रमात्ववच्च ज्ञानत्वाज्ञानत्वयोरप्यविरोधादित्याशयः इतरेत्वहमाकारापि स्मृतिज्ञानमेव प्रमाणमहं जानामीत्यनुभवात् न
चकरणासंभवः अनुभवानुसारेण मनस एवान्तरिन्द्रियस्य करणत्वसापि कल्पनादित्याशयः एवंसति बाह्यविषया
ध्येन तथा च सत्त्वं अनुस्मृतेश्चेति अनुस्मृतिः प्रत्यभिज्ञा तथा च तत्सूत्रस्थं भाष्यं य एवाहं पूर्वेद्युरद्राक्षं स एवाहमद्य स्मरामी
ति तथा च प्रत्यभिज्ञाया अहमंशे ज्ञानत्वाभावाभिधानमयुक्तमिति मतमानानां मतमाह इतरेत्वेति अनुभवादिति अहमर्थगो
चरस्मृतिर्ज्ञानत्वानुभवादित्यर्थः मनस इति अत एव विषयत्वादेभाष्यं बुद्धेः कारणत्वाभ्युपगमादिति अत एवाहंकारयथा
र्थज्ञानस्वबोधेनाकेवलसाक्षिभास्यत्वमपकृष्टार्थरूपस्यमनःप्रत्यासाधारणविषयस्यसत्त्वात् तस्येन्द्रियत्वप्रमाणपादेचत्व
दाहेविभाष्यकारैरेव अवस्थापितमितिमतम् केवलसाक्षिभास्यत्वसिद्धान्तो प्यतएवाहमर्थमतिरिक्तज्ञानस्वबोधिमात्र

सि॰ ले॰
श॰ टी॰
५७

विषयत्वमपि मंतव्यं ननु मनस इंद्रियत्वपक्षे रूपादौ चक्षुरादेरिव तस्याहमर्थे प्रमाणत्वं वाच्यं तच्च न संभवति अहमर्थस्यानावृत
नसाक्षिचैतन्येऽध्यस्तस्याज्ञातत्वाभावेन मनसः प्रमाणत्वापादकाभावादिति चेन्न तद्वति तत्प्रकारकानुभवत्वमबाधितानुभवत्वं
वा प्रमात्वमिति मतानुरोधेनाहमाकारज्ञानस्य प्रमात्वोपपत्तौ तत्करणस्य मनसोऽपि चक्षुरादेरिव प्रमाणत्वसंभवादिति भावः
ननु तर्हि परोक्षवृत्तीनामावरणाभिभावकत्वनियमस्याहमाकारापरोक्षवृत्तौ व्यभिचार इत्याशंक्य नियमस्य संकोचं दर्शय
ति पर्यवसन्नेति अहमाकारापरोक्षवृत्त्युपगमे सतीत्यर्थः उक्तनियममप्याक्षिपति नन्विति इदं रजतमिति भ्रमस्थलेऽप्ययमिद
माकारापरोक्षवृत्तिरुदेति यस्मादिदं रजतमिति भ्रमो भवति तत्रेदमाकारायाः प्रथमोत्पन्नवृत्तेरज्ञाननिवर्तकत्वं किं नास्ति

परोक्षवृत्तीनामेवावरणाभिभावकत्वनियमः पर्यवसन्नः ननु नायमपि नियमः शुक्तिरजतस्थले इदमाकारवृत्तेरज्ञा
नानभिभावकत्वात् भ्रमस्योपादानत्वाभावेन रजतोत्पत्त्ययोगादिति केचित् अत्राहुः इदमाकारवृत्त्येदमंशाज्ञाननि
वृत्तावपि शुक्तित्वादिविशेषांशाज्ञानानिवृत्तेस्तदेव रजतोपादानं शुक्तित्वाद्यज्ञाने रजताध्यासस्य तत्कार्यत्वेनानुभव
स्यानुभूयमानत्वात् अध्यासभाष्यटीकाविवरणेऽनुभूयमानान्वयव्यतिरेकस्यैवाज्ञानस्य रजताद्यध्यासोपादा
नत्वप्रसिद्धेश्च आद्ये नियमस्य व्यभिचारमाह नायमपीति यथा परोक्षवृत्तिमात्रमज्ञाननिवर्तकमिति नियमो नास्ति अहमाकारवृत्तौ
व्यभिचारात् तथा बाह्यगोचरापरोक्षवृत्तिमात्रमज्ञाननिवर्तकमिति नियमोऽपि नास्ति इदमाकारवृत्तौ व्यभिचारादित्यर्थः द्वि
तीये बाधकमाह भ्रमस्येति इदमाकारवृत्तेरज्ञानाभिभावकत्वमित्यर्थः इदमाकारवृत्तिनिवर्त्याज्ञानमपि रजतोपादानभूता
ज्ञानमस्तु तथा च न व्यभिचारः न वा रजतोत्पत्त्ययोग इति परिहरति अत्राहुरिति शुक्तित्वादिविशेषांशावरकाज्ञानमेव रज
तोपादानमित्यत्र मानमाह शुक्तित्वाद्यज्ञानइति नीलपृष्ठत्वादिकमादिपदार्थः रजतमेवाध्यस्यतइत्यध्यासइत्यर्थः अ ५७
ध्यमतत्संदेहविशेषांशापरं द्वितीयतत्पदमध्यासपरं तत्र सम्मतिमाह अध्यासेति टीका पंचपादिका अनुभूयमानान्वयव्य

तिरेकौ यस्येति विग्रहः ननु पुरोवर्त्तिद्रव्यस्य शुक्तित्वादिविशेषरूपविशिष्टस्यैव रजतकारणज्ञानानावृतत्वाभ्युपगमेन तस्यै
वाधिष्ठानत्वं स्यात् न त्विदन्त्वरूपविशिष्टस्येदमंशस्य सविलासाज्ञानविषयस्यैवाधिष्ठानत्वात् तथा चाधिष्ठानारोप्ययो
रेकज्ञानविषयत्वानियमात् शुक्तिरजतमिति भ्रमाकारः स्यात् न स्यात्त्विदं रजतमिति प्रतीत्याकारः इदमंशस्याधिष्ठानत्वा
भावादिति न इत्याह अतएवेति अध्यासोपादानाज्ञानविषयत्वादेवेत्यर्थः शुक्त्यंशस्य इति शुक्तित्वविशेषरूपेणावृतस्य
वच्छिन्नचैतन्यमित्यर्थः इदमंशस्याधिष्ठानत्वाभाव इष्ट इत्याशयेनाह इदमंश इति नन्तु तस्याधारत्वेप्यागन्तमेवाधि
ष्ठानत्वं तयोर्भेदाभावादिति नेत्याह सविलासेति विलासो रजतादिविक्षेपः विषयत्वमावृतत्वं अतद्रूपोपीति तस्य
इदमंशस्य रजतादिपरं तथा चाध्यस्तरजतादिभेदरहितोपि तदभिन्नत्वेन स्फुरन्नित्यर्थः अधिष्ठानस्यैवारोपितरजतता

अतएव शुक्त्यंशोधिष्ठानं इदमंशस्त्वाधारः सविलासाज्ञानविषयोधिष्ठानं अतद्रूपोपि तद्रूपेणारोप्यबुद्धौ स्फुरन्ना
धार इति संक्षेपशारीरके विवेचनादिति अपरेत्विदं रजतमितीदमंशस्याभिन्नत्वेन प्रतीयमानस्य रजतस्येदम
शाज्ञानमेवोपादानं न त्विदमाकारवृत्त्यावरणशक्तिमात्रनिवृत्तावपि विक्षेपशक्त्यासत्त्वात् तद्वृत्तेर्नोपादानत्वा

दात्म्याद्वस्तुगत्येदमंशस्य तद्रूपत्वमिति बोध्यं अस्मिन्मते ऽधिष्ठानारोप्ययोरेकज्ञानविषयत्वं नास्ति किन्त्वाधारारोप्य
योरेवेति न भ्रमस्य शुक्त्यंशालोकेवापत्तिरिति नन्वधिष्ठानारोप्ययोरारोपे प्रकाशमानत्वस्यासम्भवान्नाभाष्यटीका
विवरणादिग्रन्थसमर्थितत्वात् तद्विरोधित्वमापन्नकामतान्तरं तद्विरुद्धमात्र अपरे त्विति संभिन्नत्वं तादात्म्यमिति यावत् अ
ज्ञानमेवेति न तु विशेषांशाज्ञानमित्येवकारार्थः विशेषांशस्यारोपे स्फुरणाभावेन तस्याधिष्ठानत्वासम्भवादिति भावः
शुक्तित्वादिरूपविशेषदर्शनस्याध्यासप्रतिबन्धकत्वात् तदभावविषयेषु एवोक्तान्वयव्यतिरेकावितिभावः नन्विदमाका

सि॰ ले॰ रजतस्य इदमंशाज्ञानस्यानिवृत्तत्वात्कथमिदमंशाधिष्ठानत्वमत आह तस्य चेति इदमंशाज्ञानस्येत्यर्थः ननु ज्ञानस्यावरणांश
प्र॰ टी॰ टि॰ मात्रेति विक्षेपशक्त्या सहानुवृत्तिश्च क्वापि न दृष्टा अत आह जलप्रतिबिंबेनेति प्रपंचेति जीवन्मुक्तस्यापि अन्तःकरणादिप्रपं
१८ चप्रतीतेः सत्त्वादिति भावः सर्वात्मनेति रजतादिभ्रमस्थले हि सर्वात्मनाधिष्ठानसाक्षात्कारो नास्ति शुक्तित्वादिविशेषरू
पेण शुक्तिसाक्षात्काराभावात् तत्र इदमंशाज्ञाननिवृत्तावपि विशेषांशाज्ञाननिवृत्त्यभावात् तस्याध्यासोपादानत्वप्रसक्ति
रस्ति प्रतिबिंबभ्रमस्थले तु जलेवृत्तौ नास्त्येवो धीग्रप्रवायवृद्ध इति सर्वात्मना विशेषदर्शनस्य सत्त्वात्तन्मात्रांशाज्ञाने निवृत्ते
विशेषांशाज्ञानमनिवृत्तमिति विभागासंभवेन विशेषांशाज्ञानस्योपादानमिति वक्तुमशक्यं तस्मादत्रवृत्तान्तो यत्वाद्यध्यासोऽनु
रोधेनैकस्यैवाज्ञानस्यावरणांशनिवृत्तावपि विक्षेपशक्तिमदज्ञानांशानुवृत्तिरूपेया तथा जीवन्मुक्तस्यावस्थायामपि ज्ञाते
संभवः जलप्रतिबिंबितवृत्ताथोऽग्रत्वाध्यासे जीवन्मुक्तानुवृत्तप्रपंचाध्यासे च सर्वात्मनाधिष्ठानसाक्षात्कारानंतरम्भा
विन्यावरणनिवृत्तावपि विक्षेपशक्तिसहिताज्ञानमात्रस्योपादानत्वसंभवतिपत्तेरित्याहुः कवितार्किकचक्रवर्तिनृसिं
हभट्टोपाध्यायास्त्विदं रजतमिति भ्रमरूपवृत्तिव्यतिरेकेण रजतोत्पत्तेः प्रागिदमाकारावृत्तिरेव नासीदिति तस्यात्र
त्वसाक्षात्कारादावरणमात्रनिवृत्तिर्विक्षेपशक्तिमदज्ञानांशानुवृत्तिश्च वाच्या यदा तदा रजताध्यासस्थलेपीदमंशाज्ञानस्योपा
दानत्वं संभवतीति भावः एवं वाह्यगोचरापरोक्षवृत्तीनां सर्वासामेवावरणाभिभावकत्वनियमस्य भ्रमस्थलीयेदमाकारवृत्तौ
याव्यभिचारशंकासामत्रापीदमंशाज्ञाननिवर्तकत्वस्येदमंशावरणमात्रनिवर्तकत्वस्य वा सत्त्वादित्युपपादनेन निरस्ता इदा
नीं प्रथममिदमाकारवृत्तिरेव भ्रमस्थले नास्ति तत्र न व्यभिचारशंका तत्समाधानं तु दूरत एव निरस्तमित्याह कवितार्किकेति
भ्रमरूपवृत्तीति एवं मतद्वये इदमाकारवृत्तेः सत्त्वात्तदभिव्यक्तचैतन्यरूपमेव शुक्तिरजतादिज्ञानं न तु वृत्तिरूपमस्मिन्मते १८
तदभावाद्वृत्तिरूपमेव तज्ज्ञानमिति मंतव्यं एतच्चाग्रे स्फुटं भविष्यति यमिज्ञानरूपामिदमाकारवृत्तिं निराकरोति तथाहि

त्यादिना सिद्धिकमनुभवसिद्धा उत कार्यकल्प्या अध्यासे सामग्री कल्प्या नाद्य इत्याह नतावदिति ज्ञानाद्भिन्नेति इदमित्येकं ज्ञान
मिदं रजतमिति ज्ञानमपरमिति सत्त्वानुभवाभावादित्यर्थः द्वितीयं निराकरोति नाप्यधिष्ठानेति अध्यासरूपकार्यस्य कारणमधि
ष्ठानगोचरसामान्यज्ञानमन्तरेणानुपपद्यमानं सत् तत्कल्पयति तत्र अधिष्ठानसामान्यज्ञानं रूपादिदमाकारवृत्तिसिद्धा
तीतं पिनमंतव्यं अधिष्ठानसामान्यज्ञानस्याध्यासकारणत्वे मानाभावादित्यर्थः मानाभावोऽसिद्ध इति शंकते नचेति इदमर्थे
चक्षुः संप्रयोगे सति रजतादिरूपस्याध्यासस्योत्पत्तिर्नाम यथेयमनुभवसिद्धं तथा चोक्तान्वयव्यतिरेकाभ्यामधिष्ठानसामा
न्यज्ञानस्य रजताद्यध्यासं प्रति कारणत्वं सिद्ध्यति नचोक्तान्वयादिना संप्रयोगस्यैवाध्यासकारणत्वं सिध्यति न धर्मिज्ञानस्ये

ज्ञाननिवर्तकत्वसदसद्भावविचारं निरालंबनं मेन्यंते तथा हि नतावदन्वयरूपवृत्तिव्यतिरेकेणेदमाकारावृत्तिरनुभ
वसिद्धा ज्ञानद्वित्वाननुभवात् नाप्यधिष्ठानसामान्यज्ञानमध्यासकारणमिति कार्यकल्प्यानस्य तत्कारणत्वे माना
भावात् नचाधिष्ठानसंप्रयोगाभावे रजताद्यनुपपत्तिः तत्रमाने तत्रोऽदुष्टेंद्रियसंप्रयोगस्यैवाध्यासकारणत्वप्रा
प्तेः नच संप्रयोगो न सर्वत्र भ्रमव्यापी अधिष्ठानस्फुरणं तु सर्वतः प्रकाशमाने अप्रसंगात् अहंकाराद्यध्यासमपि व्या

प्नोति तथाप्यहंकाराद्यध्यासे संप्रयोगासंभवेन व्यभिचारापत्तेरतः संप्रयोगस्याध्यासं प्रति कारणतया तत्काभ्यामेवान्व
यव्यतिरेकाभ्यां शुक्तिरजताद्यध्यासस्थले धर्मिज्ञानस्यैव संप्रयोगसाध्यस्य कारणत्वं कल्प्यते तथा चाधिष्ठानसामान्या
ध्यासकारणत्वं उक्तान्वयव्यतिरेकेऽप्रमाणं भवतु एवं तिरस्कृत्याभिसंधिः अभिसंधिमज्ञात्वा दूषयति नन्विति उक्तान्वया
दिनेत्यर्थः संप्रयोगमात्रस्य प्रमास्थले साधारणत्वात् दुष्टसंयुक्तं धर्मिज्ञानकारणवादी स्वाभिसंधिमाविष्करोति नच संप्र
योग इति अधिष्ठानसामान्यज्ञानस्य संप्रयोगस्यैव न व्यभिचार इत्याह अधिष्ठानस्फुरणं त्विति संप्रयोगे केवल चरणाथेस्त्व
दिति: अधिष्ठानस्फुरणं कल्प्यं शुक्तिरजताद्यध्यासस्थले व्याहंकाराद्यध्यासमपि व्याप्नोतीत्यर्थः सन्त इति वा स्वचेतनस्याहंत

सि॰ ले॰ त्वादृत इति कृतं तत्राधिष्ठानस्फुरणं सादिचैतन्यस्यानावृतत्वादहंकाराद्यध्यासे स्वप्रभपंचाद्यध्यासे च तत्त्वतः सिद्धमित्यर्थः॥ अ
प्र॰ टी॰ धिष्ठानस्य सामान्यज्ञानस्यापि व्यभिचारमाह तस्यापीति । उक्तस्थानेनन्छ इत्यर्थः घटाद्यध्यासव्यापित्वाभावादित्यर्थः तथा च
५५ धर्मिज्ञानं नाध्यासकारणमिति भावः अव्यापित्वशङ्कितं व्यभिचारमुपपादयति घटादीत्यादिना घटाद्यध्यासस्थले शुक्तिर
जताद्यध्यासस्थलइव किं वृत्तिकृतमधिष्ठानस्फुरणमहंकाराद्यध्यासस्थलइव स्वतःसिद्धं वा नाद्य इत्याह घटादिप्रत्यक्षा
दिति तत्सदंशघटाद्यंशं न द्वितीय इत्याह स्वरूपेति नन्वधिष्ठानप्रकाशमात्रमध्यासे कारणं लाघवात् न त्वभिव्यक्ताधिष्ठान
प्रकाशस्तथा च सन् घटः सन् पट इत्यादिरूपे घटाद्यध्यासे शुद्धघटाद्यधिष्ठानसत्स्वरूपस्य ब्रह्मणः स्वप्रकाशत्वादधिष्ठानप्रकाशमा
स्तीति वाच्यं तस्यापि घटाद्यध्यासाव्यापित्वात् घटादिप्रत्यक्षात्प्राक् तदधिष्ठानभूतं नीरूपब्रह्म मात्रागोचरत्वाद्
व्यवृत्त्यसंभवात् स्वरूपप्रकाशस्यावृतत्वात् आवृतानावृतसाधारणस्याधिष्ठानप्रकाशमात्रस्याध्यासकारणत्वे शु
क्तीदं अंशसंप्रयोगात्प्रागपि तदवच्छिन्नचैतन्यस्वरूपप्रकाशस्यावृतस्य सत्त्वात् रूप्याध्यासापत्तेः न चाध्यासस्सामा
न्येधिष्ठानप्रकाशसामान्यं हेतुः प्रातिभासिकाध्यासे अभिव्यक्ताधिष्ठानप्रकाश इति नातिप्रसंगः सामान्ये सामान्यस्य
तंत्र तथाप्यस्तीति न व्यभिचार इत्याशंक्याह आवृतानावृतेति तदापीति संप्रयोगात्प्राक्कालेपीत्यर्थः धर्मिज्ञानकारणवादी
शंकते न चाध्यासस्सामान्य इति प्रातिभासिकेति अभिव्यक्ताधिष्ठानस्फुरणं प्रातिभासिकाध्यासे एव कारणमाचार्याणाम
भिमतं तत्रैव दोषसंप्रयोगसंस्काररूपकारणत्रयजन्यताया अध्यासटीकाविवरणादिषु व्यवस्थापितत्वेन संप्रयोगकार
णताया आह कथमाणलभ्याधिष्ठानापरोक्षस्य तत्रैव कारणत्वसिद्धेरित्यर्थः प्रकाशपदानन्तरं केतुपदमत्र विवक्षणीयं नयतिप्र
संगइति नतु संप्रयोगात्प्राक् रजताध्यासप्रसंग इत्यर्थः रजताध्यासस्य प्रातिभासिकत्वेन तदधिष्ठानापरोक्षत्वाय संप्रयोगापेक्षी ५५
नवृत्तेरपेक्षत्वादिति भावः उक्तेत्यादि इति तथा च धर्मिज्ञानस्याध्यासकारणत्वे संप्रयोगकारणताग्राहकान्वयादेः प्रमाण

स्यसत्त्वात् बाधकाभावाच्च तस्याध्यासकारणत्वासिद्धाविदमाकारावृत्तिःसिद्धेति भावः अभिव्यक्ताधिष्ठानप्रकाशस्य प्राति
भासिकाध्यासेऽपि सर्वत्राप्यभिर्नास्तीति कश्चिद्वेनार्किकमतानुवर्ती दूषयति एवमपीति अधिष्ठानापरोक्षस्य प्रातिभासिका
ध्यासमात्रहेतुत्वे स्वीकृतेऽपीत्यर्थः धर्मिज्ञानकारणत्वादेहि प्रथममिदमित्येवमाकारावृत्तिरुदेति तथा च वृत्त्या अभिव्यक्ते
शंखरजताद्यवच्छिन्नचैतन्ये पीतनीलरूपादिरध्यासस्तत्र प्रक्रिया तथा च तत्रेदमाकारावृत्तिः किं शंखादिद्रव्यमात्रं विषयी
करोति किं वा रूपविशिष्टं द्रव्यं नाद्य इत्याह रूपमनुपादायेति रूपाविषयकद्रव्यचाक्षुषवृत्तेर्न संभवति इतरथा वाय्वादेरपि
चाक्षुषत्वापत्तेरिति भावः द्वितीयेऽपि किं शुक्लरूपविशिष्टं द्रव्यं विषयीकरोति किं वा आरोप्यरूपविशिष्टं न द्वितीयः आ

विशेषविशेषस्य हेतुत्वोचित्यादिति वाच्यं एवमपि प्रातिभासिकशंखपीतिमरूपजलेनेत्याद्यध्यासापादनात्
रूपानुपहितचाक्षुषप्रमत्वायोगेन तदानीं शंखादिगतशौक्ल्योपलंभाभावेन चाध्यासात्प्राक् शंखादिनीरूपा
धिष्ठानगोचरवृत्त्यसंभवात् न च प्रातिभासिकेऽपि रजताध्यासमात्रे निरुक्तो विशेषहेतुरास्तामिति वाच्यम्

रोप्यरूपविशिष्टशंखादिवृत्तेरेव भ्रान्तित्वेन तस्या धर्मिज्ञानत्वाभावात् नाद्य इत्याह तदानीमिति अध्यासात्पूर्वकालेऽत्य
र्थः तदानीं शौक्ल्योपलंभे चाध्यासाभावप्रसंगादिति भावः असंभवादिति तथाभिव्यक्ताधिष्ठानस्फुरणस्य तत्रासंभवाद्व्य
भिचारेण धर्मिज्ञानं नाध्यासकारणमिति भावः ननु अध्यासात्पूर्वं द्रव्यमात्ररूपेण शंखादिगोचरचाक्षुषवृत्तिरुदेत्येव द्र
व्यगोचरचाक्षुषवृत्तौ रूपविषयकत्वनियमस्याप्रयोजकत्वात् न चैवं वाय्वादेरपि चाक्षुषत्वप्रसंगः द्रव्यगोचरचाक्षुषे द्रव्य
गतोद्भूतरूपस्य नियामकत्वात् अध्यासात्पूर्वकाले द्रव्यग्रहणेऽपि शुक्तित्वादेरिव दोषबलात् तन्निष्ठस्यापि शुक्लरूपमात्र
स्याग्रहणोपपत्तेश्च तदुक्तं भामत्यां शंखे च दोषाच्छादितशुक्लिमा तद्द्रव्यमात्रस्वरूपग्राहीत्येवेति शुक्लिमा शुक्लरूपमित्य
र्थः अतस्तत्र शुक्लरूपाविशिष्टशंखादिग्रहणम् ॥००॥

तथापि नाध्यासानुपपत्तिः दोषबलेन रूपांतरस्य शुक्लत्वजातिग्रहणप्रतिबंधमात्रेणापि तदुपपत्तेस्तथा च प्रातिभासिका
ध्यासे शुक्तिमिश्रक्ताधिष्ठानस्फुरणस्य व्यभिचाराभावात् धर्मिज्ञानरूपाद् इदमाकाराद्वृत्तिविशिष्टा भवति नास्ति दोषो वा तस्यामा
वरणनिवर्तकत्वमप्यस्याभावचिंतासालंबनैवाचार्याणां न निरालंबनेति चेत्तत्र ग्रासिन्नतेऽयमेवास्वरसः उपाध्या
याभ्यां तदसनेन सूचितं पीतशंखादिभ्रमस्थले वस्तुतोऽव्यभिचाराभावेपि तमभ्युपगम्य धर्मिज्ञानकारणवादी शंक
ते नच प्रातिभासिकेऽप्यपीति निरुक्त इति शुभिमव्यक्ताधिष्ठानप्रकाशस्यार्थः तथासतीति पीतशंखाद्यध्यासे व्यभिव्य
क्ताधिष्ठानापरोक्षत्वं चक्षुःसंप्रयोगस्यापि पीतशंखाद्यध्यासे शुकारणत्वानुपगमे संप्रयोगात्प्रागपि पीतशंखाद्यध्यास

तथासति संप्रयोगात्प्राक् पीतशंखाद्यध्यासाप्रसंगायतदध्यासे दुष्टेंद्रियसंप्रयोगः कारणमित्यवश्यं वक्तव्य
मतयातस्यैव सामान्यतः प्रातिभासिकाध्यासमात्रे लाघवात्कारणत्वसिद्धौ न तत्र वरजताध्यासकादाचित्कत्वस्या
पि निर्वाहादधिष्ठानप्रकाशस्य सामान्यतो विशेषतो वा

प्रसंगः अतस्तत्परिहारायतत्र संप्रयोगस्य कारणत्वमवश्यं वाच्यमित्यर्थः ततः किं तत्राह तस्यैवेति दुष्टेंद्रियसंप्रयोग
स्यैवेत्यर्थः सामान्यतः इत्युक्तं सामान्यमेव दर्शयति प्रातिभासिकाध्यासमात्र इति प्रातिभासिकाध्यासत्वमेव दुष्टेंद्रि
यसंप्रयोगकार्यतावच्छेदकं लाघवात् न पीतशंखाद्यध्यासत्वं गौरवादित्यर्थः ततोपि किं तत्राह न तत्रैवेति संप्रयो
गात्प्राक् पीतशंखाद्यध्यासप्रसंगपरिहाराय तत्र सामान्यतः क्लृप्तात् दुष्टेंद्रियसंप्रयोगादेवेत्यर्थः कादाचित्कत्वा १००
पीति सदा रजताद्यध्यासप्रसंगपरिहाराय अभिव्यक्ताधिष्ठानप्रकाशस्य रजताद्यध्यासकारणत्वं वाच्यं तथासति श
त्यवच्छिन्नचैतन्यस्याधिष्ठानप्रकाशस्यावृततया सदा तदभिव्यक्तेरभावेन सदा रजताद्यध्यासप्रसंगपरिहारोप

पन्ने रिति हि धर्मिज्ञानकारणत्वादिनस्तथाभिप्रायः स चानिष्टप्रसंगपरिहारः पीतशंखाद्यध्यासस्थले ह्लसान्तसंप्रयोगादेवल
ब्धेन इत्यर्थः सामान्यतन इति अधिष्ठानप्रकाशमात्रमध्यासमात्रे कारणमभिव्यक्ताधिष्ठानप्रकाशः प्रातिभासिकाध्या
से कारणमिति पूर्वोक्तकार्यकारणभावद्वयमपि न सिध्यतीत्यर्थः ननु तस्यैव सामान्यतः प्रातिभासिकाध्यासमात्रे लाघ
वात्कारणत्वसिद्धाविशेषांके अहंकाराद्यध्यासे सत्यादिचैतन्ये स्वमाध्यासे च संप्रयोगासंभवेन व्यभिचारात् न चाहंकाराद्यध्या
सस्य व्यावहारिकत्वमतेन व्यभिचारो न दोष इति वाच्यं तथापि तस्य प्रातिभासिकत्वमते दोषपरिहारासंभवात् साक्षिणि
स्वमाध्यासे प्रातिभासिकत्वस्य सर्वसंमतेः पञ्चनयाने त्रोक्तव्यभिचारस्य दुष्टत्वाच्च न च स्वमाध्यासेऽभिव्यक्ताधिष्ठानस्फुरणं कार

ध्यासकारणत्वस्यासिद्धेः ननु च सादृश्यपनिरपेक्षेऽध्यासान्तरे कारणत्वेऽपि मन्त्राद्यपेक्षे रजताद्यध्यासे रजतादिसादृश्यप
ह्रन्तरूपविशेषादिविशिष्टधर्मिज्ञानरूपमधिष्ठानसामान्यज्ञानं कारणमेवं चैवं वाच्यं दुष्टेन्द्रियसंप्रयोगमात्रस्य
कारणत्वे शुक्तित्वं दिगादेरपि रजताध्यासप्रसंगात् न च सादृश्यमपि विषयदोषत्वेन कारणमिति वाच्यम्

णमन्यथासंभवपं चस्यापरोक्षाभावप्रसंगात् वा स्वप्रातिभासिकाध्यासे भ्रान्तदुष्टेन्द्रियसंप्रयोगकारणमिति न तस्य व्यभिचा
र इति वाच्यं प्रातिभासिकत्वाध्यासमात्रे त्वदुक्तलाघवेनाभिव्यक्ताधिष्ठानप्रकाशस्य कारणत्वोक्तिस्थाहङ्काराद्यध्यासे भुसंप्रयो
गस्याधिष्ठानचैतन्याभिव्यंजकवृत्त्युपपादकतया चारितार्थ्यसंभवाच्च पीतशंखाद्यध्यासस्थलेप्यधिष्ठानचैतन्याभिव्यं
जकवृत्तिसंभवस्य दर्शितत्वाच्चेति चेत्तन्न सूक्ष्मदृष्ट्या विचार्यमाणे एवमेव स्थूलदृष्ट्यानुसंप्रयोगस्य लाघवात्प्रातिभा
सिकाध्यासमात्रे कारणमुक्तमिति मन्तव्यं शुक्तिरजताद्यध्यासासाधारणमाकारवृत्तिसिद्धये प्रकारान्तरेण धर्मिज्ञानस्य का
रणत्वं शंकते ननु च सादृश्यपति अध्यासान्तर इति पीतशंखाद्यध्यास इत्यर्थः शंखादेः पीतरूपादेश्च सादृश्याभावादिति

भावः तन्मते सादृश्यप्रत्यक्षं रजतत्वादिना सह शुक्त्यादेः सादृश्यप्रत्यक्षतो यो रूपविशेषादिस्तद्विशिष्टधर्मीत्यर्थः स्थाण्वादौ पुरुषाद्या
सायेप्ति नन्वूर्ध्वत्वादिकमादिशब्दार्थः संप्रयोगमात्रस्येति सादृश्यानपेक्षायामिति मात्रशब्दार्थः आदिपदार्थो नीलरूपवत्का
ष्ठमिंगालशब्दार्थः नन्वपेक्षितमपि सादृश्यं स्वरूपसदेवाध्यासकारणतावच्छेदकमितिप्रसंगो निरासात्त्वज्ञानं सत्कारणं तथा
चेन यद्धर्मिज्ञानस्य कारणतासिद्धिरिति मत्वा शंकते नचेति सादृश्यमिति स्वरूपसत्कारणत्वे सादृश्यभ्रमाद्ध्यासो न स्यात् सा
दृश्यभ्रमस्थले स्वरूपसतः सादृश्यस्याभावात् अतः सादृश्यज्ञानभ्रमप्रमासाधारणमध्यासकारणं वाच्यमिति तद्विशिष्टधर्मिज्ञा
नसिद्धिरिति धर्मिज्ञानकारणत्वमपि परिहरति विसदृशेपीति तत्रोदाहरणमाह जलधिसलिलस्येति श्वाहः तस्यार्थः
जलस्य श्वेतत्वात् शुक्लरूपवत्त्वात् नीलशिलातलसादृश्यं नास्ति अतः सादृश्यभ्रमान्नीलशिलातलत्वारोप इति भावः ननु धर्मि
विसदृशेपि सादृश्यभ्रमे सत्यध्याससंभवात् जलधिसलिलस्येनीलशिलारोपदर्शनात् न च तद्धेतोर्वैवेतिन्यायात्
सादृश्यज्ञानसामग्र्येवाध्यासकारणमस्त्विति युक्तं ज्ञानसामग्र्या ग्रन्थकारणत्वसम्भवादित्यपरहृष्टेः ततः सादृश्यज्ञान
तस्यैव लघुत्वाच्च न च स्वतः शुभ्रेपि शुभ्रकलधौतभ्रमगारगतेपि स्वकेजलपवनेत्याध्यासः न शुक्लफलइतिवव
ज्ञानकारणतापदेपि तत्सामग्रीत्वेन दुष्टेन्द्रियसंप्रयोगो वक्ष्यमाणस्तथा चावश्यकत्वाद्ध्यासविशेषकारणतावच्छेदकं सा
दृश्यज्ञानसामग्रीत्वमेव स तु सादृश्यज्ञानत्वेन तत्त्वेन धर्मिज्ञानसिद्धिरित्याशयेनैगाले रजताध्यासप्रसंगो विसदृशं शंकते न च तद्धे
तोरिति तद्धेतोर्वेत्यस्य तद्धेतुत्वमध्ये किं तेनेति न्यायादित्यर्थः यद्धर्मिज्ञानवादी निराकरोति ज्ञानसामग्र्या इति यद्धर्मिज्ञानकारण
तामते हि तत्र हि यद्धर्मिज्ञानं रजतादिरूपार्थोत्पत्तौ कारणमिष्यते तथा तद्धेतोरेवेति न्यायेन यद्धर्मिज्ञानसामग्रीभूतसंप्रयोगस्य कार
णत्वमुच्यमाने रजताद्यर्थोत्पत्तावेव भवेत्तच्च न संभवति सन्निकर्षस्य ज्ञानस्य च विषयोत्पत्तौ कारणतायाः क्वचिदप्यक्लृप्तत्वादि १०२
त्यर्थः ननु इति सादृश्यज्ञानसामग्रीत्वापेक्षया सादृश्यज्ञानस्यैव कारणतावच्छेदकत्वे लाघवादित्यर्थः तथा च यद्धर्मिज्ञानसि

द्धिरिति भावः साहृश्यज्ञानस्य व्याप्तिविशेषे कारणत्वाभावेपि व्यवस्थासंभवात् न धर्मिज्ञानसिद्धिरिति मत्वा पुनः शंकते नच स्वतः
सिद्धे जलस्य मुक्ताफलस्य च नैल्येन साहृश्याभावे समानेपि जल एव नैल्यव्याप्तो दृश्यते न मुक्ताफल इति व्यवस्था या जलादिवस्तु
स्वभाव एव हेतुर्नान्य इत्यर्थः नन्वपाकजातनैल्यसन्निधाने जलेन दृश्यासे नियामके न स्वभाव इत्यत आह शुभ्रकलधौतेति निर्मल
सौवर्णपात्रविशेषगतेपीत्यर्थः नन्वेवमपि जलगतनीलरूपवद्द्रव्यसंसर्गान्तरेणैव तद्व्याप्तिरित्यत आह स्वतः शुभ्रपीति जलवि
शेषणं स्वतः शुभ्रपद्माख्यानेस्वच्छ इति पदं एवं क्वचित्स्वभावस्यैव व्याप्तिसम्प्रयोजकत्वे लक्षणमपि फलितमित्याह वस्तुस्वभावादेवेति
उक्तपीतश्यामव्याप्तिरिव भृङ्गाराद्यिनजले नैल्यव्याप्ते साहृश्यज्ञानानपेक्षत्वेपि पुंडरीकमुकुलत्वव्याप्तेस्तदपेक्षाया अन्वय
व्यतिरेकसिद्धत्वेन न हि चञ्चत्किरञ्जनाव्याप्तेपि साहृश्यज्ञानभावाभावाभ्यामेव व्यवस्था ननु वस्तुस्वभावावगतिकगतित्वादस्तु

स्यादवस्तुस्वभावादेव शुक्तौ रजतव्याप्तो नेंगालादाविति व्यवस्था न तु साहृश्यज्ञानापेक्षणादिति वाच्यं स्वतः पटत्वेऽ
पुंडरीकमुकुलत्वानव्याप्तेपि तैत्रेव कर्तनादिघटितनदाकारे तद्व्याप्तदर्शनेन तद्व्याप्तस्य वस्तुस्वभावमनुरुध्य सा
हृश्यज्ञानाभावाभावाद्वयोरधीनत्वनिश्चयात् अन्यथा स्वदापि तत्र तद्व्याप्तिप्रसंगात् उक्तं ते साहृश्यज्ञानस्य व्याप्तिकारण

स्वभावाश्रयणस्य न व्याप्तधर्मिज्ञानकारणता सिद्धिरिति मत्वाह दूषयति स्वतः पटत्वेऽपि पुंडरीकस्य कमलस्य या मुक
लता व्याप्तिः तस्याः अनव्याप्तेपीत्यर्थः तैत्रैव पटत्वेऽपि एवकर्तनादिना घटितः संपादितः तदाकारः पुंडरीकमुकुलत्वाकारो यस्य प
टत्वेऽपि स्य तथा तस्मिन्नित्यर्थः तद्व्याप्तेति पुंडरीकमुकुलत्वव्याप्तेरित्यर्थः तद्व्याप्तस्य तु द्वयोरधीनत्वनिश्चयादिति संबन्धः अन्यथेति
वस्तुस्वभावस्यैव तद्व्याप्तिकारणत्व इत्यर्थः अन्यदापीति कर्तनादिना तदाकारसंपादनात्प्रागपीत्यर्थः ननु साहृश्यस्य निरपेक्षा-
व्याप्तान्तरे यत्र कारणत्वेपीत्यादिना प्रागुक्तं साहृश्यज्ञानस्य व्याप्तिविशेषे कारणता असाधनद्वारा धर्मिज्ञानस्य कारणत्वमाविष्यक
मिति एवं पक्षं विना किं कमलात्तु वर्णीतिराकरोति उच्यत इत्यादिना नन्विति पीतत्वाभावव्याप्यशंखत्ववानयं नैल्याभावव्या
प्यजलत्ववदिदमित्यादिरूपविशेषदर्शनाभावेपीत्यर्थः उक्तविशेषदर्शनेसत्यपि पीतः शंखः नीलजलमित्यादि व्याप्तसद

र्शनादिति भावः असंभवादिति वस्तुतः सादृश्यस्य तत्रासंभवात्पुंडरीकमुकुलत्वभ्रमवत्सादृश्यज्ञानानुरोधित्वाच्चेत्यर्थः ननः।
किं तत्राह विशेषदर्शनप्रतिबंधेष्वपीति प्रतिबंधकसामग्र्याः प्रतिबंधकत्वे दाहप्रतिबंधकमण्यादिसामग्र्याः प्रतिबंधकत्वो
क्तौ धर्मिज्ञानसामग्रीभूतसंप्रयोगस्याप्यासंप्रतिदाहप्रतिबंधकत्वप्रसंगः तद्वारणाय ज्ञानपदं मण्यादेः प्रतिबंधकज्ञानाभावा
न्नातिप्रसंगः ज्ञानसामग्र्याः प्रतिबंधकत्वोक्तौ धर्मिज्ञानसामग्रीभूतसंप्रयोगस्याप्यासप्रतिबंधकत्वप्रसंगः तद्वारणाय प्रति
बंधकेति ज्ञानविशेषणं धर्मिज्ञानस्य चाप्यासानुगुणत्वेन प्रतिबंधकज्ञानत्वाभावान्नोक्तातिप्रसंगः तथा च पक्षे साध्याभा
ववत्ताज्ञाने ग्राह्याभावावगाहित्वादनुमितिं प्रति साक्षात्प्रतिबंधकं तत्र साध्याभावव्याप्यवत्ताज्ञानं प्रतिबंधकज्ञानसामग्रीत्वेना
नुमितिप्रतिबंधकमिति व्यवस्था प्रसिद्धेत्यर्थः ननु एवेति प्रतिबंधकज्ञानसामग्र्याः प्रतिबंधकत्वस्वीकारादेवेत्यर्थः किमिति

तवादेऽपि विशेषदर्शनप्रतिबंधेषु रजताद्यध्यासेष्वेव तस्य कारणत्वं वाच्यं न तु तत्प्रतिबंधेष्वपीति नशंक्यं वा यद्यध्यासेष्व
संभवात् विशेषदर्शनप्रतिबंधेषु च प्रतिबंधकज्ञानसामग्र्याः प्रतिबंधकत्वनियमेन विशेषदर्शनसामग्र्या अवश्यप्र
तिबंधिकात्वाच्चेति ननु एवमपि सर्वव्यवस्थोपपत्तेः किं सादृश्यज्ञानस्य कारणत्वकल्पनया तथा हि इंगालादौ चक्षुः
संप्रयुक्ते तद्दीप्यमानत्वादिरूपविशेषदर्शनसामग्रीसत्त्वान्न रजताध्यासः शुक्त्यादावपि नीलभागादिव्यापि चक्षुः सं
प्रयोगे [illegible]वान्न तदध्यासः सादृश्यभागमात्रसंप्रयोगे तु तदभावादध्यासः तदापि शुक्तित्वरूपविशेषदर्शन

तथा च धर्मिज्ञानरूपेदमाकाराहृतिर्न सिध्यतीति भावः सादृश्यज्ञानस्याकारणत्वे पूर्वोक्तातिप्रसंगं परिहरति इंगालादावि
ति इंगालगततेजस्त्वादिविशेषः तद्दर्शनसामग्री च चक्षुःसंप्रयुक्तेंगालतादात्म्यरूपा ज्ञातेति बोध्यं नीलभागादीति त्रिको
णभागसंप्रयुक्तार्थमादिपदं तत्सत्त्वादिति विशेषदर्शनसामग्रीसत्त्वादित्यर्थः ननु इति तत्पदं रजतादिपरं ननु यदि शुक्ति
संप्रयोगकाले रजताध्यासाभावस्तर्हि संप्रयोगोऽप्यध्यासकारणं न स्यादिति नैल्यादिदर्शनसामग्र्याः प्रभावादित्यर्थः प्रो १०२
कते तदापीति सदृशभागमात्रसंप्रयोगकालेऽपीत्यर्थः अनध्यासप्रसंग इति तथा चाध्यासाभावप्रसंगपरिहाराय सा

दृश्यपज्ञाने दोषत्वेनाध्यासकारणं वाच्यं न तच्छोकदोषरूपप्रतिबंधकसत्वाद् इति वक्तव्यं शुक्तित्वदर्शनं तु सामग्री नास्ति श्रुतो
रजतत्वाद्यध्यासउपपद्यत इति धर्मिज्ञानकारणवादिनोभिसन्धिः अन्यथासप्रसंगोपविष्टं तु मभयसंसमनमर्थ्य धर्मिज्ञानापलापी
दर्शयति नेत्यादिना त्वयापीति सादृश्यपज्ञानकारणतावादिनापीत्यर्थः वाच्यत्वा[illegible] सदृशभागमात्रसंप्रयोगकाले
शुक्तित्वदर्शनसामग्र्याः प्रतिबंधको दोषोवश्यंवाच्य इति नावत्स्ते स च दोषो न सादृश्यपज्ञाने किंतु दूरत्वादिरेवातो दोषत्वे
नापि न सादृश्यपज्ञानमध्यासकारणमिति न धर्मिज्ञानसिद्धिरिति नरपुत्रापि नोप्यभिसंधिः धर्मिज्ञानवादी स्वाभिसंधिमु
द्घाटयन्नाशंकते ममेति न वेति धर्मिज्ञानापलापमहंतस्यक विना किं कमनानुवर्तिन इत्यर्थः सादृश्यपज्ञानस्याध्यास
कारणत्वत्वदनिष्टं हूंगतस्यापि न वयमसज्जेनेति भावः धर्मिज्ञानापलापवाद्यपि स्वाभिसंधिमुद्घाटयन्नध्यासप्रसंगोपरि
सामग्रीसत्वादनध्यासप्रसंग इति चेन्न अध्याससमये शुक्तित्वदर्शनाभावेन तत्संवेतत्साम अभावस्य त्वयापि वाच्यत्वा
त् ममसादृश्यपज्ञानरूपाध्यासकारणदोषेण प्रतिबंधान्न दोषः शुक्तित्वदर्शनसामग्र्यभावाभ्युपगमः न च तथाभ्यु
पगमेन द्घाटकुदृष्टभानं तदृत्तान्त इति चेत् न समीपोपसर्पणानंतरं रजतसादृश्यरूपेचाकचिक्ये दृश्यमाने पवशु
क्तित्वोपलंभेन तस्य तत्सामग्रीप्रतिबंधकत्वासिद्धौ दूरत्वादिदोषेण प्रतिबंधाद्धाव्यजकनीलपृष्ठत्वादिग्राहकास
हरति नेत्यादिना तस्येति सादृश्यदर्शनस्येत्यर्थः तत्सामग्रीति शुक्तित्वदर्शनसामग्रीत्यर्थः रजतरागादिदोषसंग्रहा
र्थमादिपदं ननु दूरस्थस्यापि पुंसः कदाचिच्छुक्तौ शुक्तित्वमप्यायाददर्शनेन दूरत्वस्यापि सादृश्यपज्ञानस्येव व्यभिचारस्तुल्य
२४ तथा रजतेरागवतोपि समीपोपसर्पणानंतरं शुक्तिप्रदर्शनेन तस्यापि व्यभिचारस्तुल्यः तथा च दूरत्वादेरपि दोषत्वं न स्या
त् यदि च क्वचिदध्यासे कदाचित्कोपि दोष इतिरीत्या दूरत्वादेर्दोषत्वेनाध्यासकारणत्वं समर्थ्यते तदा ज्वालादौ सादृश्यप
ज्ञानरूपेणैव दोषेण सेयं दीपज्वालेत्यादिभ्रमस्य सर्वानुभवसिद्धतया तस्यापि कदाचिद्रजताध्यासे दोषत्वेन का

सि॰ले॰
प्र॰टी॰
५३

रणत्वं दुर्वारं सादृश्यज्ञानदोषत्वं भाष्यसंमतं च तथा च देवताधिकरणे भाष्यं सादृश्यात् प्रत्यभिज्ञानं केशादिष्विवेति तथा
चौद्धाधिकरणेऽपि सादृश्यनिमित्तं प्रतिसंधानमिति प्रतिसंधानं प्रत्यभिज्ञानं तथा च सादृश्यज्ञानस्य दोषत्वेनाध्यासकारण
त्वमनतिप्रसक्तकारणमयुक्तमिति चेन्न तथा च स्थूलबुद्धिमाश्रित्येदमिति ध्येयं सहकार्यभावात् सामग्र्यभावमाह व्यंजके
ति शुक्तित्वव्यंजकेत्यर्थः याहृक पदं नीलभागव्यापि चक्षुः संप्रयोगपरं तत्सामग्रीति शुक्तित्वविशेषदर्शनसामग्र्यभावस्यो
भाभ्यां वक्तव्यत्वादित्यर्थः शुक्तिरजतभ्रमस्य लोकन्यायमनसत्त्रापि योजयति एवमिति सादृश्यज्ञानरूपदोषं विना रजता
ध्यासवन्नीलशिलातलत्वाध्यासः संभवतीत्यर्थः जले नीलशिलातलत्वाध्यासे हि शुक्लरूपात्मकविशेषदर्शने
जलराशित्वादिरूपविशेषदर्शने च प्रतिबंधके ततः शुक्लरूपादिदर्शनसामग्र्यपि तत्र प्रतिबन्धिका तथा च प्रतिबंध
मवध्यानाद्वा तत्सामग्र्यभावस्य वक्तव्यत्वात् एवं जलधिजले नियतनीलरूपाध्याससंप्रयोजकदोषेण दूरे नीरत्वव्यंज
कतरंगादिग्राहिकासमवधानेन च शौक्ल्यजलराशीत्वादिविशेषदर्शनसामग्र्यभावाच्छिलातलत्वाद्यध्यासः वि
स्तृतपटे पतिगृह रूपविशेषदर्शनसामग्रीसत्त्वान्न पुंडरीकस्य कलत्वाध्यासः कर्तनादिष्ठाटनतदाकारे तदभावा
त्तदध्यासइति नन्वेवं कदस्य लोकस्याकाले नदीयनीलरूपाविशेषदर्शनसामग्र्यभावा कन्नानसामग्र्यभावाद्दे
वतत्रनीलशिलातलत्वारोपः नतत्प्रथमं जले नैल्याध्यासेन सादृश्यज्ञानसंपत्तौ सत्यां तद्दोषान्नीलशिलातलत्वाध्यासइ
त्यर्थः ननु जलधिसलिले दूरे शुक्लरूपात्मकविशेषदर्शनसामग्र्यभावोऽसिद्धः नीलशिलातलत्वारोपात्पूर्वकाले चक्षुः
संयुक्तजले शुक्लरूपस्य तादात्म्याभ्युपगमेन चक्षुःसंयुक्ततादात्म्यस्य रूपसन्निकर्षस्यालोकादेश्च सत्त्वात् तथा जलराशित्वादि
रूपविशेषदर्शनसामग्र्यभावोऽप्यसिद्धः जलराशित्वव्यंजकतरंगादिप्रत्यक्षस्यापि तत्र सत्त्वादित्यत आह नियतेति जलधि
सलिले दूरे नैल्याध्यासवत्समीपोपसर्पणानंतरमपि तदध्यासो दृश्यते अतस्तस्य नियतत्वं एतदुक्तं भवति शुक्लरूपात्मक ५३
विशेषदर्शनसामग्री नियतनीलशिलारूपाध्यासप्रयोजकदोषेण प्रतिबध्यते अतः सामान्यतिवक्ष्यनास्ति दूरत्वदोषाज्जलराशित्व

धंजकतत्संगादेर्ग्राहकसमवधानं नास्ति तेन जलराशौ तत्त्रूपविशेषदर्शनसामग्री च नास्ति। तथा च द्विविधप्रतिबंधकज्ञा
नसामग्र्यभावाज्जलधिसलिले नीलशिलातलत्वाध्यासउपपद्यत इति अत्रेदं बोध्यं जलधिसलिलदूरे नीलशिलातलत्वारो
पउक्तविधयाविशेषदर्शनसामग्र्यभावस्यापेक्षितत्वेऽपि न तावन्मात्रान्नद्ध्यासः किंतु जले नीलरूपाध्यासेन नीलशिला
तलसादृश्यसंपत्त्यनंतरमेव तदध्यासस्तथा च दूरे नीलशिलातलत्वाध्यासवत्तज्जलधिसलिलदूरसमीपोपसर्पणानंतरव्य
वहारः अस्मिन्जलधिसलिलप्रदेशे मम दूरे नैल्यनैश्चल्यादिसाम्येन नीलशिलातलत्वभ्रममभूत् इदानीं स भ्रमो निवृत्त
इति एवं तत्र तत्र सादृश्यदोषान्मम पूर्वं ममयाभ्रमबभूत् इदानीं स निवृत्त इति लोकव्यवहार एवं सादृश्यज्ञानस्य दोष
त्वेनाध्यासविशेषकारणत्वसाधको दृष्टव्य इति सादृश्यज्ञानस्याध्यासकारणताग्राहकान्वयव्यतिरेकोदाहरणांतर
मन्यघ्ययति विस्तृत इति परिणाहो विस्तारस्तद्दर्शनं पुंडरीकमुकुलत्वाध्यासप्रतिबंधकं तत्सामग्रीसत्त्वादित्यर्थः सादृश्य
दूजताध्यासः किं न भवेत् सादृश्यज्ञानानपेक्षणादिति चेत् भवत्येव किं तत्तन्मात्रादिव्यावर्तकविशेषदर्शनसामग्र्या
अभावान्नद्ध्यासे तापिभाव मिति कश्चिदनेकाध्यासस्य शयगोचरो भवति कश्चित्तु रजतमायेकोशामदृशादो
षानकारणमते हि चक्षुःसंप्रयोगस्थले चाक्षुषं सादृश्यज्ञानं धर्मिज्ञानत्वेन दोषत्वेन च रजताद्यध्यासो न तो कारणं त्व
गिंद्रियसंप्रयोगस्थले च स्पार्शनं सादृश्यज्ञानमुक्तविधया रजताद्यध्यासो न तावेव कारणं कवितार्किकमतेऽपि धर्मि
ज्ञानप्रसंगाभीमासादृश्यज्ञानं कुत्रापर्याप्तकारणं नाभ्युपेयत इति व्यवस्था तथा च तत्र गिंद्रियेदमर्थसंप्रयोगस्थले त्वदभिम
ताध्यासकारणसत्त्वात् स किं न स्यादिति शंकते ननु एवमिति सादृश्यज्ञानं विनाप्यध्यासप्रतिबंधकविशेषदर्शनसाम
ग्र्यभावमात्रेणाध्यासोपगमे इत्यर्थः किं तत्र रजताध्यास आपाद्यते किं वा रजताध्यास एव आद्ये इष्टापत्तिरित्याह भव
त्येवेति द्वितीयं शंकते किन्त्विति तत्र विशेषदर्शनसामग्र्यभावस्य तन्मात्राध्याससाधारणत्वाद्रजताद्यध्यास एव स्यात्।

सि॰ले॰ प्र॰टी॰ १०४

दिमत्रापादकं नास्तीति मत्वा परिहरति नाम्नादीति रंगसवर्णशाकलादि संग्रहार्थमादिपदार्थः क्वचिदिति करतलस्थरूप्यलोहशकल
स्थलेपि क्वचिदित्यर्थः गोचरइति लोहशाकलरूपेदमर्थः किमिदं रजतं किं वा नाम्न किं वा सुवर्णादीति संशयविषयो भवतीत्यर्थः
नाम्नादि व्यावर्तकविशेषदर्शनस्थलेतु रजतनाध्यासएव भवतीत्याह क्वचिदिति यस्मिन्को प्यत्रग्रहो ग्राहकाप्रायेण रजतशकलानामेवा
वस्थानेन तत्र सविशेषस्यैवादयः शाकलेकरतलस्थे सति तत्र रजताध्यास एव भवतीति रजतकोशग्रहस्थित्रिवुद्धेत्तस्समत्वादिमर्थः
वस्थानेन तत्र सविशेषस्यैवादयः शाकलकरतलस्थे सति तत्र रजताध्यासाभावो पिदृश्यते सततमतेन संभवति विशेषदर्शनसामग्र्यभावस्य तत्रापि सत्
त्वे क्वचित्करतलस्थरूप्यलोहशाकलेरजताध्यासाभावो पिदृश्यते सतनमतेन संभवति विशेषदर्शनसामग्र्यभावस्य तत्रापि सत्
त्वेन रजताध्यासायतेराव यपकत्वान्न ननु सादृश्यज्ञानरूपकारणाभावान्न भवतीति विकुशाकानेश्मनन्त्राह क्वचित्तत्रापीति
रजताध्यासएव भवति क्वचित्तत्रापि सादृश्यज्ञाने शुक्तित्वादौ कदाचित्करणदोषाद्यभावेनाध्यासात्तदृष्टवदध्यासात्त
दृष्टेपि नहानिः तस्मात्तत्कार्यकल्पेदमाकारवृत्तिर्नाप्यशक्तेवच्छेदमर्थसंप्रयोगकारणकल्प्या ननोभवंत्याप्येवेदंवृत्ते
दुष्टेन्द्रियसंप्रयोगत्वाभिनाविद्यापरिणामभूतस्तस्समानकालेरजतविषयत्तस्याप्यसाभिव्यज्यमानत्वात् तत्रचज्ञानसमा
नकालीनमतिकेवलातिभासमात्रविषयविवर्तनिरजतेतत्प्राचीनसंप्रयोगाभावेपितन्नाशात्प्राश्रयेदमर्थसंप्रयोगादेवतस्मा
समीपोपसर्पणेनेतरं सत्यापिसादृश्यज्ञानेयथारजताध्यासाभावस्तथमतेउपेयते नयायममतेपि क्वचिदध्यासाभावोनदोषा
वहइत्यर्थः तस्मादिति कथमपि धर्मिज्ञानस्याध्यासकारणत्वात् किंतुदित्यर्थः इदमाकाराद्वृत्तिरत्रभवसिद्धावाकार्यकल्प्यावा
कारणकल्प्यावेति विकल्प्यतत्राद्यमद्वितीयानिरस्यतृतीयं निराकरोति नाप्यशक्तिवच्छेति इदमर्थस्य चक्षुः संप्रयोगकालेप्र
मत्रवासंयेसातिइदमर्थगोचरज्ञानात्तदयादृशतिवच्छेति विशेषणंयस्योक्तसंप्रयोगवशाज्जायमानात्वात्निर्भ्रान्तिरूपैवजायते
ननुभ्रान्तेः प्राचीनाइदमर्थमात्रगोचरप्रमारूपातत्प्रमानाभावादिमाशंक्येनाह ननुइति इदमर्थावच्छिन्नचैतन्येविद्यमानार १०४
जतपरिणामिन्याविद्याडुष्टेन्द्रियसंयोगरूपादध्यासनिमित्तकारणभूतात्क्षोभं कार्याभिमुख्यं प्राप्नोति तत्र रजतरूपेणपरिणत

येन परिणमने तु वेंद्रियसंप्रयोगस्तु लिरपि निर्दैवज्ञापने तथा चाप्रतिबन्धात् तु वेंद्रियसंप्रयोगजत्वेनेदमर्थगोचरवृत्तिः स्वकालोत्प
न्नरजतविशिष्टेदमर्थविषयीकरोतीत्यर्थः स्वपदं कृत्वा निपुणं धर्मिज्ञानपदेनेदमाकारवृत्तिरविद्यावृत्तौ भिकावदभावपदेन धर्मिज्ञा
नहेतुसंप्रयोगोऽविद्यावृत्तौ भक इति विभागः निष्कृष्टं तत्रानिमित्तत्वानपेक्षः इदमर्थसंप्रयोगः इदमाकारवृत्ताविव रजतगोचरवृत्ता
वेकेनत्वात् ज्ञानसमकालोत्पन्नरजतस्य ज्ञानात्पूर्वं चक्षुःसन्निकर्षाभावाच्च तथा च रजतगोचरावृत्तौ सामग्र्यभावप्रवृत्ती
नेर्धर्मिमात्रगोचरत्वाभ्युपगमे प्रतीत्याशङ्क्याह तत्र चेति भ्रमस्थलइत्यर्थः प्रतिभासकालमात्रे विपरिवर्तनं सत्तायस्य त
त्प्रतिभासमात्रविपरिवर्तितत्वमित्यतीतिप्रसत्त्वाकइति यावत् इदमर्थसंप्रयोगस्य रजतगोचरवृत्तिहेतुत्वं तावदपि हेतुत्वं
संभवति न चास्य संप्रयोगात् इदमगोचरवृत्त्युपगमे चटेंद्रियसंप्रयोगात्मतगोचरवृत्त्यापत्तिरिति वाच्यं स्वगोचरवृत्तौ स्वस्य
पि चक्षुर्योग्यत्वोपपत्ते स्तु चक्षुषा रजतं प्रपश्यामीति प्रातिभासिकरजतस्य संप्रयोगाभावेऽपि चाक्षुषत्वानुभवात्
न च स्वसंप्रयोगाभावादेव बाधकान्न चाक्षुषत्वं नापि दुष्टेंद्रियसंप्रयोगजन्यमिदं वृत्तिसमकालज्ञानकारणसेंद्रिय
संप्रयोगस्यार्थकारणत्वात् हेतोः किं निर्दंवृत्यनन्तरभावित्वमन्यत् तदभिव्यक्तसादित एव ध्यासात् तज्ज्ञानसंचाक्षु
षत्वानुभवस्तु स्वभासकचैतन्याभिव्यञ्जकेदंवृत्तिजनकेन परंपरया चक्षुरपेक्षामात्रेणेति वाच्यं तथापि सति पी
तादात्म्याध्यस्यवाइंद्रियेण सह संप्रयोगकारणमिति कल्पनात् तावत्तोकाति प्रसंगपरिहारोपपत्तेरित्याशयेनाह त
त्प्रतिभासस्याचीनेत्यर्थः तत्तादात्म्येति रजतस्येदमर्थकल्पितत्वादिजततादात्म्याध्यस्यत्वमिदमर्थ
स्यपदतादात्म्याश्रयत्वं तु न चटे स्तिपटस्य तत्रानध्यस्तत्वादिति भावः चक्षुःसंप्रयोगस्यानाश्रयस्यापि रजतस्य चाक्षु
षवृत्तिविषयत्वकल्पने हेतुमाह चक्षुषेति धर्मिज्ञानवादी चाक्षुषत्वानुभवस्यास्य पासिद्धं वदन् धर्मींद्रियसंप्रयोग
जन्याद्वृत्तिर्धर्मिमात्रगोचरेत्याशयेन शङ्कते नचेति तदिदं जतमिदं वृत्तिसमकालमसत् दुष्टेन्द्रियसंप्रयोगाजन्यमपि न भवती
मत्र हेतुमाह ज्ञानकारणस्येति तथा च प्रातिभासिकरजतस्येंद्रियकत्वपदे ग्रमेसंप्रयोगस्यान्यगोचरवृत्तिजनकत्वमेकं
कल्पनीयं तथा ज्ञानकारणस्य सन्निकर्षस्य रजताद्यर्थोत्पत्तौ

सि॰ ले॰ कारणत्वमपरं कल्पनीयमिति गौरवमिति भावः यदि संयोगो न रजताद्युत्पत्तौ कारणं नहि किंतु कारणमविद्यामात्रमस्य सदासत्वेन र
प्र॰ टी॰ जताद्युत्पत्त्यासस्य कादाचित्कत्वप्रतीतेस्तत्प्रयोजकत्वानुपपत्तिरिति शंकते किंचेति उत्तरमाह इदं रूप्यमित्याद्यनुभवीति इंद्रियसंप्र
९५ योगादिसमर्थ्यमात्रगोचरा वृत्तिरुदेति तथा चाध्यासेऽत्र निमित्तकारणमस्त्येतावद्व्यासत्वाविद्या रजताकारेण परिणमते
रजतस्य चेदमाकारवृत्त्यभिव्यक्तमिदमर्थावच्छिन्नचैतन्यमधिष्ठानं तथा च रजतं तद्गोचरवृत्तिं विनैव चैतन्यभास्यमहंकारा
दिवदित्यर्थः ननु तस्मिन्नत्र नतदभिव्यक्तं स्मृत्वचनमदमिदंवृत्तिपरं तच्चेत्कादाचित्कत्वात् रजताद्यध्यासस्य कादाचित्कत्व
मिति भावः तद्भास्यमिति साक्षिभास्यमित्यर्थः ननु वा तच्चैतन्यावभासस्य शुक्तिरूप्यादेरहंकारादिवत्कथं साक्षिभास्यत्वमि
ति वाच्यं स्वगोचरज्ञानरूपवृत्त्युपहितचैतन्यभास्यस्यैव साक्षिभास्यशब्दार्थत्वात् तथा च यथा विद्याहंकारतद्धर्माणामेव
तदंशत्वमेव चक्षुरनपेक्षाप्रसंगात् नहि तत्र शंखग्रहणे चक्षुरपेक्षा रूपं विना केवलशंखस्य चक्षुर्ग्राह्यत्वायोगात् ना
पि पीतिमग्रहणे ग्राह्यापेक्षेंद्रियकत्वानभ्युपगमात् न च पीतिमा स्वरूपतो नाध्यस्यते किंतु नयनगतपित्तपीतिम्नोऽनु
भूयमानस्य शंखसंसर्गमात्रमध्यस्यत इति पीतिमानुभवार्थमेव चक्षुरपेक्षेति वाच्यं तथा सति शंखेन तत्संसर्गो यो व
त्तेन तद्वत्वप्रसंगात् नयनप्रदेशगतपित्तपीतिमाकारवृत्त्यभिव्यक्तसाक्ष्यसंसर्गेण तयोस्तज्ज्ञास्यत्वाभावात् पीतिम
भासकचैतन्यमविद्यादिगोचरयात्तात्मकवृत्त्युपहितं न भवति एवं शुक्तिरजतादिभासकचैतन्यमपि शुक्तिरजतादि
गोचरज्ञानात्मकवृत्त्युपहितं न भवतीति न साक्षिभास्यत्वमुक्तमिति मतम् ननु शुक्तिरजतस्य साक्षिभास्यत्वे चाक्षुष
त्वानुभवविरोध इति तेनाह चाक्षुषत्वानुभवास्त्विति स्वशुक्तिरजतनमात्मकस्येदमंशावच्छिन्नचैतन्यस्याभिव्यंजकामिदंवृ
त्तिप्रति चक्षुषो जनकत्वेन शुक्तिरजतस्य चक्षुरपेक्षा वर्तते सा चापेक्षा परंपरयैवस्वाधिष्ठानगोचरवृत्त्यर्थमपेक्षितत्वात्तु
तु साक्षात्स्वगोचरवृत्त्यर्थमनपेक्षितत्वात् यथा कथंचिच्चक्षुरपेक्षामात्रेण तत्र चाक्षुषत्वानुभवउपपद्यत एवेत्यक्षरार्थः
ननु चक्षुषा रजतं पश्यामीत्यनुभवो हि रजते चाक्षुषवृत्तिविषयत्वमवगाहते न तु शुक्तिरजतगतं चाक्षुषवृत्त्यभिव्यक्तचैतन्य ९५
विषयत्वमिति चेत्तु गतिः तथा च परंपरया चक्षुरपेक्षामात्रेण निर्वाहेन चाक्षुषत्वानुभवस्य चाक्षुषवृत्त्यभिव्यक्तचैतन्यवि

षयत्वं रंजतत्वं विषयतानिरूपकत्वं भवत्यतोऽनिकल्पितेति प्रतिभाति नत्वदुक्तं शंखवद्गुभवस्याख्यानानुपपत्त्यादिनिवेदनं न
वस्तुतः इदमर्थेगतस्येदंत्वस्य तत्रानुभूयमानस्य यथा शुक्तिरजतसंसर्गारोपस्तथेदमर्थेगतस्य तत्रानुभूयमानस्य चा
क्षुषत्वस्य शुक्तिरजते संसर्गारोप इष्यस्यार्थस्य प्रकृते विवक्षितत्वात् तथा च तस्मिन्नारोपणीयं चाक्षुषत्वं विषय
त्वमिदमर्थमतेन तदाभावय शुक्तिरजतस्य चक्षूरूपेक्षावर्तनेऽस्मिन्नयमर्थः परंपरया च चक्षूरूपेक्षामात्रेणेति ग्रंथस्य हृद
यः इति न कश्चिद्दोषः प्रातिभासिकरजतादेः प्रातिभासत्वमेव न त्वैन्द्रियकत्वमिति मतं दूषयति तथासतीति शु
क्तिरजतस्यैन्द्रियकत्वलाभायैवेन्द्रियापेक्षा न तारोप्यस्य तदर्थमिन्द्रियापेक्षोपगमे सतीत्यर्थः नहीति इदं चापातनः
पीतशंखभ्रमादिस्थले पण्यासप्राचीनयामिगोचरचाक्षुषवृत्तेः प्रागुपपादितत्वादिति मननयो नापि पीतिमग्रहणं
इति चक्षुरूपेदोषमत्र षष्ठः रूपं विना केवलशंखस्य चक्षुर्ग्राह्यत्वायोगमुपेत्यारोपितस्य साक्षिभास्यत्ववादी शंकते नचपीति

संसृष्टशंखमोचैकवृत्त्यनभ्युपगमाच्च नच नयनप्रदेशस्थस्य पित्तपीतिम्नो दोषाच्छंखे संसर्गाध्यासो नोपपद्यते
किन्तु नयनरश्मिभिः सह निर्गतस्य विषयव्यापिनस्तस्य तत्र संसर्गाध्यासः कुसुंभारुणेन इव कौसुंभ इति संभ

वतीति पीतरूपमित्यर्थः यथा शुक्तौ रजतं स्वरूपेणाध्यस्यते तथा शंखे पीतरूपं नाध्यस्यत इत्यर्थः नयनगतं यत्पित्तं पीत
रूपयुक्तं द्रव्यविशेषस्तस्य यः पीतिमा तस्य पित्तद्रव्येणैवानुभूयमानस्य शंखे संसर्गमात्राध्यस्यते यथा कुसुमादावनुभू
यमानस्य लौहित्यस्य स्फटिकमण्यादौ संसर्गस्तद्वत् न चान्यगतस्यान्यत्रारोपाभ्युपगमे तथाख्यातिप्रसंग इति वा
च्यं प्रत्यक्षस्य मानसस्थसंस्थानिर्वचनीयस्योत्पत्त्यभ्युपगमेनान्यथाख्यातिविलक्षणत्वादिति भावः पीतिमानुभ
वार्थमेवेति शंखपीतरूपसंसर्गाध्यासात्प्राचीनो यः पित्तद्रव्ये पीतरूपानुभवस्तदर्थमित्यर्थः तत्र किं नयनप्रदेशगत
एव पित्तद्रव्ये पीतिमानुभवः किंवा शंखदेशं प्राप्तस्य तत्रस्थ पीतद्रव्ये पीतिमानुभवः आद्यं दूषयति तथासतीति नयन
गत एव पित्तद्रव्ये पीतरूपानुभवाङ्गीकार इत्यर्थः शंखतत्संसर्गयोरिति शंखस्य शंखपीतरूपयोः संसर्गस्य चेत्यर्थः शंख
तत्संसर्गयोर्भाने किं पित्तपीतिमगोचरवृत्त्याभिव्यक्तेन साक्षिणा किंवा पीतिमसंसृष्टशंखगोचरवृत्त्याभिव्यक्तेन साक्षिणा

नाद्युइत्याह नयनप्रदेशेति नयनप्रदेशगतपित्तपीतिमाकारवृत्त्या तत्प्रदेशस्थपीतिमावच्छिन्नं चैतन्यमभिव्यज्यते तेन त्वा
भिव्यक्तचैतन्यलक्षणसाक्षिणा सह शंखस्य शंखेसमासो पित्तपीतरूपसंसर्गस्य चासंबंधात्तयोः शंखतत्संसर्गयोरपरोक्ष
तस्मादित्यर्थः नन्वद्वितीयइत्याह पीतिमतस्सेति अत्र तमसुपगमात्स्वेति साक्षिभासत्ववादिनेनिर्दोषः शंखदेशगमनमपि
तद्दृष्टेपीति मानुभवइति द्वितीयं शंकते नचेति विषयव्यापित्वस्यैति शंखरूपमधिष्ठानत्वासत्वस्य पित्तद्रव्यस्येत्यर्थः त
थाच पित्तपीतिमाकारवृत्त्या शंखदेशस्थस्य चैतन्यस्याभिव्यक्ता शंखतत्संसर्गयोरपरोक्षसंभवतीतिभावः कुत्रम
स्तुइत्यविशेषः तद्धानेपटेयथाकुसुंभेत्यनुभूयमानस्य रक्तरूपस्य संसर्गारोपस्तद्वदित्यर्थः नयनगतपित्तद्रव्यस्य नयने
सर्वैरनुभूयमानस्य नयनरश्मिद्वारा निर्गत्य शंखव्यापित्वोपगमे बाधकमाह नयनगतेति पित्तोपहतनयनः पुरुषः
यदा शंखं पश्यति तदा तद्भिन्नेषामपि पीतः शंखइत्यनुभवप्रसंगादित्यर्थः ननु पित्तद्रव्यस्य नयनप्रदेशाद्विषयप्रदे
वति तदाकारवृत्त्यभिव्यक्तसाक्षिसंसर्गइति वाच्यं तथासति सुवर्णेलिप्त इव पित्तोपहतनयनेन वीक्ष्यमाणे शं
खे तदितरेषां पीतिमधीप्रसंगात् नचस्पीतिमा समीपेस्थीन इव गृहीतुं शक्यः विरलयस्तु पर्युत्पन्नत्वे विहंगम
स्येवतिगमनावसरे यथा पित्तोपहितनयनेन नयनदेशमारभ्य विषयव्याप्तिपर्यंतं पीतिमारस्तत्र तथा नैव पित्तयतस्स
मीपेमध्ये च पीतिमाप्रतीतप्रत्यक्षदेशेपि गृहीतुं शक्यते नान्यथेत्यत्र दृष्टांतमाह विहगस्येति यथा विहंगमः पक्षी
गगनेद्रुमतत्तद्रुमतनावसरे भूप्रदेशमारभ्य येनद्रुमोसंलग्नस्तत्रैवगगनोपरिभागे दूरं गतोपि तथास्तु
पीत्यर्थः दृष्टांतवैषम्यमाह इतरेषामपीति दृष्टांते हि गगनोपरिभागे दूरे विहंगमं पश्यन् कश्चिद्दृष्टसमस्तप्रतिपादितम
मवस्तुनिकटेन चक्षुरस्पतत्वेन तथापि विहंगमो दृष्टुं शक्यत इति संचारस्तथा पश्यति तथाप्यत्र भव
तीत्यर्थः श्वेतवाग्रनुभूयमानारोपस्थले कथंचित्तदपेक्षा सर्वेषां तदपेक्षा सर्वात्मना व
त्तुमशक्येत्याह एवमपीति जलाधारभूभागोवाजलमिश्रितद्रव्यविशेषोवा यदि नीलरूपमास्ते तदा तन्नैव चानुभूयमान
नैल्यस्य जलेप्यारोपइति शंकाभवेत् न निवर्तयेदित्यर्थमयतलस्पतियवलनं ननदीजलस्य चाक्षत्वविशेषणमपात्ते अ

खत्वं निर्मलत्वं निशि सत्त्वौ चंद्रिकायामित्यस्यापि पूर्वोक्तमेव प्रयोजनं दूषणं दुष्परिहरत्वाच्चेति अत्र पीनशंखजत्वे नैल्याद्यध्यासेषा
रोप्यपीति मते नैल्यादिसंसृष्टाधिष्ठानगोचरत्वात् दूषणमनुपगमेपि चक्षुरनपयोगो न दुष्परिहरः शंखत्वादिधर्मिमात्रगोचरचा
क्षुषवृत्तिसंभवस्य प्रागदूषितत्वादिति मन्तव्यं आरोप्यस्येंद्रियजन्यवृत्तिविषयत्वे संमतिमाह अनास्वादितेति अस्मिन्नजन्यति
अनास्वादितः रसनेंद्रियेणाननुभूतस्तिक्तरसो येन स तथा तस्येत्यर्थः मधुरे तत्तनपानादौ तिक्ततावभासात् कारः स च जन्मांतर
ीयतिक्तरसानुभवजन्यसंस्कारजन्यः आरोप्ये आरोप्यतज्जातीयपूर्वानुभवजन्यसंस्कारस्य कारणत्वादित्यर्थः अत्रेत्येति
क्ततावभासस्य संस्कारसहकृतरसनेंद्रियजन्यत्वं भाति न संस्कारमात्रजन्यत्वे स्मृतित्वप्रसंगात् तथा चेति क्ततावभास
इवइतरेषां चक्षुःसामीप्येन ग्रहणमितिवाच्यं इतरेषामपि तत्त्वद्वृत्तिकरणत्वं च तेषां पीति मत्सामीप्यसत्वेन तद्ग्रहण
स्य दुर्वारत्वात् एवमप्यति धवलस्तिक्तताम पतत्स्वभावहरद्रूतनपीतजल नैल्याध्यासे गगने नैल्याध्यासे च रक्तवस्त्रेऽपि
यौ चंद्रिकायां नैल्याध्यासे चानुभूयमानारोपस्य वक्तमशक्यत्वेन तत्र नैल्यसंसृष्टाधिष्ठानगोचरचाक्षुषवृत्त
नभ्युपगमे चक्षुरनुपयोगस्य दुःपरिहरत्वाच्च अनास्वादितेति तिक्तरसस्य बालस्य मधुरे तिक्ततावभासो जन्मांतरा
नुभवसंस्कारैरेव कृतनिर्मितिः पादस्य तत्पांचपादिकायां ग्रंथेन स्वरूपतो आरोप्यमानस्यैव तिक्तरसस्येंद्रियकत्वस्फु
टीकरणाच्च अन्यथा न तत्र रसनव्यापारापेक्षा नुपपत्तेः तस्मात् उदाहृतनैल्याध्यासस्थले च अधिष्ठानसंप्रयोगादेव
तद्गोचरचाक्षुषवृत्तिसमकालोदयो ध्यासस्तस्यावृत्तेर्विषय इति तस्य चाक्षुषत्वमभ्युपगंतव्यं रूपं विना केवलो
धिष्ठानस्य मधुरद्रव्यस्य रसनेंद्रियायोगपत्तया परिशेषात् स्वरूपतोध्यस्यमानस्य तिक्तरसस्यैव रसनेंद्रियजन्यवृत्तिविषयत्वं
स्पष्टीकृतमिति समारोप्यस्येंद्रियकत्वे संमतिरियं ग्रंथ इति भावः अन्यथेति आरोप्यतिक्तरसस्येंद्रियकत्वानुपगमे तत्र बाल
स्य तिक्ततावभासस्थले रसनेंद्रियव्यापारो न स्यात् मधुरद्रव्यस्य तदयोग्यत्वादित्यर्थः वस्तुतस्त्विति तिक्ततावभास इत्यत्र तिक्त
तावदवभासपदयोः कर्मधारयः अवभासपदं चावभास्यत इति व्युत्पत्त्या ध्यस्यमानतिक्तरसपरं पंचपादिकायामेवाव
भासपदस्यावभासमानतापदेन तथा व्याख्यानत्वात् जन्मांतरीयसंस्कारोपप्लुध्यस्यमानतिक्तरसोन्यतो हेतु प्रातिभासिको

सि॰ले॰
मु॰टी॰
८७

ध्यासस्थले शुद्धदोषसंस्काराधिष्ठानुसाम्बामस्तानानुपकारणत्र यस्याध्यस्यमानपदार्थोत्पन्नताचेव कारणतायाः टीकाविवरणा
दिष्वेवस्पष्टत्वात् तथा च कथमनेन ग्रंथेनस्वरूपतोध्यस्यमानस्यैव तिक्तरसस्येन्द्रियकत्वस्य स्फीकरणं न च तिक्तरस
स्येन्द्रियकत्वाभावे रसनव्यापारापेक्षानुपपत्तिरिति वाच्यं वा लस्यापेक्षावात्तिक्तरसाध्यासकाले रसनेन्द्रियव्यापारस्य ने
मानाभावात् न च तथा सति तिक्ततानवभासप्रसंगः इति वाच्यं त्वगिन्द्रियजन्यमधुरद्रव्यगोचरवृत्त्या अभिव्यक्ते मधुरद्रव्याव
च्छिन्नचैतन्ये तिक्तताध्यासांगीकारेण तिक्ततायाः स्वगोचरवृत्तिं विनैव स्वाधिष्ठानचैतन्यभास्यत्वसंभवात् अस्तु वा तिक्त
ताध्यासस्थले रसनेन्द्रियापेक्षा तथापि नाध्यस्यमानतिक्तरसस्येन्द्रियकत्वासिद्धिरध्यस्यमानतिक्ततामतिमधुरद्रव्यानि
ष्ठमधुररसस्याधिष्ठानत्वसंभवेन तदधिष्ठानभूतमधुररसग्रहणेन तदपेक्षोपपत्तेः पंचपादिकागतमधुररसपदस्य मधुर
रससमानाधिकरणत्वेन तदविरोधाभावाच्च न च मधुररसग्रहणे तिक्तताध्यासानुपपत्तिरिति वाच्यं रसग्रहणेपि दोषविशेषेण
धिष्ठानगोचरवृत्त्यभावे च विषयचैतन्याभिव्यक्त्यभावेन जलतदध्यस्तनैल्यादीनां चक्षुःस्पष्टतायोगात् तिक्तरसाध्यासस्थ
ले त्वधिष्ठानाध्यासयोरेकेन्द्रियग्राह्यत्वाभावात् त्वगिन्द्रियजन्याधिष्ठानगोचरवृत्त्यास्तदवच्छिन्नचैतन्याभिव्यक्तावपि तो
पहतरसनसंप्रयोगादेव न तु तिक्तरसाध्यासस्तन्मात्रविषयरासनवृत्तिश्च समकालमुदेतीति तिक्तरसस्य रासनत्वम
मधुररसत्वजातिसाक्षात्कारमतिं वयेसतितत्र तदध्यासोपपत्तेस्तत्सादारोप्यस्य साक्षिमात्रभास्यत्वं पूर्वाचार्याणां सार्वत्रिक
व्यवहारसिद्धनिरपवादमितिनिर्मत्सरमतिः परे कविताार्किकमतानुसारेण पंचपादिकाव्याख्यानेकृतं तदेवानुवर्मते तस्मा
दिति अध्यस्यमानपदार्थस्य साक्षिभास्यत्वमते पीतशंखबोधव्यासे शुक्लत्वानुपयोगस्य च व्यभिचरत्वादित्यर्थः तच्चोचरेति अधि
ष्ठानगोचरेत्यर्थः वृत्तिसमकालमुद्भवो यस्याध्यासस्य पीतरूपादेः सतथेत्यर्थः अधिष्ठानसंप्रयोगजन्याया वृत्तेरारोपितरू
पादिविषयत्वानंगीकारे आरोपितरूपादेरनवभासप्रसंगात् इत्यर्थः रूपं विना केवलाधिष्ठानगोचरवृत्त्यसंभवे
चेति आरोप्यपीतिमनैल्यादिसंसृष्टशंखादिगोचरवृत्त्यनभ्युपगमे चेति चकारार्थः तन्मते चेतन्यपरपंचपादिकाग्रंथोक्ति ८७
करसस्याध्यस्यमानस्येन्द्रियकत्वं वा तत्राध्यासस्थले इत्वाधिष्ठानारोप्ययोरेकवृत्तिविषयत्वेनन संभवति किन्तु तिक्तरस

मात्रगोचरतासन्नहृत्तेनुपपादयति तिक्तरसाध्यासस्थलेविति नत्वकिन्नेति मधुराद्रिद्रव्यरूपाधिष्ठानावच्छिन्नरसत्वर्थः
पित्ताद्युपदोषेणोपहतेपद्मसनेतेन सहमधुरद्रव्यरूपाधिष्ठानस्यसंप्रयोगान्नत्राधिष्ठानावच्छिन्नचैतन्येतिक्तरसा
ध्यासइदेति नदेवाध्यस्यमानतिक्तरसमात्रगोचरतासन्नवृत्तिश्चोदेतीत्यर्थः नन्वतिक्तरसाध्यासाधिष्ठानस्यभाने
रासत्वनातिक्तरसभानेन केवलसाक्षिरूपमितिमननमेवकुतोनाद्रियतेनत्राह त्वगिंद्रियेति चेतन्मभास्ये तिक्तरसवृ
त्तिवृत्त्युपगम्यमानइतिशेषः परंपरयापीति रजतादध्यासस्थलइवयमिमात्रगोचरवृत्त्युत्पादनद्वारापीत्यर्थः
धर्मिणो मधुरद्रव्यादेः रसनेन्द्रियायोग्यत्वादितिभावः नन्वतिक्तरूपेध्यासेकथमपीत्यस्यसाध्यासकारणत
रेणेति यद्यपि समकाले केवलसाक्षिभास्ये शुरस्वरूपादिष्वारासनत्वचाक्षुषत्वाद्यनुभवस्यारोपरूपतायावक्त
व्यत्वपर्यंतत्वं त्वगिंद्रियजन्याधिष्ठानगोचरवृत्त्यभिव्यक्तचैतन्यभास्येति तत्तस्यैव परंपरयापि रसनोपयोगाभावे
नतत्र कथमपि प्रकारान्तरेणरासनत्वानुभवस्यसमर्थनासंभवात् नथैव रजतस्यापिचाक्षुषत्वोपपत्तेः प्रत्य
क्षीत्वानुभवोनवाधनीयः नचासंप्रयुक्तस्यरजतस्यचाक्षुषत्वेप्रत्यक्षमात्रेविषयेंद्रियसन्निकर्षःकारणंइ
त्यप्रत्यक्षेतत्संयोगःकारणं रजतप्रत्यक्षेस्तनसंयोगःकारणमितिसंकोचानेककार्यकारणनियमभंगः
स्यादितिवाच्यं सन्निकर्षत्वस्यसंयोगादिसाधारण्यतेस्य कस्याभावेनाद्यनियमासिद्धेः द्वितीयनियमस्यनेयायि
काणानेनशक्नुतेपितथासमर्थयितुंसंभवति सम्प्रदायांनामिवप्रातिभासिकातिक्तरसादेरपींद्रियसन्निकृष्टत्वेनसा
मग्र्यभावस्यतुल्यत्वात्तथापितत्प्रकारमजानताननु कथमपीत्याद्युक्तमितिध्येयं नथैवेति यथारासनत्वनिविष
यत्वमाद्यारासनत्वानुभवः समर्थितस्तथाचाक्षुषवृत्तिविषयत्वमाद्यायैवचाक्षुषत्वानुभवसम्भवेतदनुभव
स्यारोपरूपत्वकल्पनमयुक्तमित्यर्थः नवाधनीयइत्युक्तं वाधकेसतितत्कायस्यावश्यकत्वादितिमत्वाशंकते न
वेति शंकितंवाधकं परिहरति सन्निकर्षस्येत्यादिना आद्यनियमासिद्धेरिति जन्यप्रत्यक्षमात्रेइन्द्रियसन्निकर्षः
कारणमितिनियमासिद्धेरित्यर्थः जन्यपदंनित्यसाक्षिरूपप्रत्यक्षव्यभिचारवारणार्थंशाक्षात्परोक्षनेयाकृभित्वन

सि॰ लि॰
मं॰ टी॰
१०८

मपिसमस्तविशेषवर्णं द्रष्टव्यं अत्रेदं बोध्यं संयोगाद्यन्यतमत्वमनुगतमस्ति न्यायमते भावत्वादिवत् रूपवेदो पार्थिवरूपत्वा
तत्रि कर्षत्वं न संभवती त्याद्यनियमाविरोधोऽङ्गीकार्यः न्याद्यनियमस्यापि सिद्धत्वमस्तकाजन्यद्रव्यप्रत्यक्षे त्वक्संयोगः का
रणमिति द्वितीयमनुपेत्य प्रकृतेन तस्याविरोधमाह द्वितीयेति नियमस्येति द्वितीयनियमस्य प्रयव्यवहारं स्यायद्रव्यत्वा
धिकरणे तद्विषयत्वेनाद्वितीयनियमाविरोधित्वादिति संबंधः नियमस्याव्यवहारविकद्रव्यविषयत्वकल्पनायां नियमा
प्रकमाह संयोगाद्यन्यतमत्वेन क्वचिदिति एकत्वाद्विना नाविरत्यर्थः एकत्वमेकविषयादिप्रकारेण तत्रापि स्याद्वोधप्रत्यत्वम
मेणद्रव्यत्वावाप्यासंभवादित्यर्थः तथा च द्रव्यसमवेतसमवेतशब्दिवसंयोगस्य कारणत्वनियमस्यैकत्वादोद्रव्यत्वावच्छ
कत्वादन्यतमस्यैव संयोगाद्यन्यतमे क्वचिद्द्रव्येपि समवायासंभवात्प्रयव्यवहारं स्यायद्रव्यत्वाधिकरणे तद्विष
यत्वेनचानिमासिकरजतेद्रव्यत्वस्याधिष्ठानगतस्यैवेदंत्वदृष्टान्तात्मनीत्मभ्युपगमेन च द्वितीयनियमा
विरोधात् द्वितीयनियमरूपसामान्यकार्यकारणभावव्यतिरेकेण विशेषापि कार्यकारणभावकल्पनाया
गौरवप्रयाह तत्वेद्वितीयनियमासिद्धेः यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे तद्विशेषोहेतुरिति न्यायस्या
पिपत्रबीजांकुरादौ सामान्यकार्यकारणभावाभ्युपगमेबीजांतरादंकुरांतरोत्पत्तिप्रसंगः तद्विषयत्वेन त
तोज्ञानमलत्वनानायमानविशेषकार्यकारणभावासिद्धेः न चात्रापि द्रव्यसमवेतद्रव्यसंयोगः कारणमिति सा
मकालेनत्वयमहेत्वाभिचारइत्यर्थः अद्रव्येद्रव्यत्वारोपे द्रष्टान्तमाह तामसीवेति सिद्धांतेतमसद्रव्यत्वाभ्युपगमादाह नैया
यिकरीत्येति प्रौढालोकाभावस्तम इति नैयायिकरीत्येत्यर्थः गुणगुणत्वं द्रव्यलक्षणमिति जानतां तमसि रूप
पवत्वभ्रमेणद्रव्यत्वभ्रमः संभवतीत्यर्थः न शुक्तिरजतादौ घटादौ विद्यमानभावतपव द्रव्यत्वमास्ति भ्रमस्याऽरजतत्वादि
जातिरपि नत्रनस्यात् न चैष प्रापतिः उत्तरत्र तत्र रजतत्वादिजातेः स्वाधयिष्यमाणत्वात् नन्वशुक्तिरजतादिकमपि
प्रवहारदृष्ट्याद्रव्यत्वाधिकरणभवान्निप्रवहारदृष्ट्यानेशुक्तौरजतवायवत्तुक्तिरजतेन्द्रियमत्र रजतत्वादिजातिवाधाद १०८
पीनात् तथा च शुक्तिरजतादेरिन्द्रियासंयुक्तस्येन्द्रियकत्वं निविषयतो मयामे द्वितीयनियमविरोधोपिद्रवीरइति चे

त्वसंस्प्रुक्तिरजतादौ रजतत्वद्रूपत्वादिज्ञानिनीतिनियमनमनुसरमनंतरद्रूपत्वमनीतिंव्यवहरयति प्रातिभासिकरजत इति इदमर्थे
गतेदंत्वस्यैवतत्र ज्ञानद्रूपत्वस्यापि तत्रसंसर्गारोप इत्यर्थः तथाच शुक्तिरजते व्यवहारदृष्ट्याद्रव्यत्वापि करणेन भवतीत्यर्थः न
तु द्रव्यत्वस्य तद्देशेंद्रियस्य संयोगः कारणमित्युपगमे रजतचाक्षुषे रजतचक्षुः संयोगः कारणमिति तृतीयनियमोपि द्र
ष्टोरः रजतस्य द्रव्यविशेषत्वात् रजतचक्षुःसंयोगस्य चेंद्रियसंयोगविशेषत्वाद्द्रव्यविशेषस्य तद्देशेंद्रियसंयोगविशेषः
कारणमित्यस्यार्थस्य यत्सामान्ययोस्तन्न्यायसिद्धत्वादिति शंकां परिहरति यत्सामान्ये इति सामान्यकार्यकारणभावो यत्रा
तिप्रसंगावहस्तत्रैवायं न्यायो नान्यत्रेत्यर्थः न्यायस्य तद्विषयत्वेन निसंदेहः ननु इति न्यायादित्यर्थः नतु बीजसामान्य
स्यांकुरसामान्यस्य च कार्यकारणभावोपगमे बीजान्तरादंकुरांतरोत्पत्तिप्रसंगवदिहाप्यतिप्रसंगसत्त्वादुक्तन्यायस
मान्यनियमोपगमस्य संयोगाद्द्रव्यप्रत्यक्षापत्तिरित्यतिप्रसंगो स्तीति वाच्यं तद्द्रव्यप्रत्यक्षे तद्द्रव्यसंयोगः कार
णमिति नियमाभ्युपगमात् भ्रमस्थात्तृतीयनियमाभ्युपगमात् भ्रमस्थात्तृतीयनियमेप्यतिप्रसंगस्य दुर्वारत्वात्
तस्मात्तत्राह ह्येनियमप्रसंगः किंचात्र तृतीयनियमभंगोपि न दोषः इदं रजतं पश्यामि नीलं जलं पश्यामीत्यादे
र्जनस्यासिद्धस्यानुभवस्य प्रत्यक्षरूपतानामपि प्रत्यक्षत्वात् विषयसन्निकर्षः कारणमित्यादिनियमानां अभाव
हातिकविषये संकोचकल्पनमंतरेणोपपादनासंभवात् नचैवं सति प्रमायां सन्निकर्षः कारणं न भ्रमइत्यपि
वृत्तिरस्त्वेवेति शंकते नचात्रापीति उक्तातिप्रसंगपरिहारायन तदंकुरत्वावच्छिन्नं प्रति तत्तद्बीजत्वेनैव कारणत्वेन हेतुत्वकु
ल्पनावश्यकत्वेनैव तत्र द्रव्यप्रत्यक्षे प्रति तद्द्रव्यसंयोगस्यैव तेन न्यायेन कारणत्वं सिध्यति न चैतेन न्यायेन तृतीयकार्य
कारणभावः सिध्यतीत्याशयेनाह तद्वदेवेति नन्वेतेन न्यायेनातिप्रसंगपरिहाराय तृतीयनियमएव कुतो न कल्प्यते तत्र
त्राह भ्रमस्थलेति तृतीयनियमकल्पन इत्यर्थः भ्रमप्रसंगस्येति भ्रमरजतचक्षुःसंयोगाद्भ्रमरजतचाक्षुषापत्तिरित्येवं
रूपस्येत्यर्थः नचवास्तविकनियमवत्तृतीयनियमोप्यस्त्विति वाच्यं भ्रमप्रसंगपरिहारायात्रापि प्रकृते स्वतन्त्रसाजागलस्तना
यमानस्याकल्पनीयतायाउक्तत्वादिति भावः तस्मादिति प्रथमतृतीययोरसिद्धत्वात् द्वितीयस्य चाविरुद्धत्वादित्य

सि॰ ले॰ र्थः ननु प्रथमद्वितीयनियमविरोधस्य दुर्वारतया ऽप्राप्तत्वान्नदंनः पाति यत्किं नियमस्य विरोधस्यापि दुर्वारत्वात् अत्र
प्र॰ टी॰ नास्ति ह्युक्तमनियमभंगाद्ययुक्तमनत आह किं चात्रेति शुक्तिरजतादिस्थलेऽयमर्थः अनन्यथासिद्धस्येति समकाले
१॰५ केवलस्याप्रतिभासेऽपि रजतादिशुचा त्वषत्वायत्तु भवत्येवात्राप्यारोपरूपत्वकल्पनासंभवात् अनन्यथासिद्धत्वमसि
द्धं नु मसाम ग्रभावस्य स्वमइवात्रापि नत्वपत्वा नयास्वमेऽपीन्द्रियव्यापारकल्पनाप्रसंगात् दृश्यमवविरोधे सति न तत्काले
तदुपरमश्च व एतस्यानन्यथानयनोपपत्तेरित्यादिकमत्रानुसंधेयं प्रत्युभवस्यापि पादनासंभवादिति संबंधः ह्युक्तनियमा
नासंकोचकल्पनेसति शुक्तिरजतादेरनिर्वचनीयत्वासिद्धिप्रापकेन नचैवं सतीति देशांतरस्थरजतादिकं भ्रमविषय
मिति[?]यमतं तत्र असन्निकृष्टस्य कथं प्रत्यक्षत्वमिति निर्वचनीयख्यातिवादिभिः प्राक्कायत्कृतायां सन्निकर्षः प्रत्यक्षे
कारणमित्यादिनियमस्य भवतां मतेऽप्यावश्यकपदार्थमात्रत्वविषयत्वेन संकोचवत्त्वममतेऽपि तस्य प्रत्यक्षप्रमा या

संकोचकल्पनासंभवादसन्निकृष्टस्यैव देशांतरस्थस्यैव रजतस्यैतारोपापत्तिरिमसख्याख्यातिः पादप्रसारिका
अभिव्यक्तं चैतन्यावगुंठितमनुस्मृतं देशांतरस्थरजतस्यापरोक्षत्वानुपपत्तेः ख्यातिबाधानुपपत्त्यादिभिर्भ्रमविषय
स्यानिर्वचनीयत्वसिद्धेश्च नचाधिष्ठानसंप्रयोगमात्रात्प्रातिभासिकस्येन्द्रियकत्वोपगमे शुक्तिरजतादिष्वसम
सन्निकर्षः कारणमिति प्रसक्तप्रमाविषयत्वेन संकोचकल्पनोपपत्तेरन्यथाख्यातिवादस्य न किंचिद्बाधकमिति परिहा
रः तद्वच पराभिमतार्थः भ्रमरूपे प्रत्यक्षे सन्निकर्षस्याहेतुत्वेऽपि नान्यथाख्यातिवादप्रसक्तिरिति परिहरति अभिव्यक्तेति
प्रत्यक्षस्यापरोक्षत्वे इन्द्रियसन्निकृष्टत्वं न च प्रयोजकं किं त्वभिव्यक्तचैतन्याभिन्नत्वमिति वक्ष्यते तथा च भ्रमविषयस्य रजतादे
देशांतरस्थत्वमापरोक्ष्यं न संभवतीति शुक्तितादात्म्यापन्नं रजतं तत्सिद्धमित्यर्थः प्रवचनतादात्म्यं नन्वेवमपि शुक्तिरज
ते शुक्तित्वस्यमेव सत्त्वान्नानिर्वचनीयमानाभावादित्यत आह ख्यातीति ख्यातिरपरोक्षप्रतीतिस्तथा च भ्रमविषयस्य
देशांतरस्थत्वमसत्त्वं च निरस्तं भवति असतः संविज्ञानात्म्याभावेन प्रत्यक्षत्वायोगात् शुक्तौ कालत्रयेऽपि रजतं नास्तीति बा १॰५
धितबाधकप्रमाणबलाद्रजतस्य स्थितिसमयेऽपि शुक्तौ रजताभावः सिद्ध्यति शुक्तौ यदि रजतं स्यात्तदा व्यावृत्त्यनुपपत्तिर्यदिन

त्ततत्त्वसंस्कारात्तदा शुक्तौ शुक्तित्वमिव न बाध्येतातः ख्यातिबाधान्यथानुपपत्त्या तस्यानिर्वचनीयत्वसिद्धिरिति शुक्तिरजतस्यो
त्पत्तिविनाशवत्त्वादनिर्वचनीयत्वसिद्धिरेन च विवर्तलक्षणनिरूपणावसरे प्रपञ्चितमिति नात्र प्रपञ्चनिडम्बनमित्यादि
शुक्त्यादिशब्दार्थः शुक्तिरजतादेः साक्षिभास्यत्ववादी शुक्तिरजतस्य स्वतादात्म्यापन्नेदमर्थसंप्रयोगादेव चाक्षुष
वृत्तिविषयत्वेनेन्द्रियसंयोगप्रसंग इति शंकते नचेति तत्रैवेति शुक्तावेव कालान्तरे यदध्यसनीयं तस्येत्यर्थः कुत इति यावृत्तिः शु
क्तिरजतं विषयीकरोति सैव वृत्तिः शुक्तौ कालान्तरेऽध्यसनीयं रजतमपि कुतो न विषयीकरोति तस्या वृत्ते रजततादात्म्या
पन्नेदमर्थसंप्रयोगजन्यत्वस्य कालान्तरीयरजततादात्म्यापन्नेदमर्थसंप्रयोगजन्यत्वस्याप्यविशेषादित्यर्थः तथाच सं
प्रयोगो न रजतगोचरवृत्तिहेतुः किन्तु सादृश्यविशिष्टधर्मिज्ञानमेव हेतुः सादृश्यज्ञानं च दोषत्वेन धर्मिज्ञानत्वेन च रजता
येतत्रैव कालान्तरेऽध्यसनीयस्य रंगस्यापि चाक्षुषत्वं कुतो न स्यादिति वाच्यं रजताध्याससमये रजतसाधारणत्वाकचि
क्यदर्शनाविशेषेपि यतो रागादिरूपदुष्टदोषाभावादिनस्तत्र न तदानीं रंगाध्यासस्तत एव मया तद्विषयवृत्त्युदयस्या
भ्युपगमात् तस्मादिदमंशासंभिन्नरजतगोचरापरोक्षवृत्तिरिन्द्रियजन्या न ननु सा त्विदमाकारा वृत्तिरिति नात्रैवेय
मत्तानिवर्तकत्वसदसत्त्वावच्छिन्नाकार्येति भ्रमेत्वधिष्ठानज्ञानमध्यासकारणमितीदमाकारवृत्तिरूपमतदभि
व्यक्तेनैव साक्षिणा तदध्यस्तरजतस्यावभाससम्भवात् तदात्मकसाक्षिभिव्यंजकयानपेक्षैवेद्वृत्त्या रजतविषय
ध्यासे कारणं रजतादिकं च स्वगोचरवृत्तिं विनैव चैतन्यभास्यमिति मतमुपपद्यते इति भावः नन्वमतेऽपि शुक्तौ कालान्तरेऽध्यस
नीयरंगस्य रजताध्याससमय एवाध्यासः किं न स्यादधिष्ठानस्य सादृश्यज्ञानस्य च रजतरंगाध्याससाधारणत्वादिति दो
षतौल्पमस्त्वयति रजताध्याससमय इति यदि च सादृश्यमानसादृश्यपरूपविषयदोषाविशेषेपि रजताध्याससमये रंगा
गोचररागात्मकदुष्टदोषस्याभावाद्रजतरागस्य सत्त्वाच्च न रंगाध्यास इति परिहारः इत्यनेन रागमात्रमपि न तत्समुक्तमित्या
शयेनाह यत इति रागादिरूपो यः दुष्टदोषस्तदभावादेः सकाशादित्यर्थः रागादीत्यादिपदेन रागस्य बुद्धौ विपरिव
र्तनं गृह्यते दोषाभावादीत्यादिपदेन रजतरागो गृह्यते ननु एवेति रंगगोचररागादेरभावाद्रजतरागसत्त्वादध्यासादो

सि॰ले॰ कारणत्वं रजतस्यैव तत्रोत्पत्तिस्तत्काले रजतविशिष्टधर्मिगोचरवृत्तेरुदयस्त्रोपेयत इत्यर्थः कथमिति तार्किकमतमुपसंहरति
प्र॰टी॰ तस्मादिति धर्मिज्ञानस्य कारणत्वे मानाभावादित्यर्थः नाद्य इति इदमाकारवृत्तेरित्यर्थः धर्मिज्ञानस्य कारणत्वे मानाभा
९९ ववचनमात्रत्वात् इत्युपपादितं तत्र नत्वतदेतद्धर्मिस्थायिनस्य तत्कारणत्वमतमेवाह अत्रेत्यधिष्ठानज्ञानमिति इदमा
कारवृत्तिरुपेत्यपि रजतगोचरवृत्तिरगृहीते कर्तव्येति केचिन्मतं दूषयति इदमाकारामिति अत्रेत्यादिमाकारो वृत्तिरुपेत्यरज
ताकारवृत्तिर्वृथैतिमन्मतं इति सम्बन्धः इदमाकारवृत्त्युपगमे हेत्वधिष्ठानज्ञानमध्यासकारणमिति नीतिनिष्ठाद्यो हेत्वर्थः
धर्मिज्ञानस्याध्यासकारणत्वादित्यर्थः इदमाकारावृत्तिर्यनिमित्ता रजताकारावृत्तिः किं रजतभानार्था किंवान्तःस्था
रार्थानाद्यः इत्याह नहमिव्यक्तेर्नैवेति इदमाकारवृत्त्यभिव्यक्तेनैवेत्यर्थः द्वितीयं दूषयति नह्यासकेति नचान्यगोचर
संस्काराधानोपपत्तेश्च रजताकारावृत्तिर्वृथैतिमन्यते ज्ञानद्वयपक्षे इदमिमेकावृत्तिरध्यासकारणीभूता इदं रज
तमिति द्वितीयावृत्तिरध्यस्तरजतविषया नत्विदमंशाविनाध्यस्तमात्रगोचरा सा इदं रजतं जानामीति तस्या इदम
र्थतादात्म्यापन्नरजतविषयत्वानुभवादिति केचित् अत्रेत्यर्थं इदमंशावच्छिन्नचैतन्यस्याविद्या रजताकारेण वि
वर्तते एवमिदमंशाविषयवृत्तिज्ञानावच्छिन्नचैतन्यस्याविद्यारजतज्ञानाभासाकारेण विवर्तते नत्विदमंशावृत्ति
वृत्त्याकथमन्यगोचरसंस्काराधानमिति वाच्यं यद्वृत्त्यवच्छिन्नचैतन्ये यावन्तः पदार्थाः प्रकाशन्ते तद्वृत्त्या तावत्स्वप
दार्थेषु संस्काराधानमिति प्रागुक्तत्वादिति भावः येन स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमिति तिमतं तेषां मते ध्य
स्तरजतगोचरवृत्तिरप्यस्ति तत्राकिं द्वितीयावृत्तिरध्यस्तरजतविशिष्टधर्मिगोचरा किंवा रजतमात्रगोचरेति संशये मतद्व
येनाह निर्णयं दर्शयति ज्ञानद्वयपक्षेइत्यादिना द्वितीयावृत्तिरिदं रजतमित्येवमाकारास्मद्ध्यस्तरजतविषयेति सम्बन्धः आ
कारविशेषोपादानफलमाह नत्विति द्वितीयवृत्तेर्विशिष्टविषयकत्वेऽनुभवं प्रमाणयति इदं रजतं जानामीति द्विती ९९
यवृत्तेरध्यस्तमात्रविषयकत्वमिति मतमाह अत्रेत्यादिना ज्ञानद्वयपक्षे द्वितीयवृत्तिरविद्यावृत्तिरिति प्रतिपादयति यथे
त्यादिना विवर्ततेपरिणमत इत्यर्थः एवमिति इदमंशाविषयवृत्तिज्ञानेनावच्छिन्नेत्यर्थः इदमाकारवृत्त्यवच्छिन्नचैतन्य

गतानविद्याभ्युपगमस्तु रजतमात्रगोचरवृत्तिरूपेण परिणमते सा च वृत्तिर्ज्ञानाभासः तत्र च ज्ञानकारणजन्यत्वादित्यर्थः अ
नध्यस्तमिति ज्ञानाभासस्वरूपे रजतज्ञानं रजतवत्तथानिर्भासकमेव न त्विदमाकारा वृत्तिवद्व्यावहारिकं ज्ञानाभासस्या
पि शुक्तिरजतवदेव शुक्त्यज्ञाननिवर्तकप्रमात्वाद्यभावादित्यर्थः ज्ञानाभासस्य रजतमात्रविषयकत्वेन सेदं रजतमिमा
कारो न स्यादित्याशंक्य ज्ञानाभासस्येदमंशाविषयकत्वाभावे पि तस्य तदाकारः संभवतीत्याशयेनाह तथा चेति ज्ञाना
भासप्रतीतिः इदंविषयकत्वेन वच्छिन्नचैतन्यस्याधिष्ठानत्वे सतीत्यर्थः इदमंशज्ञाने ज्ञानाभासप्रत्ययाधिष्ठानत्वे विषयमात्रं
यदिदंत्वविषयकत्वेन तस्य संसर्गो रजतगोचरज्ञानाभासे भासते तत्र दृष्टान्तमाह रजतस्येति रजताधिष्ठानगतस्येदंत्वस्य सं

वरतथ्यस्ति रजतज्ञानमस्ति तथा च रजतस्याधिष्ठानगतेदंत्वसंसर्गभानवत्तज्ज्ञानस्याप्यधिष्ठानगतेदंत्वविषयत्वसंस
र्गभानोपपत्तेर्न तस्यापीदंविषयत्वमभ्युपगन्तव्यं न च रजततत्त्वदध्यस्तस्य रजतेदंत्वसंसर्गस्य रजतज्ञानगोचरत्वा
त्तत्प्रतियोगिन इदंत्वस्यापि तद्विषयत्वं वक्तव्यमिति वाच्यं स्वतादात्म्यापन्नस्येदंत्वविषयत्वादेव तस्य तत्संसर्ग
विषयत्वेतिप्रसंगाभावात् न चाधिष्ठानाध्यासयोरेकस्मिन् ज्ञाने शक्याशनियमस्य संभावनाभाष्यविवरणे प्र
तिपादनात् एकवृत्तिविषयकत्वं वक्तव्यमिति वाच्यं वृत्तिभेदेपीदमाकारवृत्त्याभिव्यक्तैकस्मिन्साक्षिणि तयोः

संसर्गस्य यथा रजते भासते तथेत्यर्थः ननु ज्ञानाभासे न रजतेदंत्वमाणे इदंत्वसंसर्गो भासते चेदिदंत्वमपि तेनावगंतव्यं संसर्गग्रहस्य इदंत्व
ग्रहणं विना तत्संसर्गग्रहणायोगात् तथा च ज्ञानाभासस्य रजतविषयी इदमंशविषयकत्वसिद्धिरिति शंकते नन्विति सं
सर्गोपास्य रजतज्ञानाभासगोचरत्वे हेतुगर्भविशेषणमध्यस्तस्येति वक्तव्यमिति शून्यत्वावृत्तत्वादिनिरूपितसंसर्गप्रम
तत्स्य वृत्तत्वादिविषयकत्वेन स्यादिमतिप्रसंगापत्तेरितिभावः ज्ञानाभासस्येदंत्वरूपप्रतियोगिविषयकत्वाभावे किं ज्ञा
नाभासस्याधिष्ठानतया ज्ञानाभासतादात्म्यापन्नस्येदमंशज्ञानस्य प्रतियोगिविषयकत्वात् ज्ञानाभासस्य संसर्गविष
यकत्वं संभवति तावतैवोक्तातिप्रसंगपरिहारोपपत्तेरिति परिहरति स्वतादात्म्यापन्नस्येति स्वपदं ज्ञानापरम् इति
देषोति अध्यस्तमात्रगोचरत्वाविद्यावृत्तेर्विवरणकारैरेवाभ्युपगमात् तदुक्तं नियमे ज्ञानपदे साक्षिपरमेव न हानेय

सि॰ ले॰
प्र॰ टी॰
१०११

त्यमितिविवरणकारणाभाषायोलस्ततइतिभावः एवंचाप्रयोगेच परोक्षवृत्तीनामेवावरणाभिभावकत्वमितिनियमस्य
मस्यलीयेदमाकारवृत्तेर्व्यभिचारयोकायासमानह तत्सप्रयगमानभ्युपगमाभ्यांतापरिहृत्यसंगतज्ञानस्यपरोक्षे किं
चिद्विचार्यसर्वोक्तवृत्तिनिर्गममाक्षिपति नन्विति किंतत्रेति वृत्तिरेवमास्तुतन्निर्गमोहराद्यपास्तप्रवेशायोयः ननुकेवल
साक्षिणएवविषयानुभवरूपत्वेकालांतरेविषयानुसन्धानं नस्यात्तदनुभवजन्यशालवृत्तिसंस्काराभावात् तथाप्राग्ज्ञातक
वृत्तंतगीकारेचक्षुरादिप्रयुक्तवैयर्थ्यं नस्यान्निमत्तादिभिचक्षुरादेरुपयोगात् प्रत्तोवृत्तिरावरणनाशकत्वमंगीकरोति
युद्यादीति ननुविषयप्रकाशफलतन्निर्गमफलमितितिनेत्याह परोक्षस्थलस्वैवेति ननुप्रमत्तपरोक्षज्ञानयोर्वैलक्षण्यमनु
भवसिद्धं नचप्रमत्तस्थलेवृत्तिनिर्गमाभ्युपगमेनिर्वहति वहिर्निर्गतंवृत्त्यवच्छिन्नचैतन्यमपरोक्षज्ञानमनिर्गतवृत्त्यवच्छिन्न
काशोपगमादित्याह ननुसर्वपदार्थानांसाक्षिप्रसादादेवप्रकाशोपपत्तेः किंवृत्त्याचक्षुरादिविषयसंस्काराद्यानायु
पपत्तयेतदपेक्षत्वेपिनन्निर्गमाभ्युपगमोयमर्थः परोक्षस्थलएवानिर्गतवृत्त्यवच्छिन्नसाक्षिणैवचक्षुरादेरपिप्रका
शोपपत्तेः नचतथासतिपरोक्षापरोक्षवैलक्षण्यानुपपत्तिप्रत्यक्षत्वमिस्योस्विकरणविशेषप्रयुक्तवृत्तिवैजात्यादे
वतदुपपत्तेः अत्रकेचिदाहुः प्रमत्तस्थलेविषयाधिष्ठाननतयातदवच्छिन्नमेवचैतन्यंविषयप्रकाशःसाक्षात्संबद्धस्य
तत्पसंबंधसंभवेस्वरूपसम्बन्धस्यामसवाकल्पनायोगादिति तदभिप्रायमर्थअत्रोवृत्तिनिर्गमाभ्युपगमःपरो
क्षैतत्स्यपरोक्षज्ञानमितितिनेत्याह नचतथासतीत्यादिना वृत्त्यनिर्गमनेसतीत्यर्थः इंद्रियजन्यज्ञानंप्रमत्तंतदजन्यज्ञानंपरोक्ष
मितिवैलक्षण्योपपत्तेरित्यर्थः यथाशाब्दज्ञानेशाब्दत्वरूपकरणविशेषप्रयुक्तशाब्दत्वरूपवैजात्यंयथावानुमितावनुमि
तित्वंतथेत्यर्थः करणविशेषः इंद्रियमनुमानादिचैतन्यप्रयुक्तमवृत्तिवैजात्यंप्रत्यक्षत्वादिजातिरूपमुपाधिरूपंवानस्या
देवेत्यर्थः वृत्तिनिर्गमस्याप्ययति अत्रकेचिदाहुरिति विषयाधिष्ठाननतयाविषयावच्छिन्नचैतन्यंतदेवविषयप्रकाशःनजीव
चैतन्यंतस्यविषयप्रत्युपादानत्वाभावेनसाक्षात्ताद्रूप्यसंबंधाभावादित्यर्थः अन्यस्यैवेति परंपरासंबंधस्यैवेत्यर्थः तादात्म्य १०११
रूपसंबंधकल्पनायोगात्साक्षात्संबंधसंभवेऽन्यस्यसंबंधस्यकल्पनायोगादितिभावः ततः किंतत्राह इतितदभिप्रायमि

ति विषयावच्छिन्नब्रह्मचैतन्यस्यैव विषयप्रकाशकत्वात्तस्य चावृतत्वादावरणाभिभवरूपाभिव्यक्तिरित्यर्थः ॥ न
नु तथापि परोक्षस्थलेऽपि विषयावच्छिन्नब्रह्मचैतन्यमेव विषयावभासकं स्यात्तत्र तत्रापि वृत्तिनिर्गमः प्रसज्येतेति चे
त्राह परोक्षस्थल इति वृत्तिनिर्गमनहेतुसन्निकर्षाभावादित्यभिप्रायेणाह व्यवहितइति वृत्तिनिर्गमनानुपपत्तेरस्मा
ह ग्रन्थे त्विति संसर्गिणि लब्धं परमिति तौ जिसं सर्गस्तादात्म्यं विषयापरोक्षे कश्चिन्न लक्षणप्रयोजकस्य संसर्गस्यैवात्रापि
संभवेन ज्ञानगतापरोक्षत्वादिनि भावः ॥ विषयसंसृष्टमेवेति ननु तदसंसृष्टं जीवचैतन्यमभिव्यक्तार्थः तादिति विषयावच्छि
न्नब्रह्मचैतन्याभिव्यक्त इत्यर्थः ॥ प्रमेयस्यावरणाभिभवस्यावश्यकत्वप्रतिपादनपूर्वकं तदभिभवार्थवृत्तिनिर्ग

परोक्षस्थले व्यवहितेनेत्रादौ वृत्तिसंसर्गाद्योगादिन्द्रियवदन्वयव्यतिरेकशालिनो वृत्तिनिर्गमनद्वारस्यानुपलम्भाच्च नानिर्ग
तवृत्त्यवच्छिन्नचैतन्यमेव स्वरूपसंबन्धेन विषयगोचरप्रमागतत्वाभ्युपगम्यत इति ग्रन्थे त्वहंकारस्य सुखदुःखादिष्वापरोक्ष्य
स्यादात्मचैतन्यसंसर्गित्वलक्षणमिति विचारदशायामपि विषयसंसृष्टमेव चैतन्यमापरोक्ष्यहेतुरिति तदभिव्यक्तये वृत्तिनिर्गम
समर्थ्यते इतरे तु शाब्दानुमानादावतन्मयः प्रमाणावगतेऽसंसृष्टत्वात्तावदनुभूयते नहि रसालपरिमलादिविशेषे शानवा
रमानोपदिष्टेऽपि प्रत्यक्षावगतत्वेन संसृष्टतास्ति तदनन्तरमपि कथमादिति जिज्ञासानुवृत्तेः नच शाब्दानुमानादिना
वगमेऽपि रसालमाधुर्यादिवृत्तावान्तरजातिविशेषस्य वाचकशब्दाभावान्नत्वेऽपि श्रोतानस्यागृहीतसंगतिकत्वाच्छ
ब्दादसाधारणजातिविशेषावच्छिन्नमाधुर्यावगमो नाभूदिति जिज्ञासानुवृत्तिर्युक्तेति शङ्क्यं मतिमिति प्रतिपादयति इ
तरे त्विति ननु शाब्दाद्यवगतेऽप्यर्थे संसृष्टता किं न स्यादिति नेत्याह नहीति परिमलस्य गंधस्यादिपदेन रसालगतरसस्य संग्रहः तात्पूर्वमो
त्र फले मधुररसादिरस्तीत्येवं रूपा प्रमा वाक्याच्छ्रवणादनुमानादपि मधुरत्वादिसामान्यविशिष्टतयैव रसादिज्ञानं भवति न
तु मधुरत्वाव्याप्यजातिविशेषविशिष्टरसादिज्ञानं तथा च रसादिगतजातिविशेषज्ञानाभावादेव जातिविशेषजिज्ञासोपप
द्यते न तु शाब्दावगतेऽपि संसृष्टत्वाभावादित्यभिप्रायेण शंकते नचेति शब्दादीति माधुर्येम मधुररसे माधुर्यादिमाजावगमेऽपि शब्दा

सि॰ ले॰
प्र॰ टी॰
९१२

दसाधारणजातिविशेषावच्छिन्नमाधुर्यावगमो नास्तीति संबंधः असाधारणो यो जातिविशेषस्तदवच्छिन्नेन यन्माधुर्यावगमो
नास्तीत्यर्थः जातिविशेषावगमाभावे उपायाभावं हेतुमाह रसालेत्यादिना रसालस्य यन्माधुर्यादितद्गतिर्यद्वांतरजाति
विशेषस्तद्बोधकपदाभावादित्यर्थः न च बोधकशब्दमंगीकृत्यापि शक्तिग्रहाभावान्न तदवगमो न संभवतीत्याह तस्मिन्नपीति
तस्मिन्निति अवांतरजातिविशेषवाचकशब्दे सत्यर्थः न च शक्यमिति संबंधः तथा च कपदाभावेऽपि तद्बोधको वाक्यरूपश
ब्दोऽस्ति तेन तज्जातिविशेषावगमोऽप्यस्ति तथा चावगते जातिविशेषे सप्रपत्त्याभावादेव जिज्ञासेत्याशयेनाह रसालेत्या
दिना अथ शब्दः किं तत्तज्जातिविशेषं बोधयति किं वा सामान्यं यद्यांगीकरोति तत्तत्तावांतरेति द्वितीयं दूषयति तस्य
रसालेसर्वातिशायी माधुर्यविशेषोऽस्तीत्यस्या जातिद्वारा वक्तुत्वावांतरजातिविशेषस्याप्यवगमात् तत्तद्यदि विशेषवा
चकत्वं तत्तद्वेव विशेषं विहाय यावत्समगतं विशेषं तत्र बोधयति असामान्यपत्तेः न च तत्तत्तमेव विशेषं विशेषत्वेन सामान्ये
न रूपेण बोधयतीति न विशेषप्रयेति जिज्ञासेति वाच्यं प्रमत्तेनापि मधुररसविशेषणस्य जातिविशेषस्य स्वरूपतप्र
विषयीकरणेन जातिविशेषगतविशेषांतराविषयीकरणाज्जिज्ञासानुवृत्तिप्रसंगात् तत्तस्मात्प्रमत्तत्राद्यप्र
भिधकायपरो लोके रसैवेतत्त्वावगच्छतात्सप्रवृत्त्वाजिज्ञासानिवर्त्तनं तमायाहाध्यात्मतदभावादस्मत्पत्तेनिवृत्तस्यात्मनुप
गन्तव्या शुतपद्मसादिवेद्यस्य सुखादेः स्वगतत्वाद्व्यनिवेद्यस्यापि ब्रह्मणो मननादेः साधारणानिवृत्तानस्य सत्त्वा
मिति तेत्रति रसालमाधुर्यादावित्यर्थः तात्पर्यविषयप्रवेशाद्रूपस्य प्रामाण्याभ्युपगमादिति भावः न चाप्रामाण्यं स्यादिति
निवाच्यं प्रामाण्यवाक्यस्य तद्देशीकारायोगादिति भावः माधुर्यगतजातिविशेषाभावमंगीकृत्य शंकते न च तत्तन्मेवेति सा
मान्येनेति विशेषत्वेन रसालमाधुर्यगतजातिविशेषद्वयफलांतरमाधुर्यगतेष्वजातिविशेषेष्वपि सत्त्वात् सामान्यरूपमि
तिभावः न विशेष्येति जातिविशेषगतविशेषविशिष्टतया जातिविशेषं न बोधयति तथा च रसालमाधुर्यगतजातिवि
शेषस्य स्वरूपेण शब्दादवगतत्वेऽपि स्वगतासाधारणविशेषविशिष्टतयानवगतत्वादेव जिज्ञासा स्वामिति भावः जातिविशे ९१२
षगतोसाधारणविशेषः किं जातिरूपः किं वा जातिविशेषाश्रयेतरावृत्तित्वे सति जातिविशेषाश्रयवृत्तित्वरूपोपाधिर्वा ना

शः ज्ञानेन तदवगीकारात् न द्वितीयः रसालमाधुर्यगतजातिविशेषे प्रत्यक्षेणापि तद्ग्रहः केन प्रमत्वावगतेपि जातिविशे
षजिज्ञासानुवृत्तिप्रसंगात् तस्मात्प्रत्यक्षेणापि सजातिविशेषः स्वरूपेणैव गृह्यत इति वक्तव्यं स्वरूपेण तदवगमश्च कथमावृत्तेः स्यादेवेति शा
ब्दावगतस्यापि स्पष्टत्वेन तत्र जिज्ञासानुवृत्तिर्न स्यादित्याशयेनाह प्रमत्वेनापीति तस्मादिति प्रमत्वावगत इव शाब्दादिगम्येर्थे स्पष्टताभावा
दित्यर्थः अनुभवसिद्धायाः स्पष्टतायाः प्रयोजकमाह अभिव्यक्तेति अपरोक्षत्वस्य प्रकाशत्वमेकरसमेकरूपत्वं अभिव्यक्तपदपरोक्षैकरस
चैतन्यमभिन्नत्वादन्यात् अप्रमेयस्पष्टताविषयताविशेषरूपेत्यर्थः अनेन विषयगतस्पष्टताप्रयोजकीभूता या विषये चैतन्याभिव्यक्तिरा
वरणनिवृत्तिरूपा तस्याः सिद्धये वृत्तिनिर्गमनमपेक्षितमिति सूचितं आवरणनिवृत्तेः स्पष्टताप्रयोजकत्वे अन्वयव्यतिरेकौ दर्शयति अन्तःक
वेत्यादिना अभिव्यक्तचैतन्यसंसर्गाद्वेत्यर्थः यावृत्तीति पाहेजस्यावृत्तिर्मननाद्यनुष्ठानात् आगमसंभावनाविपरीतभावनाभ्यामप्रतिबद्धा
तदनंतरं तन्निवृत्तौ स्पष्टतेति वृत्तिनिर्गममुपपादयंति नन्वेतावतापि विषयावरकाज्ञाननिवृत्त्यर्थं वृत्तिनिर्गम इत्युक्तं तदयुक्तं विषयाव
च्छिन्नचैतन्यगतस्य तदावरकाज्ञानस्यानिर्गतवृत्त्या वृत्त्युपगमेप्यनतिप्रसंगात् न च तथा सति देवदत्तीयघटज्ञानेन यज्ञदत्तीयघटा
ज्ञानस्यापि निवृत्तिप्रसंगः समानविषयत्वस्य सत्वात् अरूपमर्थं विषयचैतन्यनिष्ठयोर्ज्ञानाज्ञानयोरभिन्नाश्रयत्वेन तयोर्विरोधे समाना
श्रयत्वस्यातंत्रत्वादिति वाच्यं समानाश्रयविषयत्वं ज्ञानाज्ञानयोर्विरोधप्रयोजकमंगीकृत्य वृत्तिनिर्गमाभ्युपगमेपि देवदत्तीयघटवृ
दज्ञानानिवर्तकाज्ञानदत्तुष्ठानानंतरमप्रतिबद्धत्वादज्ञाननिवर्तकेतिभावः नन्वेतावतापीति अत्रके चित्कुत्स्यादिनामतत्रयोपन्यासात्त्व
कंग्रथेनापीत्यर्थः विषयावरकाज्ञानस्य पुरुषगतत्वमते अनिर्गतवृत्त्यापि निवृत्तिसंभवेपि तस्य विषयावच्छिन्नचैतन्यगतत्वपक्षे तन्निर्गमापे
क्षा स्यादित्याशयेनानिर्गतवृत्त्यैव विषयगताज्ञानस्यापि निवृत्तौ नास्ति बाधकमित्याशयेनाज्ञानविधिनाष्टि विषयावच्छिन्नचैतन्यगतस्येति
तत्तज्ज्ञानाज्ञानयोर्निवर्त्यनिवर्तकभावलक्षणे विरोधे समानाश्रयत्वे सति समानविषयकत्वं तंत्रं समानाश्रयत्वं च वृत्तिनिर्गमने सति संभव
ति अज्ञानाश्रये विषयचैतन्ये वृत्तिरूपज्ञानस्यापि स्थितिलाभात् तन्निर्गमाभावे तु तयोः समानाश्रयत्वासंभवात् समानविषयकत्वमात्रं विरो
धप्रयोजकं पर्यवस्यति तथा चोक्तातिप्रसंग इति शंकते नचेत्यादि तथा सतीति वृत्तिनिर्गमानुपगमे सतीत्यर्थः सत्वादिति देवदत्तीयघटज्ञानयज्ञ
दत्तीयघटाज्ञानयोरिति शेषः अरूपमर्थेति वृत्तिनिर्गमाभावे सति ज्ञानमरूपमर्थनिष्ठमेव न विषयचैतन्यनिष्ठं विषयावरकाज्ञानं च विषय

सि॰ ले॰
प्र॰ प॰
१०३३

चेत्तस्मात्निषुमेवनतुहमर्थनिरुक्तं तथा च समानाश्रयत्वं बाधितत्वान्न प्रयोजककोटिप्रविष्टमित्यर्थः समानाश्रयविषयत्वमिति ज्ञानाज्ञानयोर्विरोधे समानाश्र
यत्वे सति समानविषयकत्वं प्रयोजकं परिकल्प्यते तन्त्रैवास्तु यद्वृत्तिनिर्गमे स्वीकृते पूर्वोक्तदोषतादवस्थ्येन तयोर्विरोधे ऽक्तप्रयोजकादन्यदेव प्रयोजकं कल्प
नीयं तच्च वृत्तिनिर्गमं विनैव सेत्स्यति अतो विरोधप्रयोजकोपपादकतयापि वृत्तिनिर्गमो न सिद्ध्यतीति समुदायार्थः देवदत्तीयेति यज्ञदत्तीयघटा
ज्ञानाश्रये घटावच्छिन्नचैतन्ये देवदत्तीयघटज्ञानवृत्तेर्निर्गमनद्वारा संबंधे सति देवदत्तीयघटज्ञानयज्ञदत्तीयघटाज्ञानयोः समानाश्रयत्वे सति स
मानविषयकत्वं लभ्यते न च देवदत्तीयघटवृत्त्या यज्ञदत्तीयघटाज्ञाननिवृत्तिरस्तीत्युक्तदोषतादवस्थ्यमित्यर्थः यदीदं प्रयोजकं न भवति किं तर्हि
तत्प्रयोजकं वृत्तिनिर्गमननिरपेक्षं सर्ववादिनस्तवाभिमतं तत्राह यद्ज्ञानमिति तदिति तद्ज्ञानं तत्पुरुषीयतद्विषयकज्ञाननिवर्त्यमिति भावः तथा
च प्रयोजकशरीरे यत्पुरुषं प्रतीत्यनेन न तदीयत्वेनेन च यज्ञदत्तं प्रति विषयावरकाज्ञानस्य यज्ञदत्तीयज्ञानेनैव निवृत्तिर्न देवदत्तज्ञानेनेति नियमलाभा
न्नैर्यज्ञदत्तीयघटाज्ञानस्य च घटावच्छिन्नचैतन्यैकाश्रयत्वमास्मात्तिप्रसंगतादवस्थ्येन यद्ज्ञानं यं पुरुषं प्रति यद्विषयावरकं तत्तदीयतद्वि
षयकज्ञाननिवर्त्यमिति इत्येव विरोधप्रयोजकस्य वक्तव्यतया समानाश्रयत्वस्यानपेक्षणात् अत्राहुः वृत्तिनिर्गमानुपगमे ज्ञानाज्ञान
योर्विरोधप्रयोजकमेव दुर्निरूप्यं यद्ज्ञानं यं पुरुषं प्रति स्याद्युक्तमिति चेन्न परोक्षज्ञानेनापि विषयगताज्ञाननिवृत्तिप्रसंगात् अपरोक्ष
त्वमपि निवर्तकज्ञानविशेषणमिति चेत् किं तदपरोक्षत्वं न तावज्ज्ञो ज्ञोक्तातिप्रसंग इति सत्यं चितं वृत्तिनिर्गमं साधयितुमुपक्रमते अत्राहु
रित्यादिना किं तदिति अपरोक्षत्वं जातिरुपाधिर्वेति किंशब्दार्थः आद्यं दूषयति न तावदिति सर्वे दंडविशिष्टतया गृहीते विस्तमित्वे वर्तमानकाले दं
डवियुक्तमस्यत्प्रत्यभिज्ञानं संस्काररूपोपनायकसहितादिन्द्रियाज्जायते अयं विस्तमित्वोदंड्यासीदिति तत्र दंडांशे परोक्षत्वमलिनवाद्याद्ये दोषमा
ह दंडांशेपीति निवृत्त्यापत्तादिति न चात्रेष्टापत्तिर्वक्तुं शक्या संदेहदानीं कीदृशः इति जिज्ञासाद्यदयप्रसंगादिति भावः ननु ज्ञाननिवृत्त्यनुभव
योरभावेपि दंडांशे परोक्षत्वं कल्प्यते कल्पकं चेंद्रियसन्निकर्षजन्यत्वं सन्निकर्षश्च सविषयं प्रत्यासत्तिरिति मतमनुसृत्य संस्कारः कल्प्यत इत्या
शंक्यातिप्रसंगमाह अनुमवेपीत्यादिना अनुमितौ लिंगज्ञानं सन्निकर्षः उपमितौ सादृश्यज्ञानं सन्निकर्षः शाब्दे पदार्थोपस्थितिः सन्निक
र्षः अर्थापत्तावनुपपद्यमानपदार्थज्ञानं सन्निकर्षः अभावज्ञाने प्रतियोगिज्ञानं सन्निकर्ष इति कल्पनया प्रमत्वं प्रमाणपरिशेषापत्तेरितिभा १०३
वः ॥

तदंगीकारेति अपरोक्षत्वांगीकारापत्तेरित्यर्थः दंडांशेपि प्रमत्वं नास्तीति द्वितीयकल्पं दूषयति दंडांश इति व्याप्यवृत्तित्वनियमादिति
अन्यथा एकस्यामेव प्रमाभिन्नायां तज्ज्ञाने संस्कारजत्वमनयाप्रत्यक्षत्वापत्तेः जातिसंकरापत्तेरिति भावः तदनियमेपीति जातेर्व्याप्यवृत्ति
त्वनियमाभावेपि प्रकृते प्रत्यभिज्ञायाः विशिष्टमित्रांशे प्रमात्वे दंडांशे तदभावस्यास्तीति वक्तव्यं तत्तत्स्थावच्छेदकभेदं विना प्रतियोगि
तदभावयोरेकत्र वृत्त्ययोगात् उपाधिभेदो वाच्यः स च दुर्निरूपस्तस्मादपरोक्षप्रज्ञाने स्वसमानाधिकरणान्यजात्यभावप्रतियोगित्वरूपा
व्याप्यवृत्तित्वायोगात् व्याप्यवृत्तिजातित्वमेव वाच्यं तत्र च दूषणमुक्तमिति भावः ननु प्रकृते उपाधिभेदानिरूपणमसिद्धं लौकिकसन्नि
कर्षजन्यत्वतदभावयोर्वा संस्कारजन्यत्वतदभावयोर्वा विशिष्टमित्रविषयकत्वतदभावयोर्वा परोक्षत्वतदभावोपस्तूपाधित्वसंभवादि
ति चेन्न उक्तोपाधीनामपि भावाभावरूपतया तदर्थमुपाध्यन्तरापेक्षायामनवस्थाप्रसंगादिति भावः अपरोक्षत्वमुपाधीति पदं दू
ति: दंडमाप्रमात्वादिति संस्कारोपनीतदंडविशिष्टग्रहणविषयस्य वा प्रत्यक्षज्ञानस्य दंडांशेपि तत्त्वे तत्रापि विषयगतात्ज्ञाननिहत्यापा
तात् दंडसाक्षात्करोमीति न दंडोप्यापरोक्षानुभवापत्ते अत्र स्मृतावनुभवेपि संस्कारसन्निकर्षपरिकल्पेन्द्रियसन्निकर्षजन्यतया
तत्रकाल्पनिकापरोक्षोपगमे अनुमित्यादावपि लिंगज्ञानादिकं सन्निकर्षं परिकल्प्य तदंगीकारापत्तेः दंडांशे अपरोक्षतास्तित्वे तु
तस्य जातित्वायोगात् ज्ञाने व्याप्यवृत्तित्वनियमात् तदनियमेप्यवच्छेदकोपाधिभेदानिरूपणेन तस्या व्याप्यवृत्तिजातित्वायो
षयति नापीति अनिर्वचनमसिद्धमिति चेन्न तत्र वक्तव्यं किमिन्द्रियजन्यत्वमपरोक्षत्वं किं वा तत्तत्सन्निकर्षजन्यत्वे सिद्धांताभिमतं वा तत्रा
द्यमन्त्र्य दूषयति इन्द्रियेति सुखादिप्रमत्वरूपेनिमसादिप्रत्यक्षानिमुक्ताप्रतिव्याप्तिमप्याह अनुमितीति यस्मिन्न्रहे अनुमानेन वा
शब्देन वा गुरुत्वमनुभूतं तेन तस्मिन्निन्द्रियसन्निकर्षेणापि घटोयं गुरुरिति प्रमर्दं भवति तत्र विशेषणाभूतगुरुत्वांशे अतिव्याप्तिरित्यर्थः न
व गुरुत्वसौ इन्द्रियायोगपन्नतयापरोक्षे तदंशोज्ञानेन तज्जन्यत्वमसिद्धमित्यत आह कारणतेति परोक्षेपीति यथाकथंचिद्ज्ञातमते अनुमितोमन
सः करणत्वं नस्यादिति भावः नचेन्द्रियत्वेनेन्द्रियजन्यत्वमपरोक्षत्वं गुरुत्वांशे ज्ञानेचननथा तज्जन्यत्वमिति नातिव्याप्तिरिति वाच्यं तथापि सा
दिप्रमाद्यव्याप्तिनिरासादिति भावः अनेकेन्द्रियजन्यादिसाक्षात्कारेषु तज्जन्यत्वं तुर्ग्रह मनस्त्वगतजन्यतावच्छेदकभावेन तज्ज्ञाने वा जन्यत्वज्ञाना

सि॰ ले॰
प्र॰ टी॰
१०२५

संभवादित्याह श्रुतगतेति नन्वसाक्षात्कारो मीमत्वभवसिद्धः कश्चिद्दंडोपाधिरेवजन्यतावच्छेदकोस्त्वित्याशंकातर्हिसपवापरोक्षत्वंभवेन्नाम
दित्याह नन्वहेचेति अवच्छेदजन्यत्वग्रहात्सर्वमेवावच्छेदकग्रहस्यावश्यकत्वात्साक्षात्कारोमीमत्वभवयोगस्यापरोक्षत्वस्य तद्योग्यधर्मरूपत्वाद्यो
गात्वेमर्थः अस्तुतर्हि कावच्छेदकोपाधेरेवापरोक्षत्वरूपत्वसकिं वा प्रवृत्तिरथाप्रवृत्तिर्वानाद्यः दंडयमासीदितिशब्दाद्दंडशादितिप्रामेनद्विती
यः अवच्छेदकमेवानिरूपणात् नचाविसृमित्रविषयकत्वावच्छेदेनतत्रापरोक्षत्वरूपोपाधिरस्तिदंडविषयकत्वावच्छेदेनतत्रैवतदभावोप्यस्तीति
वाच्यं तथासतिदंडशो विसृमित्राविषयकत्वाभावस्यवृत्तिमत्तयातत्रभत्यन्तेविसृमित्रविषयकत्वतदभावयोरविरोधापायावच्छेदकानवरापेत्यायाः प्र
वैशिष्ट्यानवस्थाप्रसंगाद्दंडोपाधिस्वीकारेजातिमात्रविलयप्रसंगाच्चत्रोक्तोपाधिपक्षःसंभवतीतिभावः उपाधिपक्षेद्वितीयविकल्पनिराकरो

गाच्चत्वाच्चुपाधिस्तदनिर्वचनात् इंद्रियजन्यत्वमितिचेन्न साक्षित्मस्याव्यापनात् सूत्रमितियाह ज्ञानोपनीतगुरुत्वादिविशिष्टचट
प्रत्यक्षेविशेषणांशानिव्यापनाच्च कारणंतराभावेनतदंशोपरोक्षेप्युपनयसहकारिसामर्थ्यादिंद्रियस्यैवजनकत्वादनुगतेजन्य
तावच्छेदकाग्रहेणानेकेंद्रियजन्यत्वस्यदुर्ग्रहत्वाच्चतद्ग्रहेचतस्यैवप्रथमप्रतीतस्यापरोक्षत्वरूपोपपत्तौ प्रत्यक्षानुभवायोगस्येंद्रि
यजन्यत्वस्यतद्योग्यापरोक्षरूपत्वकल्पनायोगात् एतेनेंद्रियसन्निकर्षजन्यत्वमापरोक्ष्यमुपनयसत्त्वेनेंद्रियजस्यापरोक्षांशेऽवनस
न्निकर्षजन्यमनुमितावप्युपनीतभानसत्वेनप्रमाणांतरसाधारण्योपनयस्यासन्निकर्षत्वादित्यपिशंकानिरस्तासंयोगादिसन्निकर्ष
ति एतेनेति अव्याप्त्यादिदोषप्रसंगेनेत्यर्थः इंद्रियजन्यत्वमपरोक्षत्वमितिपक्षेयाप्रातिव्याप्तिरुक्तास्यातत्सन्निकर्षजन्यत्वेनदितिपक्षेनास्तीत्याह
शांकिकः उपनयेति कारणंतराभावेइंद्रियजन्यत्वसत्वेपितत्सन्निकर्षजन्यत्वंनास्ति उपनयस्यसन्निकर्षत्वासंभवात्सन्निकर्षांतराभावाच्चेतिभा
वः दूषयतितस्माह संयोगादीति संयोगसंयुक्तसमवायादिसन्निकर्षाणामननुगमेनसंयोगादिष्वनुगतसन्निकर्षत्वस्याभावेनेतियावत् अननु
गमाच्चेति इंद्रियसन्निकर्षजन्यत्वस्येतिशेषः तथाचघटत्वरूपरूपत्वघटत्वसत्वादिगोचरसाक्षात्कारोमीमत्वनुगतप्रत्यक्षत्वस्यादितिभावः उपाधि
पक्षेतृतीयमुपाधिमाशंकते यत्तदाभिमतमिति तद्विसंवादितेनोपपन्नानुगतमपरोक्षत्वंसमनंतदेवसमसमंतप्रस्तुतथाचापरोक्षत्वस्याज्ञान
निवर्तकज्ञानविशेषणत्वसंभवान्नपरोक्षज्ञानेनतन्निवृत्तिप्रसंगःइतिभावः मदभिमतापरोक्षत्वस्यज्ञानेनतन्निवृत्तिप्रयोजकत्वेनसंभवतीति १०२५
तिरस्करोतीदूषयति नतस्येति मदभिमतापरोक्षत्वस्येत्यर्थः प्रस्तावःप्रकरणंतच्चात्रतीयपरिच्छेदावसानेद्रष्टव्यं तत्रैवदर्शनीययेति ज्ञानस्य

परोक्षत्वं हि न करणविशेषप्रयुक्तं किंतु परोक्षार्थाभिन्नत्वमिदं चापरोक्षत्वं विषयावभासकचैतन्यरूपज्ञाननिष्ठं न वृत्तिनिष्ठमतो न साक्षि
प्रत्यक्षाव्याप्तिः अर्थापरोक्षत्वं च स्वव्यवहारानुकूलचैतन्याभिन्नत्वे स्वपदमर्थपरं न व्यवहारानुकूले च चैतन्ये तु वृत्त्यावरणे न तद्दधिष्ठानचै
तन्यमेव तथा च घटादर्थस्य स्वव्यवहारानुकूलेन स्वाधिष्ठानचैतन्येन स्वगोचरवृत्त्यभिव्यक्तेन तादात्म्यलक्षणभेदसत्त्वान् स्वव्यवहारा
नुकूलचैतन्याभिन्नत्वरूपमपरोक्षत्वमुपपन्नं तथाहंकारादिष्वनदधिष्ठानस्य तस्य केवलसाक्षिरूपतत्प्रमज्ञानस्य वा ह्यघटादिषु तत्त
दाकारवृत्त्युपहितस्य घटादिप्रमातृज्ञानरूपतस्य घटाद्यधिष्ठानचैतन्यस्य चैतन्येनतेन विषयेण तादात्म्यसत्त्वाद् परोक्षार्थाभिन्नत्वरूपम
परोक्षत्वमुपपन्नमिति हि तन्त्रदर्शिनी यारीतिः प्रयोज्यत्वेति विषयचैतन्यगताज्ञाननिवृत्तौ तस्मात् विषयस्य घटादेः स्वव्यवहारानुकूले चै
तन्याभिन्नत्वरूपमपरोक्षत्वं लभ्यत इति विषयसन्निलाभे सति तज्ज्ञानस्यापरोक्षार्थाभिन्नत्वरूपमपरोक्षत्वं लभ्यते तथा च विषयचैतन्यगता
ज्ञानमननुगमेनानुभवमात्रं यत्तदाभिमतमपरोक्षत्वं तदेवमस्माप्यस्त्विति चेन्न तस्य ज्ञाप्यापरोक्षत्वनिरूपणमशक्तावेअतिपादनीयस्य तत्त्वे
वद्दर्शिनीयया रीत्या ज्ञाननिवृत्तिप्रयोज्यत्वेन तन्निवृत्तिप्रयोजकविशेषणलाभावायोगात् तस्मात्त्वरीति यो कस्मात्स्वविदितिश्च तस्य ब्र
ह्मज्ञानस्य मूलाज्ञानाश्रयभूतसर्वोपादानब्रह्मसंसर्गनियतस्य मूलाज्ञाननिवर्तकत्वादैन्द्रियकवृत्तयस्तत्तदिन्द्रियसन्निकर्षसाम
ग्र्या तत्तद्विषयावच्छिन्नचैतन्यसंसृष्टा एवोत्पद्यन्त इति नियमस्यापेक्षाज्ञानाश्रयचैतन्यसंसर्गनियतत्वं निवर्तकज्ञानविशेषण
ज्ञाननिवृत्तेः सर्वज्ञानस्यापरोक्षत्वालाभेन सिद्धान्त्यभिमतस्य ज्ञानगतापरोक्षत्वस्य विषयचैतन्यगताज्ञाननिवृत्तिप्रयोजकस्याज्ञाननिवृत्तिं
प्रतिप्रयोजकत्वासंभवादित्यर्थः तन्निवृत्तिं प्रतिप्रयोजकतया निवर्तकज्ञानविशेषणत्वायोगादित्यन्तरार्थः तस्मादिति यदज्ञानं यं पुरुषं प्रति
मादिरूपेण निरुक्ते विरोधप्रयोजके अपरोक्षत्वस्य निवर्तकज्ञानविशेषणत्वासंभवादित्यर्थः तस्मादज्ञानाश्रयचैतन्यसंसर्गनियतत्वं निवर्तक
ज्ञानविशेषणं वाच्यमिति संबन्धः परोक्षज्ञानस्याज्ञाननिवर्तकत्वप्रसंगवारणायेति शेषः ननु विषयसंसृष्टस्य वृत्तिज्ञानस्य विषयगताज्ञा
ननिवर्तकत्वं कचिद्दृष्टमिति ब्रह्मगोचरवृत्तिज्ञाने कृतोऽभिमतायेनाह ब्रह्मज्ञानस्येति मूलाज्ञानाश्रयभूतसर्वोपादाने ब्रह्म
णि संसर्गस्य नियमस्येत्यर्थः यदा ब्रह्मगोचरवृत्तिज्ञानमुदेति तदा नियमेन ब्रह्मसंसृष्टमेवोदेतीत्यत्र हेतुत्वेन सर्वोपादानत्वमुपात्तं कार्य

सि॰ ले॰
प्र॰ टी॰
१०२५

मात्रस्यज्ञानस्य प्रभृत्यनुपादानस्य तद्ब्रह्मणा सह संसर्गनियमे सति ब्रह्मगोचरवृत्तिज्ञानस्यापि तन्निवर्तकत्वाज्ञानाश्रयस्य तेन ब्रह्मणा संसर्गनियमो प्यर्थसिद्ध इति भावः ब्रह्मज्ञानस्याज्ञाननिवर्तकत्वे मानमाह तरति शोकमिति शोकपदमज्ञानपरमात्मपदं ब्रह्मगाभिन्नब्रह्मपरं तरतीति पदा त्सर्वमज्ञानं निवर्तकत्वेनेति शेषः परोक्षवृत्तीनां विषयचैतन्यसंसर्गाभावादैन्द्रियकवृत्तीनां तत्संसर्गे को हेतुस्तत्राह तत्तदिन्द्रियसन्निकर्षस्या मर्थ्यादिति श्रुतेनेन परोक्षवृत्तीनामज्ञानाश्रयविषयचैतन्यसंसर्गनियमत्वरूपविशेषणाभावाद्यदज्ञानेयं प्रतीत्याद्याशास्तेपि न तत्रातिप्रसं गइति सत्यचिते पर्यवसितं प्रयोजकं दर्शयति तथा चेति उक्तविशेषणे सतीत्यर्थः तत्तदवच्छिन्नचैतन्ये तत्पावरकाज्ञानानि वर्तन्ते सतीति शेषमध्ये कानि चिद्देवदत्तं प्रति तदावरकाणि कानिचिद्यज्ञदत्तादिकं प्रति तदावरकाणि एवं प्रतिविषयं पुरुषभेदेनानेकाज्ञानानि सन्ति तथा च विष याच्छे तथा च यदज्ञानं यं पुरुषं प्रति यद्विषयावरकं तत्तद्दायतद्विषयतदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभज्ञाननिवर्त्यमि ति ज्ञानाज्ञानयोर्विरोधप्रयोजकं निरूपितं भवति न चैवं सति नाडीहृदयस्वरूपगोचरपरोक्षज्ञानस्याप्यज्ञाननिवर्तकत्वप्रसङ्गः तस्य कदाचिदर्थसंसेपन्न नाडीहृदयान्यतरवस्तुसंसर्गसंभवेपि विषयसंसर्गविनापि परोक्षज्ञानसंभवेन तत्संसर्गनियतात्मलाभत्वाला भात् तस्मादज्ञानविरोधनिर्वाहाय वृत्तिनिर्गमो वक्तव्य इति ॥ यावरकाज्ञानानां मध्ये यदज्ञानं यं पुरुषं देवदत्तं प्रति यद्विषयावरकं यस्य विषयस्य घटस्यावरकं सदज्ञानं तदीयेन देवदत्तीयेन तद्विषयेण तत्तद्घटविषयकेण तदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभज्ञानेन नि वर्त्यमित्यर्थः तदज्ञाने निपदेन देवदत्तं प्रति घटावरकाज्ञानमभिधीयते तदज्ञानाश्रयचैतन्यं घटावच्छिन्नचैतन्यं तत्र यः संसर्गस्तन्नियतः तथा प्यात्मलाभो यस्य घटगोचरवृत्तिज्ञानस्य तज्ज्ञानं तदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभेन ज्ञानं चेति विग्रहः आत्मलाभः उत्पत्तिः नियमश्च यदा यदा घटगोचरवृत्तिज्ञानस्य चेन्द्रियसन्निकर्षजन्यस्यात्मलाभस्तदा तदा घटावच्छिन्नचैतन्येन सह घटगोचरवृत्तिज्ञानस्य संसर्ग इत्येवमात्मकस्तदुक्तमार्गेन्द्रियकवृत्तयस्तत्तद्विषयावच्छिन्नचैतन्यसंसर्गमपेक्ष्य जायन्ते इति नियममपेक्ष्येति अत्र यदा यदा पदं इन्द्रियकवृत्तीनामु त्पत्तिस्तदा तदा विषयचैतन्येन तासां संसर्ग इति कि नियमः स्पष्टं भासते एवं विषयान्तरे पुरुषान्तरे चाज्ञानान्तरे पुचे देशप्रयोजकं विशिष्यावि १०२५
शिष्य योजनीयं ननु परोक्षवृत्तीनां विषयचैतन्यसंसर्गाभावेनोक्तप्रयोजकाभावात् अज्ञाननिवर्तकत्वप्रसंगो नास्तीत्युक्तमयुक्तं कदा

चिन्मयोत्तवृत्तेरपिविषयसंसर्गसत्वात्तथाहि हृदयपुंडरीकेनाड्यः संतीति वाक्याज्जायमानायावृत्तेः कदाचिदंतःकरणे हृदयपुंडरीकस्थेनाडीहृ
दयाद्यनवच्छिन्नचैतन्ये संसर्गसत्वात्तदावरणनिवर्तकत्वप्रसंगः न चेष्टापत्तिस्तदाहृदयावच्छेदेनजननेसतितस्यावृत्तेस्तदनवच्छिन्नचैतन्ये संसर्गसत्वात्तदावरणनिवर्तकत्वप्रसंगः न चेष्टापत्तिस्तदा तदनव
च्छिन्नजिज्ञासायाहृदयप्रसंगादिति शंकानियतपदेननिरस्तेत्याह न चैवंसतीतिविरोधप्रयोजकस्यनियतगर्भत्वेसति यावृत्तिर्ज्ञानस्याप्यज्ञाननि
वर्तकत्वप्रसंगो न चेति संबंधः यदा यदा हृदयादिगोचरस्यावृत्तेर्हृदयस्तदा तदा तस्यावृत्तेर्हृदयाद्यनवच्छिन्नचैतन्ये संसर्ग इति नियमो
नास्तीति हेतुमाह तस्येति नाड्यादिनावृत्तेर्ज्ञानस्येत्यर्थः ऐन्द्रियकवृत्तीनां हि तत्तदिंद्रियगोलकावच्छिन्नान्तःकरणप्रदेशोत्पत्तिनियमः संभवतेऽ
न्द्रियनिरपेक्षवृत्तीनां त्वन्तःकरणे जायमानानां प्रदेशनियमे कारणाभावात् हृदयादिगोचरवृत्तिः कदाचिद्देवयोगात् हृदयाद्यवच्छेदेनांतः
करणे जायते कदाचित् हृदयादिप्रदेशविलक्षणप्रदेशांतरावच्छेदेन तत्र जायत इति निरुक्तनियमो नास्तीत्यर्थः अत्र तस्येति षष्ठ्याः समभ्याः प
करणे जायते ... एवं ज्ञानाज्ञानयोर्विरोधप्रयोजकनिर्व
चनम्यात्मसंबंधः तस्मादिति वृत्तिज्ञानस्याज्ञानाश्रयविषयचैतन्ये संसर्गाविनाभावात्तन्निवर्तकत्वासंभवादित्यर्थः एवं ज्ञानाज्ञानयोर्विरोधप्रयोजकनिर्व

अत्रैतद्विषयगताज्ञानस्य लाघवात्समानाधिकरणज्ञाननिवर्त्यत्वसिद्धौ वृत्तिनिर्गमः फलतीत्याह अपरोक्षवाक्यप्रकाशस्य वाह्यतमोनिव
र्तकत्वसामानाधिकरण्यसत्वेऽपि दृष्टमिति दृष्टानुरोधाद्वृत्तिनिर्गमः सिद्ध्यतीत्याह केचित्त्वावरणाभिभवार्थवृत्तिनिर्गमानपेक्षायामपि
चिदुपरागार्थं प्रमातृचैतन्यस्य विषयप्रकाशकब्रह्मचैतन्याभेदाभिव्यक्त्यर्थं वातद्रपेक्षेत्याहुः अथ किं प्रमाणेकोपजीवब्रह्मणोरभेदः
हकत्वेन वृत्तिनिर्गमनं प्रसाध्यतत्रैवहेत्वन्तराणि मतभेदेनाह अन्येत्वित्यादिना लाघवादिति विषयगताज्ञानस्यान्वयव्यतिरेकाभ्यां ज्ञानति
वर्त्यत्वग्रहदशायां लाघवात्समानाधिकरणज्ञाननिवर्त्यत्वं गृह्यते न तु व्यधिकरणज्ञाननिवर्त्यत्वमित्यर्थः एतदुक्तं भवति अज्ञानस्य विषयचै
तन्यगतत्वात्तन्निवृत्तिलक्षणं ज्ञानकार्यमपि तत्रैव तथा चाज्ञाननिवृत्तिरूपकार्यस्य स्वकारणभूतज्ञानेन सहेन्द्रियसन्निकर्षसामर्थ्यात्
सामानाधिकरण्यलक्षणसंबंधसंभवे तस्याभावायोगात् कार्यकारणयोः सामानाधिकरण्यस्यौत्सर्गिकादिति वाह्यतमइति ग्रंथकारेणार्थः स
त्मवेति अत्रविद्यमानादालोकाद्यत्रतमोनाशो न दृष्टइत्येवकारार्थः अज्ञानस्यापि विषयावरकत्वेन वाह्यतमः सदृशत्वादिति रूपस्यवृत्त्या
रूढचैतन्यरूपस्यवा प्रकाशस्यावरणनिवर्तकत्वेनालोकसदृशत्वाज्ञानाज्ञानयोरप्यपकाशालोकयोरिवसमानाधिकरणयोरेवनिवर्त्यमिति
वतकभावः कल्प्यते तच्च सामानाधिकरण्यमज्ञानाश्रयेविषयचैतन्ये वृत्तिज्ञानस्य संसर्गरूपं स च संसर्गो वृत्तिनिर्गमाधीन इति भावः एवंविष

सि॰ ले॰ यद्यैतन्यगताज्ञाननिवृत्तिरनिर्गतवृत्त्यापि संभवत्यतो वृत्तिनिर्गमनाभ्युपगमो व्यर्थ इत्यादिश्वेतन्निर्गमं विनाज्ञाननिवृत्तिर्न संभवतीति तदभ्युपगमः
प्र॰ टी॰ सफल इति समानं दर्शितमिदानीं विषयचैतन्यगताज्ञाननिवृत्त्यर्थं वृत्तिनिर्गमनं नापेक्षितमिति सर्वपक्षक्रममङ्गीकृत्यापि वृत्तिनिर्गमनं साध
१०१९ यति केचित्विति इदं च सकारद्वयं प्रागेव प्रपञ्चितमिति नेह प्रपञ्च्यत इति बोध्यं प्रमातृचैतन्यनिष्ठाहिताजीवस्य ब्रह्माभेदे नास्ति प्रमाणमिति शं
कते अथेति अयमभेदः किं वेदान्तप्रमाणकः किं वा तदन्यप्रमाणकस्तत्र न तावदाद्यः कल्पः संभवति वेदान्तानामुपासनापरत्वप्रतीतेः न
द्वितीयः जीवब्रह्माभेदस्योपनिषदत्वश्रुतिविरोधादिति भावः नत्वाद्यं कल्पं परिगृह्य समाधत्ते वेदान्तेति ननूपासनादिपरत्वं दूषयति
सर्वेऽपीति वेदान्तानां कृततात्पर्यमिति विमृश्यमानाः सर्वेऽपि वेदान्ता अद्वये जीवाभिन्ने ब्रह्मणि समन्वयन्ति समन्वयं तात्पर्यं लभन्ते तात्पर्यं चाप
कानि लिङ्गानिकथयति उपक्रमेति आदिपदमभ्यासादिसंग्रहार्थं केनैव वेदान्ताः कथं वा तैः उक्तलिङ्गानां सत्त्वं को वा तैर्लिङ्गैस्तात्पर्यावग

योऽत्याभिव्यज्यते वेदान्तप्रमाण इति ग्रंथाचोषः सर्वेऽपि वेदान्ता उपक्रमोपसंहारैकरूप्यादिना तात्पर्यलिङ्गैर्विमृश्यमानाः प्रत्यगभि =
न्ने ब्रह्मणि पद्वितीये समन्वयन्ति यथा चायमर्थस्तथा शास्त्रप्रवृत्तसमन्वयाध्याये प्रपञ्चितो विस्तरभयान्नेह प्रदर्श्यत इति श्रीमच्छास्त्रसिद्धा ॐ
न्तलेशसंग्रहे अप्पय्यदीक्षितविरचिते प्रथमः परिच्छेदः समगात्त्वरमवर्ण्यदृष्टसम् ॥ ॥ॐ अथ कथमद्वितीये ब्रह्मणि वेदान्तानां समन्व
यप्रकारं व्याख्यातायामाह यथा चेति सर्वेषां वेदान्तानां मध्ये परमतात्पर्यविषयभूतोऽर्थः ननूपासनादिरितिं प्रपञ्चितमित्यर्थः अत्रापि कुतो
न प्रपञ्च्यते तत्राह विस्तरेति ग्रंथविस्तारभयादित्यर्थः ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीचरणार
विन्दसंलग्नरजोऽभून्नस्याच्युतकृष्णानंदतीर्थस्य कृतौ शास्त्रसिद्धान्तलेशसंग्रहव्याख्याने श्रीबालमुकुंदानंदतीर्थपादसञ्ज्ञाभिर्ध्यश्रीवि
श्वनाथतीर्थस्य पुस्तकोद्धारणः प्रथमपरिच्छेदः समाप्तिमगात् ॥ ॐ श्रीविश्वेश्वराय नमः योमेविश्वेश्वरो देवोऽविश्वेश्वरसमो गुरुः समथ्या
त्तिस्वयंज्योतिर्वाणीसंज्ञो भजामि तेन १ स्वयंप्रकाशसरस्वतीसंज्ञ इत्यर्थः आचार्यचरणद्वन्द्वमस्तीति लेविकरूपिणमाकृत्वाकुरुते व्याख्या
हमत्र प्रभुर्यतः अत्र व्याख्याने प्रभुः समर्थ इत्यर्थः प्रथमपरिच्छेदे ब्रह्मलक्षणविचारावसरे लक्षणस्य मतभेदेन ज्ञेयब्रह्मनिष्ठत्वनिरूपणे १०१९
ने श्वररूपब्रह्मनिष्ठत्वनिरूपणेन च तमद्दलसार्थवाच्यार्थौ निरूपितौ तयानन्दनन्तरं जीवतत्त्वादिलोणनिरूपणेन त्वंपदवाच्यार्थलक्ष्यार्थौ